# व्याकरणम्



## M23SN04DC

**Post Graduate Programme**

**Sanskrit Language and Literature**

SELF LEARNING MATERIAL



**SREENARAYANAGURU OPEN UNIVERSITY**

The State University for Education, Training and Research in Blended Format, Kerala

# SREENARAYANAGURU OPEN UNIVERSITY

## Vision

*To increase access of potential learners of all categories to higher education, research and training, and ensure equity through delivery of high quality processes and outcomes fostering inclusive educational empowerment for social advancement.*

## Mission

To be benchmarked as a model for conservation and dissemination of knowledge and skill on blended and virtual mode in education, training and research for normal, continuing, and adult learners.

## Pathway

Access and Quality define Equity.

# व्याकरणम्

Course Code: M23SN04DC

Semester - I

## Discipline Core Course
## Post Graduate Programme
## Sanskrit Language and Literature
## Self Learning Material


വിദ്യകൊണ്ട് സ്വതന്ത്രരാവുക

SREENARAYANAGURU
OPEN UNIVERSITY

**SREENARAYANAGURU OPEN UNIVERSITY**

The State University for Education, Training and Research in Blended Format, Kerala

**M21SN04DC**

# व्याकरणम्

**Semester - I**

SREENARAYANAGURU
OPEN UNIVERSITY

All rights reserved. No part of this work may be reproduced in any form, by mimeograph or any other means, without permission in writing from Sreenarayanaguru Open University. Printed and published on behalf of Sreenarayanaguru Open University by Registrar, SGOU, Kollam.

www.sgou.ac.in

ISBN 978-81-966907-5-5

9 788196 690755

## DOCUMENTATION

### Academic Committee

| | |
|---|---|
| Dr. Shyla C. A. | Dr. Chandrashekaran Nair |
| Prof. M. S. Muraleedharan Pillai | Dr. Sreegith T. G. |
| Pro. C. S. Sasikumar | Dr. J. P. Prajith |
| Dr. K. M. Sangameshan | Dr. K. Unnikrishnan |
| Dr. N. K. Sundareswaran | Dr. C. T. Francis |

### Development of the Content

Dr. G. Sahadevan, Dr. Jothilekshmi. M

### Review

Content : Dr. G. Sahadevan
Format : Dr. I. G. Shibi
Linguistics : Dr. G. Sahadevan

### Edit

Dr. G. Sahadevan

### Scrutiny

Dr. Vijayarajan K. U., Dr. Sreeja J., Chitra Bhaskar

### Co-ordination

Dr. I. G. Shibi and Team SLM

### Design Control

Azeem Babu T. A.

### Cover Design

Jobin J.

### Production

December 2023

### Copyright

© Sreenarayanaguru Open University 2023

YouTube

# MESSAGE FROM VICE CHANCELLOR

Dear

I greet all of you with deep delight and great excitement. I welcome you to the Sreenarayanaguru Open University.

Sreenarayanaguru Open University was established in September 2020 as a state initiative for fostering higher education in open and distance mode. We shaped our dreams through a pathway defined by a dictum 'access and quality define equity'. It provides all reasons to us for the celebration of quality in the process of education. I am overwhelmed to let you know that we have resolved not to become ourselves a reason or cause a reason for the dissemination of inferior education. It sets the pace as well as the destination. The name of the University centres around the aura of Sreenarayanaguru, the great renaissance thinker of modern India. His name is a reminder for us to ensure quality in the delivery of all academic endeavours.

Sreenarayanaguru Open University rests on the practical framework of the popularly known "blended format". Learner on distance mode obviously has limitations in getting exposed to the full potential of classroom learning experience. Our pedagogical basket has three entities viz Self Learning Material, Classroom Counselling and Virtual modes. This combination is expected to provide high voltage in learning as well as teaching experiences. Care has been taken to ensure quality endeavours across all the entities.

The university is committed to provide you stimulating learning experience. The postgraduate programme in Sanskrit has a unique blend of language and literature. The focus of the programme is on enhancing the capabilities of the learners to undergo a deeper comprehension of the sociology of the forms in literature, although the required credits are in place to learn other aspects of Sanskrit literature. Care has been taken to expose the students to recent trends in Sanskrit literature. We assure you that the university student support services will closely stay with you for the redressal of your grievances during your studentship.

Feel free to write to us about anything that you feel relevant regarding the academic programme.

Wish you the best.

Regards,
Dr. P. M. Mubarak Pasha

01.12.2023

# CONTENTS


| | | |
|---|---|---|
| BLOCK -1 | संज्ञासन्धिप्रकरणम् | 1 |
| Unit 1 | संज्ञा, अच्सन्धिः, हल्सन्धिः,विसर्गसन्धिः | 2 |
| Unit 2 | अजन्तपुंलिङ्गः पतिसमासपर्यन्तम् | 38 |
| Unit 3 | अजन्तस्त्रीलिङ्गः,अजन्तनपुंसकलिङ्गः (मिदचोऽन्त्यात्परः) | 68 |
| Unit 4 | हलन्तपुंलिङ्गः, हलन्तस्त्रीलिङ्गः, हलन्तनपुंसकलिङ्गः | 81 |
| BLOCK- 2 | धातुप्रकरणम् | 98 |
| Unit 1 | भ्वादिगणपरिचयः (भू एध् धातूनां प्रक्रियाविचारः) | 99 |
| Unit 2 | इतरनवगणनां प्रथमधातूनां परिचयः (प्रक्रिया नावश्यकी) | 158 |
| Unit 3 | ण्यन्तसन्नन्त आत्मनेपदी परस्मैपदी लकारार्थः | 188 |
| Unit 4 | कृत्यप्रकरणं पूर्वकृ दन्तप्रकरणं चरेष्टः पर्यन्तम् | 206 |
| BLOCK- 3 | समासप्रकरणम् | 222 |
| Unit 1 | समासप्रकरणम् (केवलसमासः) | 223 |
| Unit 2 | समासप्रकरणम् (अव्ययीभावः तत्पुरुषः च) | 228 |
| Unit 3 | समासप्रकरणम् (बहुव्रीहिः द्वन्द्वः च) | 253 |
| Unit 4 | कारकप्रकरणम् | 265 |
| BLOCK - 4 | तद्धितप्रकरणम् | 275 |
| Unit 1 | अपत्याधिकारप्रकरणम् | 276 |
| Unit 2 | मत्वर्थीयप्रकरणम् | 288 |
| Unit 3 | स्त्रीप्रत्ययप्रकरणम् | 296 |
| Unit 4 | अव्ययप्रकरणम् | 311 |
| Model Question Paper (SET – A) | | 318 |
| Model Question Paper (SET – B) | | 320 |

# संज्ञासन्धिप्रकरणम्

# BLOCK -1

UNIT 1

# संज्ञा, अच्सन्धिः, हल्सन्धिः, विसर्गसन्धिः

## Learning Outcomes

- व्याकरणविषये प्राथमिकतत्त्वानां ज्ञानम्।
- भाषाध्ययनाय बांधनाय च प्रावीण्यार्जनम्।
- व्याकरणसंज्ञानां परिचयः।
- सन्धिकार्याणां प्रक्रियावगमनम्।

## Background

'भाषा' आशयविनिमयाय उपयुज्यते। 'भाष व्यक्तायां वाचि इत्यस्मात् धातोः निष्पन्नं भवति 'भाषा' इति पदम्। आङ्ग्लभाषायां Language (लाङ्ग्वेज्) इति पदमुपयुज्यते। अस्माभिरुच्चार्यमाणस्य शब्दस्य वाक्यस्य वा निश्चितरूपेण कश्चन आशयः वर्तते। शब्दः अर्थेन युक्तः शब्दार्थौ सहकृतौ भवतः।

भाषा तत्तद्देशस्थानां संस्कारं सूचयति भाषाप्रयोगेन जने अन्तर्भूतं संस्कारं ज्ञातुं शक्यते। अतः संस्कृतियुक्तायां भाषायां व्याकरणरखालित्यं न भवेत्। व्याकरणं भाषां शुद्धीकरोति।

**किं नाम व्याकरणम् ?**

व्याक्रियन्ते व्युत्पाद्यन्ते शब्दाः अनेन इति व्याकरणम्। मानवानां प्रयोगानुसारं भाषाः जायन्ते। भाषानुसारं व्याकरणरूपाणि निष्पाद्यन्ते।पाणिनिः प्रसिद्धः वैयाकरणाचार्यः भवति। तस्य 'पाणिनीयम्' विश्वविख्यातमेव।

**वरदराजाचार्यस्य लघुसिद्धान्तकौमुदी।**

अपरः कश्चन प्रसिद्धः व्याकरणग्रन्थः भवति वरदराजाचार्यस्य लघुसिद्धान्तकौमुदी। वरदराजः भट्टोजिदीक्षितस्य शिष्यः। सः सप्तदशे शतके महाराष्ट्रदेशे जीवितमदाधारयत्। तस्य पिता दुर्गादासः उक्तं च।

**नत्वा वरदराज श्रीगुरून् भट्टोजिदीक्षितान्।**
**करोति पाणिनीयानां मध्यसिद्धान्तकौमुदीम्।। इति।**

सः मध्यसिद्धान्तकौमुदीरचनानन्तरं व्याकरणशास्त्रस्य प्रथमसोपानरूपां लघुसिद्धान्तकौमुदीं रचितवान्। ग्रन्थान्ते तेन सूचितमस्ति यत्

**शास्त्रान्तरे प्रविष्टानां बालानां चोपकारिका**
**कृता वरदराजेन लघुसिद्धान्तकौमुदी इति।**

**विविधानि सूत्राणि।**

इतरभाषास्विव संस्कृतेऽपि अनके वैयाकरणाचार्याः आसन्। तेषु पाणिनिरेव श्रेष्ठः सर्वरङ्गीकृतश्च। तस्य काले प्रचुरप्रचारों सूत्रप्रणालीं सः स्वीकृतवान्।

विविधानि सूत्राणि सन्ति। तानि संज्ञा- परिभाषा विधि-नियम-अतिदेश-अधिकार भेदात् षड्विधानि। पाठभागे तानि षड्विधानि सुत्राणि आगमिष्यन्ति। तत्र तानि पठामः।

## Keywords

माहेश्वराणि सूत्राणि, अच्, हल्, विसर्गः, स्थानानि, यण्सन्धिः, वृद्धिसन्धिः, प्रगृह्यः, द्वित्वसन्धिः, छत्वं, आम्रेडितसंज्ञा, यादेशः, अणः दीर्घः, रुत्वं, कुक्टुगागमौ, ह्रस्वविधिः

## Discussion

### 1.1.1 संज्ञाप्रकरणम्

प्रथमं निर्विघ्नपरिसमाप्त्यर्थं मङ्गलमाचरति वरदराजभट्टाचार्यः।

**'नत्वा सरस्वतीं देवीं शुद्धां गुण्यां करोम्यहम्।**
**पाणिनीयप्रवेशाय लघुसिद्धान्तकौमुदीम्।**

**सार**:

वरदराजाचार्यः इष्टदेवतां वाग्देवतां सरस्वती नमस्करोति। इयं सरस्वती शुद्धा, शब्दव्युत्पत्तिज्ञानादिप्रशस्तैः गुणैः युक्ता भवति। तां देवीं नमस्कृत्य पाणिनीये प्रवेष्टुं इच्छूनां छात्राणां सुकरया प्रवेशनाय लघुसिद्धान्तकौमुदीं नाम ग्रन्थं रचितुमारेभे।

चतुर्दश माहेश्वराणिसूत्राणि

**माहेश्वराणि सूत्राणि।**

**अइउण्। ऋलृक्। एओङ्। ऐऔच्। हयवरट्। लण्। ञमङणनम्। झभञ्। घढधष्। जबगडदश्। खफछठथचटतव्। कपय्। शषसर्। हल्।**

इति चतुर्दश माहेश्वरसूत्राणि। महेश्वरात् आगतानि माहेश्वराणि।
माहेश्वरसूत्राणाम् अन्त्ये ण्, क्, ङ् ,च् इत्यादयः सन्ति। ते अणादिप्रत्याहारार्थमेव। ते ण्, क्, ङ्. च् प्रभृतयः लुप्यन्ते। ते इतः भवन्ति। 'अइउण्, ऋलृक्, एओङ्, ऐऔच् इति माहेश्वरसूत्रचतुष्टयेन स्वराक्षराणि सूच्यन्ते। 'हयवरट्, लण्' इत्यादिषु सूत्रेषु अकारः उच्चारणार्थमेव प्रयुज्यते। 'लण्' इति माहेश्वरसूत्रे वर्तमानः अकारः अपि इत् भवति। 'अण्, अक्' इत्यादिषु प्रत्याहारेषु इतां न ग्रहणम्। अर्थात् 'अक्' इत्युच्यते चेत् 'अ इ उ ऋ लृ' इत्येते वर्णाः गृह्यन्ते।

**1. हलन्त्यम्। (१-३-३)**

इत्

हल् अन्त्यम् इति द्विपदं सूत्रम्। अनेन सूत्रेण इत्संज्ञा विधीयते। उपदेशेऽन्त्यं हल् 'इत्" स्यात्। उपदेशः आद्यानां श्रेष्ठानाम् उच्चारणम्। प्रथममुच्चरितानि माहेश्वरसूत्राणि उपदेशे अन्तर्भवन्ति। यथा अइउण् इति माहेश्वरसूत्रे वर्तमानः ण् इत् भवति। ण् हलि अन्तर्भवन्ति।

**2. अदर्शनं लोपः। (१-१-६०)**

लोपसंज्ञा

द्विपदं सूत्रम्। अनेन सूत्रेण लोप संज्ञा विधीयते। प्रसक्तस्य (पूर्वोक्तस्य इतः, विद्यमानस्य इतः वा) अदर्शन लोपसंज्ञं स्यात्। यथा हरे इह इत्यत्र एचोऽयवायावः इति सूत्रेण अयादेशे हरय् इह। अत्र लोपः शाक्ल्यस्य इति सूत्रेण य् लुप्यते।

**3. तस्य लोपः। (१- ३-९)**

लोपः

द्विपदं सूत्रम्। अनेन सूत्रेण लोपः विधीयते। तस्येतो लोपः स्यात्। यथा- 'अइउण् इत्यत्र 'ण्' इत्यस्य लोपसंज्ञायां 'तस्य लोपः' इति सूत्रेण लोपः। 'ण्' इत्यारभ्य 'ल्' पर्यन्ताः सूत्रान्त्यवर्णाः अण्-अक्-अच् इति प्रत्याहारार्थाः।

**4. आदिरन्त्येन सहेता। (१-१- २७)**

प्रत्यहारसंज्ञा

आदिः अन्त्येन सह इताइति चतुष्पदं सूत्रम्। अनेन सूत्रेण प्रत्याहारसंज्ञा विधीयते। अन्त्येन इता सहित आदिः मध्यगानां स्वस्य च संज्ञा स्यात्। यथा- अर्थात् 'अण्' इत्यनेन 'अ इ उ' इत्यते ग्राह्याः। अइउण् इति माहेश्वरसूत्रे आदिः अकारः। अन्त्यः णकारः। अन्त्येन इता सहिता आदिः अण्। स अण् मध्यत्रयोः इ उ इत्येतयोः आदेः अकारस्य च संज्ञा स्यात्।

हृस्वदीर्घप्लुतसंज्ञाः

**5. उकालोऽज्ह्स्वदीर्घप्लुतः। (१-१-२७)**

ऊकालः अच् हस्वदीर्घप्लुतः इति त्रिपदं सूत्रम्। अनेन सूत्रण ह्स्व दीर्घ-प्लुतसंज्ञः विधीयते। उः च ऊः चः ऊः३च वः। उ इत्यस्य प्रथमाबहुवचनं वः। वां काल इव कालो यस्य सोऽच्क्रमात् हस्वदीर्घप्लुतसंज्ञः स्यात्।

अ इ उ - एकमात्र: - ह्रस्वः।

आ ई ऊ द्विमात्रः - दीर्घः।

अ३ इ३ उ३ त्रिमात्रः- प्लुतः।

**6. उच्चैरुदात्तः। (१-२-२९)**

उदात्तसंज्ञा

उच्चैः उदान्तः इति द्विपदं सूत्रम्। अनेन सूत्रेण उदात्तसज्ञा विधीयते। उच्चारणस्थानेषु एकं भवति तालु। ताल्वादिषु सभागेषु स्थानेषु ऊर्ध्वभागे निष्पन्नोऽच् उदात्तसंज्ञः स्यात्। यथा आ, ये - इत्यत्र आकारः ये इत्यत्र एकारः च उदात्तः।

**7. नीचौरनुदात्तः। (१-२-३०)**

अनुदात्तसंज्ञा

द्विपदं सूत्रम्। अनेन सूत्रेण अनुदात्तसंज्ञा विधीयते। ताल्वादिषु सभागेषु स्थानेषु अधोभागे निष्पन्नः अच् अनुदात्तसंज्ञः स्यात्। यथा 'अर्वाङ्' इत्यत्र अकार अनुदात्तः।

**8. समाहारः स्वरितः। (१-२-३१)**

स्वरितसंज्ञा

द्विपदं सूत्रम्। अनेन सूत्रेण स्वरितसंज्ञा विधीयते। उदात्तानुदात्तत्वं वर्णधर्मौ समह्रियतेयस्मिन् सोऽच्स्वरितसंज्ञः स्यात्। यथा 'अग्निमीले' इत्यत्र मकारात्परस्य ईकारः 'स्वरितः'।
एवम् अकारादिस्वाराणां नवभेदाः।

| | | |
|---|---|---|
| १. उदात्तह्रस्वः | ४. उदात्तदीर्घः | ७. उदात्तप्लुतः |
| २. अनुदात्तह्रस्वः | ५. अनुदात्तदीर्घः | ८. अनुदात्तप्लुतः |
| ३. स्वरितह्रस्वः | ६. स्वरितदीर्घः | ९. स्वरितप्लुतः |

**9. मुखनासिकावचनोऽनुनासिकः। (१-१-८)**

अनुनासिकसंज्ञा

मुखनासिकावचनः अनुनासिकः इति द्विपदं सूत्रम्। अनेन सूत्रेण अनुनासिकसंज्ञा विधीयते। मुखसहिता नासिका मुखनासिका।

मुखसहितनासिकयोः उच्चार्यमाणो वर्णौ अनुनासिकसंज्ञः स्यात्। अनुनासिकस्य अननुनासिकस्य भेदः उच्चारणेनैव ज्ञातुं शक्यते। अकारस्य इकारस्य उकारस्य च प्रत्येकम् अष्टादशभेदाः। लृवर्णस्य द्वादश, तस्य दीर्घाभावात्। एचामपि द्वादश तेषां ह्रस्वाभावात्।

**10. तुल्यास्यप्रयत्नं सवर्णम्। (१-१-९)**

सवर्णसंज्ञा

द्विपदं सूत्रम्। अनेन सूत्रेण सवर्णसंज्ञा विधीयते। ताल्वादिस्थानम् आभ्यन्तरप्रयत्नश्च इत्येतद् द्वयं यस्य येन तुल्यं तन्मिथः सवर्णसंज्ञं स्यात्। अकारस्य सवर्णः भवति आकारः स्थानस्य आभ्यन्तरप्रयत्नस्य च साम्यात्।

**11. ऋलृवर्णयोः मिथः सावर्ण्यं वाच्यम्। (वार्तिकम्)**

ऋलृवर्णौ सवर्णौ

चतुष्पदं वार्तिकमिदम्। ऋकारलृकारौ सवर्णौ इति वक्तव्यम्। ऋकारस्य लृकारस्य च स्थानं भिन्नमपि तयोः मिथः सावर्ण्यं वक्तव्यम्।

**स्थानानि** **उच्चार्यमाणाः वर्णाः**

१. कण्ठः अकुहविसर्जनीयानां कण्ठः। अ क ख ग घ ङ ह ः

२. तालु इचुयशानां तालु। इ च छ ज झ ञ य श

३. मूर्धा ऋटुरषाणां। ऋ ट ठ ड ढ ण र ष।

४. दन्ताः लृतुलसानां दन्ताः। लृ त थ द ध न ल स

उच्चारणस्थानानि

५. ओष्ठौ उपूपाध्मानीयानामोष्ठौ उ प फ ब भ म ≍प ≍फ (उपाध्मानीयौ)

६. नासिका ञमङणानां नासिका च। ञ म ङ ण न। (वर्गपञ्चमानां तत्तत्स्थानेन सह नासिका अपि तस्य स्थानं भवति)

७. कण्ठतालु एदैतोः कण्ठतालु। ए ऐ।

८. कण्ठोष्ठम् ओदौतोः कण्ठोष्ठम्ओ औ।

९. दन्तोष्ठम् वकारस्य दन्तोष्ठम्। व ।

१०. जिल्ह्वामूलीयस्य जिह्वामूलम् । जिह्वामूलम् – ≍क ≍ख।

उपाध्मानीयं नाम पफाभ्यां प्रागर्थविसर्गसदृशः वर्णः। यथा ≍प ≍ फ ।

जिह्वामूलीयं नाम कखाभ्यां प्रागर्थविसर्गसदृशः वर्णः। यथा - ≍क ≍ ख।

नासिका - नासिका अनुस्वारः । अनुस्वारस्य चिह्नम् ं

**यत्नः** द्विधा - आभ्यन्तरः बाह्यश्च ।
आभ्यन्तरप्रयत्नः पञ्चधा

आभ्यन्तरप्रयत्नः

१. स्पृष्टम् - स्पृष्टं प्रयत्नं स्पर्शानाम् - - क ख ग घ ङ (कवर्गः)
-स्पर्शाक्षराणि (वर्गाक्षराणि) २५- च छ ज झ ञ (चवर्गः)
- ट ठ ड ढ ण (टवर्गः)
- त थ द ध न (तवर्गः)
- प फ ब भ म (पवर्गः)

२. ईषत्स्पृष्टम् - ईषत्स्पृष्टमन्तःस्थानाम् - य, व,र, ल
३. ईषद्विवृतम् - ईषद्विवृतमूष्माणाम् - श,ष,स,ह
४. विवृतम् - विवतं स्वराणाम् - अ इ उ ऋ ऌ ए ओ ऐ औ
५. संवृतम् - ह्रस्वस्यावर्णस्य प्रयोगे संवृतम् (अ-प्रयागे)

प्रक्रियायां संवृताकारः विवृतत्वेन परिणमति ।

बाह्यप्रयत्नः

बाह्यप्रयत्नः एकादश। ते विवारः, संवारः, श्वासः, नादः, घोषः, अघोषः, अल्पप्राणः महाप्राणः उदात्तः अनुदात्तः स्वरितः च। विवाराः, श्वासाः, अघोषाः - खरः भवन्ति। हशः संवाराः नादाः घोषस्च। वर्गाणां प्रथमतृतीयपञ्चमाः यणश्च अल्पप्राणाः। वर्गाणां द्वितीयचतुर्थौ शलश्च महाप्राणाः। अचः स्वराः।

**12. अणुदित्सवर्णस्य चाप्रत्ययः। (१-१-६९)**

सवर्णसंज्ञा

अण् उदित् सवर्णस्य च अप्रत्ययः इति पञ्चपदं सूत्रम्। अनेन सूत्रेण सवर्णसञ्ज्ञं विधीयते। अविधीयमानो अण् उदित् च सवर्णस्य संज्ञा स्वात्। 'कर्मण्यण्' इत्यादिभिः सूत्रैः विधीयमानः अण् एव। प्रत्याहारस्थेन अणा व्यवहारः अविधीयमानः अण्। अत्र अण् परेण णकारेण। अर्थात् अत्र 'अण्' इत्यनेन लण्पर्यन्ताः वर्णाः गृह्यन्ते। 'अ इ उ ऋ ए ऐ ओ औ ह य व र ल इत्यते वर्णाः।

उत् इत् यस्य तत् उदित्। 'कुचु टु तु पु' एते उदितः। 'कु' इत्यनेन कवर्गः क ख ग घ ङ इत्येते वर्णाः गृह्यन्ते। प्रतीयते विधीयते इति प्रत्ययः। न प्रत्ययः अप्रत्ययः।

**स्वराणां भेदाः**

| **स्वराः** | **कति भेदाः** | **कारणं किम् ?** |
|---|---|---|
| अ, इ, उ | -प्रत्येकम् अष्टादशभेदाः | -ह्रस्वदीर्घप्लुताः, -उदात्तानुदात्तस्वरितभेदात्, -अनुनासिकाननुनासिकभेदाच्च। |

ऋ -अष्टादशभेदाः
लृ -द्वादशभेदाः -दीर्घाभावात्।

(ऋलृवर्णयोः मिथः सावण्यं वाच्यम् इति वार्तिकलात् परस्पर सावर्ण्यं ऋकारस्य लृकारस्य च प्रत्येकं त्रिंशत् भेदाः)
ए, ओ, ऐ, औ -प्रत्येकं द्वादशभेदाः - ह्रस्वाभावात्
अनुनासिकाननुनासिकभेदेन यवलाः द्विधा ।
यथा- य् यूँ, व् वै, ल् लूँ इत्येवं रूपेण ।

**13. परः सन्निकर्षः संहिता। (१-४-१०९)**

संहितासंज्ञा

त्रिपदं सूत्रम्। अनेन सूत्रेण संहितासंज्ञा विधीयते। वर्णानामतिशयितः सन्निधिः संहिता संज्ञा स्यात्। संहितायां सन्धिः। यथा सुधि उपास्यः इत्यत्र ईकारउकारयोः सन्निधिः वर्तमानत्वात् संहितासंज्ञा।

**14. हलोऽनन्तराः संयोगः। (१-१-७)**

संयोगसंज्ञा

हलः अनन्तराः संयोगः इति त्रिपदं सूत्रम्। अनेन सूत्रेण संयोगसंज्ञा विधीयते। न विद्यते अन्तरं येषां ते अनन्तराः। अज्भिः (स्वराक्षरैः) अव्यवहिताः हलः(व्यञ्जनाक्षराः) संयोगसंज्ञाः स्युः। यथा चक्रम् इत्यत्र ककाररेफयोः मध्ये स्वराभावात् संयोगः वर्तते। संयोगान्तस्य लोपः इत्यादावस्य प्रयोजनम्।

**15. सुप्तिङन्तं पदम्। (१-४-१४)**

पदंसंज्ञा

द्विपदं सूत्रम्। अनेन सूत्रेण पदसंजा विधीयते। सुबन्तं तिङन्तं च पदसंज्ञं स्यात्। सुप् अन्ते यस्य तत् सुबन्तं, तिङ् अन्ते यस्य तत् तिङन्तम्। सुप् इत्यनेन एकविंशतिः सुप् प्रत्ययाः ग्राह्याः। तिङ् इत्यनेन अष्टादश तिङ्-प्रत्ययाः।

**सुप् प्रत्ययाः**

| **विभक्तिः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमा | सु | औ | जस् |
| द्वितीया | अम् | औट् | शस् |
| तृतीया | टा | भ्याम् | भिस् |
| चतुर्थी | ङे | भ्याम् | भ्यस् |
| पञ्चमी | ङसि | भ्याम् | भ्यस् |

| | | | |
|---|---|---|---|
| षष्ठी | ङस् | ओस् | आम् |
| सप्तमी | ङि | ओस् | सुप् |

सु इत्यारभ्य प् पर्यन्तं सुप्।

**तिङन्तप्रत्ययाः**

**परस्मैपदिनः नवप्रत्ययाः**

| **पुरुषः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमुरुषः | तिप् | तस् | झि |
| मध्यपुरुषः | सिप् | थस् | थ |
| उत्तमपुरुषः | मिप् | वस् | मस् |

**आत्मनेपदिनः नव प्रत्ययाः ।**

| **पुरुषः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमुरुषः | त | आताम् | झ |
| मध्यपुरुषः | थास् | आथाम् | ध्वम् |
| उत्तमपुरुषः | इड् | वहि | महिङ् |

ति इत्यारभ्य ङ् पर्यन्तं तिङ्।

संज्ञाप्रकरणम् समाप्तम्।

### सन्धिप्रकरणम्।

सन्धयः सामान्यता पञ्चधा भवन्ति। अच्सन्धिः (स्वरसन्धिः), प्रकृतिभावसन्धिः, हल्सन्धिः(व्यञ्जनसन्धिः), विसर्गसन्धिः, स्वादिसन्धिः च इति।

## 1.1.2 अच्सन्धिप्रकरणम्।

### 1. इकोयणचि। (६-१-७७)

यणसन्धिः

इकः यण् अचि इति त्रिपदं सूत्रम्। अनेन सूत्रेण यणादेशः विधीयते। इकः स्थाने यण् स्यात् अचि संहितायां विषये। इकः इति षष्ठी। तस्य स्थाने इत्यर्थः। यण् इति प्रथमा स्यात् इत्यर्थः। अचि इति सप्तमी परे इत्यर्थः। अर्थात् इ ई उ ऊ ऋ लृ इत्येतेषां वर्णानामनन्तरं यदि असवर्णस्वराः वर्तन्ते तर्हि क्रमशः 'इ, ई ' इत्यनयोः स्थानेयकारः 'उ, ऊ 'स्थाने वकारः, ऋ, ॠ इत्यनयोः स्थाने रेफः, लृकारस्य स्थाने लकारश्च आदेशाः भवन्ति। यथा 'इति अत्र'। इकारस्य स्थाने यणादेशे यकारे इत् य् अत्र, इत्यत्र इति रूपम्।

**2. तस्मिन्निति निर्दिष्टे पूर्वस्य। (१-१-६६)**

सप्तमीनिर्देशेन विधीयमानं कार्यं पूर्वस्य स्थाने

तस्मिन् इति निर्दिष्टे पूर्वस्य इति चतुष्पदं सूत्रम्। सप्तमीनिर्देशेन विधीयमानं कार्यं पूर्वस्य स्थाने स्यात् इति सूचयति। सप्तमीनिर्देशेन विधीयमानं कार्यं वर्णान्तरेणाव्यवहितस्य पूर्वस्य बोध्यम्। यथा 'इति अत्र' इत्यत्र इकोयणचि इति यण्। अचि इति सप्तमी। अतः यण् पूर्वस्य इकारस्य स्थाने भवति।

**3. स्थानेऽन्तरतमः। (१-१-५०)**

सदृशतमः आदेशः

स्थाने अन्तरतमः इति द्विपदं। प्रसङ्गे सति सदृशतम आदेशः स्यात्। यत्र अनेकविध आन्तर्यं तत्र स्थानतः आन्तर्यं बलीयः। आन्तर्यं इत्यस्य सादृश्यम् इत्यर्थः। यथा 'इति अत्र' इत्यत्र इकोयणचि इति यण्। ईकारस्य स्थाने सदृशतमः यकारः एव स्यात्। स्थानतः सादृश्यात्।

**4. अनचि च। (८-४-४७)**

द्वित्वम्

अनचि च इतिद्विपदम्। अनेन सूत्रेण विकल्पेनयरः द्वित्वं विधीयते। अचः परस्य यरो द्वे वा स्तः, न तु अचि। यथा 'सुधि उपास्यः' इत्यत्र 'इकोयणचि' इति यणि सुध् य् उपास्यः। अत्र 'अनचि च' इति सूत्रेण यरः धकारस्य द्वित्वे सुध् ध् य् उपास्यः।

**5. झलां जश् झशि। (८-४-५३)**

जश्त्वम्

झलां जश् झशि इति त्रिपदं सूत्रम्। अनेन सूत्रेण जश्त्वं विधीयते। झलां स्थाने जश् स्यात् झशि परे। यथा 'सुध् ध् य् उपास्यः' इत्यत्र 'झलां जश् झशि' इति सूत्रेण जश्त्वे सुद् ध् य् उपास्यः।

**6. संयोगान्तस्य लोपः। (८-२-२३)**

संयोगान्तस्य लोपः

संयोगान्तस्य लोपः इति द्विपदं सूत्रम्। अनेन सूत्रेण संयोगान्तस्य यणः लोपः विधीयते। संयोगे अन्तं यस्य तत् संयोगान्तं, तस्य संयोगान्तस्य। पदस्य इति पदम् अत्र अनुवर्तत। यथा 'सुद् ध् य् उपास्यः' इत्यत्र 'संयोगान्तस्य लोपः' इति सूत्रेण य् इत्यस्य लोपप्रसक्तिः। संयोगान्तं यत्पदं तदन्तस्य लोपः स्यात् इति वृत्तिः।

**7. अलोऽन्त्यस्य। (१-१-५२)**

अन्त्य अलादेशः

अलः अन्त्यस्य इति द्विपदं सूत्रम्। षष्ठीनिदिष्टः चेत् अल् अन्त्यस्य एव स्यात्। षष्ठीनिर्दिष्टो अन्त्य अलादेशः स्यात्। यथा ‘सुद् ध् य् उपास्यः’ इत्यत्र ‘अलोऽन्त्यस्य’ इति सूत्रेण य् इत्यस्य लोपः।

**8. यणः प्रतिषेधो वाच्यम्। (वार्तिकम्)**

यणः लोपप्रतिषेधः

त्रिपदं वार्तिकम्। अनेन वार्तिकेन यणः लेपः प्रतिषेधः विधीयते। संयोगान्तस्य यणः प्रतिषेधः वाच्या इत्यर्थः। यथा सुद् ध् य् उपास्यः इत्यत्र संयोगान्तस्य लोपः इति सूत्रेण विधीयमानस्य यणः लोपः न।

**सन्धत्त -**

सुधी उपास्यः – सुद्ध्युपास्यः, सुध्युपास्याः वा।
सुधी+उपास्यः इति स्थिते ‘तस्मिन्निति निर्दिष्ठे पूर्वस्य, ‘स्थानेऽन्तरतमः’ इति सूत्रद्वयसहकारेण ‘इको यणचि’ इति सूत्रेण ईकारस्य स्थाने यकारादेशे सुध् य् उपास्यः। तत्र 'अनचि च' इति सूत्रेण धकारस्य विकल्पेन द्वित्वे सुध् ध् य् उपास्यः इति स्थिते ‘झलां जश् झशि’ इति सूत्रेण आद्यधकरस्य जश्त्वे दकारादेशे सुद् ध् य् उपास्यः इति। ‘संयोगान्तस्य लोपः’ इति सूत्रेण यकारस्य लोपे प्राप्ते 'यणः प्रतिषेधो वाच्यः' इति वातिकेन तस्य निषेधे सुद्ध्युपास्यः इति रूपम्।

पाक्षिकत्वात् ‘अनचि च' इति सूत्रेण द्वित्वाभावपक्षे सुध्युपास्यः इति रूपम्।

एवं मद्ध्वरिः धात्रंशः, लाकृतिः।
लृ+आकृतिः इति स्थिते ‘इकोयणचि’ इति सूत्रेण लृकारस्य स्थाने लकारे ल् आकृतिः संयोगे लाकृतिः इति रूपम्।

**9. एचोऽयवायावः। (६-७-७८)**

अयवायावः

एचः अयवायावः इति द्विपदं सूत्रम्। अनेन सूत्रेण अयवायावः विधीयन्ते। एचः क्रमात् अय्, अव्, आय्, आव् एते स्युः अचि। ‘ए.ऐ.ओ.औ’ इत्येतेभ्यः वर्णेभ्यः स्वरे परे एकारस्य स्थाने अय्,ऐकारस्य स्थाने आव्, ओकारस्यस्थाने अव्, औकारस्य स्थाने आव् च आदेशाः भवन्ति।

यथा ‘हरे + ए’ इत्यत्र 'एचोऽयवायावः इति सूत्रेण अयादेशे हर अय् ए - हरये इति रूपम्। एवं विष्णवे, नायकः, पावकः

**10. यथासंख्यामनुदेशः समानम्।(१-३-१०)**

समसम्बन्धी विधिः यथासंख्यम्

यथासंख्यम् अनुदेशः समानम् इति त्रिपदं सूत्रम्। संख्याम् अनतिक्रम्य यथासंख्यम्। अनुदेशः विधिः। समशब्दः तुल्यार्थकः। समानमिति सम्बन्धसामान्ये षष्ठी। समसम्बन्धी विधिः यथासंख्यं स्यात्। यत्र स्थान्यादेशयोः संख्या तुल्या तत्र प्रथमस्य प्रथमः, द्वितीयस्य द्वितीयः इत्यादि क्रमेण प्रवर्तते इत्यर्थः यथा - 'एचोऽयवायावः' इति सूत्रेण एचः (ए ओ ऐ औ) अयवायावः आदेशाः विधीयते। तत्र एचः अयादीनां च संख्या तुलना इति एकारस्य अय्, ओकारस्य अव् इति क्रमेण आदेशाः भवन्ति। यथा – 'विष्णो + ए' इति स्थिते 'एचोऽयवायावः', 'यथासंख्यमनुदेशः समानम्' इति सूत्रद्वयसाहाय्येन ओकारस्य अवादेशे विष्णवे इति रूपम्।

**11. वान्तो यि प्रत्यये। (६-१-७९)**

अवावौ

वान्तः यि प्रत्यये इति त्रिपदं सूत्रम्। अनेन सूत्रेण अवावौ विधीयेते। यकारादौ प्रत्यये परे औदौतोः अव् आव् एतौ स्तः। यथा गो यम् इति स्थिते वान्तो यि प्रत्यये इति सूत्रेण ओकारस्य अव् आदेशे ग् अव् यम् गव्यम् इति रूपम्। एवं नाव्यम्।

**12. अध्वपरिमाणे च। (वार्तिकम्)**

आवादेशः

द्विपदं वार्तिकम्। अनेन वार्तिकेन अवादेशः विधीयते। अध्ववाचि परिमाणवाचि च यूतिशब्दे परे वान्तादेशः स्यात्। यथा गो यूतिः इत्यत्र अध्वपरिमाणे च इति वार्तिकेन अवादेशे ग् अव् यूतिः, गव्यूतिः इति रूपम्।

**13. अदेङ्गुणः।(१-१-२)**

गुणसंज्ञा

अत् एङ् गुणः इति त्रिपदं सूत्रम्। अनेन सूत्रेण गुणसंज्ञा विधीयते। अत् एङ् च गुमसंज्ञः स्यात्। अ, ए, ओ इत्येते गुणाः। आद्गुणः इत्यादावस्य प्रयोजनम्।

**14. आद्गुणः।(६-१-६७)**

गुणसन्धिः

द्विपदं सूत्रम्। अनेन सूत्रेण गुणः एकादेशत्वेन विधीयते। अवर्णादचि परे पूर्वपरयोः एको गुणादेशः स्यात्। यथा उप इन्द्रः इति स्थिते गुणे एकादेशे उप् ए इन्द्रः - उपेन्द्रः इति रूपम्। एवं गङ्गोदकम्।

**15. उपदेशेऽजनुनासिक इत्। (१-३-२)**

इत्संज्ञा

उपदेशे अच् अनुनासिक इत् इति चतुष्पदं सूत्रम्। अनेन सूत्रेण इत्संज्ञा विधीयते। उपदेशे अनुनासिकः अच् इत्संज्ञः स्यात्। यथा राम सु इत्यत्र सकारात्परस्य उकारस्य इत्संज्ञा।

**16. उरण् रपरः। (१-१-५२)**

रपरत्वम्

उः अण् रपरः इति द्विपदं सूत्रम्। अनेन सूत्रेण रपरत्वं विधीयते। ऋकारस्य स्थाने विधीयमानः अण् रपरः सन्नेव प्रवर्तते। यथा कृष्ण ऋद्धिः इत्यत्र 'आद्गुणः इति सूत्रेण गुणः उकारस्य ऋकास्य च स्थाने एकादेशत्वेन स्यात्। ऋकारस्य स्थाने इत्यतः 'उरण् रपर, 'इति सूत्रेण रपरत्वे कृष्ण् अर् द्धिः - कृष्णर्द्धिः इति रूपम्। तव लृकारः इत्यत्र आद्गुणः इति सुत्रेण गुणे उरण् रपरः 'इति परत्वे (र इति प्रत्याहारे रलौ वर्तते) तव् अल् कारः तवल्कारः इति रूपम्।

**17. लोपः शाकल्यस्य। (८- ३- १९)**

यवयोः लोपः

द्विपदं सूत्रम्। अनेन सूण विकल्पेन लोपः विधीयते। अवर्णपूर्वयोः पदान्तयोः यवयोः लोपो वा अशि परे। यथा हरे + इह इत्यत्र एचोऽयवायायः इति सूत्रेण अवादेशे हरय् इह। अत्र 'लापः शाकल्यस्य इति सूत्रेण विकल्पेन यलोपे हर यह इति रूपम्। लोपापाभावपक्षे हरयिह ।

**18. पूर्वत्रासिद्धम्। (८-२-१)**

पूर्वत्रासिद्धत्वम्

पूर्वत्र असिद्धम् इति द्विपदं सूत्रम्। अनेन सूत्रेण पूर्वत्रासिद्धत्वं विधीयते। सपादसप्ताध्ययी प्रति त्रिपाद्यसिद्धा। त्रिपाद्यामपि पूर्वं प्रति परं शास्त्रमसिद्धं स्यात्। अष्टाध्यायी द्विधा। सपादसंप्ताध्यायी इत्येकः भागः 7¼। त्रिपादी इत्यन्यः ¾ भागः। सपादसप्ताच्ध्यायीस्थानि सूत्राणि परस्परं जानन्ति । किन्तु तानि सूत्राणि त्रिपादीस्थानि सूत्राणि न जानति। त्रिपाद्यां वर्तमानानि पूर्वसूत्राणि परसूत्राणि न जानन्ति। परं सूत्रं पूर्वं सूत्रकार्यं जानाति। अन्तिमं सूत्रं (अ.अ.) सर्वाणि सूत्राणि जानन्ति। किन्तु तत्सूत्रं किमपि न जानाति। यथा हरे + इह इति स्थिते एचोऽयवायावः इति सूत्रेण अयादेशे हरय् इह। 'लोपः शाकल्यस्य इति त्रिपादिस्थेन सूत्रेण यकारलोपे हर इह। अत्र 'आद्गुणः' इति गुणः न प्राप्नोति 'आद्गुणः' इति सूत्रं संपादसप्ताध्याय्यां वर्तते। अतः हर इह इति रूपम्। यलोपाभावपक्षे हरहि।

विष्णो + इह इति स्थिते एचोऽयवायावः इति सूत्रेण अवादेशे विष्ण् अव् इह। 'लोपः शाकल्यस्य इति विकल्पेन वकारलोपे विष्ण इह। अत्रापि पूर्वसिद्धत्वात् न गुणसन्धिः। वकारलोपाभावे विष्णविह।

**19. वृद्धिरादैच्। (१-१-१)**

वृद्धिसंज्ञा

वृद्धिः आत् ऐच् इति त्रिपदं सूत्रम्। अनेन सूत्रेण वृद्धिसंज्ञा विधीयते। आत् ऐच् च वृद्धिसंज्ञः स्यात्। आ ऐ औ इत्येते वृद्धयः। वृद्धिरेचि इत्यादावस्य प्रयोजनम्।

**20. वृद्धिरेचि ( ६- १ - ८८)**

वृद्धिसन्धिः

वृद्धिः एचि इति द्विपदं सूत्रम्। अनेन सूण वृद्धिरेकादेशत्वेन विधीयते। आदेचि परे वृद्धिरादेशः स्यात्। यथा कृष्ण + एकत्वम् इति स्थिते 'आद्गुणः 'इति गुणे बाधित्वा वृद्धिरेचि इति सूत्रेण पूर्वपरयोः अकार- एकारयोः स्थाने ऐकारे एकादेशे कृष्णैकत्वम् इति रूपम्।

एवं गङ्गा + ओघः - गङ्गौघः

देव + ऐश्वर्यम् - देवैश्वर्यम्

कृष्ण + औत्कण्ठ्यम् -कृष्णौत्कण्ठ्यम्।

गुणापवादः आद्गुणस्य अपवादः भवति वृद्धिरचि इति सूत्रम्।

**21. एत्येधत्यूठ्सु। (६-१-८९)**

एजाद्योः एत्येधत्योः ऊठि च परे वृद्धिरेकादेशः

एकपदं सूत्रम् अनेन सूत्रेण वृद्धिरेकादेशः विधीयते।अवर्णात् एजाद्योः एत्येधत्योः ऊठि च परे वृद्धिरेकादेशः स्यात्। यथा उप + एति इति स्थिते 'एत्येधत्यूट्सु' इति सूत्रेण पूर्वपरयोः अकार-एकारयोः वृद्धौ ऐकारे एकादेशे उपैति इति रूपम्।

एवं उप + एधते -उपैधते। प्रष्ठ + ऊहः - प्रष्ठौहः।

एजाद्योः इति किम्?

उप + इतः इति स्थिते 'एत्येधत्यूट्सु' इति सूत्रेण वृद्धिः न। एजादिः न इति कारणात्। इत इति इण् धातुः एजादिः न। अतः वृद्धिं बाधित्वा 'आद्गुणः' इति गुणे उपेतः इति रूपम्। 'मा भवान् प्रेदिधत्' - इत्यत्रापि वृद्धिं बाधित्वा गुणे मा भवान् प्रेदिधत् इति।

अक्षशब्दात्
ऊहिनीशब्देपरे
वृद्धिरेकादेशः

**22. अक्षादूहिन्यामुपसंख्यानम्। (वार्तिकम्)**

अक्षात् ऊहिनी उपसंख्यानम् इति त्रिपदं वार्तिकम्। अनेन वार्तिकेन वृद्धिरेकादेशः विधीयते। अक्षशब्दात् ऊहिनीशब्देपरे वृद्धिरेकादेशः स्यात्। यथा अक्ष + ऊहिनी इति स्थिते 'अक्षादूहिन्यामुपसंख्यानम्' इति वार्तिकेन वृद्धौ पूर्वपरयोः औकारे एकादेशे नकारस्य णकारे च अक्षौहिणी इति रूपम्। सेना इत्यर्थः।

प्राद् ऊहः, ऊढः, ऊढिः, एषः, एष्यः परेषु वृद्धिरेकादेशः

**23. प्रादूहोढोढ्येषैष्येषु। (वार्तिकम्)**

एकपदं वार्तिकम्। अनेन वार्तिकेन वृद्धिरेकादेशः विधीयते। प्राद् ऊहः, ऊढः, ऊढिः, एषः, एष्यः परेषु वृद्धिरेकादेशःस्यात्। यथा प्र+ ऊहः इति स्थिते 'प्रादूहोढोढ्येषेष्येषु' इति वार्तिकेन पूर्वपरयोः अकार-ऊकारयोः वृद्धौ औकारे एकादेशे प्रौहः इति रूपम्।

एवं प्र + ऊढः - प्रौढः। प्र + ऊढिः - प्रौढिः। प्र + एषः-प्रैषः। प्र + एष्यः - प्रैष्यः।

प्रवत्सतरकम्बलवस नमृण दशशब्देभ्यः ऋणशब्दे परे वृद्धिरेकादेशः

**24. प्रवत्सतरकम्बलवसनार्णदशानामृणे। (वार्तिकम्)**

प्रवत्सतरकम्बलवसनार्णदशानाम् ऋणे इति द्विपदं वार्तिकम्। अनेन वार्तिकेन वृद्धिरेकादेशः विधीयते। प्र-वत्सतर- कम्बल - वसन - ऋण - दशशब्देभ्यः ऋणशब्दे परे वृद्धिरेकादेशः स्यात्। प्र + ऋणम् इति स्थिते 'प्रवत्सतरकम्बलवसनार्णदशानामृणे' इति वार्तिकेन पूर्वपरयोः अकार-ऋकारयोः वृद्धौ आकार एकादेशः। स च 'उरण् रपरः' इति सूत्रेण रपरत्वे प्र् आर् णम् - प्रार्णम्।

एवं वत्सतर + ऋणम्व - वत्सतरार्णम्। एकादेशः। कम्बल + ऋणम् - कम्बलार्णम्। वसन + ऋणम् वसनार्णम्। ऋण + ऋणम् - ऋणार्णम्। दश + ऋणम् - दशार्णम्।

उपसर्गसंज्ञा

**25. उपसर्गाः क्रियायोगे । (१-४-५९)**

उपसर्गाः क्रियायोगे इति द्विपदं सूत्रम्। अनेन सूत्रेण उपसर्गसंज्ञः विधीयते। प्रादयः क्रियायोगे उपसर्गसंज्ञाः स्युः। प्र, परा, अप, सम्, अनु, अव, निस्, निर्, दुस्, दुर्, वि, आङ्, नि, अधि, अपि, अति, सु, उत्, अभि, प्रति, परि, उप एते प्रादयः। यथा - गच्छति इति क्रिया। निर् इति प्रादिः। निर्गच्छति इत्यत्र वर्तमानस्य निरः उपसर्गसंज्ञः लभते।

धातुसंज्ञा

**26. भूवादयो धातवः। (१-३-१)**

भूवादयः धातवः इति द्विपदं सूत्रम्। अनेन सूत्रेण धातुसंज्ञा विधीयते। क्रियावाचिनो भ्वादयो धातुसंज्ञाः स्युः। भुवौ आदिः येषां ते भूवादयः इति विग्रहः। आदिशब्दः प्रभृत्यर्थकः। स च भू इत्यत्र अन्वेति भ्वादिरिति, भूप्रभृतयः इत्यर्थः। भूप्रभृतयो वा सदृशश्च धातुसंज्ञाः स्युः इत्यर्थः। सादृश्यश्च क्रियावचकत्वेन। तथा च क्रियावाचिनो भ्वादयो धातुसंज्ञाः स्युः इति सूत्रार्थः। 'भू सत्तायाम्' इत्यस्य अनेन धातुसंज्ञा।

अवर्णान्तादुपसर्गात् ऋकारादौ धातौ परे वृद्धिरेकादेशः

**27. उपसर्गादृति धातौ । (६-१-९१)**

उपसर्गात् ऋति धातौ इति त्रिपदं सूत्रम्। अनेन सूत्रेण वृद्धिरेकादेशः विधीयते। अवर्णान्तादुपसर्गात् ऋकारादौ धातौ परे वृद्धिरेकादेशः स्यादिति सूत्रार्थः। यथा प्र + ऋच्छति इति स्थिते 'उपसर्गादृति धातौ' इत्यनेन पूर्वपरयोः स्थाने अकार-ऋकारयोः वृद्धौ 'उरण् रपरः' इति रपरत्वे कृते प्र् आर् च्छति प्रार्च्छति इति रूपम्।

**28. एङि पररूपम्। (६-१-९४)**

पररूपमेकादेशः

एङि पररूपम् इति पदच्छेदः। 'उपसर्गादृति धातौ' इति सूत्रात् उपसर्गात्, इति, धातौ च अनुवर्तते। एङ् प्रत्याहारः। एकार ओकारश्च गृह्यते। अवणान्तात् उपसर्गात् एङादौ धातौ परे पररूपम् एकादेशः स्यात् इति सूत्रार्थः। यथा प्र + एजते इति स्थिते 'प्र' इति अवर्णान्तात् उपसर्गात् एज् धातौ परे 'एङि पररूपम्' इति सूत्रेण अकार- एकारयोः पररूपे एकादेशे प्रेजते इति रूपम्। एवं उप + ओषति - उपोषति।

**29. अचोऽन्त्यादि टि। (१-१-६४)**

टिसंज्ञा

अचः अन्त्यादि टि इति त्रिपदं सूत्रम्। अनेन सूत्रेण टिसंज्ञा विधीयते। अचः इति षष्ठी। अचां मध्ये इत्यर्थः। अन्त्यः आदिः यस्य तत् अन्त्यादि इति विग्रहः। अचां मध्ये यो अन्त्यः स आदिः यस्य तत् टि संज्ञं स्यात्। 'हरिस्' इत्यत्र इस् टि भवति।

**30. शकन्ध्वादिषु पररूपं वाच्यम्। (वार्तिकम्)**

पररूपमेकादेशः

शकन्धुः इत्यादि रूपसिद्ध्यर्थं टेः पररूपं स्यात्। यथा शक + अन्धुः इति स्थिते 'अकः सवर्णे दीर्घः' इति सूत्रेण दीर्घे प्राप्ते तं प्रबाध्य 'शकन्ध्वादिषु पररूपं वाच्यम्' इति वार्तिकेन शक इत्यस्य टेः अकारस्य स्थाने पररूपे शक्

अन्धुः - शकन्धुः इति रूपम्। एवं कर्क + अन्धुः -कर्कन्धुः। मनस् + ईषा - मनीषा। शकन्ध्वादि गणः आकृतिगणः। मार्त्तण्डः इति पदमपि आकृतिगणे योजितव्यम्। मार्त्त + अण्डः इति स्थिते 'अकः सवर्णे दीर्घः' इति सूत्रेण सवर्णदीर्घे प्राप्ते तं बाधित्वा पररूपे अकारे मार्त्तण्डः इति रूपम्।

**31. ओमाङोश्च। (६-१-९५)**

परररूपमेकादेशः

ओमाङोः च इति द्विपदं सूत्रम्। ओम् च आङ् च ओमाङौ, तयोः ओमाङोः। ओमाङोः परयोः (ओमि आङि च परे) इत्यर्थः। 'आद्गुणः' इति सूत्रात् आदिति, 'एङि पररूपमिति सूत्रात् पररूपमिति च अनुवर्तते। अवर्णात् ओमि आङि च परे पररूपमेकादेशः स्यात्। उदा - शिवाय + ओम् (नमः) इति स्थिते 'ओमाङोश्च' इति सूत्रेण अकारस्य ओकारस्य च स्थाने पररूपे शिवायो (नमः) इति रूपम्। शिव आ इहि इति स्थिते आ इहि इति भागे 'आद्गुणः' इति सूत्रेण गुणे एकारे एकादेशे शिव एहि। अत्र ओमाङोश्च इति सूत्रेण पररूपे शिवेहि इति रूपम्।

**32. अन्तादिवच्च (६-१-८५)**

अन्तादिवद्भावः

अन्तादिवत् च इति द्विपदं सूत्रम् । अन्तश्च आदिश्च अन्तादी, अन्तादिभ्यां तुल्यम् अन्तादिवत्। योऽयमेकादेशः स पूर्वस्यान्तवत् परस्यादिवत् स्यात्। उदा शिव + एहि इति स्थिते 'अन्तादिवच्च' इति सूत्रेण ए इत्यस्य पूर्वस्य अन्तवद्भावमादाय 'ओमाङोश्च' इति सूत्रेण पररूपे शिव् एहि, शिवेहि इति रूपम्।

**33. अकः सवर्णे दीर्घः। (६-१-१०१)**

सवर्णदीर्घः

त्रिपदं सूत्रम्। इको यणचि इति सूत्रात् अचि इति पदम् अनुवर्तते। अक् इति प्रत्याहारे अ, इ, उ, ऋ, ऌ इति वर्णाः अन्तर्भवन्ति। अकः इति पञ्चम्यन्तः। अकः सवर्णेऽचि परे पूर्वपरयोः दीर्घ एकादेशः स्यात्। अ आ इत्येतयोः अनन्तरं यदि अ आ इत्येतौ वर्णौ स्तः तर्हि आकारः। इ ई इत्येतयोः अनन्तरं यदि इ ई इत्येतौ वर्णौ स्तः तर्हि ईकार: उ ऊ इत्येतयोः अनन्तरं यदि उ ऊ इत्येतौ वर्णौ स्तः तर्हि ऊकारः। उदा - दैत्य + अरिः इति स्थिते 'अकः सवर्णे दीर्घः' इति सूत्रेण पूर्वपरयोः अकारअकारयोः दीर्घे आकारे दैत्यारिः इति रूपम् । एवं श्री + ईशः - श्रीशः। विष्णु + उदयः - विष्णूदयः। होतृ + ऋकारः - होतृकारः।

पूर्वरूपमेकादेशः

**34. एङः पदान्तादति । (६-१-१०९)**

एङः पदान्तात् अति इति पदच्छेदः। अति तपरकरणं सप्तम्यन्तम्। अति परे ह्रस्वे अकारे परे इत्यर्थः। अमि पूर्वः इति सूत्रात् पूर्वं इत्यनुवर्तते। पदान्तात् एङः अति परे पूर्वपरयोः स्थाने पूर्वरूपम् एकादेशः स्यात्। यथा हरे + अव इति स्थिते पदान्तात् एकाराद् अति परे 'एङः पदान्तादति' इति सूत्रेण एकारे हरेऽव इति रूपम्। विष्णो + अव - विष्णोऽव इति रूपम्।

प्रकृतिभावः

**35. सर्वत्र विभाषा गोः। (६-१-१२२)**

सर्वत्र विभाषा गोः इति त्रिपदं सूत्रम्। सर्वत्र इत्यस्य लोके वेदे च इत्यर्थः। विभाषाशब्दः विकल्पार्थः। एङः पदान्तादति इति अनुवर्तते। लोके वेदे च एङन्तस्य गोरिति प्रकृतिभावः वा स्यात् पदान्ते। यथा - गो+ अग्रम् इति स्थिते 'सर्वत्र विभाषा गोः' इति सूत्रेण गोशब्दस्य एङन्तस्य ओकारान्तस्य प्रकृतिभावे गो अग्रम् इति रूपम्।

प्रकृतिभावस्य अभावपक्षे तु 'एङः पदान्तादति' इति पूर्वरूपे गोऽग्रम् इति च रूपम्।

'सर्वत्र विभाषा गोः' इति सूत्रे एङः इति गोः विशेषणम्। चित्रग्वग्रम् इत्यत्र प्रकृतिभावो न। एङन्ताभावात्। किन्तु यण् आदेशे चित्रग्वग्रम् इति रूपम्।

अत्र पदान्ते इति विशेषणात् गो शब्दस्य षष्ठी एकवचने गो ङस् (अस्) इति स्थिते पदान्तत्वाभावात् प्रकृतिभावो न। किन्तु 'ङसिङसोश्च' इति सूत्रेण पूर्वरूपे रुत्वे विसर्गे च गोः इति।

सर्वादेशः

**36. अनेकाल् शित्सर्वस्य । (१-१-५५)**

अनेकाल् शित् सर्वस्य इति त्रिपदं सूत्रम्। अनेकः अल् यस्य सः अनेकाल्। श् इत् यस्य सः शित्। शकारः इत् इत्यर्थः। अनेकाल् यः आदेशः शित् आदेशश्च स सर्वस्य षष्ठीनिर्दिष्टस्य स्थाने स्यात्। यथा - गो + अग्रम् इत्यत्र 'अवङ् स्फोटायनस्य' इति सूत्रेण अवङ्। अवङ् अनेकाल् भवति। अतः 'अनेकाल् शित्सर्वस्य' इति सूत्रेण सर्वादशप्रसक्तिः।

**37. ङिच्च । (१-१-५३)**

ङित् च इति पदच्छेदः। ङ् इत् यस्य सः ङित्। 'अलोऽन्त्यस्य' इति सूत्रम् अत्र अनुवर्तते। ङित् अनेकाल् अपि अन्त्यस्य एव स्यात्, न सवदिशः। यथा - गो +

अन्त्यादेशः

अग्रम् इत्यत्र 'अवङ् स्फोटायनस्य' इति सूत्रेण अवङ्। अवङि ङकारः इत् भवति। ङित्वात् ङिच्च इति सूत्रेण अन्त्यादेशे गो इत्यस्य ओकारस्य स्थाने अवङ्। ग् अव अग्रम्। पुनः सवर्णदीर्घे गवाग्रम् इति रूपम्।

**38. अवङ् स्फोटायनस्य। (६-१-१२३)**

अवङ्ङदेशः

द्विपदं सूत्रम्। स्फोटायनः इति पाणिनेः पूर्वस्य कस्यचन वैयाकरणाचार्यस्य नाम। गोः, एङः, पदान्ते, अति, इत्येतानि पदानि अनुवर्तन्ते। पदान्ते एङन्तस्य गोः अवङ् स्यात् अचि। यथा - गो + अग्रम् इत्यत्र 'अवङ् स्फोटायनस्य' इति सूत्रेण अवङ्। अवङि ङकारः इत् भवति। ङित्वात् ङिच्च इति सूत्रेण अन्त्यादेशे गो इत्यस्य ओकारस्य स्थाने अवङ्। ग् अव अग्रम्। पुनः सवर्णदीर्घे गवाग्रम् इति रूपम्। अवङ् इति आदेशाभावपक्षे 'सर्वत्र विभाषा गोः' इति प्रकृतिभावे गो अग्रम् इति रूपम्।

पदान्ते इति किम्? गो शब्दात् सप्तम्यकवचनप्रत्यये गो ङि। अनुबन्धलोपे गो इ। गो इत्यस्य पदान्तत्वाभावात् अवङ् इति आदेशः न प्राप्तः। अतः 'एचोऽयवायावः' इति सूत्रेण अव आदेशे गवि इति रूपम्।

**39. ईदूदेद्द्विवचनं प्रगृह्यम्। (१-१-११)**

प्रगृह्यसंज्ञा

ईदूदेद् द्विवचनं प्रगृह्यम् इति त्रिपदं सूत्रम्। अनेन सूत्रेण प्रगृह्यसंज्ञा विधीयते। ईदूदेद् इति द्विवचनस्य विशेषणम्। ईकारान्त-ऊकारान्त-एकारान्तद्विवचनं प्रगृह्यसंज्ञं स्यात्। हरी इकारान्तद्विवचनम्। एवं गुरू, शम्भू इत्यादौ ऊकारान्तः द्विवचने। गङ्गे, पचेथे इत्यादि एकारान्तद्विवचनम्। उदा - हरी + एतौ इति स्थिते ईकारान्तस्य द्विवचनस्य 'ईदूदेद्द्विवचनं प्रगृह्यम्' इति सूत्रेण प्रगृह्यसंज्ञायां 'प्लुतप्रगृह्या अचि नित्यम्' इति सूत्रेण प्रकृतिभावे हरी एतौ इति रूपम्। अत्र प्रकृतिभावविधानात् यणादेशो न। एवं विष्णू + इमौ - विष्णू इमौ। गङ्गे +अमू - गङ्गे अमू।

**40. अदसो मात्। (१-१-१२)**

प्रगृह्यसंज्ञा

अदसः मात् इति पदच्छेदः। 'ईदूदेद्द्विवचनं प्रगृह्यम्' इति सूत्रम् अत्र अनुवर्तते। एवं च अदस् शब्दावयवमकारात् परावीदूतौ प्रगृह्यौ स्तः। यथा - अमी + ईशाः - अमी अदस्शब्दस्य पुल्लिङ्गस्य प्रथमा बहुवचनम्। अत्र मकारात् परस्य ईकारस्य 'अदसो मात्' इति सूत्रेण प्रगृह्यसंज्ञायां 'प्लुतप्रगृह्या अचि नित्यम्' इति सूत्रेण प्रकृतिभावे अमी ईशाः इति रूपम्। एवं

रामकृष्णावमू + आसाते - रामकृष्णावमू आसाते। मात् इति किम्? अमुकेऽत्र इत्यत्र मात्परत्वेन नास्ति। 'एङः पदान्तादति' इति पूर्वरूपे अमुकेऽत्र इति ।

**41. चादयोऽसत्वे। (१-४-५७)**

निपातसंज्ञा

चादयः असत्वे इति द्विपदं सूत्रम्। अनेन सूत्रेण निपातसंज्ञा विधीयते। न सत्वम् असत्वम् अद्रव्यमित्यर्थः। च आदिः येषां ते चादयः। च ह इत्यादिशब्दाः निपाताः। अद्रव्यार्थाः चादयः निपातसंज्ञाः स्युः।

**42. प्रादयः । (१-४-५८)**

प्र आदयः इति पदच्छेदः। आदयः इत्युक्ते प्र, परा इत्यादि। एतेऽपि निपातसंज्ञाः स्युः। प्रादयः निपाताः स्युः इत्यर्थः।

**43. निपात एकाजनाङ् । (१-१-१४)**

निपातः प्रगृहयः

निपातः एकाच् अनाङ् इति त्रिपदं सूत्रम्। एकः अच् एकाच्। न आङ् अनाङ्। आङ्भिन्नः इत्यर्थः। 'ईदूदेद्द्विवचनं प्रगृह्यम्' इति सूत्रात् प्रगृह्यम् इति पदम् अनुवर्तते। एकाच् निपातः आङ्वर्जः प्रगृह्यः स्यात्। यथा - इ + इन्द्रः इत्यत्र इ इत्यस्य चादिगणे पठितत्वात् 'चादयोऽसत्वे' इति निपातसंज्ञा। तस्य 'निपात एकाजनाङ्' इति सूत्रेण प्रगृह्यसंज्ञा। तस्मात् इकारेऽचि परे 'प्लुतप्रगृह्या अचि नित्यम्' इति सूत्रेण प्रकृतिभावः। अतः सवर्णदीर्घो न। उ + उमेशः अत्र 'चादयोऽसत्वे' इति सूत्रेण निपातसंज्ञा। 'निपात एकाजनाङ्' इति सूत्रेण प्रगृह्यसंज्ञा। तस्मात् उकारेऽचि परे 'प्लुतप्रगृह्या अचि नित्यम्' इति सूत्रेण प्रकृतिभावः, अतः सवर्णदीर्घो न।

आ इति निपातः ङित् अङित् चेति द्विविधः। तत्र 'वाक्यस्मरणयोरङित्' इत्यनेन वाक्ये स्मरणार्थे च अङित् भवति। आ एवं किल तत्, आ एवं नु मन्यसे इति। उभयत्रापि प्रगृह्यसंज्ञायां प्रकृतिभावः। अन्यत्र ङित् - ईषद् उष्णम् - ओष्णम्। ईषद् इत्यादिषु अर्थेषु आङ् ङित्। अतः तत्र प्रगृह्यसंज्ञा नास्ति। आ (ईषत्) उष्णम् इति स्थिते प्रगृह्यसंज्ञाभावात् प्रकृतिभावाभावे 'आद्गुणः' इति सूत्रेण गुणे ओष्णम् इति रूपम्।

**44. ओत् । (१-१-१५)**

प्रगृहयः

एकपदं सूत्रम्। निपातः प्रगृह्यम् इति पदद्वयम् अत्र अनुवर्तते। ओदन्तो निपातः प्रगृह्यः स्यात्। यथा अहो ईशाः इत्यत्र 'ओत्' इति सूत्रेण प्रगृह्यसंज्ञायां 'प्लुतप्रगृह्या अचि नित्यम्' इति सूत्रेण प्रकृतिभावे अहो ईशाः इति।

**45. सम्बुद्धौ शाकल्यस्येतावनार्षे। (१-१-१६)**

विकल्पेन प्रगृह्यः

सम्बुद्धौ शाकल्यस्य इतौ अनार्षे इति चतुष्पदं सूत्रम्। अनेन सूत्रेण विकल्पेन प्रगृह्यः विधीयते। सम्बुद्धिनिमित्तकः ओकारो वा प्रगृह्यः अवैदिके इतौ परे। यथा - विष्णो + इति अत्र विष्णो इत्यस्य ओकारः सम्बुद्धिनिमित्तकः। अतः 'सम्बुद्धौ शाकल्यस्यतावनार्षे' इति विकल्पेन प्रगृह्यसंज्ञायां 'प्लुतप्रगृह्या अचि नित्यम्' इति सूत्रेण प्रकृतिभावे विष्णो इति।

प्रगृह्यसंज्ञाभावपक्षे 'एचोऽयवायावः' इति सूत्रेण ओकारस्य अवादेशे विष्णविति इति जाते 'लोपः शाकल्यस्य' इति सूत्रेण वकारलोपपक्षे विष्ण इति। लोपाभावपक्षे विष्णविति इति च रूपम्।

**46. इकोऽसवर्णे शाकल्यस्य ह्रस्वश्च। (६-१-१२७)**

विकल्पेन ह्रस्वः

इकः असवर्णे शाकल्यस्य ह्रस्वः च इति पञ्चपदं सूत्रम्। अनेन सूत्रेण विकल्पेन ह्रस्वः विधीयते। पदान्ताः अचि इत्यनुवर्तते। पदान्ताः इको ह्रस्वो वा स्युः असवर्णेऽचि। यथा - चक्री + अत्र इति स्थिते 'इकोऽसवर्ण शाकल्यस्य ह्रस्वश्च' इति सूत्रेण पदान्तस्य ईकारास्य वैकल्पिकेन हस्वे चक्रि अत्र इति रूपम्।

हस्वाभावपक्षे 'इको यणचि' इति सूत्रेण यणादेशे चक्र्यमत्र इत्यपि रूपम्। चक्री अत्र इति हस्वविध्यनन्तरं 'इको यणचि' इति सूत्रं न। स्वरविधिसामर्थ्यात्।

पदान्ताः इति किम्? गौरी औ इत्यत्र 'इको यर्णाचि' इति यणि गौ र् य् ओ। अत्र गौरी इत्यवस्थायां पदान्तत्वं न।अतः न ह्रस्वः।

**47. अचो रहाभ्यां द्वे। (८-४-४६)**

यरः द्वित्वं

अचः रहाभ्यां द्वे इति त्रिपदं सूत्रम्। यरः, वा इत्यनुवर्तते। अचः इति पञ्चमी। अचः पराभ्यां रेफहकाराभ्यां परस्य यरो द्वे वा स्तः।

यथा - गौरो + औ इति स्थिते 'इको यणचि' इति यणि गौर् य् औ। 'अचो रहाभ्यां द्वे' इति सूत्रेण यकारस्य द्वित्वे गौर्य्यौ इति रूपम्।

**48. ऋत्यकः । (६-१-१२८)**

ऋति परे विकल्पेन ह्रस्वः

ऋति अकः इति द्विपदं सूत्रम्। पदान्तः, ह्रस्वः, वा इत्यनुवर्तन्ते। ऋत् इत्यस्य ह्रस्वः ऋकारः। अकः इति प्रथमा बहुवचनम्। पदान्ताः अकः ऋति परे हस्वः वा स्युः। यथा- ब्रह्मा + ऋषिः इति स्थिते पदान्तस्याकारस्य ऋति परे

'ऋत्यकः' इति सूत्रेण विकल्पेन ह्रस्वे ब्रह्म ऋषिः इति रूपम्। ह्रस्वाभावपक्षे तु गुणे रपरत्वे च ब्रह्मर्षिः इति रूपम्। ह्रस्वविधिसत्वे न गुणः।

पदान्ताः इति किम्? आ+ ऋच्छत् इत्यवस्थायां पदान्तस्य इत्युक्तत्वात् ह्रस्वः न। आ इति लङ्स्थितः आडागमः। तत् न पदम्। अतः 'आटश्च' इति सूत्रेण वृद्धी 'उरण् रपरः इति रपरत्वे च आर्च्छत् इति रूपम्।

### 1.1.3 हल्सन्धिप्रकरणम्।

**1. स्तोः श्चुना श्चुः। ( ८-४-४०)**

श्चुत्वं

त्रिपदं सूत्रम्। अनेन सूत्रेण श्चुत्वं विधीयते। सकारतवर्गयोः शकारचवर्गाभ्यां योगे शकारचवर्गौ स्तः। यथा - रामस् + शेते अत्र 'स्तोः श्चुना श्चुः' इति सूत्रेण सकारस्य स्थाने शकारे रामश्शेते इति रूपम्।

एवं रामस् + चिनोति रामश्चिनोति । सत् + चित् - सच्चित्। शाङ्गिन् + जय शाङ्गिञ्जय ।

स्तोः चुना श्चुः इति सूत्रे अयं पूर्वः अयं परः इति व्यवस्था न केवलं योग एव कार्यः ।

स् + श - श्श।    श् + स -श्श।    स् + च - श्च।

त् + च -च्च।    च् + त च्च।    त् + चि- च्चि।

थ् + छ - छ्छ।    छ् + थ - छ्छ।    न् + ज - ञ्ज।

द् + ज- ज्ज।    ज् + द - ज्ज।

ध् + झ - ज्झ।    झ् + ध - ज्झ

न्+ञ - ञ्ञ।    ञ् + न - ञ्ञ।

**2. शात्। (८-४-४४)**

श्चुत्वनिषेधः

एकपदं सूत्रम्। अनेन सूत्रेण श्चुत्वनिषेधः विधीयते। शात्परस्य तवर्गस्य श्चुत्वं न स्यात्। यथा विश् + नः। अत्र 'शात्' इति सूत्रेण श्चुत्वनिषेधे विश्नः इति रूपम्। एवं प्रश्नः। शात् इति सूत्रे पूर्वपरव्यवस्था वर्तते। विश्नः - प्रवेशः।

ष्टुत्वम्

### 3. ष्टुना ष्टुः। (८-४-४१)

द्विपदं सूत्रम्। अनेन ष्टुत्वं विधीयते। सकारतवर्गयोः षकारटवर्गाभ्यां योगे ष्टुः स्यात्। यथा - रामस् +षष्ठः इत्यत्र 'ष्टुना ष्टुः' इति ष्टुत्वे षकारे रामष्षष्ठः इति रूपम्। एवं रामस् + टीकते- रामष्टीकते (स् + टी ष्टी)। पेस् + टा पेष्टा (स्+टा ष्टा)। तत् + टीका - तट्टीका (त् + टी - ट्टी) चक्रिन् + ढौकसे - चक्रिण्ढौकसे (न् + ढौ - ण्ढौ)

ष्टुना ष्टुः इति सूत्रे पूर्वपरव्यवस्था न केवलं योग एव।

| | | |
|---|---|---|
| स् + ष -ष्ष। | ष्+ स-ष्ष। | स्+ ट- ष्ट। |
| त्+ ट -ट्ट। | ट्+त - ट्ट। | ष्+टी - ष्टी। |
| थ्+ ठ - ठ्ठ। | ठ् +थ -ठ्ठ। | द्+ टी - ट्टी। |
| द् + ड - ड्ड। | ड्+ द- ड्ड। | न् + ढ - ण्ढ। |
| ध् + ढ- ढ्ढ। | ढ्+ ध- ढ्ढ। | न्+ढ - ण्ढ। |
| न्+ ण-ण्ण। | ण्+ न -ण्ण | |

ष्टुत्वनिषेधः

### 4. न पदान्ताट्टोरनाम्। (८-४-४२)

न पदान्तात् टोः अनाम् इति चतुष्पदं सूत्रम्। अनेन सूत्रेण ष्टुत्वनिषेधः विधीयते। पदान्तात् टवर्गात्परस्य स्तोः ष्टुः न स्यात्। यथा षट् सन्तः। अत्र 'ष्टुना ष्टुः' इति सूत्रेण ष्टुत्वे प्राप्ते 'न पदान्ताट्टोरनाम्' इति सूत्रेण ष्टुत्वनिषेधे षट्सन्तः इति रूपम्। एवं षट् + ते षट्ते। -

पदान्तात् इति किम्? ईड् + टे इत्यत्र पदान्तत्वाभावात् 'ष्टुना ष्टुः' इति ष्टुत्वे ईट्टे इति रूपम्।

टोः इति किम्? सर्पिष् + तमम् इत्यत्र टवर्गाभावात् ष्टुत्वनिषेधः न। ष्टुत्वे सर्पिष्टमम्।

ष्टुत्वनिषेधः न

### 5. अनाम्नवतिनगरीणामिति वाच्यम् । (वार्तिकम्)

पदान्तात् टवर्गात् परस्य नाम्नवतिनगरीणां भिन्नस्य स्तोः (सकारतवर्गयोः) ष्टुत्वनिषेधः न स्यात्। वार्तिकमिदं 'न पदान्ताट्टोरनाम्' इत्यस्यापवादः। यथा-षड्+ नाम् इत्यत्र 'अनाम्नवतिनगरीणामितिवाच्यम्' इति वार्तिकबलात्

'ष्टुना ष्टुः' इति ष्टुत्वे षड्नाम्। 'प्रत्यये भाषायां नित्यम्" इति अनुनासिके षण् णाम् षण्णाम् इति रूपम्। षड् + नवतिः षण्णवतिः। षड् +नगर्यः - षण्णगर्यः। नगरी इत्यस्य बहुवचनं भवति नगर्यः।

**6. झलां जशोऽन्ते । (८-२-३९)**

जशत्वम्

झलां जशः अन्ते इति त्रिपदं सूत्रम्। अनेन सूत्रेण जश्त्वं विधीयते। पदान्ते झलां जशः स्युः। यथा - वाक् + ईशः इत्यत्र 'झलां जशोऽन्ते' इति सूत्रेण जश्त्वे वाग् ईशः वागीशः इति रूपम्। जश् - वर्गतृतीयम् (ज ब ग ड द)| वागीशः - बृहस्पतिः (देवानां गुरुः)।

**7. यरोऽनुनासिकेऽनुनासिको वा। (८-४-४५)**

विकल्पेन अनुनासिकः

यरः अनुनासिके अनुनासिकः वा इति चतुष्पदं सूत्रम्। अनेन सूत्रेण विकल्पेन अनुनासिकः विधीयते। यरः पदान्तस्यानुनासिके परे अनुनासिको वा स्यात्। यथा-एतद्+मुरारिः इति स्थिते 'यरोऽनुनासिकेऽनुनासिको वा' इति विकल्पेन अनुनासिके नकारे एतन्मुरारिः। अनुनासिकाभावे एतद्मुरारिः।

**8. प्रत्यये भाषायां नित्यम्।(वार्तिकम् )**

अनुनासिकः

त्रिपदं वार्तिकम्। अनेन वार्तिकेन नित्यमनुनासिकः विधीयते। भाषायाम् इत्यस्य लौकिकप्रयोगे इत्यर्थः। प्रत्यये अनुनासिके परतः पदान्तस्य यरः नित्यमनुनासिकादेशः स्यात्। यथा - तद् + मात्रम् इत्यत्र मात्रच्प्रत्ययः परत्वेन वर्तमानत्वात् 'प्रत्यये भाषायां नित्यम्' इति वार्तिकेन अनुनासिके तन्मात्रम् इति। एवं चिद् + मयम् चिन्मयम् ।

**9. तोर्लिः। (९८-४-६०)**

परसवर्णः

तोः लि इति द्विपदं सूत्रम्। अनेन परसवर्णः विधीयते। तु इत्यस्य पञ्चम्यैकवचनं भवति तोः। लि इत्यस्य लकारे परे। तवर्गस्य लकारे परे परसवर्णः स्यात्। यथा तद् लयः इत्यत्र 'तोर्लिः' इति परसवर्णे लकारे तल्लयः इति रूपम्। एवं विद्वान् लिखति - विद्वाँल्लिखति। नकारस्य (अनुनासिकस्य) स्थाने आगतत्वात् ँ इत्ययं चिह्नः।

पूर्वसवर्णः

**10. उदः स्थास्तम्भोः पूर्वस्य। (७-४-६१)**

त्रिपदं सूत्रम्। अनेन पूर्वसवर्णः विधीयते। उदः परयोः स्थास्तम्भोः पूर्वसवर्णः स्यात्। यथा - उद् स्थानम् इत्यत्र 'उदः स्थास्तम्भोः पूर्वस्य' इति सूत्रेण पूर्वसवर्णः। दकारस्य सवर्णः थ् आयाति।

**11. तस्मादित्युत्तरस्य । (१-१-६७)**

परस्य स्थाने

तस्मात् इति उत्तरस्य इति त्रिपदं सूत्रम्। पञ्चमीनिर्देशेन विधीयमानं कार्यं परस्य स्थाने स्यात् इति कार्यमनेन सूत्रेण विधीयते। पञ्चमीनिर्देशेन विधीयमानं कार्यं वर्णान्तरेण अव्यवहितस्य परस्य ज्ञेयम्। यथा - उद् स्थानम् इत्यत्र 'उदः स्थास्तम्भोः पूर्वस्य' इति सूत्रेण पूर्वसवर्णः विधीयते। उदः इति पञ्चमी। अतः अयं पूर्वसवर्णः परस्य स्था इत्यस्य स्थाने स्यात्।

**12. आदेः परस्य । (१-१-५४)**

परस्यादेः

द्विपदमिदं सूत्रम्। परस्य विहितं कार्यं तस्यादेः स्यादिति इदं परिभाषासूत्रं विशदयति। परस्य यद् विहितं तद् तस्यादेः बोध्यम्। यथा - उद् + स्थानम् इत्यत्र 'उदः स्थास्तम्भोः पूर्वस्य' इति सूत्रेण विधीयमानं कार्यं परस्य आदेः सकारस्य स्थाने स्यात्। उद् थ् थानम्।

**13. झरो झरि सवर्णे । (८-४-६५)**

लोपः

झरः झरि सवर्णे इति त्रिपदं सूत्रम्। अनेन सूत्रेण विकल्पेन झरः लोपः विधीयते। हलः परस्य झरो वा लोपः स्यात् सवर्णे झरि। यथा - उद् थ् थानम् इत्यवस्थायां 'झरो झरि सवर्णे' इति सूत्रेण विकल्पेन झरः थकारस्य लोपे उद् थानम्।

**14. खरि च । (८-४-५५)**

चर्त्वम्

द्विपदं सूत्रम्। अनेन सूत्रेण चर्त्वं विधीयते। खरि परे झलां चरः स्युः। यथा - उद् + थानम् इत्यत्र 'खरि च' इति सूत्रेण चर्त्वे तकारे उत्थानम् इति रूपम्।

**सन्धत्त** - उद् + स्थानम्। उद् + स्तम्भनम्।

**उद् + स्थानम्** इति स्थिते 'उदः स्थास्तम्भोः पूर्वस्य' इति सूत्रेण पूर्वसवर्णे 'तस्मादित्युत्तरस्य' इति सूत्रसाहाय्येन परस्य स्थानेऽयं पूर्वसवर्णः। 'आदेः परस्य' इति सूत्रसाहाय्येन परस्यादेः सकारस्य स्थाने थकारे उद् थ् थानम्। 'झरो झरि सवर्णे' इति विकल्पेन पूर्वथकारस्य लोपे उद् थानम्। 'खरि च' इति

सूत्रेण चर्त्वे उत्थानम् इति रूपम्। थकारस्य लोपाभावपक्षे उत्थ्यानम् इति रूपम्।

**उद् + स्तम्भनम्** इत्यत्र 'उदः स्थास्तम्भोः पूर्वस्य' इति पूर्वसवर्णे उद् थ् तम्भनम्। 'झरो झरि सवर्णे' इति थकार विकल्पेन लोपे उद् तम्भनम् 'खरि च' इति चर्त्वे तकारे उत्तम्भनम्। थकारस्य लोपाभावे उत्तम्भनम् इति रूपम्।

### 15. झयो होऽन्यतरस्याम्। (८-४-६२)

विकल्पेन पूर्वसवर्णः

झयः हः अन्यतरस्याम् इति त्रिपदं सूत्रम्। अनेन सूत्रेण विकल्पेन पूर्वसवर्णः विधीयते। अन्यतरस्याम् इत्यनेन वैकल्पिकविधिः। झयः परस्य हस्य वा पूर्वसवर्णः स्यात्। यथा - वाक् + हरिः इत्यत्र 'झलां जशोऽन्ते' इति जश्त्वे 'झयो होऽन्यतरस्याम्' इति सूत्रेण वैकल्पिकेन पूर्वसवर्णः। हकारस्य स्थाने ककारस्य सवर्णः। सः पूर्वसवर्णः घकारः। वाग्घरिः इति रूपम्। पूर्वसवर्णाभावे वाग्हरिः इति रूपम्।

(हशः संवाराः नादाः घोषाश्च। हशि ह य व र ल ञ म ङ ण न झ भ घ ढ ध ज ब ग ड द इत्येते वर्णाः। अस्मिन हकारस्य सवर्णत्वेन घ ग च अन्तर्भवतः। वर्गाणां द्वितीयचतुर्थौ शलश्च महाप्राणाः। अतः महाप्राणे हकारः कवर्गस्थः घकारश्च स्तः। अतः हकारस्य स्थाने घकारः स्यात्।)

### 16. शश्छोऽटि। (८-४-६३)

विकल्पेन छत्वं

शः छः अटि इति त्रिपदं सूत्रम्। अनेन सूत्रेण विकल्पेन छत्वं विधीयते। पदान्तात् झयः परस्य शस्य छो वा स्यदटि। यथा - तद् शिवः इत्यत्र 'स्तोः श्चुना श्चुः' इति सूत्रेण दकारस्य श्चुत्वे जकारे तज् शिवः। 'खरि च' इति चर्त्वे चकारे तच् शिवः। अत्र 'शश्छोऽटि' इति सूत्रेण विकल्पेन छत्वे तच्छिवः इति रूपम्। छत्वाभावपक्षे तच्शिवः इति रूपम्।

### 17. छत्वममीति वाच्यम्।(वार्तिकम्)

छत्वं

छत्वम् अम् इति वाच्यम् इति चतुष्पदं वार्तिकम्। अनेन वार्तिकेन छत्वं विधीयते। पदान्तात् झयः परस्य शकारस्य छः स्यात् अटि परे। यथा - तद् श्लोकेन इत्यत्र 'स्तोः श्चुना श्चुः' इति श्चुत्वे तज् श्लोकेन। 'खरि च' इति चर्त्वे चकारे तच् श्लोकेन। 'छत्वममीति वाच्यम्' इति वार्तिकेन तच्छ्लोकेन इति रूपम्।

**18. मोऽनुस्वारः। (८-३-२३)**

मः अनुस्वारः इति द्विपदं सूत्रम्। अनेन सूत्रेण अनुस्वारः विधीयते। मान्तस्य पदस्यानुस्वारः स्यात् हलि। यथा - हरिम् + वन्दे इत्यत्र 'मोऽनुस्वारः' इति सूत्रेण अनुस्वारे हरिं वन्दे इति रूपम् ।

अनुस्वारः

**19. नश्चापदान्तस्य हलि। (८-३-२४)**

नः च अपदान्तस्य हलि इति चतुष्पदं सूत्रम्। अनेन सूत्रेण अनुस्वारः विधीयते। नस्य मस्य च अपदान्तस्य झल्यनुस्वारः स्यात्। यथा - यशान् + सि इत्यत्र 'नश्चापदान्तस्य झलि' इति सूत्रेण नकारस्यानुस्वारे यशांसि इति रूपम्। एवम् आक्रम् + स्यते - आक्रंस्यते।

झलि इति किम्? झलि परे एव अनुस्वारः। मन् यते इत्यत्र झलः परत्वाभावात् नानुस्वारः। मन्यते इति।

**20. अनुस्वारस्य ययि परसवर्णः। (८-४-५८)**

परसवर्णः

त्रिपदं सूत्रम्। अनेन सूत्रेण परसवर्णः विधीयते। अनुस्वारस्य ययि परसवर्णः स्यात्। यथा - शां + तः इत्यत्र 'अनुस्वारस्य ययि परसवर्णः' इति सूत्रेण परसवर्णे नकारे शान्तः इति रूपम्।

**21. वा पदान्तस्य। (८-४-५९)**

विकल्पेन परसवर्णः

द्विपदं सूत्रम्। अनेन सूत्रेण विकल्पेन परसवर्णः विधीयते। पदान्तस्यानुस्वारस्य ययि परे परसवर्णो वा स्यात्। यथा - त्वं + करोषि इत्यत्र 'वा पदान्तस्य' इति सूत्रेण विकल्पेन परसवर्णे त्वङ्करोषि इति रूपम्। परसवर्णाभावे त्वं करोषि इति रूपम्।

**22. आद्यन्तौ टकितौ। (१-१-४६)**

आद्यन्तावयवौ

द्विपदं सूत्रम्। आदिः च अन्तः च आद्यन्तौ। टकारः इत् यस्य सः टित्। ककारः इत् यस्य सः कित्। टित् च कित् च टकितौ। टित्कितौ यस्योक्तौ तस्य आद्यान्तावयवौ स्तः। यथा - षड् सन्तः इत्यत्र 'डः सि धुट्' इति धुडागमः। धुटि ट् इत्। अनेन परिभाषासूत्रेण टित्त्वात् आद्यावयवे षड् ध् सन्तः। 'खरि' इति चर्त्वे षड् त् सन्तः। पुनरपि चर्त्वे षट् त् सन्तः इति रूपम्।

**23. ङ्णोः कुक्टुक् शरि। (८-३-२८)**

कुक्टुगौ आगमौ

त्रिपदं सूत्रम्। अनेन सूत्रेण कुक्टुक् इत्येतौ आगमौ विधीयेते ङकारणकारयोः कुक्टुको आगमौ स्तः शरि। यथा - प्राङ् षष्ठः इति स्थिते 'ङ्णोः कुक्टुक् शरि' इति सूत्रेण विकल्पेन कुगागमे प्राङ् क् षष्ठः।

**24. चयो द्वितीयाः शरि पौष्करसादेरिति वाच्यम्।(वार्तिकम्)**

वर्गद्वितीयाः

चयः द्वितीयाः शरि पौष्करसादेः इति वाच्यम् इति षट् पदानि सन्ति। अनेन वार्तिकेन वर्गद्वितीयाः विकल्पेन विधीयन्ते। शरि परे झयः स्थाने विकल्पेन वर्गद्वितीयाः स्युः पौष्करसादेः मते। यथा - प्राङ् षष्ठः इत्यत्र 'ङ्णोः कुक्टुक् शरि' इति सूत्रेण विकल्पेन कुगागमे प्राङ् क् षष्ठः। 'चयो द्वितीयाः शरि पौष्करसादेरिति वाच्यम्' इति वार्तिकेन वर्गद्वितीये प्राङ् ख् षष्ठः। वर्गद्वितीयाभावे प्राङ् क् षष्ठः, प्रङ्क्षष्ठः। कुगागमाभावे प्राङ् षष्ठः। एवं सुगण् ठ् षष्ठः, सुगण् ट् षष्ठः, सुगण् षष्ठः।

**सन्धत्त** सुगण् षष्ठः।

सुगण् ट् षष्ठः - ङ्णोः कुक्टुक् शरि।
सुगण् ठ् षष्ठः - चयो द्वितीयाः शरि पौष्करसादेरिति वाच्यम्।
सुगण् ट् षष्ठः- वर्गद्वितीयाभावे।
सुगण् षष्ठः - टुगः अभावे।

**नश्च। (८-३-३०)**

धुडागमः

नः च इति द्विपदं सूत्रम्। अनेन सूत्रेण विकल्पेन धुडागमः विधीयते। नान्तात्परस्य सस्य धुड् वा स्यात्। यथा - सन् + सः इत्यत्र 'नश्च' इति सूत्रेण विकल्पेन धुडागमे सन् ध् सः। 'खरि च' इति सूत्रेण चर्त्वे सन्त्सः इति रूपम् । धुडागमाभावे सन् सः।

**25. शि तुक्। (८-३-३१)**

तुगागमः

द्विपदं सूत्रम्। अनेन सूत्रेण विकल्पेन तुगागमः विधीयते। पदान्तस्य नस्य शे परे तुग्वा स्यात्। यथा - सन् शम्भुः इत्यत्र "शि तुक्" इति सूत्रेण विकल्पेन तुगागमे सन् त् शम्भुः। 'स्तोः श्चुना श्चुः' इति सूत्रेण तकारस्य श्चुत्वे सन् च् शम्भुः। पुनरपि श्चुत्वे नकारस्य ञत्वे सञ् च् शम्भुः। 'शश्छोऽटि' इति सूत्रेण शकारस्य विकल्पेन छत्वे सञ् च् छम्भुः। 'झरो झरि सवर्णे' इति सूत्रेण वैकल्पिकत्वेन झरः चकारलोपे सञ्छम्भुः इति रूपम्। चकारस्य लोपाभावपक्षे

सञ्च्छम्भुः। छत्वाभावे चकारस्य लोपाभावे च सञ्च्छम्भुः। 'शि तुक्' इति तुगभावे श्चुत्वे सञ्शम्भुः इति चतुर्थ रूपम्।

**26. ङमो ह्रस्वादचि ङमुण्णित्यम्। (८-३-३२)**

ङमुडागमः

ङमः ह्रस्वात् अचि ङमुट् नित्यम् इति पञ्च पदानि सन्ति। अनेन सूत्रेण ङमुडागमः विधीयते। ङम् इति प्रत्याहारे ङणनाः सन्ति। ङमुडि ङट् णट् नट् च सन्ति। ह्रस्वात्परो यो ङम् तदन्तं यत्पदं तस्मात्परस्य अचो नित्यं ङमुडागमः स्यात्। यथा- प्रत्यङ् + आत्मा इत्यत्र 'ङमो ह्रस्वादचि ङमुण्णित्यम्' इति सूत्रेण ङमुडागमे प्रत्यङ् ङ् आत्मा, प्रत्यङ्ङात्मा इति। एवं सुगण ईशः- सुगण्णीशः। सन् अच्युतः सन्नच्युतः।

**27. समः सुटि। (८-३-५)**

रेफादेशः

द्विपदं सूत्रम्। अनेन सूत्रेण मकारस्य रुत्वं विधीयते। समो रुः स्यात् सुटि। यथा - सम् + कर्ता इत्यत्र' सम्परिभ्यां करोतौ भूषणे' इति सुटि अनुबन्धलोपे सम् स् कर्ता। अत्र 'समः सुटि' इति सूत्रेण मकारस्य रुत्वे सर् स् कर्ता।

**28. अनुनासिकात्परोऽनुस्वारः। (८-३-४)**

अनुस्वारागमः

अनुनासिकात् परः अनुस्वारः इति त्रिपदं सूत्रम्। अनेन सूत्रेण अनुस्वारागमः विधीयते। अनुनासिकं विहाय रो पूर्वस्मात् परोऽनुस्वारागमः स्यात्। यथा - सम् कर्ता इत्यत्र 'सम्परिभ्यां करोतौ भूषणे' इति सुडागमे सम् म् कर्ता। 'समः सुटि' इति मस्य रुत्वे सर् स्कर्ता। 'अनुनासिकात्परोऽनुस्वारः' इति सूत्रेण अनुस्वारागमे संर् स्कर्ता।

**29. खरवसानयोर्विसर्जनीयः। (८-३-१५)**

विसर्गादेशः

खरवसानयोः विसर्जनीयः इति द्विपदं सूत्रम्। अनेन रेफस्य विसर्गः विधीयते। खरि अवसाने च पदान्तस्य रेफस्य विसर्गः स्यात्। यथा - संर् स्कर्ता इत्यत्र 'खरवसानयोर्विसर्जनीयः' इति विसर्गे सः स्कर्ता इति।

**30. सम्पुम्कानां सो वक्तव्यः। (वार्तिकम्)**

सकारादेशः

सम्पुम्कानां सः वक्तव्यः इति त्रिपदं वार्तिकम्। अनेन वार्तिकेन रेफस्य सकारः विधीयते। सम्पुम्कानां सम्बन्धः यः विसर्गः तस्य सकारः आदेशत्वेन स्यात्। यथा - संः स्कर्ता इत्यत्र 'सम्पुम्कानां सो वक्तव्यः' इति वार्तिकेन सत्वे संस्कर्ता इति रूपम्।

**सन्धत्त** - सम् कर्ता इत्यत्र 'सम्परिभ्यां करोतौ भूषणे' इति सूत्रेण सुडागमे सम् स् कर्ता। 'समः सुटि' इति मस्य रुत्वे सर् स् कर्ता। 'अत्रानुनासिकः पूर्वस्य तु वा' इति सूत्रेण विकल्पेन अनुनासिके सँर् स्कर्ता। 'अनुनासिकात्परोऽनुस्वारः' इति अनुस्वारे संर् स्कर्ता। 'खरवसानयोर्विसर्जनीयः' इति रेफस्य विसर्गे संः स्कर्ता। अनुनासिकपक्षे सँः स्कर्ता। 'सम्पुम्कानां सो वक्तव्यः' इति विसर्गस्य सत्वे संस्कर्ता इति। अनुनासिकपक्षे सँस्कर्ता इति रूपम्।

### 31. नश्छव्यप्रशान्। (८-३-७)

नस्य रुत्वम्

नः छवि अप्रशान् इति त्रिपदं सूत्रम्। अनेन सूत्रेण नस्य रुत्वं विधीयते। अम्परे छवि नान्तस्य पदस्य रुः स्यात्। यथा - चक्रिन् त्रायस्व इत्यत्र 'नश्छव्यप्रशान्' इति सूत्रेण रुत्वे चक्रिर् त्रायस्व।

### 32. विसर्जनीयस्य सः। (८-३-३४)

विसर्गस्य सः

द्विपदं सूत्रम्। अनेन सूत्रेण विसर्गस्य सकारः विधीयते। खरि विसर्जनीयस्य सः स्यात्। यथा - चक्रिन् त्रायस्व इत्यत्र 'नश्छव्यप्रशान्' इति सूत्रेण नस्य रुत्वे चक्रिर् त्रायस्व। 'अत्रानुनासिकः पूर्वस्य तु वा' इति विकल्पेन अनुनासिकागमे चक्रिँर् त्रायस्व। 'खरवसानयोर्विसर्जनीयः' इति विसर्गे चक्रिँः त्रायस्व। 'विसर्जनीयस्य सः' इति विसर्गस्य सत्वे चक्रिँस्त्रायस्व इति रूपम्। अनुनासिकाभावे 'अनुनासिकात्परोऽनुस्वारः' इत्यनुस्वारे चक्रिंस्त्रायस्व इति रूपम्।

'नश्छव्यप्रश्नान्' इत्यत्र अप्रश्नान् इति किम्? प्रश्नान् इत्यत्र रुत्वं न। यथा प्रश्नान् तनोति। पदान्तस्य इति किम्? पदान्तस्य नस्य रुत्वम्। हन् ति इत्यत्र पदान्ताभावात् न रुत्वम्।

### 33. तस्य परमाम्रेडितम् । (८-१-२)

आम्रेडितसंज्ञा

तस्य परम् आम्रेडितम् इति त्रिपदं सूत्रम्। अनेन सूत्रेण आम्रेडितसंज्ञः विधीयते। द्विरुक्तस्य परं रूपमाम्रेडितं स्यात्। यथा कान् कान् इत्यत्र परस्य कान् इत्यस्य आम्रेडितसंज्ञा। एवं 'तान् तान्' इत्यत्र परस्य तान् इत्यस्याम्रेडितत्वम्। 'कानाम्रेडिते' इत्यादावस्य प्रयोजनम्।

### 34. कानाम्रेडिते। (६-१-७३)

रुत्वम्

कान् आम्रेडिते इति द्विपदं सूत्रम्। अनेन सूत्रेण नकारस्य रुत्वं विधीयते। कान्नकारस्य रुः स्यादाम्रेडिते परे। यथा - कान् कान् इति स्थिते 'कानाम्रेडिते'

इति सूत्रेण आम्रेडितसंज्ञकस्य पूर्वस्य नकारस्य रुत्वे कार् कान्। ‘अत्रानुनासिकः पूर्वस्य तु वा’ इति इति विकल्पेन अनुनासिके काँर् कान्। 'खरवसानयोर्विसर्जनीयः’ इति विसर्गे काँः कान्। ‘सम्पुम्कानां सो वक्तव्यः' इति वार्तिकेन सत्वे काँस्कान् इति रूपम्। अनुनासिकाभावे ‘अनुनासिकात्परोऽनुस्वारः' इत्यनुस्वारे कांस्कान् इति।

**35. छे च। (६-१-७३)**

तुगागमः

द्विपदं सूत्रम्। अनेन सूत्रेण तुगागमः विधीयते। ह्रस्वस्य छे परे तुगागमः स्यात्। यथा - शिव + छाया इत्यत्र 'छे च' इति सूत्रेण तुगागमे शिव त् छाया। 'स्तोः श्चुना श्चुः' इति श्चुत्वे शिवच्छाया इति रूपम्।

## 1.1.4 विसर्गसन्धिः।

स्वरव्यञ्जनसन्ध्योरनन्तरं प्रतिपाद्यते विसर्गसन्धिः। यत्र विसर्गस्य विकारः दृश्यते तत्रैव विसर्गसन्धिः। विसर्गस्य रेफादेशः, विसर्गस्य सकारादेशः, विसर्गलोपः, विसर्गस्य उत्वं, विसर्गस्य यादेशः, नकारस्य रुत्वं च अत्र विशदयन्ति।

**1. विसर्जनीयस्य सः (८-३-३४)**

विसर्गस्य सः

विसर्जनीयस्य सः इति पदद्वयम्। 'खरवसानयाविसर्जनीयः' इत्यतः खरि इति अनुवर्तते। खरि विसर्जनीयस्य सः स्यात्। खरि (सप्तमी) - खरि परे। खर् - ख फ छ ठ थ च ट त क प श ष स। विसर्जनीयस्य (षष्ठी) - विसर्गस्य स्थाने। सः (प्रथमा) - सकारः स्यात्। यथा - विष्णुः + त्राता इति स्थिते 'विसर्जनीयस्य सः' इति सूत्रेण तकारे परे (खरि परे) विसर्गस्य स्थाने सकारादेशे विष्णुस्त्राता इति रूपम्। एवं शिरः + छेदम् इति स्थिते छकारे परे (खरि परे) 'विसर्जनीयस्य सः' इत्यनेन विसर्गस्य सकारादेशे शिरस् छेदम् इति स्थिते 'स्तोः श्चुना श्चुः' इति सूत्रेण सकारस्य श्चुत्वे (शकारादेशे) शिरश्छेदम् इति रूपम्।

**2. वा शरि (८-३-३६)**

विसर्गः

वा शरि इति पदद्वयम्। 'विसर्जनीयस्य सः' इत्यतः विसर्जनीयस्य इति 'शर्परे विसर्जनीयः' इत्यतः विसर्जनीयः इति अनुवर्तते। शरि विसर्गस्य विसर्गो वा स्यात्। शरि (सप्तमी)- शर्परे शर् श ष स। विसर्जनीयस्य (षष्ठी) - विसर्गस्य स्थाने विसर्जनीयः (प्रथमा) - विसर्गः वा विकल्पेन भवति। यथा - हरिः + शेते इति स्थिते 'वा शरि' इति सूत्रेण शकारे परे विसर्गस्य विसर्गादेशे हरिः शेते

इति रूपम्। तदभावे 'विसर्जनीयस्य सः' इति सूत्रेण शकारपरे (खरि परे) विसर्गस्य सकारादेशत्वात् हरिस् शेते इति जाते 'स्तोः श्चुना श्चुः' इति सूत्रेण सकारस्य शकारादेशत्वात् हरिश्शेते इति रूपम्। एवं मनः सुखम् - मनस्सुखम्, मनः शल्यम् मनश्शल्यम्, इत्याद्युदाहरणानि द्रष्टव्यानि।

### 3. ससजुषो रुः। (८-२-६६)

रुत्वम्

ससजुषोः रुः इति पदच्छेदः। अनेन सूत्रेण रुत्वं विधीयते। सश्च सजुष् च ससजुषौ तयोः ससजुषोः। पदान्तस्य सस्य सजुष्शब्दस्य च रुः स्यात्। पदान्तस्य सस्य पदान्तस्य सकारस्य, सजुष्शब्दस्य सजुष् शब्दान्तं यत् पदं तदन्तस्य षकारस्य रुः स्यात्। यथा - रामशब्दात् प्रथमाविभक्तौ एकवचने सुप्रत्यये अनुबन्धलोपे च रामस् इति स्थिते 'ससजुषो रुः' इति सूत्रेण पदान्तस्य रुत्वे रामर् 'खरवसानयोर्विसर्जनीयः' इति सूत्रेण रेफस्य विसर्गादेशत्वात् रामः इति रूपम्।

### 4. अतो रोरप्लुतादप्लुते। (६-१-११३)

अतः रोः अप्लुतात् अप्लुते इति चतुष्पदम् सूत्रम्। अनेन सूत्रेण रोः उत्वं विधीयते। 'ऋत उत्' इत्यतः उः इत्यनुवर्तते। अप्लुतात् परस्य रोः (षष्ठी) स्थाने (रेफस्य स्थाने) अप्लुते अति (अप्लुते अकारे परे) उः उकारः आदेशः स्यात्। अप्लुतादतः परस्य रोरुः स्यादप्लुतेऽति। यथा शिवस् + अर्च्यः इति स्थिते 'ससजुषो रुः' इति सूत्रेण सकारस्य रुत्वे शिव र् अर्च्यः। 'अतो रोरप्लुतादप्लुते' इति सूत्रेण रेफस्य उकारादेशे शिव उ अर्च्यः इति संजाते 'आद्गुणः' इति सूत्रेण वकारात्परस्य अकारस्य उकारस्य च स्थाने ओकारादेशे शिव् ओ अर्च्यः, शिवो अर्च्यः। 'एङः पदान्तादति' इति सूत्रेण पूर्वरूपे शिवोऽर्च्यः इति रूपम्।

उत्वम्

### 5. हशि च। (६-१-११४)

हशि च इति द्विपदं सूत्रम्।अनेन सूत्रेण उत्वं विधीयते। 'अतो रोरप्लुतादप्लुते' इत्यतः अतः रोः अप्लुतात् इति, 'ऋतः उत्' इत्यतः उत् इति च अनुवर्तते। अप्लुतात् अतः परस्य रोः उः स्यात् हशि। अप्लुतात् अतः - अप्लुताकारात् परस्य रोः (षष्ठी) रोः स्थाने (रेफस्य स्थान) हशि (सप्तमी) हशि परे (हश्- ह य व र ल ज म ङ म न झ भ घ ढ ध ज ब ग ड द) उः (प्रथमा) उकारादेशः स्यात्। यथा - शिवस् वन्द्यः इत्यत्र 'ससजुषो रुः' इति रुत्ये शिवर् बन्धः इति स्थिते 'हशि च' इति सूत्रेण रेफस्य उकारादेशे शिव उ वन्द्यः इति। 'आदगुणः'

इति सूत्रेण वकारात्परस्य अकारस्य उकारस्य च स्थाने गुणादेशे (ओकारादेशे) शिवो वन्द्यः इति रूपं सिद्धम्।

**6. भो- भगो-अघोअपूर्वस्य योऽशि (८-३-१७)**

यादेशः

भो-भगो-अघो अपूर्वस्य, यः, अशि इति पदत्रयम्। 'रोऽसुपि' इत्यतः रोः इत्यनुवर्तते। अनेन सूत्रेण रेफस्य यादेशः विधीयते। भोभगो अघो अपूर्वस्य रोः यादेशः स्यात् अशि परे। यथा - भोस् देवाः इति स्थिते 'ससजुषो रुः इति रुत्वे भोर् देवाः। 'भो- भगो-अघोअपूर्वस्य योऽशि इति सूत्रेण रेफस्य यादेशे भोय् देवाः। 'हलि सर्वेषाम्' इति सूत्रेण यकारस्य लोपे भो देवाः। एवं भगोस् नमस्ते भगो नमस्ते। अघोस् याहि अघो याहि।

**7. हलि सर्वेषाम्। (८-३-२२)**

यलोपः

द्विपदं सूत्रम्। अनेन सूत्रेण यकारस्य लोपः विधीयते। भो-भगो-अघो -अपूर्वस्य यस्य लोपः स्यात् हलि। यथा भगोस् नमस्ते इत्यत्र 'ससजुषो रुः इति सूत्रेण सकारस्य रुत्वे भगोर् नमस्ते। 'भो भगो-अघो- अपूर्वस्य योऽशि' इति सूत्रेण रेफस्य यादेशे भगोय् नमस्ते। 'हलि सर्वेषाम्' इति यकारलोपे भगो नमस्ते इति रूपम् ।

**8. रोऽसुपि । (८-२-६९)**

रुत्वम्

रः असुपि इति द्विपदं सूत्रम्। अनेन सूत्रेण अहन् शब्दस्य नकारस्य रुत्वं विधीयते। अह्नो रेफादेशः स्यात् न तु सुपि। यथा- अहन् + अहः इति स्थिते 'रोऽसुपि' इति सूत्रेण नकारस्य रुत्वे अहर् अहः अहरहः इति रूपम्। एवं अहन् + गणः - अहर्गणः। रेफस्य लोपः।

**9. रोरि। (८-३-१४)**

रेफस्य लोपः

रः रि इति द्विपदं सूत्रम्। अनेन सूत्रेण रेफस्य लोपः विधीयते। रेफस्य रेफे परे लोपः स्यात्। यथा - पुनर् रमते इत्यत्र 'रोरि' इति सूत्रेण र् इत्यस्य लोपे पुन रमरे। 'ढ्रलोपे पूर्वस्य दीर्घोऽणः' इति सूत्रेण अणः दीर्घे पुना रमते इति रूपम्।

**10. ढ्रलोपे पूर्वस्य दीर्घोऽणः। (८-३-१११)**

अणः दीर्घः

ढ्रलोपे पूर्वस्य दीर्घः अणः इति चतुष्पदं सूत्रम्। अनेन सूत्रेण पूर्वस्य अणः दीर्घः विधीयते। ढरेफयोः लोपनिमित्तयोः पूर्वस्य अणः दीर्घः स्यात्। ढ् च र् च ढ्रौ, तौ लोपयतीति ढ्रलोपः, तस्मिन् ढ्रलोपे। यथा - हरिस् रम्यः इत्यत्र 'ससजुषो रुः'

इति रुत्वे हरिर् रम्यः। 'रोरि' इति सूत्रेण पूर्वस्य रेफस्य लोपे हरि रम्यः। अत्र 'ढ्रलोपे पूर्वस्य दीर्घोऽणः' इति सूत्रेण पूर्वस्य अणः दीर्घे हरीरम्यः। एवं शम्भुस् + राजते शम्भू राजते।

एवं स्वाराज्यं, नीरवः, नीरसः, नीरूपः इत्याद्युदाहरणानि द्रष्टव्यानि।

अणः इति किम्? अणः एव दीर्घः। तृढ् ढ इत्यत्र 'ढो ढे लोपः' इति सूत्रेण ढकारलोपः। अत्र ऋकारस्य दीर्घो न। अणः अभावात्। तृढः इति रूपम्। विप्रतिषेधे परं कार्यम्।

## Summarised Overview

हलन्त्यम् इति सूत्रेण इत् संज्ञा। अदर्शनम् लोपः इति लोपः संज्ञा। आदिरन्त्येन सहेता इति सूत्रेण प्रत्याहारः संज्ञा। ऊकालोऽज्हस्वदोर्घप्लुतः इति सूत्रेण ह्रस्वदीर्घप्लुतसंज्ञाः। उच्चैरुदात्तः इति सूत्रेण उदात्तसंज्ञा।नीचैरनुदात्तः इति सूत्रेण अनुदात्तसंज्ञा समाहारः स्वरितः इति सूत्रेण स्वरितसंज्ञा। परः सन्निकर्षः संहिता इति सूत्रेण संहितासंज्ञा। हलोऽनन्तराः संयोगःइति सूत्रेण संयोगसंज्ञा। सुप्तिङन्तं पदम् इति सूत्रेण पदं संज्ञा। इको यणचि इति सूत्रेण यण् विधीयते। झलां जश् झशि इति सूत्रेण जश्त्वम्। एचोऽयवायावः इति सूत्रेण अयवायावः विधीयन्ते। अदेङ्गुणः इति सूत्रेण गुणसंज्ञा। आद्गुणः इति सूत्रेण गुणादेशः। उरण् रपरः इति सूत्रेण रपरत्वं विधीयते। पूर्वत्रासिद्धम् इति सूत्रेण पूर्वत्र असिद्धत्वं विधीयते। वृद्धिरादैच् इति सूत्रेण वृद्धिसंज्ञा विधीयते। वृद्धिरेचि इति सूत्रेण वृद्धिरेकादेशः विधीयते। दूराद्धूते च इति सूत्रेण प्लुतः विधीयते।

प्लुतप्रगृह्या अचि नित्यम् इति सूत्रेण प्रकृतिभावः। ईदूदेद्द्विवचनं प्रगृह्यम् इति सूत्रेण प्रगृह्यसंज्ञा विधीयते। चादयोऽसत्वे इति सूत्रेण निपातसंज्ञा विधीयते। निपात एकाजनाङ् इति सूत्रेण प्रगृह्यसंज्ञा।

स्तोः श्चुना श्चुः इति सूत्रेण श्चुत्वम् विधीयते। शात् इति सूत्रेण श्चुत्वनिषेधः विधीयते। ष्टुना ष्टुः इति सूत्रेण ष्टुत्वं विधीयते। न पदान्ताट्टोरनाम् इति सूत्रेण पदान्तात् टवर्गात्परस्य ष्टुत्वनिषेधः। अनाम्नवतिनगरीणामिति इति वार्त्तिकेन नाम्, नवति, नगरि एषां ष्टुत्वनिषेधो न। तोः षि इति सूत्रेण तवर्गस्य षकारे परे न ष्टुत्वम्। झलां जशोऽन्ते इति सूत्रेण जश्त्वम्। तोर्लि इति सूत्रेण हलः परसवर्णविधिः। उदः स्थास्तम्भोः पूर्वस्य इति सूत्रेण हलपरसवर्णविधिः। झरो झरि सवर्णे इति सूत्रेण विकल्पेन झर लोपः। खरि च इति सूत्रेण चर्त्वविधिः। शश्छोऽटि इति सूत्रेण विकल्पेन छत्वविधिः। छत्वममीति वाच्यम् वार्तिकेन छत्वं विधीयते। वा पदान्तस्य इति सूत्रेण विकल्पेन अनुस्वारस्य परसवर्णः। मो राजि समः क्वौ इति सूत्रेण मस्य मः। आद्यन्तौ टकितौ इति सूत्रेण आद्यन्तत्वे विधीयेते। ङ्णोः कुक्टुक् शरि इति सुत्रेण कुक् टुक् इत्येतौ आगमौ विकल्पेन। च यो द्वितीयाः शरि पौष्करसादेरिति वाच्यम् इति वार्तिकेन वर्गद्वितीयादेशाः। डः सि धुट्, नश्चइत्योतौ सूत्राभ्यां विकल्पेन धुडागमः। शि तुक् इति सूत्रेण विकल्पेन तुगागमः। सम्पुम्काना सो वक्तव्यः इति वार्तिकेन विसर्गस्य सकारादेशः।

विसर्जनीयस्य सः इति सूत्रेण विसर्गस्य सकारः विधीयते। तस्य परमाम्रेडितम् इति सूत्रेण आम्रेडितसंज्ञा। छे च इति सूत्रेण तुगागमः। पदान्ताद्वा इति सूत्रेण वैकल्पिकेन तुगागमः।

विसर्जनीयस्य सः इति सूत्रेण विसर्गस्य सकारादेशः विधीयते। अतो रोरप्लुतादप्लुते इति सूत्रेण रोः उत्वं विधीयते। हशि च इति सूत्रेण हशि परे रोः उत्वं विधीयते। रोऽसुपि इति सूत्रेण अहन् शब्दस्य नकारस्य रुत्वं विधीयते। रोरि इति सूत्रेण रेफस्य लोपः विधीयते। ङमो ह्रस्वादचि ङमुण्नित्यम् इति सूत्रेण ङमुडागमः विधीयते। समः सुटि इति सूत्रेण मकारस्य रेफादेशविधिः। अत्रानुनासिकः पूर्वस्य तु वा इति सूत्रेण रेफस्य विकल्पेन अनुनासिकः। अनुनासिकात्परोऽनुस्वारः इति सूत्रेण रेफपूर्वस्यानुस्वारागमः। खरवसानयोर्विसर्जनीयः इति सूत्रेण रेफस्य विसर्गादेशः।

## Assignments

1. स्वराणां भेदाः के? विशदयत ।
2. उच्चारणस्थानानि कानि तानि विशदयत।
3. तुल्यास्यप्रयत्नं सवर्णम् -सूत्रं व्याख्यात।
4. परः सन्निकर्षः संहिता -सूत्रं व्याख्यात।
5. सुप्तिङन्तं पदम् -सूत्रं व्याख्यात।
6. अयवायावसन्धिं विशदयत।
7. वृद्धिसन्धिं विशदयत।
8. निपात एकाजनाङ् विशदयत।
9. ष्टुत्वविधिः विशदयत।
10. सुधी उपास्यः - सन्धिकार्याणि स्पष्टयत।
11. शिवो अर्च्यः - सप्रमाणं सन्धत्त।
12. पुना रमते - सप्रमाणं सन्धत्त।
13. विसर्गसन्धिः विशदयत।

## Suggested Readings


1. पदसंस्कारचन्द्रिका. कैकुलका रामवारियर, केरलसाहित्य अकादमि तृश्शूर २००५
2. लघुपाणिनीयम्. ए आर् राजराजवर्मा, केरलसर्वकलाशाला तिरुवनन्तपुरम्।
3. पाणिनीयप्रद्योतम्. ऐसि चाक्को, भाषा इन्स्टिट्यूट, तिरुवनन्वपुरम्।
4. प्रक्रियाभाष्यम्. फा .जोन् कुन्नपप्लि, नाषणल् बुक् स्टाल् कोट्टयम्।

## References


1. लघुसिद्धान्तकौमुदी.वरदराजः,चौखम्बा संस्कृत सीरीस अकादमि, वाराणसी २००५.
2. श्रीवरदराजाचार्यकृतः लघुसिद्धान्तकौमुदी. श्रीसूर्यनारायणशुक्लः, 'बालमनोरमा' संस्कृत - हिन्दीटीका सहित प्रकाशक, :वाराणासी, संस्कृत संस्थान सीरीज, १०००
3. श्रीमद्वरदराजाचार्यप्रणीता लघुसिद्धान्तकौमुदी. श्रीधरमुखोल्लासिनी, हिन्दी- व्याख्यासमन्विता व्याख्याकारः गोविन्द प्रसाद शर्मा, चौखम्बा सुरभारती प्रकाशन, वाराणसी, २००७
4. लघुसिद्धान्तकौमुदी प्रथमो भागः. प्रोफसर् आर् वासुदेवन् पोट्टि, सर्वकारीयसंस्कृतकलालयः, तृप्पूणित्तुरा, १९९३


**Space for Learner Engagement for Objective Questions**

Learners are encouraged to develop objective questions based on the content in the paragraph as a sign of their comprehension of the content. The Learners may reflect on the recap bullets and relate their understanding with the narrative in order to frame objective questions from the given text. The University expects that 1 - 2 questions are developed for each paragraph. The space given below can be used for listing the questions.

UNIT 2

# अजन्तपुंलिङ्गः पतिसमासपर्यन्तम्

## Learning Outcomes

- सुप्रत्ययान् अवगच्छन्ति।
- अजन्तपुल्लिङ्गशब्दान् तेषां निष्पत्तिं जानन्ति।
- अजन्तपुल्लिङगशब्दानां परिचयः।
- एकं शब्दं ज्ञात्वा सदृशान् बहून्शब्दान् वक्तुं क्षमतोत्पादनम्।
- अजन्तपुंलिङ्गप्रकरणस्थानि सूत्राणि तेषामर्थं च अवगच्छन्ति।
- भाषाप्रयोगावेलायां विभक्तिपरिवर्तनं जानन्ति।

## Background

भवद्भिः संज्ञा, अच्सन्धिः, हल्सन्धिः, विसर्गसन्धिश्चेति विषयाः पठिताः एव। सम्प्रति भवद्भिः लघु-सिद्धान्तकौमुद्याः अजन्त-शब्द-प्रकरणस्य सूत्राणि पठितुमवसरः संप्राप्तः। अकारान्त - इकारान्त - उकारान्त - ऋकारान्त - ऐकारान्त - ओकारान्त- पुंलिङ्गशब्दानां सिद्धि-प्रक्रियाः अपि भवद्भिः ज्ञातुं शक्यते। ततः अजन्तपुंलिङ्गशब्दानां सप्त विभक्तिषु सिद्ध-रूपाणि अपि ज्ञास्यन्ति भवन्तः। व्याकरणं भाषां शुद्धिं करोति। भाषा संस्कृतियुक्ता भवेत्। भाषाप्रयोगे पाटवमार्जायितुं व्याकारणज्ञानमावश्यकम्। शब्दानां शुद्धिनिर्णयेन साहित्यलोके प्रवेष्टुं शक्यते। अस्मिन्नेकके साधारणतया अस्माभिः संभाषणादिषु प्रयुक्तानां शब्दानामेव प्रयोगः कृतः। अतः सोत्साहमस्मिन् पाठभागे प्रविशन्तु भवन्तः।

## Keywords

सुप्, विभक्तिः, प्रत्ययः, वचनं, प्रातिपदिकः, सर्वनामम्, अवसान-सम्बुद्धिः-अङ्गसंज्ञाः, णत्वं, नुडागमः, इत्संज्ञा, यादेशः, दीर्घः, स्मात्-स्मिन्, पूर्वसवर्णनिषेधः, गुणादयः।

# Discussion

प्रातिपदिकसंज्ञम्

**1. अर्थवदधातुरप्रत्ययः प्रातिपदिकम् (१-२-४५)**

अर्थवत्, अधातुः, अप्रत्ययः, प्रातिपदिकम् इति पदच्छेदः। अनेन सूत्रेण प्रातिपदिकसंज्ञा विधीयते। धातुं प्रत्ययं प्रत्ययान्तं च वर्जयित्वा अर्थवत् शब्दस्वरूपं प्रातिपदिकसंज्ञं स्यात् इति सूत्रार्थः। अर्थ अस्य अस्ति इति अर्थवत्। अधातुः इति, अप्रत्ययः इति च तस्य विशेषणम्। न धातुः अधातुः। अप्रत्ययः इत्यनेन प्रत्ययभिन्नं प्रत्ययान्तभिन्नं च विवक्षितं वर्तते। एवं धातुं प्रत्ययं प्रत्ययान्तं च वर्जयित्वा अर्थवत् शब्दस्वरूपं प्रातिपदिकसंज्ञं भवति इति सूत्रार्थः। यथा रमन्ते योगिने अस्मिन् इति रामः। अत्र 'राम' इत्यस्य प्रातिपदिकत्वम्।

कृदन्तं-तद्धितान्तं समासाश्च - प्रातिपदिकसंज्ञम्

**2. कृत्तद्धितसमासाश्च (२.२.४६)**

कृत्तद्धितसमासाः, च इति पद च्छेदः। अनेन सूत्रेण प्रातिपदिकसंज्ञा विधीयते। कृत्तद्धितान्तौ समासाश्च प्रातिपदिकसंज्ञाः स्युः इति सूत्रार्थः। पूर्वसूत्रात् 'प्रातिपदिकम्' इत्यनुवर्तते। कृदन्तं, तद्धितान्तं समासाश्च इत्येते प्रातिपदिकसंज्ञकाः स्युः इति सूत्रस्य अर्थः लभ्यते। यथा छिन्नः इति पदे वर्तमानः छिन्न इत्यस्य प्रातिपदिकत्वम्। एवं दशरथि - राजपुरुष इत्यादीनामपि प्रातिपदिकत्वम्।

प्रातिपदिकात् स्वादयः प्रत्ययाः

**3. स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप् (४.१.२)**

एकपदं सूत्रम्। अनेन सूत्रेण स्वाध्यायः प्रत्ययाः विधीयन्ते। सु - ओ - जस् - अम् - औट् - शस् - टा - भ्याम् - भिस् - ङे – भ्याम् – भ्यस् - ङसि - भ्याम् - भ्यस् - ङस् - ओस् - आम् - ङि - ओस् - सुप् इति। ङि- अन्ताद् आबन्तात् प्रातिपदिकात् च परे स्वादयः प्रत्ययाः स्युः। एवं सूत्रार्थः भवति - ङि- अन्ताद् आवन्तात् प्रातिपदिकात् च परे सु-आदयः एकविंशतिः प्रत्ययाः स्युः। तेषां सु-आदीनाम् एकविंशतेः प्रत्यवानाम् (सुबन्त-प्रत्ययानां) वर्गीकरणम्।

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| **प्रथमा** | सु | औ | जस् |
| **द्वितीया** | अम् | औट् | शस् |

| | | | |
|---|---|---|---|
| **तृतीया** | टा | भ्याम् | भ्यस् |
| **चतुर्थी** | ङे | भ्याम् | भ्यस् |
| **पञ्चमी** | ङसि | भ्याम् | भ्यस् |
| **षष्ठी** | ङस् | ओस् | आम् |
| **सप्तमी** | ङि | ओस् | सुप् |

**4. ङ्याप्प्रातिपदिकात् (४.१.१)**

ङ्यन्ताद् आबन्तात् प्रातिपदिकात् च परे स्वादयः

एकपदं सूत्रम्। अनेन सूत्रेण स्वादयाः प्रत्ययाः विधीयन्ते। ङि च, आप् च प्रातिपदिकं च इति ङ्याप्प्रातिपदिकम् (समाहारदन्द्रः), तस्मात् ङ्याप्रातिपदिकात् इति पञ्चमी एकवचनान्तम्। ङि इत्यनेन 'डीप् ङीष् ङि' इत्यादिनां स्त्री-प्रत्ययानां सामान्येन ग्रहणम्। एवमेव आप् इत्यनेन टाप्-डाप्-चाप् इत्येतेषां स्त्रीप्रत्ययानां ग्रहणम्। प्रत्ययग्रहणपरिभाषया च तदन्तग्रहणम्। एवं ङ्यन्ताद् आबन्तात् प्रातिपदिकात् च परे स्वादयः प्रत्ययाः स्युः इति सूत्रार्थः। यथा रमाशब्दः आबन्तः। अत्र 'रमा' इत्यस्य प्रातिपदिकत्वम्। आकारान्त स्त्रीशब्दत्वात् पदत्वं चास्ति।

**5. प्रत्ययः (३.१.९)**

प्रत्ययः इति एकपदं वर्तते। एतद् अधिकारसूत्रम् अस्ति। तत् च प्रथमान्तम् अस्ति। इतः ऊर्ध्वम् आपञ्चमाध्यायपरिसमाप्तेः प्रत्यय शब्दः संज्ञात्वेन अधिक्रियते। अर्थात् अस्य सूत्रस्य अधिकारः तृतीयाध्यायस्य प्रथम पादात् पञ्चमाध्यायपरिसमाप्ति यावत् प्रवर्तते।

**6. परश्च (३.१.२)**

स्वादयः प्रत्ययाः विधीयन्ते

परः च इति द्विपदं सूत्रम्। ङ्यन्तादाबन्तात्प्रातिपदिकाच्च परे स्वादयः प्रत्ययाः स्युः। एतद् अपि अधिकारसूत्रम् अस्ति। परः इति प्रथमान्तम्। च इति अव्ययम् अस्ति। अत्र प्रत्ययः इति पदं च अनुवर्तते। ततश्च ङ्यन्ताद् आबन्तात् प्रातिपदिकात् च परे स्वादयः प्रत्ययाः स्युः इति सूत्रस्य अर्थः। अर्थात् यस्मात् प्रत्ययः विधीयते ततः प्रत्ययाः परे स्युः इत्यवबोद्धव्याः।

**7. सुपः (२.४.१०३)**

सुपः इति एकपदम् वर्तते। अनेन सूत्रेण एकवचनद्विवचनबहुवचन- संज्ञानि विधीयन्ते। सुपस्त्रीणि त्रीणि वचनान्येकशः एकवचन द्विवचनबहुवचनसंज्ञानि

सुपः एकवचन द्विवचन बहुवचन - संज्ञानि स्युः

स्युः इति सूत्रार्थः। 'सुप्' इति प्रत्याहारस्य षष्ठीएकवचने रूपं सुपः। त्रीणि त्रीणि, एकवचन द्विवचन बहुवचनानि, एकशः इति अनुवर्तते। एवं सुप्सम्बन्धीनि त्रीणि त्रीणि वचनानि क्रमेण एकवचन-द्विवचन-बहुवचन-संज्ञानि स्युः इति सूत्रार्थः। अर्थात् प्रथमादि-सप्त-विभक्तिषु प्रथमप्रत्ययस्य एकवचनसंज्ञा, द्वितीयप्रत्ययस्य द्विवचनसंज्ञा तथा तृतीयप्रत्ययस्य च बहुवचनसंज्ञा।

**8. द्वयेकयोर्द्विचनैकवचने (१.४.२२)**

द्वित्व एकत्वयोः यथाक्रमं द्विवचनं एकवचनं च

द्वयेकयोः द्विवचनैकवचने इति पदद्वयं वर्तते। द्वित्वैकत्वयोरेते स्तः इति सूत्रार्थः। द्वित्व - एकत्वयोः यथाक्रमं द्विवचनं एकवचनं च भवतः। यतो हि द्विपदेन पदार्थ-द्वयस्य तथा च एकपदेन एकस्य पदार्थस्य बोधः भवेत्।

**9. विरामोऽवसानम् (१.४.९१०)**

अवसानसंज्ञः

विरामः अवसानम् इति पदच्छेदः। अनेन सूत्रेण अवसआनसंज्ञः विधीयते। वर्णानामभावोऽवसानसंज्ञः स्यात् इति सूत्रार्थः। रुत्वविसर्गे रामः। विरामशब्दस्य अर्थद्वयं सम्भवति। प्रथमः- विरम्यते अस्मिन्निति विरामः। अर्थात् उच्चारणस्य स्थगनं यत्र क्रियते तद् विरमणम्। उच्चारणस्य स्थगनम् अन्तिमवर्णस्य समीपे क्रियते। अतः एतन्मतानुसारम् अन्तिमवर्णः अवसानसंज्ञकः भवति। द्वितीयः- विरमणं विरामः। विरमणं नाम क्रियायाः अभावः। यथा 'राम' इति प्रातिपदिके अकारानन्तरं वर्णः न। अतः तादृशस्य अकारस्यावसानसंज्ञां लभते।

**रामः**

अकारान्तः पुलिङ्गः प्रथमैकवचनम्। रामशब्दात् प्रथमैकवचने सुप्रत्यये राम सु इति जाते 'उपदेशेऽजनुनासिक इत्' इति इकारस्य इत्संज्ञायां 'तस्य लोपः' इत्यनेन लोपे राम् स् इति स्थिते 'सजुषो रुः' इति सूत्रेण रुत्वे 'खरवसानयोर्विसर्जनीयः' इति सूत्रेण पदान्तरेफस्य विसर्गे 'रामः' इति सिद्धम्

**10. सरूपाणामेकशेष एकविभक्तौ (१.२.६४)**

सरूपाणि एक एवं शिष्यते

सरूपाणाम् एकशेषः एकविभक्तौ इति पदच्छेदः। एकविभक्तौ यानि सरूपाण्येव दृष्टानि तेषामेक एव शिष्यते इति सूत्रार्थः। एका चासौ विभक्तिश्चेति एकविभक्तिः तस्याम् 'एक- विभक्तौ'। समान रूपं येषां तानि सरूपाणि (बहुव्रीहिः)। शिष्यते इति शेषः। यथा रामराम औ इत्यत्र अनेन सूत्रेण एकः रामशब्दः शिष्यते। राम औ।

### 11. प्रथमयोः पूर्वसवर्णः (६.१.१०२)

पूर्वसवर्णदीर्घ एकादेशः

प्रथमयोः पूर्वसवर्णः इति पदच्छेदः। अनेन सूत्रेण पूर्वसवर्णदीर्घमेकादेशः विधीयते। अकः प्रथमाद्वितीययोरचि पूर्वसवर्णदीर्घः एकादेशः स्यात्। दीर्घः अकः अचि एकः पूर्वपरयोः इत्यादयः अनुवर्तन्ते। प्रथमयोः इति अवयवषष्ठी। यथा राम औ इत्यत्र 'प्रथमयोः पूर्वसवर्णः' इति सूत्रेण पूर्वसवर्णदीर्घस्य प्रसक्तिरस्ति।

### 12. नादिचि (६.१.१०४)

न पूर्वसवर्णदीर्घः

न आत् इचि इति पदच्छेदः। अनेन सूत्रेण पूर्वसवर्णदीर्घः न विधीयते। आदिचि परे न पूर्वसवर्णदीर्घः। वृद्धिरेचि। रामौ। पूर्वसवर्णः दीर्घः इति अनुवर्तेते। यथा - राम औ प्रत्यये इत्यत्र औ इति इच्प्रत्याहारे परे सवर्णदीर्घस्य निषेधः भवति। ततश्च वृद्धिरेचि इति सूत्रेण वृद्धिः एकादेशे रामौ इति सिद्ध्यति।

### रामौ

रामशब्दात् प्रथमाद्विवचनविवक्षायां 'औ' प्रत्यये राम-औ इत्यत्र 'वृद्धिरेचि' इति सूत्रेण वृद्धिं प्राप्ते तं प्रबाध्य 'प्रथमयोः पूर्वसवर्णः' इति सूत्रेण पूर्वसवर्णदीर्घ प्राप्ते 'नादिचि' इति सूत्रेण निषेधे 'वृद्धिरेचि' इति सूत्रेण वृद्धौ 'रामौ' इति सिद्धम्।

### 13. बहुषु बहुवचनम् (१.४.२१)

बहुत्वविवक्षायां बहुवचनम्

बहुषु बहुवचनम् इति पदच्छेदः। अनेन सूत्रेण बहुवचनं विधीयते। बहुत्वविवक्षायां बहुवचनं स्यात् इति सूत्रार्थः। बहुवचनम् इति च प्रथमा एकवचनम्। यथा रामश्च रामश्च रामश्च इति एकशेष राम इति शिष्यते। ततः प्रथमा विभक्तेः बहुत्वविवक्षायां बहुषु बहुवचनम् इत्यनेन बहुवचनान्त जस्प्रत्ययः युज्यते।

### 14. चुटू (१.३.७)

चवर्गटवर्गौ इत्संज्ञकौ

चुटु इति एकपदं वर्तते। अनेन सूत्रेण इत्संज्ञा विधीयते। प्रत्ययाद्यौ चुटु इतौ स्तः इति सूत्रार्थः। प्रत्ययस्य आदिः इत् इति अनुवर्तन्ते। चुश्च टूश्च चुटू (इतरेतरद्वन्द्र-समासः) एवं प्रत्ययस्य आदिभूतौ यौ चवर्गटवर्गौ तौ इत्संज्ञकौ भवतः इत्यर्थः। यथा राम जस् इत्यत्र 'ज्' इत् भवति।

### 15. विभक्तिश्च (१.४.१०४)

विभक्तिः च इति पदच्छेदः। अनेन सूत्रेण विभक्तिसंज्ञौ विधीयेते। सुप्तिङौ विभक्तिसंज्ञौ स्तः इति सूत्रार्थः। अत्र सुपः तिङः इति च अनुवर्तते। सुबन्तस्य

सुप्तिङौ
विभक्तिसंज्ञौ

तिङन्तस्य च विभक्तिसंज्ञा न भवति किन्तु केवलं सुपः (स्वौजस् इति सूत्रोक्तानाम्) तिङश्च (तिप्-तस्-झि... इति सूत्रोक्तानाम्) भवति इति अवधातव्यम्। 'न विभक्तौ तुस्माः' इत्यादावस्य प्रयोजनम्।

**16. न विभक्तौ तुस्माः (१.३.४)**

विभक्तिस्थाः
तवर्ग-सकार-मकाराः
इत्संज्ञकाः न

न विभक्तौ तुस्माः इति पदच्छेदः। अनेन सूत्रेण इत् न विधीयते। विभक्तिस्थाः तवर्गसकारमकाराः इतो न स्युः इति सूत्रार्थः। इति नेत्त्वम्। रामाः। तुस्मा इत्यत्र तु सू-म् इत्येतेषां तुश्च स् च मश्च इति विग्रहे सति द्वन्द्वसमासः। इत् इति अनुवर्तते। ततश्च विभक्तिस्थाः तवर्ग- सकार - मकाराः इत्संज्ञकाः न स्युः इत्यर्थः लभ्यते। एवं सकारस्य इत्संज्ञाभावे रेफे विसर्गे रामाः इति रूपं सिद्ध्यति।

**रामाः -**

रामशब्दात् बहुवचनविवक्षायां प्रथमा बहुवचने जस्प्रत्यये राम राम राम जस् इति स्थिते 'सरूपाणामेकशेष एकभक्तौ' इति सूत्रेण एकस्मिन् रामशब्दे अवशिष्टे 'राम जस्' इति स्थिते 'चुटू' इति सूत्रेण जकारस्य इत्संज्ञायां 'तस्य लोपः' इति सूत्रेण तस्य लोपे, 'अदर्शनं लोपः' इति सूत्रेण तस्य अदर्शने, राम-अस् इति जाते सकारस्य 'हलन्त्यम्' इति सूत्रेण इत्संज्ञा। 'न विभक्तो तुस्माः' इति सूत्रेण निषिद्धा, अथ च 'प्रथमयोः पूर्वसवर्णः' इति सूत्रेण पूर्वपरयोः पूर्वसवर्णदीर्घादेशे सकारस्य रुत्वे विसर्ग च कृते 'रामाः' इति सिद्धम्।

**17. एकवचनं सम्बुद्धिः (२.३.४९)**

सम्बोधने
सुप्रत्ययस्य
सम्बुद्धिसंज्ञा

एकवचनं सम्बुद्धिः इति पदच्छेदः। अनेन सूत्रेण सम्बुद्धिसंज्ञं विधीयते। सम्बोधने प्रथमायाः एकवचनं सम्बुद्धिसंज्ञं स्यात् इति सूत्रार्थः। प्रथमा सम्बोधने इति च अनुवर्तते। तेन सम्बोधनप्रथमाया: एकवचनस्य सम्बुद्धिसंज्ञा। अर्थात् सम्बोधने सुप्रत्ययस्य सम्बुद्धिसंज्ञा भवति।

**18. यस्मात्प्रत्ययविधिस्तदादि प्रत्ययेऽङ्गम् (१.४.१३)**

अङ्गसंज्ञः

यस्मात् प्रत्ययविधिः तदादि प्रत्यये अङ्ग इति पदच्छेदः। अनेन सूत्रेण अङ्गसंज्ञा विधीयते। यः प्रत्ययो यस्मात् क्रियते तदादि शब्दस्वरूपं तस्मिन् प्रत्यये परेऽङ्गसंज्ञं स्यात् इति सूत्रार्थः। तत् प्रकृतिरूपम् आदिर्यस्य शब्दस्वरूपस्य तत् तदादि। यः प्रत्ययः यस्मात् पदाद् विधीयते तस्मिन् प्रत्यये परे सति तदादि शब्दस्वरूपस्य अङ्गसंज्ञा भवति। यथा हे राम सु इत्यवस्थायां राम इत्यस्य अङ्गसंज्ञा, सु परत्वेन वर्तमानत्वम्।

**19. एड्ह्रस्वात्सम्बुद्धेः (६.१.६९)**

सम्बुद्धेः हलः लोपः

एङ् ह्रस्वात् सम्बुद्धेः इति पदच्छेदः। अनेन सूत्रेण लोपः विधीयते। एङन्ताद् ह्रस्वान्ताच्चाङ्गात् परः हल्लुप्यते सम्बुद्धेश्चेत् इति सूत्रार्थः। हे राम। हे रामौ। हे रामाः। हल् लोपः इत्येते अनुवर्तेते। लुप्यते इति लोपः। एङ् च ह्रस्वश्च एङ्ह्रस्वम्, तस्मात् एङ्ह्रस्वात्। एङन्ताङ्गात् ह्रस्वान्ताङ्गात् परस्य सम्बुद्धेः हलः लोपः भवति इति सूत्रार्थः। यथा हे राम सु इत्यवस्थायां 'एड्ह्रस्वात्सम्बुद्धेः' इत्यनेन सकारस्य लोपः।

**20. अमि पूर्वः (६.१.१०७)**

पूर्वपरयोः स्थाने पूर्वरूप एकादेशः

अमि पूर्वः इति पदच्छेदः। अनेन सूत्रेण पूर्वरूपमेकादेशः विधीयते। अकोऽम्यचि पूर्वरूपमेकादेशः स्यात्। (अकः अमि अचि पूर्वरूपम् एकादेशः स्यात्)। अत्र अकः अचि इत्येतौ अनुवर्तेते। यथा- रामम्। रामशब्दात् द्वितीयैकवचनप्रत्यये राम अम् इत्यत्र 'अमि पूर्वः' इति पूर्वरूपे रामम् इति।

**रामम्**

रामशब्दात् 'कृत्तद्धितसमासाश्च' इति सूत्रेण प्रातिपदिकसंज्ञायां द्वितीयाविभक्तेरेकवचने अम्प्रत्यये 'राम-अम्' इति स्थिते 'हलन्त्यम्' इति सूत्रेण मकारस्य इत्संज्ञायां प्राप्तायां 'विभक्तिश्च' इति सूत्रेण विभक्तिसंज्ञायां 'न विभक्तौ तुस्माः' इति सूत्रेण मकारस्य इत्संज्ञानिषेधे 'अकः सवर्ण दीर्घः' इति सूत्रेण पूर्वसवर्णदीर्घ च प्राप्ते तम् उभयम् अपि प्रबाध्य 'अमि पूर्वः' इति सूत्रेण पूर्वरूपे 'रामम्' इति सिद्धम्।

**रामौ**

रामशब्दात् प्रातिपदिकसंज्ञायां द्वितीयाविभक्तेः द्वित्वविवक्षायाम् औट्प्रत्यये राम-राम-औट् इति स्थिते ततः अनुबन्धलोपे 'सरूपाणामेकशेष एकविभक्तौ' इत्येकशेषे 'राम-औ' इति स्थिते 'वृद्धिरेचि' इति सूत्रेण वृद्धौ प्राप्तायां ताम् प्रबाध्य 'प्रथमयोः पूर्वसवर्णः' इति सूत्रेण पूर्वसवर्णदीर्घे प्राप्ते 'नादिचि' इति सूत्रेण तन्निषेधे 'वृद्धिरेचि' 'इति सूत्रेण वृद्धौ 'रामौ' इति रूपम्।

**21. लशक्वतद्धिते (१.३.८)**

लशकवर्गाः इतः

लशकु अतद्धिते इति पदच्छेदः। अनेन सूत्रेण इत् विधीयते। तद्धितवर्जप्रत्ययाद्या लशकवर्गाः इतः स्युः। लशकु इति समस्तपदम्। अत्र 'लश्च शश्च कुश्च' इति एषां समाहारद्वन्द्वः। न तद्धिते अतद्धिते इति नञ्समासः।

प्रत्ययस्य आदिः इत् इति च अनुवर्तते। तद्धितभिन्नस्य प्रत्ययस्य आदिभूतं लकारशकार-कवर्गम् इत्संज्ञं भवति।

**22. तस्माच्छसो नः पुंसि (६.२.१०३)**

शसः नकारः

तस्मात् शसः नः पुंसि इति पदच्छेदः। अनेन सूत्रेण नकारः विधीयते। पूर्वसवर्णदीर्घात् परो यः शसः सकारस्तस्य नः स्यात्पुंसि। ततश्च पूर्वसवर्णदीर्घात् परः यः शसः सकारः तस्य स्थाने नकारः स्यात् पुंलिङ्गे इत्यर्थः लभ्यते। यथा राम शब्दात् द्वितीयाबहुवचने राम शस्। अनुबन्धलोपे राम अस्। सवर्णदीर्घे रामास्। अत्र सकारस्य नकारादेशः।

**23. अट्कुप्वाङ्नुम्व्यवायेऽपि (८.४.१)**

रेफषकाराभ्यां परस्य नस्य णकारः

अट्कुप्वाङ्नुम्व्यवाये अपि इति पदच्छेदः। अनेन सूत्रेण नस्य णः विधीयते। अट् कवर्गः पवर्ग आङ् नुम् एतैः व्यस्तैः यथासम्भवं मिलितैश्च व्यवधानेऽपि रषाभ्यां परस्य नस्य णः स्यात् समानपदे इति सूत्रार्थः। रषाभ्यां नो णः समानपदे इति सूत्रम् अनुवर्तते। इति तेन च सूत्रेण रषाभ्याम् अव्यवहितपरस्य णत्वं विहितम्। रामेण इत्यादौ अडादि व्यवधाने अपि णत्व प्राप्त्यर्थम् इदम् आरब्धम्। अट्प्रत्याहारः, कुः कवर्गः, पुः.पवर्गः। अट् च कुश्च पुश्च, आङ् च, नुम् च इति अट्कुप्वाङ्नुम् (इतरेतर-द्वन्द्वः)। एते व्यवधानं अटकुवानुम्व्यवायः (तृतीया तत्पुरुषः)। तस्मिन् अट्कुप्वाङ्नुम्व्यवाये। तैः यद् व्यवधानं तस्मिन् सत्यपि रषाभ्यां परस्य नस्य णत्वं स्यात् इत्यर्थः। यथा रामान् इत्यत्र नस्य णत्वप्रसक्तिः।

**24. पदान्तस्य (८.४.३७)**

रेफषकाराभ्यां परस्य नस्य णकारः न

पदान्तस्य इति एकपदं सूत्रम्। अनेन सूत्रेण नस्य णत्वं न विधीयते। पदान्तस्य नस्य णो न स्यात् इति सूत्रार्थः। रामान्।णः नः न इति च अनुवर्तते। ततश्च अट् कवर्गः पवर्गः आङ्नुम् एतैः व्यस्तैः यथासम्भवं मिलितैश्च व्यवधाने अपि रेफषकाराभ्यां परस्य पदान्तस्य नकारस्य स्थाने णकारः न स्यात् इत्यर्थः लभ्यते। यथा- रामान्। अत्र यद्यपि पूर्वसूत्रेण नकारस्य णकारः प्राप्नोति। किन्तु तस्य सुबन्तत्वात् सुप्तिङन्तं पदमिति सूत्रेण पदसंज्ञायां पदान्तत्वात् च अनेन सूत्रेण तस्य निषेधे रामान् इति रूपं सिद्ध्यति।

**रामान् –**

रामशब्दात् द्वितीया बहुवचने शस्प्रत्यये 'राम शस्' इति जाते 'लशक्वतद्धिते' इति सूत्रेण शस्य इत्संज्ञायां लोपे च कृते 'राम अस्' इत्यत्र 'अकः सवणे दीर्घः' इति सूत्रेण दीर्घे, 'अतो गुणे' इति सूत्रेण पररूपञ्च प्रबाध्य 'प्रथमयोः

पूर्वसवर्णः' इति सूत्रेण पूर्वसवर्णदीर्घादेशे 'रामास्' इति स्थिते 'तस्माच्छो नः पुंसि' इति सूत्रेण सकारस्य नकारे 'अट्कुप्वाङ्नुम्व्यवायेऽपि' इति सूत्रेण नस्य णत्वे प्राप्ते 'पदान्तस्य' इति सूत्रेण निषेधे 'रामान्' इति सिद्धम्।

**25. टाङसिङसामिनात्स्याः (७.१.१२)**

टाङसिङसाम्
इनात्स्याः

टाङसिङसाम् इनात्स्याः इति पदच्छेदः। अनेन सूत्रेण इनादयः विधीयते। अदन्तात् टादीनाम् इनादयः क्रमात् स्युः इति सूत्रार्थः। णत्वम्। रामेण। अतः अङ्गस्य इत्येतौ अनुलर्तेते। अङ्गस्य इति पञ्चम्यन्तं विशेषणम्। ततः तदन्तविधिः। अकारान्ताद् अङ्गाद् इति। क्रमादिति च यथासंख्यमनुदेशाः समानाम् इति सूत्रलभ्यम्'। टादीनाम् (टा-ङसि- ङसाम्) इनादयः (इन-आत् स्य इत्येते प्रत्ययाः) भवन्ति। अर्थात् अकारान्ताद् अङ्गात् परेषां टा ङसि ङस् इत्येतेषां स्थाने क्रमाद् इन आत् स्य इत्येते आदेशाः स्युः इत्यर्थः लभ्यते। यथा रामेण। अत्र राम इति अदन्ताङ्गम्। अतः परं टा इत्यस्य इनादेशः भवति। 'आद्गुणः' इति सूत्रेण गुणे 'अट्कुप्वाङ्नुम्व्यवायेऽपि' इति सूत्रेण नकारस्व णकारे च रामेण इति सिध्यति।

**रामेण –**

रामशब्दात् 'कृत्तद्धितसमासाश्च' इत्यनेन प्रातिपदिकसंज्ञायां प्रातिपदिकत्वात् तृतीयाविभक्तेः एकवचनविवक्षायां टाप्रत्यये 'राम-टा' इति स्थिते 'टाङसिङसामिनात्स्याः' इत्यनेन टास्थाने इनादेशे राम इन इति स्थिते 'आद्गुणः' इति सूत्रेण गुणः एकादेशे रामेण इति स्थिते ततः 'अट्कुप्वाङ्नुम्व्यवायेऽपि' इति सूत्रेण नस्य णत्वे 'रामेण' इति सिद्धम्।

**26. सुपि च (७३.१०२)**

ह्रस्वाकारान्त-
ङ्गस्य दीर्घः

सूपि च इति पदद्वयं वर्तते। अनेन सूत्रेण दीर्घः विधीयते। यञादौ सुप्यतोऽङ्गस्य दीर्घः स्यात् इति सूत्रार्थः। रामाभ्याम्। अत्र 'अतः अङ्गस्य दीर्घः यञि इति च अनुवर्तते। यथा रामाभ्याम्। राम - भ्याम् इति स्थिते भ्याम् इति यञादि सुप् वर्तते। अतः अदन्ताङ्गस्य रामस्य अनेन सूत्रेण दीर्घे सति रामाभ्याम् इति सिद्ध्यति।

**रामाभ्याम्**

रामशब्दात् 'कृतद्धितसमसाश्च' इति सूत्रेण प्रातिपदिकसंज्ञायां प्रातिपदिकत्वात् तृतीयाद्विवचनविवक्षायां भ्याम्प्रत्यये एकशेषे राम- भ्याम् इति स्थिते 'सुपि च' इति सूत्रेण दीर्घे 'रामाभ्याम्' इति सिद्धं भवति।

**27. अतो भिस् ऐस्  (७.१.९)**

भिसः ऐस्

अतः भिसः ऐस् इति पदच्छेदः। अनेन सूत्रेण भिसः ऐस् विधीयते। अदन्तात् अङ्गात् परस्य भिसः ऐस् स्यात् इति सूत्रार्थः। (अकारान्तात् अङ्गात् भिसः ऐस् स्यात्) अनेकाल्शित्सर्वस्य रामैः। 'अङ्गस्य इति पञ्चमी। ततश्च अकारान्तात् अङ्गात् परस्य भिसः स्थाने ऐस् इति आदेशः स्यात् इत्यर्थः अनेकाल्शित्सर्वस्य इति सूत्रसामर्थ्यात् अनेकाल्त्वाद् भिसः ऐस् इति सर्वादेशः भवति। यथा रामैः। राम ऐस्। वृद्धौ रुत्वे विसर्गे च रामैः।

**रामैः –**

रामशब्दात् प्रातिपदिकत्वात् तृतीयाबहुवचनविवक्षायां भिस्प्रत्यये, एकशेषे राम भिस् इति स्थिते 'अनेकाल्शित् सर्वस्य' इति परिभाषया 'अतो भिस् ऐस्' इति सूत्रेण भिसः ऐसादेशे राम-ऐस् इति स्थिते 'वृद्धिरेचि' इति सूत्रेण वृद्धौ रामैस् इति स्थिते सकारस्य रुत्वे विसर्गे च 'रामैः' इति सिद्धम्।

**28. ङेर्यः (७.१.१३)**

ङेः यकारादेशः

ङेः यः इति पदच्छेदः। अनेन सूत्रेण यकआरआदएशः विधीयते। अतोऽङ्गात्परस्य ङेयदिशः स्यात् इति सूत्रार्थः। 'ङेः' इति एकारान्तात् षष्ठ्यैकवचनम्, न तु ङिशब्दस्य सप्तम्येकवचनं व्याख्यानात्। अतः इति पञ्चम्यन्तम् अनुवर्तते। ततश्च अकारान्ताद् अङ्गात् परस्य ङेः इत्यस्य यकारादेशः स्यात् इति सूत्रार्थः। यथा चतुर्थी विभक्तौ राम ङे। यकारादेशे जाते यञादेः यकारस्य सुप्त्वाभावात् सुपि च इत्यनेन दीर्घः न स्यात्। अत एव यकारे सुप्त्वधर्मम् आनेतुं स्थानिवद्भावं सूत्रं प्रवर्तते।

**29. स्थानिवदादेशोऽनल्विधौ (१.१.५६)**

स्थानिवद्भावः न

स्थानिवत् आदेशः अनल्विधौ इति पदच्छेदः। अनेन सूत्रेण स्थानिवद्भावं न विधीयते। आदेशः स्थानिवत् स्यात्, न तु स्थान्यलाश्रयविधौ इति सूत्रार्थः। स्थानिना तुल्यं स्थानिवत्। अला विधिः अल्विधिः (तृतीया तत्पुरुषः), अलः परस्य विधिः अल्विधिः (पञ्चमी तत्पुरुषः), अलः (स्थाने) विधिः अल्विधिः (षष्ठीतत्पुरुषः), अलि (परे) विधिः अल्विधिः (सप्तमी तत्पुरुषः) इति च चतुर्विधसमासेन अल्विधिः इत्यस्य अलाश्रयविधिः इत्यर्थः भवति। न अल्विधिः अनल्विधिः (नञ्- तत्पुरुषः)। एवम् आदेशः स्थानिवद् भवति अलाश्रयविधौ तु न भवति इत्यर्थः। ततः स्थानिवत्त्वात् सुपि च  इत्यनेन सूत्रेण दीर्घः। एवं रामाय इति रूपम्।

**रामाय-**

रामशब्दात् प्रातिपदिकसंज्ञायां चतुर्थ्येकवचने ङेप्रत्यये राम - ङे इति स्थिते 'ङेर्यः' इति सूत्रेण यादेशे राम य इत्यत्र 'स्थानिवदादेशोऽनल्विधौ' इति सूत्रेण स्थानिवद्भावेन सुप्त्वात् 'सूपि च' इति सूत्रेण अदन्तस्य अङ्गस्य दीर्घे 'रामाय' इति रूपं सिद्धम्।

**30. बहुवचने झल्येत् (७.३.१०३)**

एत्वम्

बहुवचने झलि एत् इति पदच्छेदः। अनेन सूत्रेण एत्वं विधीयते। झलादौ बहुवचने सुप्यतोऽङ्गस्य एकारः स्यात् इति सूत्रार्थः। रामेभ्यः। अत्र अतः सुपि इति च अनुवर्तते। 'झलि' इत्यनेन 'सुपि' इति विशेष्यते। यस्मिन् विधिस्तदादावल्ग्रहणे इति परिभाषया तदादिविधिः अङ्गस्य इत्यधिक्रियते। एवम् अदन्ताङ्गस्य एकारः स्यात् झलादौ बहुचवचने सुपि परे इत्यर्थः। यथा रामेभ्यः। राम भ्यस् इत्यत्र भ्यस् इत्यस्य भकारस्य झल्वात् झलादि सुपि परे अदन्तास्य रामगतस्य अकारस्य एकारे रामेभ्यः इति रूपं सिद्ध्यति।

सुपि किम्? पचध्वम्। अत्र सुपि इति अनुवृत्तौ पचध्वम् इत्यत्र झलादि बहुवचनत्वे सति अकारस्य न एत्वं स्यात्।

**रामेभ्यः -**

रामशब्दात् प्रातिपदिकत्वे चतुर्थीविभक्तेः बहुवचनविवक्षायां भ्यस्प्रत्यये राम-राम-राम भ्यस् इति स्थिते 'सरूपाणामेकशेष एकविभक्तौ' इत्येकशेषे राम भ्यस् इति स्थिते (अदन्तत्वात्) आदित्वात् सुप्त्वाच्च 'सुपि च' इति सूत्रेण दीर्घे प्राप्ते, 'बहुवचने झल्येत्' इति सूत्रेण एत्वे, अनुबन्धलोपे सकारस्य रुत्वे विसर्गे च कृते 'रामेभ्यः' इति सिद्धम्।

**31. वाऽवसाने (८.४.५६)**

अवसाने झलां स्थाने चरः विकल्पेन

वा अवसाने इति पदच्छेदः। अवसाने झलां चरो वा स्युः इति सूत्रार्थः। अत्र झलां चर् इति च अनुवर्तते। एवम् अवसाने झलां स्थाने चरः विकल्पेन स्युः इत्यर्थः लभ्यते। विकल्पनिर्देशात् पक्षे चर्त्वे सति रामात्। अन्यथा रामाद् इति रूपं सिद्ध्यति।

**रामात् -**

रामशब्दात् प्रातिपदिकत्वात् पञ्चम्येकवचनविवक्षायां ङसिप्रत्यये राम ङसि इति जाते 'टाङसिङसमिनात्स्याः' इति सूत्रेण ङसेः आद् इत्यादेशे 'राम-आद्'

इति स्थिते 'अकः सवर्ण दीर्घः' इति सूत्रेण सवर्णदीर्घे 'खरि च' इति चर्त्वे 'रामात्' इति रूपं सिद्ध्यति।

**रामस्य -**

रामशब्दात् 'कृत्तद्धितसमासाश्च' इति सूत्रेण प्रातिपदिकसंज्ञायां प्रातिपदिकत्वात् षष्ठ्येकवचनविवक्षायां ङस्प्रत्यये 'राम ङस्' इति स्थिते 'टाङसिङसामिनात्स्याः' इति सूत्रेण ङसः स्थाने स्य इत्यादेशे 'रामस्य' इति सिद्धम्।

**32. ओसि च (७.३.१०४)**

अदन्ताङ्गस्य एकारः ओसि परे

ओसि च इति पदच्छेदः। अनेन सूत्रेण एत्वं विधीयते। ओसि परेऽतोऽङ्गस्य एकारः स्यात् इति सूत्रार्थः। अदन्ताङ्गस्य एकारः स्यात् ओसि परे इति अर्थः। अलोऽन्त्यस्य इति परिभाषानुसारं अङ्गस्य अन्त्यस्य अलः अकारस्य एकारादेशः। यथा रामयोः। राम् ओस्। राम् ए ओस्। राम् अय् ओस्। रुत्वे विसर्गे च रामयोः इति रूपम्।

**रामयोः -**

रामशब्दात् 'कृत्तद्धितसमासाश्च' इति प्रातिपदिकसंज्ञायां प्रातिपादिकत्वात् षष्ठी विभक्तेः द्विवचनविवक्षायाम् ओस्प्रत्यये राम ओस् इति स्थिते 'ओसि च' इति सूत्रेण अदन्ताङ्गस्य एकारे प्राप्ते 'अलोऽन्त्यस्य' इति नियमात् अकारस्य एकारे रामे ओस् इति स्थिते 'एचोऽयवायावः' इति सूत्रेण एकारस्य अयादेशे 'रामयोस्' इति स्थिते सकारस्य रुत्वे विसर्गे च 'रामयोः' इति सिद्धम्।

**33. ह्रस्वनद्यापो नुट् (७.१.५४)**

आमः नुडागमः

ह्रस्वनद्यापः नुट् इति पदच्छेदः। अनेन सूत्रेण नुडागमः विधीयते। ह्रस्वान्तात् नद्यन्ताद् आबन्ताद् चाङ्गात्परस्यामो नुडागमः स्यात् इति सूत्रार्थः। ह्रस्वश्च नदी च आप् च इति ह्रस्वनद्याप्। तस्मात् ह्रस्वनद्यापः (समाहारद्वन्द्वः)। आप् इत्यनेन टाप् चाप् याप् इत्येतेषां स्त्रीप्रत्ययानां ग्रहणम्। 'परस्य' इति अध्याहार्यम्। ह्रस्वान्ताद् नद्यन्ताद् आबन्तात् च अङ्गात् परस्य आमः नुडागमः स्यात् इत्यर्थः। यथा राम आम् इत्यत्र नुडागमः।

**34. नामि (६.४.३)**

अजन्ताङ्गस्य दीर्घः

नामि इति एकपदं वर्तते। अनेन सूत्रेण दीर्घः विधीयते। नामि परेऽजन्ताङ्गस्य दीर्घः स्यात् इति सूत्रार्थः। अत्र दीर्घः,अङ्गस्य च इति अनुवर्तते। अङ्गं विशेष्यते। अतः तदन्तविधिः। ततश्च अजन्ताङ्गस्य दीर्घः स्यात् नामि परे

इत्यर्थः। यथा राम आम् इति स्थिते नुडागमे राम नाम् इति जाते अजन्ताङ्गस्य रामस्य दीर्घे सति 'अट्कुप्वाङ्.......' इति नकारस्य णकारे रामाणाम् इति रूपं सिद्ध्यति।

**रामाणाम् –**

रामशब्दात् षष्ठीबहुवचने आम्प्रत्यये राम आम् इति स्थिते 'ह्रस्वनद्यापोनुट्' इति सूत्रेण नुडागमे राम नाम् इति जाते 'नामि' इति सूत्रेण दीर्घे 'अट्कुप्वाङ्नुम्व्यवायेऽपि' इति सूत्रेण नकारस्य णत्वे 'रामाणाम्' इति सिद्धम्।

**35. आदेशप्रत्यययोः (८.३.५९)**

सकारस्य मूर्धन्यादेशः

आदेशप्रत्यययोः इति एकपदं वर्तते। अनेन सूत्रेण मूर्धन्यादेशः विधीयते। इण्कवर्गाभ्यां परस्याऽपदन्तास्याऽऽदेशः प्रत्ययावयवश्च यः सकारस्तस्य मूर्धन्यादेशः स्यात् इति सूत्रार्थः। ईषद्विवृतस्य सस्य तादृशः एव षः । रामेषु। आदेशश्च प्रत्ययश्च आदेशप्रत्ययौ तयोः आदेशप्रत्यययोः (इतरेतर द्वन्द्वः)। अत्र आदेशस्य इत्यत्र अभेदात्मिका षष्ठी तथा प्रत्ययस्य इत्यत्र अवयवषष्ठी। अतः आदेशस्य इत्यनेन आदेशरूपसकारस्य तथा प्रत्ययस्य इत्यनेन प्रत्ययावयवस्य सकारस्य इत्यर्थः लभ्यते। ततश्च इण्कवर्गाभ्यां परस्य अपदान्तस्य आदेशरूप सकारस्य प्रत्ययावयव सकारस्य च स्थाने मूर्धन्यादेशः स्यात् इत्यर्थः लभ्यते।

**रामे -**

रामशब्दात् 'कृत्तद्धितसमासाश्च' इत्यनेन प्रातिपदिकसंज्ञायां प्रातिपदिकत्वात् सप्तमी विभक्तौ एकवचने ङिप्रत्यये 'हलन्त्यम्' इति सूत्रेण इत्संज्ञायां 'तस्य लोपः' इति सूत्रेण लोपे च कृते राम इ इति स्थिते आद्गुणः इति सूत्रेण अकार-इकारयोः गुणे एकारे रामे इति रूपम्।

**रामेषु –**

रामशब्दात् 'कृत्तद्धितसमासाश्च' इत्यनेन प्रातिपदिकसंज्ञायां प्रातिपदिकत्वात् सप्तमी विभक्तौ बहुवचने सुप्प्रत्यये 'हलन्त्यम्' इति सूत्रेण पकारस्य इत्संज्ञायां 'तस्य लोपः' इति सूत्रेण लोपे च कृते राम सु इति स्थिते 'बहुवचने झल्येत्' इति सूत्रेण एकारे रामे सु इति जाते 'स्थानेऽन्तरतमः' इति परिभाषया मकारोत्तरवर्तिनः एकाराद् इणः परस्य सुप्प्रत्ययावयवस्य विवृताघोषप्रयत्नवतः सकारस्य स्थाने विवृतघोप्रयत्नवति मूर्धन्यादेशे षकारे रामेषु इति रूपं सिद्ध्यति।

## रामशब्दस्य रूपाणि

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | रामः | रामौ | रामाः |
| द्वितीया | रामम् | रामौ | रामान् |
| तृतीया | रामेण | रामाभ्याम् | रामैः |
| चतुर्थी | रामाय | रामाभ्याम् | रामेभ्यः |
| पञ्चमी | रामात् | रामाभ्याम् | रामेभ्यः |
| षष्ठी | रामस्य | रामयोः | रामाणाम् |
| सप्तमी | रामे | रामयोः | रामेषु |

## सर्वनामसंज्ञकशब्दाः

सर्वनामसंज्ञकानि

### 36. सर्वादीनि सर्वनामानि (१.१.२७)

सर्वादीनि सर्वनामानि इति द्विपदं सूत्रमिदम्। अनेन सूत्रेण सर्वनामसंज्ञा विधीयते। सर्वादीनि शब्दस्वरूपाणि सर्वनामसंज्ञानि स्युः इति सूत्रार्थः। सर्व, विश्व, उभ, उभय, उत्तर, उतम, अन्य, अन्यतर, इतर, त्वत्, त्व, नेम, सम, सिम, पूर्वपरावरदक्षिणोत्तराऽपराऽधराणिव्यवस्थायामसंज्ञायाम्। स्वमज्ञातिधनाख्यायाम्। अन्तर बहिर्योगोपसंव्यानयोः। त्यद्, तद्, यद्, एतद्, इदम्, अदम्, एक, द्वि, युष्मद्, अस्मद्, भवतु, किम् एतानि सर्वादीनि। सर्व आदिः प्रथमावयवः येषां तानि सर्वादीनि इति बहुव्रीहिः। अत्र सर्वशब्दः स्वरूपपरः। नपुंसकवशात् शब्दस्वरूपाणि इति विशेष्यम् अध्याहार्यम्। ततश्च सर्वादिगण पठितानि शब्दस्वरूपाणि सर्वनामसंज्ञकानि स्युः इत्यर्थः।

जसः शी

### 37. जसः शी (७.१.१७)

जसः शी इति द्विपदं सूत्रमिदम्। अनेन सूत्रेण शी विधीयते। अदन्तात् सर्वनाम्नो जसः शी स्यात् इति सूत्रार्थः। अनेकाल्वात् सवदिशः। सर्वे। अतः 'सर्वनाम्नः' इत्यनुवर्तते। तदन्तविधिः। ततश्च अदन्ताद् अङ्गात् परस्य सर्वनाम्नः विहितस्य जस्-प्रत्ययस्य स्थाने शी इत्यादेशः स्यात् इत्यर्थः। तस्मात् तस्य शकारस्य तु 'लशक्वतद्धिते' इति सूत्रेण इत् 'तस्य लोपः' इति लोपे सर्व इ। गुणे सर्वे।

**सर्वे -**

सर्वशब्दात् प्रथमा बहुवचने जसि सर्व जस्' इति जाते 'सर्वादीनि सर्वनामानि' इत्यनेन सर्वशब्दस्य सर्वनामसंज्ञायां 'जसः शी' इत्यनेन जसः स्थाने शी आदेशे प्राप्ते 'अनेकाल्शित् सर्वस्य' इत्यनेन सर्वादिशे 'सर्व शी' इति जाते 'लक्वतद्धिते' इत्यनेन शकारास्य इत्संज्ञायां 'तस्य लोपः' इत्यनेन लोपे, सर्व ई' इति स्थिते 'आद्गुणः' इत्यनेन गुणे 'सर्वे' इति सिद्धम्।

**38. सर्वनाम्नः स्मै (७.१.१४)**

ङेः स्मै

सर्वनाम्नः स्मै इति द्विपदं सूत्रमिदम्। अनेन सूत्रेण स्मै विधीयते। अतः सर्वनाम्नो ङे इत्यस्य स्मै स्यात् इति सूत्रार्थः। अत्र अतः, ङेः इति, इति च अनुवर्तते। तदन्तविधिः। ततश्च अदन्तात् अङ्गात् परस्य सर्वनाम्नः विहितस्य 'ङेः' इत्येतस्य स्थाने 'स्मै' इत्यादेशः स्यात् इत्यर्थः। यथा सर्वस्मै। सर्व ङे इति स्थिते ङेः इत्येतस्य स्थाने स्मै इत्यादेशे 'सर्वस्मै' इति रूपम्।

**सर्वस्मै –**

सर्वशब्दात् प्रतिपदिकसंज्ञायां 'सर्वादीनि सर्वनामानि' इत्यनेन सर्वनामसंज्ञायां चतुर्थ्येकवचनविवक्षायां ङे प्रत्यये 'सर्व ङे' इति जाते 'ङेर्यः' इत्यनेन यादेशे प्राप्ते तं प्रवाध्य 'सर्वनाम्नः स्मै' इत्यनेन 'ङे' इत्यस्य 'स्मै' आदेशे 'सर्वस्मै' इति सिद्धम्।

**39. ङसिङ्योः स्मात्स्मिनौ (७.१.१५)**

स्मात्स्मिनौ

ङसिङ्योः, स्मात्स्मिनौ इति पदच्छेदः। अनेन सूत्रेण स्मात्स्मिनौ विधीयते। अतः सर्वनाम्नः एतयोरेतौ स्तः इति सूत्रार्थः। अतः सर्वनाम्नः इति च अनुवर्तते। ङसिश्च ङिश्च ङसिङी तयोः इति द्वन्द्वः। एवमेव स्मात् च स्मिन् च इति स्मात्स्मिनौ इति द्वन्द्वः। तदन्तविधिः। एवम् अदन्तात् सर्वनाम्नः परस्य 'ङसि' इत्यस्य स्थाने 'स्मात्' तथा 'ङि' इत्यस्य स्थाने स्मिन्' इति आदेशः च स्यात् इत्यर्थः।

**सर्वस्मात् –**

सर्वशब्दात् प्रातिपदिकसंज्ञायां 'सर्वादीनि सर्वनामानि' इत्यनेन सर्वनामसंज्ञायां पञ्चम्येकवचनविवक्षायां ङसिप्रत्यये 'सर्व ङसि' इति जाते 'ङसिङ्योः स्मात्स्मिनौ' इत्यनेन 'स्मात्' आदेशे 'सर्वस्मात्' इति रूपम्।

सुडागमः

**40. आमि सर्वनाम्नः सुट् (७-१-५२)**

आमि सर्वनाम्नः सूट् इति पदच्छेदः। अनेन सूत्रेण सुडागमः विधीयते। अवर्णान्तात्परस्य सर्वनाम्नो विहितस्याऽऽमः सुडागमः स्यात् इति सूत्रार्थः। एत्वषत्वे। सर्वेषाम्। सर्वस्मिन्। आद् अङ्गस्य इति च अनुवर्तते। येन विधिस्तदन्तस्य इत्यनेन तदन्तविधिस्वीकारात् अवर्णान्तात् अङ्गात् इति बुध्यते। 'परस्य' इति अध्याहार्यम्। यथा सर्व आम् इत्यत्र 'आमि सर्वनाम्नः सुट्' इति सूडागमे सर्व स् आम्।

**सर्वेषाम् –**

सर्वशब्दात् प्रातिपदिकत्वात् 'सर्वादीनि सर्वनामानि' इत्यनेन सर्वनामसंज्ञायां षष्ठीबहुवचने आमि 'सर्व आम्' इति जाते 'ह्रस्वनद्यापो नुट्' इत्यनेन प्राप्तं नुटुं प्रबाध्य 'आमि सर्वनाम्नः सुट्' इत्यनेन सुडि अनुबन्धलोपे 'सर्व स् आम्' इति स्थिते 'बहुवचने झल्येत्' इति एत्वे 'आदेशप्रत्यययोः' इत्यनेन षत्वे 'सर्वेषाम्' इति सिद्धम्।

**सर्वस्मिन्**

सर्वशब्दात् प्रातिपदिकसंज्ञायां सर्वनामसंज्ञायां सप्तम्यैकवचनविवक्षायां ङिप्रत्यये 'ङसिङ्योः स्मात्स्मिनौ' इत्यनेन 'स्मिन्' आदेशे 'सर्वस्मिन्' इति सिद्धम्।

सर्वनामसंज्ञा

**41.पूर्वपरावरदक्षिणोत्तरापराधराणि व्यवस्थायामसंज्ञायाम् (१.१.३४)**

पूर्व-पर-अवर-दक्षिण-उत्तर अपर- अधराणि, व्यवस्थायाम्, असंज्ञायाम् इति पदत्रयं सूत्रमिदम्। अनेन सूत्रेण सर्वनामसंज्ञा विधीयते। एतेषां व्यवस्थायामसंज्ञायां च सर्वनामसंज्ञा गणसूत्रात्सर्वत्र या प्राप्ता सा जसि वा स्यात् इति सूत्रार्थः। पूर्वे, पूर्वाः। यथा पूर्वशब्दात् जशि अनेन सूत्रेण सर्वनामसंज्ञापक्षे जशः शी इति शीभावे अनुबन्धलोपे गुणे पूर्वे सर्वनामसंज्ञाभावे पूर्वाः। उत्तराः कुरवः। असंज्ञायां किम्? उत्तराः कुरवः। अत्र संज्ञाभावात् न सर्वनामसंज्ञा। दक्षिणा गायकाः इत्यस्य कुशला इत्यर्थः। अत्र व्यवस्थाभावात् न सर्वनामसंज्ञा।

**पूर्वे / पूर्वाः**

पूर्वशब्दात् प्रातिपदिकसंज्ञायां प्रातिपदिकत्वात् प्रथमाबहुवचने जस्प्रत्यये, 'सर्वादीनि सर्वनामानि' इत्यनेन नित्या सर्वनामसंज्ञा प्राप्ता तं प्रबाध्य 'पूर्वपरावरदक्षिणोत्तराधराणि व्यवस्थायामसंज्ञायाम्' इत्यनेन जसि विकल्पेन

सर्वनामसंज्ञा। 'जशः शी' इत्यनेन 'जसः' स्थाने 'शी' इत्यादेशे अनुबन्धलोपे 'पूर्व' इति जाते 'आदगुणः' इत्यनेन गुणे 'पूर्वे' इति सिद्धम्। सर्वनामसंज्ञाभावपक्षे 'पूर्व जस्' इति स्थिते, अनुबन्धलोपे 'प्रथमयोः पूर्वसवर्णः' इत्यनेन पूर्वसवर्णदीर्घे, अनुबन्धलोपे रुत्वे विसर्गे च 'पूर्वाः' इति च सिद्ध्यति।

**42.स्वमज्ञातिधनाख्यायाम् (१.१.३५)**

सर्वनामसंज्ञा-जसि वा

स्वम् अज्ञातिधनाख्यायाम् इति पदच्छेदः। अनेन सूत्रेण सर्वनामसंज्ञा विकल्पेन विधीयते। ज्ञातिधनवाचिना स्वशब्दस्य प्राप्ता संज्ञा जसि वा इति सूत्रार्थः। स्वे स्वाः आत्मीयाः आत्मान इति वा। ज्ञातिधनवचनस्तु स्वाः ज्ञातयोऽर्था वा। अत्रापि सर्वनामानि विभाषा जसि इत्येतानि अनुवर्तन्ते। ज्ञातिश्च धनं च ज्ञातिधने (द्वन्द्व समासः), तयोः आख्या ज्ञातिधनाख्या (षष्ठी तत्पुरुष- समासः), न ज्ञातिधनाख्या अज्ञातिधनाख्या (नञ् तत्पुरुषसमासः) तस्याम् अज्ञातिधनाख्यायाम्। यथा स्व जस् इत्यत्र सर्वनामपक्षे 'जसः शी' इति शीभावे इतः लोपे गुणे स्वे। सर्वनामसंज्ञाभावे स्वाः।

**स्वे/स्वाः**

स्वशब्दात् प्रातिपदिकत्वात् प्रथमाबहुवचने जस्प्रत्यये 'सर्वादीनि सर्वनामानि' इत्यनेन प्राप्ता नित्या सर्वनामसंज्ञा 'स्वमज्ञातिधनाख्यायाम्' इत्यनेन विकल्पेन सर्वनामसंज्ञायां 'जसः शी' इत्यनेन 'जसः' स्थाने 'शी' इत्यादेशे अनुबन्धलोपे 'स्व ई' इति जाते 'आद्गुणः' इत्यनेन गुणे 'स्वे' इति सिद्धम्। सर्वनामसंज्ञायाः अभावपक्षे 'स्व जस्' इति स्थिते, अनुबन्धलोपे 'प्रथमयोः पूर्वसवर्णः' इत्यनेन पूर्वसवर्णदीर्घे, रुत्वे अनुबन्धलोपे विसर्गे च 'स्वाः' इति च सिद्ध्यति।

**43. अन्तरं बहिर्योगोपसंव्यानयोः। (१-१-३६)**

सर्वनामसंज्ञा - जसि वा

अन्तरं बहिर्योगोपसंव्यानयोः इति पदच्चछेदः। अनेन सूत्रेण सर्वनामसंज्ञा विकल्पेन विधीयते। बाह्ये परिधानीये चार्थेऽन्तरशब्दस्य या प्राप्ता संज्ञा सा जसि वा स्यात् इति सूत्रार्थः। अन्तरे अन्तरा वा गृहाः। बाह्या इत्यर्थः। अन्तरा अन्तरे वा शाटकाः। परिधानीया इत्यर्थः। अत्रापि सर्वनामानि विभाषा जसि इत्येतानि अनुवर्तन्ते। बहिः अनावृतः प्रदेशः। तेन योगः सम्बन्धः यस्य सः बहियोगः, बहिः विद्यमानः अर्थः इति यावत्। उपसंविधीयते परिधीयते इति उपसंख्यानम् अन्तरीयं वस्त्रम्। ततश्च बाह्ये परिधानीये चार्थे अन्तरशब्दस्य प्राप्ता नित्यसर्वनाम संज्ञा जसि वा स्यात् इत्यर्थः। यथा अन्तरे /अन्तराः।

**अन्तरे / अन्तराः**

अन्तरशब्दात् प्रातिपदिकत्वात् प्रथमाबहुवचने जस्प्रत्यये सर्वादीनि सर्वनामानि इत्यनेन प्राप्तां नित्यां सर्वनामसंज्ञां प्रबाध्य 'अन्तर वहियोगोपसंव्यानयोः' इत्यनेन विकल्पेन सर्वनामसंज्ञायां 'जसः शी इत्यनेन जसः स्थाने 'शी' इत्यादेशे अनुबन्धलोपे 'अन्तर ई' इति 'आदगुणः' इत्यनेन गुणे 'अन्तरे' इति सिद्धम्। सर्वनामसंज्ञाभावपक्षे 'अन्तर जस्' इति स्थिते 'प्रथमयोः पूर्वसवर्णः' इत्यनेन पूर्वसवर्णदीर्घे रुत्वे अनुबन्धलोपे विसर्गे च कृते 'अन्तराः' इति रूपं सिद्ध्यति।

**44. पूर्वादिभ्यो नवभ्यो वा (७.१.१६)**

स्मात्स्मिनौ विकल्पेन

पूर्वादिभ्यः नवभ्यः वा इति पदच्छेदः। अनेन सूत्रेण विकल्पेन स्मात्स्मिनौ विधीयते। एभ्यो ङसिङ्योः स्मात्स्मिनौ वा स्तः इति सूत्रार्थः। पूर्वस्मात् पूर्वात्। पूर्वस्मिन्। पूर्वे। अत्र 'ङसिङ्योः स्मात्स्मिनौ' इति सूत्रम् अनुवर्तते। ततश्च पूर्व-पर-अवर-दक्षिण-उत्तर- अपर-अधर-स्व-अन्तर इत्येतेभ्यः नवभ्यः शब्देभ्यः परस्य ङसिप्रत्ययस्य स्थाने स्मात्, ङिप्रत्ययस्य स्थाने स्मिन् आदेशश्च विकल्पेन स्यात् इत्यर्थः। यथा स्मात् आदेशे सति पूर्वस्मात्।स्मिन् आदेशे पूर्वस्मिन्। अन्यथा च यथाक्रमं पूर्वात् पूर्वे चेति ।

**पूर्वस्मात्/ पूर्वस्माद् - पूर्वात्/ पूर्वाद्**

पूर्वशब्दस्य प्रतिपदिकसंज्ञायां सर्वनामसंज्ञायाश्च प्रातिपदिकत्वात् पञ्चम्येकवचने ङसिप्रत्यये अनुबन्धलोपे 'न विभक्तौ तुस्माः' इति सकारेत्संज्ञानिषेधे 'टाङसिङसामिनात्स्याः' इति सूत्रं प्रबाध्य 'ङसिङ्योः स्मात्स्मिनौ' इति 'स्मात्' आदेशे प्राप्ते 'पूर्वादिभ्यो नवभ्यो वा' इत्यनेन विकल्पेन स्मादादेशे 'पूर्वस्मात्'। पक्षे 'टाङसिङसामिनात्स्याः' इत्यनेन आदादेशे स्वर्णदीर्घे, पूर्वात्' 'पूर्वाद्' इति च भवति।

**पूर्वस्मिन्/ पूर्वे**

पूर्वशब्दस्य प्रातिपदिकसंज्ञायां सर्वनामसंज्ञायाश्च प्रातिपदिकत्वात् सप्तम्येकवचने ङिप्रत्यये 'पूर्वादिभ्यो नवभ्यो वा' इत्यनेन 'ङि' इत्यस्य विकल्पेन 'स्मिन्' इत्यादेशे 'पूर्वस्मिन्' इति सिद्धम्। विकल्पपक्षे 'पूर्व ङि' इति स्थिते अनुबन्धलोपे 'पूर्व इ' इति जाते 'आद्गुणः' इत्यनेन गुणे 'पूर्वे' इति रूपं सिद्धम्।

**45. प्रथमचरमतयाल्पार्थकतिपयनेमाश्च। (१-१-३३)**

प्रथमचरमतयाल्पार्थ कतिपयनेमाश्च सर्वनामसंज्ञा - जसि वा

प्रथम-चरम-तय-अल्प-अर्थ-कतिपय-नेमाः च इति द्विपदं सूत्रमिदम्। अनेन सूत्रेण विकल्पेन सर्वनामसंज्ञा विधीयते। एते जसि वा सर्वनामसंज्ञा स्युः इति

सूत्रार्थः। प्रथमे प्रथमाः। तयः प्रत्ययः। द्वितये, द्वितया। नेमे- नेमाः शेषं सर्ववत्। प्रथमश्च, चरमश्च, तयश्च, अल्पश्च, अर्धश्च, कतिपयश्च नेमश्च इति प्रथमचरमतयाल्पार्धकतिपयनेमाः। सर्वादीनि सर्वनामानि इत्यतः सर्वनामानि इति अनुवृत्तौ प्रथमादयः शब्दाः सर्वनामसंज्ञकाः भवन्ति इति अर्थः लभ्यते। तीयान्तस्य ङे, ङसि ङस् इत्येतेषु ङित्सु परेषु सर्वनामसंज्ञावचनं कर्तव्यम् इत्यर्थः। यथा प्रथमा जस् प्रथमे प्रथमाः वा।

### 46. तीयस्य ङित्सु वा ( वार्तिकम्)

तीयस्य सर्वनामसंज्ञा वा

तीयस्य ङित्सु वा इति पदच्छेदः। अनेन वार्तिकेन सर्वनामसंज्ञा विकल्पेन विधीयते। द्वितीयस्मै द्वितीयाय। एवं तृतीयः, द्वेस्तीयः, त्रेः सम्प्रसारणम् इति सूत्राभ्यां यथाक्रमं द्वि-त्रि-शब्दयोः तीयप्रत्यययोगेन द्वितीयः तृतीयः इति च शब्दौ निष्पद्येते। तत्र च तीयस्य ङित्सु प्राप्ता नित्या सर्वनामसंज्ञा वा स्यात् इति वार्तिकार्थः लभ्यते। यथा- सर्वनामसंज्ञापक्षे द्वितीयस्मै अन्यथा द्वितीयाय। एवमेव सर्वनामसंज्ञापक्षे तृतीयस्मै। अन्यथा तृतीयाय चेति।

**द्वितीयस्मै**

द्वयोः पूरणयोद्वितीयः। अत्र 'देस्तीयः' इत्यनेन पूरणे तीयप्रत्ययः। द्वितीयशब्दात्प्रातिपदिकत्वात् चतुर्थ्येकवचने ङेप्रत्यये 'द्वितीय ङे' इति जाते 'तीतस्य ङित्सु वा वाच्या' इति वार्तिकेन विकल्पेन सर्वनामसंज्ञायां 'सर्वनाम्नः स्मै' इत्यनेन 'ङे' इत्यस्य 'स्मै' इति आदेशे कृते 'द्वितीयस्मै' इति सिद्धम्। सर्वनाम संज्ञाऽभावपक्षे 'द्वितीय ङे' इति स्थिते 'ङेर्यः' इत्यनेन 'ङेः' यादेशे 'सुपि च' इत्यनेन दीर्घे 'द्वितीयाय' इति च सिद्ध्यति।

### 47. जराया जरसन्यतरस्याम् (७.२.१०१)

जरशब्दस्य जरसादेशः वा

जरायाः जरस् अन्यतरस्याम् इति पदच्छ्दः। अनेन सूत्रेण जरसादेशः विधीयते। जरा शब्दस्य जरसादेशः वा स्यात् विभक्तौ परे इति सूत्रार्थः। जरशब्दस्य जरस्। निर्जरसो, निर्जरसा इत्यादि। यथा निर् जराशब्दात् औविभक्तौ जरायाः जरसन्यतरस्याम् इति जरसादेशे निर् जरस् औ निर्जरसौ इति रूपम्।

### 48. निर्दिश्यमानस्यादेशाः भवन्ति (परिभाषा)

निर्दिश्यमानस्यादेशः

निर्दिश्यमानस्येति। अत्रायं भावः। पदाङ्गाधिकारे तस्य च तदन्तस्य च इति परिभाषया 'जराया जरसन्यतरस्याम्' इति सूत्रेण निर्जर- समुदायस्य जरसादेशे प्राप्ते निर्दिश्यमानस्य आदेशाः भवन्ति' इति परिभाषया जराशब्दस्य एव जरसादेशः भवति। न च अत्र निर्जरशब्दे जरा शब्दत्वाभावात् कथं जरसादेशः

इति वाच्यम्? 'कर्ण-पूच्छ-विहीनः श्वा न च अश्वः न च गर्दभः' इति न्यायानुसारेण एकदेशविकृतमनन्यवत्' इति परिभाषया जरा शब्देन इव निर्जर शब्दस्यापि ग्रहणात्। अत एव अत्रापि सर्वनामसंज्ञापक्षे निर्जरसे।अन्यथा च निर्जराय चेति।

**निर्जरः -**

निष्क्रान्तो जरायाः - निर्जरः। 'निरादयः क्रान्ताद्यर्थे' इति वार्तिकेन निर्गता जरा यस्मादिति बहुव्रीहिः 'गोस्त्रियोः' इति ह्रस्वत्वम्। निर्जरशब्दात् प्रातिपदिकत्वात् प्रथमैकवचनविवक्षायां सुप्रत्यये अनुबन्धलोपे ससजुषो रूः इति रुत्वे खरवसानयोर्विसर्जनीयः इत्यनेन विसर्गे निर्जरः इति सिध्यति।

**निर्जरसौ -**

निर्जरशब्दात् प्रथमाद्विवचने औप्रत्यये 'जराया जरसन्यतरस्याम्' इत्यनेन जरसादेशे लब्धे सूत्रे जराशब्दस्य जरसादेशः प्रोक्तो न तु निर्जरशब्दस्य इति कथमत्र जरसादेशः इति शङ्कायां पदाङ्गाधिकारे तस्य च तदन्तस्य च' इति परिभाषा अत्र अङ्गाधिकारात् तदन्तस्य अपि स्यात् इति प्राप्ते 'निर्दिश्यमानस्यादेशाः भवन्ति' इत्यनया परिभाषया जराशब्दस्य एव जरसादेशः स्यात् इति कथमत्र निर्जराशब्दस्य जरसः इति शङ्कायाम् 'एकदेशविकृतमनन्यवत्' इति जरसादेशे 'निर्जरसौ' इति सिद्धम्।

**49. दीर्घाज्जसि च (६.१.१०१)**

जसि परे पूर्वसवर्णदीर्घः न

दीर्घात् जसि च इति पदत्रयम्। अनेन सूत्रेण पूर्वसवर्णदीर्घो न विधीयते। दीर्घाज्जसि इचि च परे पूर्वसवर्णदीर्घो न स्यात्। यथा विश्वपौ। 'प्रथमयोः पूर्वसवर्णः' इत्यतः पूर्वसवर्णः इति, अकः सवर्णे दीर्घः इति सूत्राद् दीर्घः इति 'नादिचि' इत्यतः 'न' तथा 'इचि' इति च अनुवर्तन्ते। एवं दीर्घात् जसि इचि च परे पूर्वसवर्णदीर्घः न स्यात् इत्यर्थः। यथा विश्वपौ, विश्वपा औ इत्यत्र दीर्घाज्जसि च सूत्रेण पूर्वसवर्णदीर्घस्य निषेधः भवति। ततश्च वृद्धिरेचि इति सूत्रेण वृद्धिरेकादेशे सति विश्वपौ इति रूपं सिद्धयति।

एवमेव विश्वपा जस् इत्यत्र दीर्घाज्जसि च सूत्रेण पूर्वसवर्णदीर्घस्य निषेधे अकः सवर्णे दीर्घः इति सूत्रेण सवर्णदीर्घे विश्वपाः इति रूपं सिद्ध्यति।

**50. सुडनपुंसकस्य (१.१.४२)**

सर्वनामस्थानसंज्ञा

सुट् अनपुंसकस्यव इति पदच्छेदः। अनेन सूत्रेण सर्वनामस्थानसंज्ञा विधीयते। स्वादि पञ्चवचनानि स्थानसंज्ञा सर्वनामस्थानसंज्ञानि स्युरक्लीवस्य। एतेन सर्वनामस्थानविधीयते। अशि सर्वनामस्थानम् इत्यतः 'सर्वनामस्थानम्' इति अनुवर्तते तस्य बहुवचनान्तत्वेन विपरिणामः। सुट् इति प्रत्याहारः इति 'सु' इत्यारभ्य औटा टकारेण इति शेषः। सर्वनामस्थानसंज्ञायां सर्वनामस्थाने चासम्बुद्धौ इति उपधादीर्घः लभते।

**51. स्वादिष्वसर्वनामस्थाने (१.४.१७)**

स्वादिप्रत्यये परे पूर्वस्य पदसंज्ञा

स्वादिषु असर्वनामस्थाने इति पदच्छेदः। कप्-प्रत्ययावधिषु स्वादिष्वसर्वनामस्थानेषु पूर्व पदं स्यात् इति सूत्रार्थः। अत्र स्वादिषु असर्वनामस्थाने इति पदद्वयं वर्तते। सुप्रत्ययः आदि येषां ते स्वादयः तेषु स्वादिषु (बहुव्रीहिसमासः)। न सर्वनामस्थाने असर्वनामस्थाने असर्वनामस्थाने इति शब्दः स्वादिषु इत्यस्य विशेषणम्। अनेन सूत्रेण पदकार्यं लभते।

**52. यचि भम् (१.४.१८)**

भसंज्ञा

यचि भम् इति पदच्छेदः। यादिष्वजादिषु च कप्प्रत्ययावधिषु स्वादिष्वसर्वनामस्थानेषु पूर्वं भसंज्ञं स्यात् इति सूत्रार्थः। एतेन भसंज्ञा विधीयते। एवं सर्वनामस्थानभिन्नेषु यकारादिषु अजादिषु च कप्प्रत्ययावधिषु स्वादिषु प्रत्ययेषु पूर्वस्य भसंज्ञा स्यात् इत्यर्थः। यथा विश्वपा अस् (शस्) इत्यत्र अस्प्रत्ययः अजादिः। अतः तत्-पूर्व-शब्द-समुदायस्य विश्वपा इत्यस्य भसंज्ञा भवति।

**53. आकडारादेका संज्ञा (१.४.१)**

एका संज्ञा

आ कडारात् एका संज्ञा पदचतुष्टयं वर्तते। अनेन सूत्रेण एका संज्ञा विधीयते। इतः ऊर्ध्वं कडाराः कर्मधारयः इत्यतः प्राक् एकस्यैक एव संज्ञा स्यात् पदभसंज्ञयोः युगपत्प्राप्तौ एकैव संज्ञा स्यात्। यथा सु औ जस् अम् औट् इत्यादिषु प्रत्ययेषु परेषु सत्सु पदसंज्ञा भवति। तथा अन्यत्र भसंज्ञा भवति। यथा विश्वपा शस् इत्यत्र भसंज्ञायां 'आतो धातोः' इति आकारलोपे विभक्तिकार्ये च विश्वपः इति।

**54. आतो धातोः (२.४.२४०)**

भस्य अङ्गस्य लोपः

आतः धातोः इति पदद्वयम्। अनेन सूत्रेण लोपः विधीयते। आकारान्तः यो धातुस्तदन्तस्य भस्याङ्गस्य लोपः स्यात् इति सूत्रार्थः। यथा विश्वपः। हरी। 'अङ्गस्य' इति भस्य इति च अधिकृतम्। 'धातोः' इति, आतः इति षष्ठ्यन्तेन विशेष्यते। तेन तदन्तविधिः 'अल्लोपोऽनः' इत्यतः लोपः इति अनुवर्तते। यथा

विश्वपः अत्र विश्वपा अस् इत्यत्र पा इति आकारान्तः धातुः, तदन्तं भसंज्ञकम् अङ्गं च। आतो धातोः अन्त्यस्य आकारस्य लोपे विश्वप् अस् इति जाते सकारस्य रुत्वे विसर्गे च विश्वपः इति रूपं सिद्ध्यति।

**हरिशब्दः इकारान्त शब्दः प्रक्रिया प्रारभ्यते हरिशब्दस्य अनेके अर्थाः भवन्ति।**

प्रथमायां हरिः - हरी - हरयः।

हरि सु - अनुबन्धलोपे रुत्वे विसर्गे च हरिः।

हरि औ इत्यत्र प्रथमयोः पूर्वसवर्णदीर्घः इति दीर्घे हरी।

**55. जसि च**

जसि गुणः

अस्मिन् सूत्रे पदद्वयं वर्तते। एतेन गुणः विधीयते। ह्रस्वान्तस्याङ्गस्य गुणः स्याज्जसि इति सूत्रार्थः। हरयः। जसि च इति ह्रस्वान्तस्य अङ्गस्य गुणः स्यात् इति सूत्रार्थः लभ्यते। अलोऽन्त्य परिभाषया अयं च गुणः अङ्गस्य अन्त्यस्य अलः स्थाने भवति। यथा हरि जस् इत्यत्र जसि च इति गुणे हरे जस्। अनुबन्धलोपे हरे अस्। अवादेशे रुत्वे विसर्गे च हरयः इति रूपम्।

**हरयः-**

हरिशब्दात् 'अर्थवदधातुरप्रत्ययः प्रातिपदिकम्' इत्यनेन प्रातिपदिक संज्ञायां प्रातिपदिकत्वात् प्रथमाबहुवचने जस्प्रत्यये अनुबन्धलोपे सकारस्य 'हलन्त्यम्' इत्यनेन इत्संज्ञायां प्राप्तायां, न विभक्तो तुस्माः इति निषेधे प्रथमयोः पूर्वसवर्णः इत्यनेन पूर्वसवर्णदीर्घ प्राप्ते तम्प्रबाध्य तस्मिन्निति', 'अदेङ् गुणः', 'स्थानेऽन्तरतमः' इति सूत्रत्रय सहकारेण 'जसि च' इत्यनेन गुणे 'हरे अस्' इति जाते तस्मिन्निति, 'यथासंख्य.. इति सूत्रद्वयसहकारेण 'एचोऽयवायावः' इत्यनेन अयादेशे 'हरयस्' इति जाते सकारस्य रुत्वे विसर्गे च हरयः इति सिद्धम्।

**56. ह्रस्वस्य गुणः (७.३.१०८)**

ह्रस्वान्तस्य अङ्गस्य गुणः सम्बुद्धौ

ह्रस्वस्य गुणः इति पदद्वयं वर्तते। एतेन ह्रस्वान्ताङ्गस्य गुणः विधीयते। ह्रस्वस्य गुणः स्यात् सम्बुद्धौ इति सूत्रार्थः। सम्बुद्धौ च इत्यतः सम्बुद्धौ इति अनुवर्तते। ह्रस्वस्य अङ्गस्य चेति अधिकृतम्। ह्रस्वस्य तदन्तविधिः भवति। एवं सम्बुद्धौ (सम्बोधनैकवचनान्ते) परे ह्रस्वान्ताङ्गस्य गुणः भवति इति सूत्रार्थः।

अलोऽन्त्यपरिभाषया अयं च गुणः अङ्गस्य अन्त्यस्य अलः स्थाने भवति। यथा हे हरे इति रूपम्।

**हरिम् -**

हरिशब्दात् प्रातिपदिकसंज्ञायां द्वितीयैकवचने 'अम्' प्रत्यये 'हरि अम्' इति जाते 'इको यणचि' इत्यनेन यणादेशे प्राप्ते, तं प्रबाध्य 'प्रथमयोः पूर्वसवर्णः' इत्यनेन पूर्वसवर्णदीर्घे च प्राप्ते तमपि प्रबाध्य 'अमि पूर्वः'। इत्यनेन पूर्वपरयोः। स्थाने पूर्वरूपे एकादेशे च 'हरिम्' इति रूपं सिद्धम्।

**हरीन् -**

हरिशब्दात् प्रातिपदिकत्वे शसि प्रत्यये अनुबन्धलोपे हरि अस् इति स्थिते 'तस्मिन्निति' इति सूत्रसहकारेण 'प्रथमयोः पूर्वसवर्णः' इति पूर्वसवणदीर्घे 'तस्माच्छसो नः पूसि' इति सकारस्य नकारे 'हरीन्' इति सिद्ध्यति।

**57. शेषो घ्यसखि (१.४.७)**

घिसंज्ञा

शेषः घि असखि। अनेन सूत्रेण घिसंज्ञा विधीयते। अनदीसंज्ञौ ह्रस्वौ याविदतो तदन्तं सखिवर्जं घिसंज्ञं स्यात् इति सूत्रार्थः। एतेन घिसंज्ञा विधीयते। न सखि असखि (नञ्- तत्पुरुषः)। यथा हरिशब्दः घिसंज्ञकः। अतः घिकार्यं लभते।

**58. आङो नाऽस्त्रियाम् (७.३.१२०)**

आङः (टा इत्यस्य) स्थाने ना

अत्र आङः ना, अस्त्रियाम् इति पदत्रयं वर्तते। अनेन सूत्रेण नादेशः विधीयते। घेः परस्य आङो ना स्याद् अस्त्रियाम्। आङ् इति टासंज्ञा। न स्त्रियाम् अस्त्रियाम् इति नञ्तत्पुरुषः। अत्र 'अच्च घेः' इत्यतः घेः इत्यनुवर्तते। एवं स्त्रीलिङ्गाव्यतिरिक्तेषु लिङ्गेषु घिसंज्ञकात् परस्य आङः ('टा' इत्यस्य) स्थाने 'ना' इत्यादेशः स्याद् इत्यर्थः लभ्यते। यथा हरिणा। हरि टा। हरि ना। पुनः णत्वे हरिणा इति रूपम्।

**हरिणा-**

हरिशब्दात् प्रातिपदिकसंज्ञायां तृतीया विभक्तेः एकवचनविवक्षायां टाप्रत्यये 'शेषो घ्यसखि' इति घिसंज्ञायां 'आङो नाऽस्त्रियाम्' इति सूत्रेण आस्थाने 'ना' इत्यादेशे 'अटकुप्वाङ्नुम्व्यवायेऽपि' इति सूत्रेण नस्य णत्वे 'हरिणा' इति सिद्धम्।

**59. घेर्ङिति।**

घिसंज्ञकस्य गुणः

घेः ङिति। घिसंज्ञकस्य ङिति सुपि गुणः। एतेन घिसंज्ञकस्य गुणः विधीयते। अत्र 'सुपि च' इत्यतः 'सुपि' इति 'ह्रस्वस्य गुणः' इत्यतः गुणः इति च अनुवर्तते। 'अलोऽन्त्य-परिभाषया' अयं च गुणः घसंज्ञकस्य अङ्गस्य अन्त्यस्य अलः स्थाने भवति। यथा हरये हरि ए (ङे) इत्यत्र ङिति सुपि एकारे सति घिसंज्ञकस्य अन्त्यवर्णस्य इकारस्य स्थाने एकारे हरे ए इति जाते 'एचोऽयवायावः' इत्यनेन सूत्रेण 'हरये' इति रूपं सिद्ध्यति।

**हरये -**

हरिशब्दात् चतुर्थीविभक्तेः एकवचनविवक्षायां ङेप्रत्यये अनुबन्धलोपे शेषो घ्यसखि इत्यनेन घिसंज्ञायां 'तस्मिन्निति', 'अदेङ् गुणः', 'स्थानेऽन्तरतमः' इति सूत्रत्रय सहकारेण 'घेर्ङिति' इत्यनेन गुणे 'हरे-ए' इति जाते 'तस्मिन्निति', 'यथासंख्य..'. इति सूत्रद्वयसहकारेण 'एचोऽयवायावः' इत्यनेन अवादेशे 'हरये इति सिद्धम्।

**60 . ङसिङसोश्च (६.१.११०)**

पूर्वरूपम्

ङसिङसोः च। अनेन सूत्रेण पूर्वरूपमेकादेशः विधीयते। एङो ङसिङसोरिति पूर्वरूपमेकादेशः स्यात् इति सूत्रार्थः। हरेः। अत्र 'एङः पदान्तादति' इत्यतः 'एङः' इति, 'अति' इति च अनुवर्तते। 'अमि पूर्वः' इत्यतः 'पूर्वः' इति अनुवर्तते। एकः पूर्वपरयोः इत्यधिकृतम्। यथा हरे अस् (ङसि) अकारे परे पूर्वपरयोः स्थाने पूर्वरूपम् एकादेशः (एकारः) सञ्जातः। ततः सकारस्य रुत्वे विसर्गे च हरेः इति रूपं सिद्ध्यति।

**हरेः -**

हरिशब्दात् प्रातिपदिकत्वे पञ्चम्येकवचने ङसिप्रत्यये अनुबन्धलोपे 'हरि अस्' इति जाते 'शेषो घ्यसखि' इति घिसंज्ञायां 'घेर्ङिति' इत्यनेन सूत्रेण गुणे 'ङसिङसोश्च' इति पूर्वरूपे सकारस्य रुत्वे विसर्गे 'हरेः' इति सिद्धम्।

**61. अच्च घेः (७.३.११९)**

ङेः औकारे अकारान्तादेशे च

अत् च घेः। इदुद्भ्यामुत्तरस्य ङेरौत्। यथा हरौ। अत्र 'ङेराम्नद्याम्नीभ्यः' इत्यतः ङ् इति अनुवर्तते। 'इदुद्भ्याम्' इति 'औत्' इति च सूत्रम् अनुवर्तते। 'अलोऽन्त्यस्य' इति परिभाषोपस्थितिः, तस्मादित्युत्तरस्य इति परिभाषया इदुद्भ्याम् इत्यत्र पञ्चम्या उत्तरस्य इति लभ्यते। एवम् इदुद्भ्याम् उत्तरस्य ङिप्रत्ययस्य स्थाने औकारादेशः, घिसंज्ञकस्य अन्तादेशः ह्रस्व अकारः च स्यात् इति सूत्रार्थः। 'अलोऽन्त्यस्य' परिभाषया अयं अत् इत्यादेशः घिसंज्ञकस्य

अन्त्यस्य अलः भवति। यथा हरी इ (ङि) इत्यत्र इति सूत्रेण ङि- (इ) प्रत्ययस्य स्थाने औकारादेशे घिसंज्ञकस्य हरिशब्दस्य ह्रस्वे अकारे आदेशे च 'हर औ' इति जाते 'वृद्धिरेचि' इत्यनेन वृद्धि एकादेशे 'हरौ' इति रूपं सिद्ध्यति।

**हरौ -**

हरिशब्दात् प्रातिपदिकत्वे सप्तम्येकवचने ङिप्रत्यये अनुबन्धलोपे हरि इ इति जाते 'शेषो घ्यसखि' इति घिसंज्ञायाम् 'अच्च घेः' इति सूत्रेण औकारेदेशे घिसंज्ञकस्य हरि इत्यस्य स्थाने अकारे 'अलोऽन्त्यस्य' इति परिभाषया रेफोत्तरवर्त्तिनः इकारस्य स्थाने अकारे च कृते हर अ इति जाते 'तस्मिन्निति', 'वृद्धिरादैच्', 'स्थानेऽन्तरतमः' इति सूत्रत्रयसहकारेण 'वृद्धिरेचि' इति पूर्वपरयोः स्थाने वृद्धौ एकारादेशे 'हरौ' इति रूपम्।

## सखिशब्दाः

### 62. अनङ् असौ (७.१.९३)

अनङादेशः

अनङ् सौ। अनेन सूत्रेण अनङादेशः विधीयते। सख्युस्थानङादेशोऽसम्बुद्धौ सौ इति सूत्रार्थः। अत्र 'सख्युरसम्बुद्धौ' इति अनुवर्तते। 'अङ्गस्य' इत्यधिकृतम्। एवम् अङ्गसंज्ञकस्य सखिशब्दस्य अनङादेशः स्यात् सम्बुद्धि भिन्ने सुप्रत्यये इत्यर्थः। अत्र सौ इत्यनेन प्रथमायाः एकवचनं (सु) गृह्यते। यथा सखि सु इत्यत्र अनङ् सौ इति सूत्रेण अनङादेशे सखन् सु।

### 63. अलोऽन्त्यात्पूर्व उपधा (१.१.६५)

उपधासंज्ञा

अलः अन्त्यात् पूर्वः उपधा। अन्त्यादलः पूर्वो वर्ण उपधासंज्ञः स्यात् इति सूत्रार्थः। अनेन उपधासंज्ञा विधीयते। 'अलः' इति पञ्चमी, अन्त्यात् इति सामानाधिकरण्यात्। अल् इति प्रत्याहारः वर्णपर्यायः। एवम् अन्ते विद्यमानाद् वर्णात् पूर्वः वर्णः उपधासंज्ञः स्यात् इत्यर्थः। यथा पठ्, पच्, यत्, अत् इत्यादिषु अन्त्य वर्णात् पूर्वः अकारः उपधासंज्ञकः भवति। सर्वनामस्थाने चासम्बुद्धौ इत्यादावस्य प्रयोजनम्।

### 64. सर्वनामस्थाने चासम्बुद्धौ (६.४.८)

उपधादीर्घः

सर्वनामस्थाने च असम्बुद्धौ। एतेन उपधादीर्घः विधीयते। नान्तस्योपधायाः दीर्घोऽसम्बुद्धौ सर्वनामस्थाने। न सम्बुद्धौ असम्बुद्धौ (न-तत्पुरुषः)। अत्र 'नोपधायाः' इति सूत्रम् अनुवर्तते। 'न' इति लुप्तषष्ठीक पदम्। 'ठ्रलोपे' इत्यतो 'दीर्घः' इति अनुवर्तते। यथा सखन्- स् (सु) इत्यत्र सम्बुद्धि भिन्नस्य नान्ताङ्गस्य उपधाभूतस्य अकारस्य दीर्घे सखान् स्।

**65. अपृक्त एकाल् प्रत्ययः (२.४.४१)**

अपृक्तसंज्ञा

अत्र अपृक्तः, एकाल्, प्रत्ययः इति पदत्रयं वर्तते। एकाल्प्रत्ययो यः सोऽपृक्तसंज्ञः स्यात् इति सूत्रार्थः। एतेन सूत्रेण अपृक्तसंज्ञा विधीयते। एकश्चासावल् एकाल् इति कर्मधारयसमासः। यथा सखान् स् इत्यत्र सस्य अपृक्त संज्ञः।

**66. हल्ङ्याभ्यो दीर्घात्सुतिस्यपृक्तं हल् (६.१.६८)**

अपृक्तहलः लोपः

हलङ्याब्भ्यः दीर्घात् सुतिस्यपृक्तम् हल् इति चतुष्पदं सूत्रम्। अनेन अपृक्तहलः लोपः विधीयते। हलन्तात्परं दीर्घो यो ङ्यपौ तदन्ताच्च परं सुतिस्यपृक्तं हल् लुप्यते। हल् च ङि च आप् च हल्ङ्यापः इति इतरेतरद्वन्द्वः। दिक्योगे पञ्चमी। परम् इति अध्याहार्यम्। सुश्च तिश्च सिश्च 'सु-ति-सि' इति समाहारद्वन्द्वः। अपृक्तम् इति हल् इति च सामानाधिकरण्येन अन्वेति। 'लोपो व्योर्वलि' इत्यतः लोपः इति अनुर्वर्तते। यथा सखन् स् इत्यत्र सकारस्य लोपः।

**67. नलोपः प्रातिपदिकान्तस्य (८.२.७)**

नलोपः

न लोपः प्रातिपदिकान्तस्य। प्रातिपदिकसंज्ञं यत्पदं तदन्तस्य नस्य लोपः इति सूत्रार्थः। यथा सखा। अत्र 'पदस्य' इति अधिकृतम्। यथा सखान् इत्यत्र 'नलोपः प्रातिपदिकान्तस्य' इति नलोपे सखा इति रूपम्।

**सखा -**

सखिशब्दात् प्रथमैकवचनप्रत्यये सखि सु। 'अनङ सौ' इति सूत्रेण अनङादेशे सखन् सु। 'सर्वनानस्थाने चासम्बुद्धौ' इत्युपधादीर्घे सखान् सु। अनुबन्धलोपे सखान् स्। 'हल्ङ्याब्भ्यो दीर्घात् सुतिस्यापृक्तं हल्' इति सकारलोपे सखान्। 'नलोपः प्रातिपदिकान्तस्य' इति नलोपे सखा इति रूपम्।

**68. सख्युरसम्बुद्धौ (७.१.९२)**

णिद्वद्भावः

सख्युः असम्बुद्धौ। सख्युरङ्गात्परं सम्बुद्धिवर्जं सर्वनामस्थानं णिद्वत्स्यात् इति सूत्रार्थः। 'परम्' इत्यध्याहार्यम्। यथा सखिशब्दात् प्रथमाद्विवचनप्रत्यये औ विभक्तौ 'सख्युरसम्बुद्धौ' इति सूत्रेण णिद्वद्भावः। तेन णिद्वत्कार्यं लभते।

**69. अचो ञ्णिति(७.२.११५)**

वृद्धिः

अचः ञ्णिति ।अजन्ताङ्गस्य वृद्धिः ञिति णिति च परे। यथा सखायै। अनेन सूत्रेण वृद्धिः विधीयते। एवम् अजन्ताङ्गस्य वृद्धिः स्याद् ञिति णिति च परे इति

सूत्रार्थः। यथा सखि औ इत्यत्र 'सख्युरसम्बुद्धौ' इति सूत्रेण णिद्वद्भावे 'अचो ञ्णिति' वृद्धौ सखै औ। अयादेशे सखायौ।

**70. ख्यत्यात्परस्य (६.१.११२)**

अकारस्य उकारः

ख्यात् परस्य। खितिशब्दाभ्यां खीती शब्दाभ्यां कृतयणादेशाभ्यां परस्य ङसिङसोरतः उः स्यात् इति सूत्रार्थः। खिखी इत्यनयोः तिती इत्यनयोश्च कृतयणादेशयोः 'ख्यत्य' इति निदेशः। यकारात् अकारः उच्चारणार्थः। एङः पदान्तात् इत्यतः अति इत्यनुवर्तते। तच्च परस्य इति सामानाधिकरण्यात् षष्ठ्यन्ततया विपरिणम्यते। 'ङसिङसोश्च' इत्यतः 'ङसिङसोः' इत्यनुवर्तते। अवयवषष्ठी एषा। ततश्च इसिङसोः अवयवस्य उतः इत्यर्थः। 'ऋत उत्' इत्यतः उत् इत्यनुवर्तते। यथा सखिशब्दात् पञ्चम्येकवचनप्रत्यये सखि ङसि अनुबन्धलोपे सखि अस्। 'इकोयणचि' इति यणि सख्यस्। 'ख्यात्परस्य' इति अकारस्य उकारे सख्युस्। रुत्वे विसर्गे च सख्युः।

**71. औत् (७.३.११८)**

ङेरौत् (ङेः औ)

औत्। इदुद्भ्यां परस्य ङेरौत् स्यात् इति सूत्रार्थः। अनेन सूत्रेण औकारः विधीयते। यथा संख्यौ। अत्र 'इदुद्भ्याम्' इति सूत्रम् अनुवर्तते। एवम् इतः परस्य ङेः औत् स्यात् इत्यर्थः। यथा सखि ङि इत्यत्र औत् इति सूत्रेण औकारे सखि औ। 'इकोयणचि' इति यणि सख्यौ।

**72. पतिः समास एवं (१.४.८)**

पतिशब्दस्य घिसंज्ञा

पतिः समासे एव। अनेन सूत्रेण घिसंज्ञा विधीयते। समासस्थितस्य पतिशब्दस्य घिसंज्ञा स्यात् इति सूत्रार्थः। अत्र 'शेषो घ्यसखि' इत्यतः 'घि' इति अनुवर्तते। एवं पतिशब्दः समासे सति घिसंज्ञकः स्यादिति अर्थः। यथा भूपतये। भूपति अ डे इत्यत्र पति समास एवं इति सूत्रेण समासे - असमास घिसंज्ञा अतः 'घेर्ङिति' इति गुणे भूपते ए। अयादेशे भूपतये। असमासे पतिशब्दे घिसंज्ञायाः निषेधे सति पत्या, पत्ये, पत्युः इति रूपाणि भवन्ति। न तु पतिना, पतये, पतेः। समासे सति भूपतिना, भूपतये, भूपतेः इत्येवं विधानि रूपाणि भवन्ति। एवं नरपति - नृपति - मृगपति -लोकपति-पशुपत्यादिषु रूपाणि।

## Summarised Overview

भवद्भिः प्रातिपदिक-संज्ञा-विधायकसूत्राणि, सुप्विधायकानि वा कानिचन आवश्यकसूत्राणि अपि अस्मिन् एकके पठितानि। अत्र भवन्तः अकारान्त पुंल्लिङ्ग-प्रातिपदिकानां सप्तसु विभक्तिषु रूपाणां विधानार्थं

सहायकसूत्राणि, तेन सह बहुवचन सम्बुद्धि-संज्ञा-विधायक-सूत्राणि अपि पठितवन्तः। अत्र सर्वनाम-गणपाठम् अपि पठितवन्तः। अकारान्त पुंल्लिङ्ग प्रातिपदिकानां प्रतिनिधिभूतस्य राम-शब्दस्य,सर्वनामशब्दस्य हरिशब्दस्य पतिशब्दस्य च सिद्धि-प्रक्रियाम् अपि अवगच्छवन्तः भवन्ति। पाठभागे वर्तमानानां सूत्राणां प्रक्रियारूपाणां च ज्ञानेन सामान्यतया शब्दनिष्पत्तिरूपं नैपुण्यं भवन्तः आर्जितवन्तः खलु?

## Assignments

1. अर्थवदधातुरप्रत्ययः प्रातिपदिकम् इति सूत्रस्य कः अर्थः?
2. कृत्तद्धितसमासाश्च इत्यनेन सूत्रेण केषां प्रातिपदिकसंज्ञा विधीयते?
3. द्वकयोर्द्विवचनैकवचने सूत्रं व्याख्यात।
4. अवसानसंज्ञाविधायकं सूत्रं किम् ?
5. केन सूत्रेण पदान्तस्य नस्य णः न भवति? विशदयत।
6. बहुत्वसंज्ञाविधायकं सूत्रं किम् ? व्याख्यात।
7. केन सूत्रेण नकारस्य णकारः भवति? व्याख्यात।
8. चुटू इति सूत्रस्य कः अर्थः? उदाहरणसहितं विशदयत।
9. स्मात्स्मिनौ इति प्रत्ययौ कयोः स्थानयोः भवतः?
10. सर्वनामस्थानविधायकानि सूत्राणि कानि?
11. पूर्वादिभ्यो नवभ्यो वा इत्यत्र नवभ्यः इत्यनेन विवक्षिताः नवशब्दाः के?
12. सर्वादीनि सर्वनामानि सूत्रलक्षणं सोदाहरणं च लिखत।
13. पूर्वस्मात्/ पूर्वस्माद् - पूर्वात्/ पूर्वाद् भेदं स्पष्टयत।

**यथासूचितं पञ्च अधिकृत्य सप्रमाणं प्रक्रियां साधयत-**

1. रामः द्वितीयाा विभक्तिः।
2. हरिशब्दस्य चतुर्थीविभक्तिः।
3. पतिशब्दस्य तृतीयाविभक्तिः।
4. जराशब्दस्य द्वितीयाविभक्तिःय़
5. सर्वशब्दस्य पञ्चमीविभक्तिः।

## Suggested Readings


1. पदसंस्कारचन्द्रिका. कैकुलका रामवारियर्, केरलसाहित्य अकादमि, तृश्शूर।
2. लघुपाणिनीयम्. ए आर् राजराजवर्मा, केरलसर्वकलाशाला, तिरुवनन्तपुरम्।

3. पाणिनीयप्रद्योतम्. ऐसि चाक्को, भाषा इन्स्टिट्यूट, तिरुवनन्वपुरम्।
4. प्रक्रियाभाष्यम्. जोन् कुन्नपप्लि, नाषणल् बुक् स्टाल्, कोट्टयम्।

# References


1. लघुसिद्धान्तकौमुदी.वरदराजः, चौखम्बा संस्कृत सीरीस अकादमी, वाराणसी २००५
2. श्रीवरदराजाचार्यकृतः लघुसिद्धान्तकौमुदी. श्रीसूर्यनारायणशुक्लः, 'बालमनोरमा' संस्कृत - हिन्दीटीका सहित प्रकाशकः, वाराणासी संस्कृत संस्थान सीरीज १०००
3. श्रीमद्वरदराजाचार्यप्रणीता लघुसिद्धान्तकौमुदी. श्रीधरमुखोल्लासिनी -हिन्दी- व्याख्यासमन्विता व्याख्याकारः गोविन्द प्रसाद, शर्मा चौखम्बा सुरभारती प्रकाशन वाराणसी २००७
4. लघुसिद्धान्तकौमुदी प्रथमो भागः. प्रोफसर् आर् वासुदेवन् पोट्टि, सर्वकारीयसंस्कृतकलालयः, तृप्पूणित्तुरा,१९९३


**Space for Learner Engagement for Objective Questions**

Learners are encouraged to develop objective questions based on the content in the paragraph as a sign of their comprehension of the content. The Learners may reflect on the recap bullets and relate their understanding with the narrative in order to frame objective questions from the given text. The University expects that 1 - 2 questions are developed for each paragraph. The space given below can be used for listing the questions.

UNIT 3

# अजन्तस्त्रीलिङ्गः, अजन्तनपुंसकलिङ्गः
## (मिदचोऽन्त्यात्परः)

## Learning Outcomes

- अजन्तस्त्रीलिङ्ग-नपुंसकलिङ्ग-प्रकरणान्तर्गतानां शब्दानां तत्प्रक्रियासम्बद्धानां सूत्राणाञ्च अवगमनम्।
- अजन्तस्त्रीलिङ्गनपुंसकलिङ्गपदस्वरूपं तद्भेदान् च अवगच्छन्ति।
- अजन्तस्त्रीलिङ्ग नपुंसकलिङ्गपदानि ज्ञात्वा तेषां प्रयोगम् अपि कर्तुं प्रभवति।
- प्रक्रियारचनद्वारा भाषाशुद्धिं जानाति।

## Background

अस्य खण्डस्य द्वितीये एकके अजन्तपुंलिङ्गप्रकरणस्थसूत्राणाम् अध्ययनं कृतम्। अधुना अजन्तस्त्रीलिङ्ग-नपुंसकलिङ्गप्रकरणे वर्तमानानां सूत्राणाम् अर्थः, तेषाम् उदाहरणानि तथा तेषां उदाहरणानां सिद्धिप्रक्रियाः च अत्र प्रतिपादयितुं अवसरः संप्राप्ताः। व्याकरणज्ञानेन भाषाशुद्धिं सांस्कारिकावबोधं च सिद्ध्यति। महामुनेः पाणिनेः बुद्धिवैभवं तथा तत्कालीनं सांस्कारिकं चरित्रपरं च बोधान् प्राप्तुं शक्यते।

## Keywords

शी, याट्, तिसृ, चतसृ, इयङ्, ङीप्, क्लीबः, नदीसंज्ञा, विकल्पेन सर्वनामसंज्ञा, सर्वनामस्थानसंज्ञा

# Discussion

### 1. औङ् आपः (७.१.१८)

औङः शी

औङ् आपः इति पदच्छेदः। अनेन शी विधायते। आबन्तादङ्गात् परस्य औङः शी स्यात्। 'औङः' इत्यौकारविभक्तेः संज्ञा। आपः इति पञ्चमी। आपः इति अङ्गात् पदस्य विशेषणम्। अतः प्रत्ययग्रहणपरिभाषया आबन्तं विवक्षितम् 'अङ्गस्य' इति पञ्चम्या विपरिणम्यते। 'औङः' इति षष्ठी। 'शी' इति अनुवर्तते। एवम् आबन्तात् अङ्गात् परस्य औङः शी स्यात् इति सूत्रार्थः यथा रमे। रमाशब्दात् शीभावे रमा ई। गुणे रमे।

**रमा**

रमाशब्दात् प्रातिपदिकत्वात् प्रथमैकवचनविवक्षायां रमा सु अनुबन्धलोपे अपृक्त एकाल्प्रत्ययः इति सु इत्यस्य अपृक्तसंज्ञायां 'हल्ङ्याब्भ्यो दीर्घात् सुतिस्यपृक्तं हल्' इति सुलोपे 'रमा' इति भवति।

**रमे**

रमाशब्दात् प्रातिपदिकत्वात् प्रथमा द्विवचविवक्षायां औप्रत्यये रमा 'औ' इति जाते 'औङ् आपः' इति औकारस्य स्थाने 'शी' इत्यादेशे अनुबन्धलोपे 'रमा ई' इति स्थिते 'आद्गुणः' इति पूर्वपरयोः स्थाने गुणादेशे 'रमे' इति।

**रमाः -**

रमाशब्दात् प्रथमा बहुवचने जसि 'रमा जस्' इति जाते 'चुटु' इति जकारस्य इत्संज्ञायां 'तस्य लोपः' इति लोपे 'रमा अस्' इति स्थिते 'प्रथमयोः पूर्वसवर्णः' इति पूर्वसवर्णदीर्घ सकारस्य रुत्वे विसर्गे च रमाः' इति सिद्धम् ।

### 2. सम्बुद्धौ च (७.३.१०६)

आपः- एकारः

सम्बुद्धौ च इति पदच्छेदः। अनेन एत्वं विधीयते। आप एकारः स्यात् सम्बुद्धौ इति सूत्रार्थः। हे रमे। आपः अङ्गस्य इति च अनुवर्तते। अङ्गस्य आप एकारः स्यात् सम्बुद्धौ इति सूत्रार्थः। 'एङ्ह्रस्वाद्सम्बुद्धेः' इति लोपे सति हे रमे। रमाशब्दात् संबोधनप्रथमायाम् एकवचने 'सम्बुद्धौ च' इति एत्वे हे रमे सु।

**हे रमे**

रमाशब्दात् सम्बोधनप्रथमैकवचने सुप्रत्यये ‘रमा सु' इति जाते अनुबन्धलोपे 'एकवचनं सम्बुद्धिः' इति सम्बुद्धिसंज्ञायां 'सम्बुद्धौ च' इत्यनेन एत्वे रमे स्' इति जाते 'एङ्ह्रस्वात् सम्बुद्धेः' इति सकारलोपे, हे इत्यस्य पूर्वप्रयोगे च ‘हे रमे' इति सिद्धम्।

**3. आङि चापः (७.३.१०५)**

आङि ओसि परे आपः- एकारः

आङि च आपः इति पदच्छेधः। अनेन एत्वं विधीयते। आङि औसि च परे आबन्तस्याङ्गस्य एकारः स्यात् इति सूत्रार्थः। रमया। एत् ओसि अङ्गस्य इति अनुवर्तते। 'आपः' इति षष्ठी। तेन च तदन्तविधिः। आपः तदन्तविधिना आबन्तस्य अङ्गस्य इत्यर्थः। एवम् आङि ओसि च परे आपः (आबन्तस्य अङ्गस्य) एकारः स्यात् इति सूत्रार्थः। यथा रमया

**रमया –**

रमाशब्दात् तृतीयैकवचने टा प्रत्यये ‘रमा टा' इति जाते अनुबन्धलोपे 'आङि चापः' इति आकारस्य एकारे 'रमे आ' इति स्थिते ‘एचोऽयवायावः’ इति अयादेशे 'रमया' इति सिद्धम्।

**4. याडापः (७.३.११३)**

ङितः याडागमः

याट् आपः इति पदच्छेदः। अनेन याडागमः विधीयते। आपो ङितो याट् इति सूत्रार्थः। यथा रमायै। 'आपः' इति पञ्चमी। ङिति इति अनुवृत्तं षष्ठ्या विपरिणम्यते ङित इति। एवम् आपः (आवन्तादङ्गात् परस्य) ङितः याट् स्यात् इति सूत्रार्थः । याट् इत्यस्य टकारस्य इत्।

**रमायै –**

रमाशब्दात् चतुर्थ्यैकवचने ङेप्रत्यये अनुबन्धलोपे 'रमा ए' इति स्थिते ‘याडापः' इत्यनेन याडागमे अनुबन्धलोपे वृद्धौ रमायै इति सिध्यति।

**रमायाः –**

रमाशब्दात् पञ्चम्येकवचने ङसिप्रत्यये अनुबन्धलोपे रमा अस् इति जाते 'याडापः' इत्यनेन याडागमे अनुबन्धलोपे 'रमा-या अस्' इति जाते सवर्णदीर्घे सस्य रुत्वे विसर्गे च रमायाः इति पदं सिद्धम्।

**रमयोः**

रमाशब्दात् षष्ठी द्विवचने ओस्प्रत्यये 'आङि चापः' इति आकारस्य एत्वे 'रमे ओस्' इति जाते 'एचोऽयवायावः' इति अयादेशे सकारस्य रुत्वे विसर्गे च 'रमयोः' इति सिद्धम्।

**रमायाम्**

रमाशब्दात् प्रातिपदिकत्वे सप्तम्येकवचने ङिप्रत्यये 'ङेराम्नद्याम्नीभ्यः' इति ङेरामादेशे 'याडापः' इति 'याडागमे' अनुबन्धलोपे 'रमा या आम्' इति स्थिते सवर्णदीर्घे 'रमायाम्' इति सिद्धम्।

**5. सर्वनाम्नः स्याड्ढ्रस्वश्च (७.३.११४)**

सर्वनाम्नः ङितः स्याट्

सर्वनाम्नः स्याट् ह्रस्वः च इति पदच्छेदः। अनेन सूत्रेण स्याडागमः विधीयते। आबन्तात् सर्वनाम्नो ङितः स्याट् स्याद् आपश्च ह्रस्वः इति सूत्रार्थः। यथा सर्वस्यै। अत्र आपः इति पञ्चम्यन्तम् अनुवर्तते। तेन सर्वनाम्नः इत्येतद् विशेष्यते। तदन्तविधिः। 'ङिति' इति अनुवृत्तं षष्ठ्या विपरिणम्यते। सर्वाशब्दात् ङे विभक्तौ सर्वनाम्नः स्याड्ढ्रस्वश्च इति सूत्रेण स्याटि आबन्तस्य ह्रस्वे च सर्वा स्या ए।

**सर्वस्यै** - सर्वाशब्दात् चतुर्थ्येकवचने ङे प्रत्यये 'याडापः' इति याडागमे प्राप्ते तं प्रबाध्य 'सर्वनाम्नः स्याड्ढ्रस्वश्च' इति स्याडागमे आबन्तस्य च ह्रस्वे 'सर्व-स्या-ए' इति स्थिते 'वृद्धिरेचि' इति वृद्धौ सर्वस्यै।

**सर्वस्याः** - सर्वाशब्दात् पञ्चम्येकवचने ङसिप्रत्यये 'याङापः इति याङगमे प्राप्ते तम्प्रबाध्य 'सर्वनाम्नः स्याड्ढ्रस्वश्च' इति स्याडागमे आबन्तस्य च ह्रस्वे अनुबन्धलोपे सवर्णदीर्घे सस्य रुत्वे विसर्गे च 'सर्वस्याः' इति रूपम्।

**सर्वासाम्** - सर्वाशब्दात् षष्ठीबहुवचने आमि 'आमि सर्वनाम्नः सुट्' इति सुडागमे अनुबन्धलोपे 'सर्वासाम्' इति रूपं सिद्धम्।

**सर्वस्याम्** - सर्वाशब्दात् सप्तम्येकवचने ङिप्रत्यये 'ङेराम् नद्याम्नीभ्यः' इति ङेरामादेशे 'सर्वनाम्नः स्याड्ढ्रस्वश्च' इति स्याडागमे अनुबन्धलोपे 'सर्वस्य- आम्' इति स्थिते सवर्णदीर्घे 'सर्वस्याम्' इति रूपं सिद्धम्।

**6. विभाषा दिक्समासे बहुव्रीहौ (१.१.२७)**

विभाषा दिक्समासे बहुव्रीहौ इति पदच्छेदः। अनेन विकल्पेन सर्वनामसंज्ञा विधीयते। अत्र सर्वनामता वा स्यात् इति सूत्रार्थः। दिक्समासे बहुव्रीहौ

सर्वनाम्नः संज्ञा विकल्पेन

सर्वादिगणपठितानां शब्दानां विकल्पेन सर्वनामसंज्ञा भवति इति सूत्रार्थः। यथा उत्तरपूर्वस्यै उत्तरपूर्वायै। उत्तरपूर्वशब्दात् चतुर्थ्येकवचनप्रत्यये उत्तरपूर्वा ङे। दिक्समासे बहुव्रीहौ इति सूत्रेण विकल्पेन सर्वनामसंज्ञा। सर्वनामसंज्ञायां 'सर्वनाम्नः स्याड्ढ्रस्वश्च' इति सूत्रेण स्याडागमे ह्रस्वे च उत्तरपूर्वा ङे। अनुबन्धलोपे उत्तरपूर्वा स्या ए। 'वृद्धिरेचि' इति वृद्धौ उत्तपूर्वस्यै। सर्वनामाभावे उत्तरपूर्वा 'याडापः' इति उत्तरपूर्वा या ए। वृद्धौ उत्तरपूर्वायै।

**द्वितीयस्यै** - द्वितीयाशब्दात् चतुर्थ्येकवचने ङेप्रत्यये 'द्वितीया-ए' इति जाते 'तीयस्य ङित्सु वा' इति वार्तिकेन विकल्पेन सर्वनामसंज्ञायां 'सर्वनाम्नः स्याड्ढ्रस्वश्च' इति स्याडागमे आपः ह्रस्वे अनुबन्धलोपे च 'द्वितीयस्या-ए' इति स्थिते वृद्धौ 'द्वितीयस्यै' इति सिद्धम्। सर्वनामसंज्ञायाः अभावे तु 'याडापः' इति याडागमे अनुबन्धलोपे वृद्धौ 'द्वितीयायै' इति च भवति।

**हे अम्ब** - सम्बोधने अम्बाशब्दात् सुप्रत्यये 'अम्बा-सु' इति जाते 'एकवचनं सम्बुद्धिः' इति सम्बुद्धिसंज्ञायाम् 'अम्बार्थ नद्योर्ह्रस्वः:' इति ह्रस्वे 'हे' इत्यस्य पूर्वप्रयोगे 'अम्ब-सु' इति स्थिते अनुबन्धलोपे 'हल्ङ्याब्भ्यो दीर्घात् सुतिस्यापृक्तं हल्' इति सुलोपे 'हे अम्ब' इति सिद्धम्।

**जरसौ/जरे** - जराशब्दात् प्रथमाद्विवचने औप्रत्यये 'जरायाः जरसन्यतरस्याम्' इत्यनेन विकल्पेन जराशब्दस्व जरसादेशे 'जरस् औ' जरसौ इति। जरसादेशस्य अभावे 'औङ आपः' इत्यनेन श्यादेशे अनुबन्धलोपे गुणे च जरे इति रूपं भवति।

**मत्या** - मतिशब्दात् टाप्रत्यये 'आङोनाऽस्त्रियाम्' इत्यत्र 'अस्त्रियाम्' इति पर्युदासात् आत्वं न, किन्तु 'इकोयणचि' इति यणि 'मत्या' इति ।

### 7. ङिति ह्रस्वश्च (१.४.६)

नदीसंज्ञा विकल्पेन

ङिति ह्रस्वः च इति पदच्छेदः। अनेन सूत्रेण विकल्पेन नदीसंज्ञा विधीयते। इयङुवङुवस्थानौ स्त्रीशब्दभिन्नौ नित्यस्त्रीलिङ्गावीदूतो, ह्रस्वौ च इवर्णोवर्णो, स्त्रियां वा नदीसंज्ञौ स्तो ङिति इति सूत्रार्थः। यथा मत्ये, मतये। अत्र चकारात् वाक्यद्वयं सम्भवति। स्त्रीशब्दं वर्जयित्वा इत्यर्थः। ईश्च ऊश्च यू (इतर- द्वन्द्वः)। यथा मति शब्दात् चतुर्थ्येकवचनप्रत्यये मति ङे। 'ङिति ह्रस्वश्च' इति सूत्रेण विकल्पेन नदीसंज्ञायाम् 'आण्नद्याः' इत्याडागमे 'आटश्च' इति वृद्धौ यणि अनुबन्धलोपे च मत्यै इति नदीसंज्ञाभावे 'घेर्ङिति' इति गुणे अयादेशे मतये इति। एवं मत्याः, मतेः।

### 8. इदुद्भ्याम् (७.३.११७)

ङेः आम्

इदुद्भ्याम् एक पदं वर्तते। एतेन आम् विधीयते। इदुदुद्भ्यां नदीसंज्ञकाभ्यां परस्य ङेराम् इति सूत्रार्थः। मत्याम्, मतौ। इच्च उच्च इति इदुतौ (इतेतरद्वन्द्वः) तान्याम् उदुद्भ्याम् 'ङेराम्नद्याम्नीभ्यः' इति सूत्रात् नदी, ङे, आम् इति च अनुवर्तन्ते। नदीसंज्ञकाभ्याम् इत्यादिनां पक्षे इति नदीत्वाभावपक्षे 'अच्च घेः' इति अत्वे सन्नियोगे अकारान्तादेशः। मतिशब्दात् ङिविभक्तौ 'ङिति ह्रस्वश्च' इति नदीसंज्ञायां 'इदुद्भ्याम्' इति ङेरामि, स्थानिवद्भावमादाय 'आण्नद्याः' इत्यादि वृद्धौ यणि च मत्याम्। नदीसंज्ञाभावे मतौ इति।

### 9. त्रिचतुरोः स्त्रियां तिसृ-चतसृ (७.२.९९)

तिसृ- चतसृ आदेशौ

त्रिचतुरोः स्त्रियाम् तिसृचतसृ इति पदच्छेदः। अनेन सूत्रेण तिसृचतसृ आदेशौ विधीयेते। स्त्रीलिङ्गयोरेतयोरेतौ स्तौ विभक्तौ इति सूत्रार्थः। त्रि च चतुर् च त्रिचतुरौ (समाहार-द्वन्द्वः) तयो: त्रिचतुरोः। एवमेव तिसृ च चतसृ च तिसृचतसृ (समाहार-द्वन्द्वः)। अत्र 'विभक्तौ' इति अनुवर्तते। त्रिचतुरोः इत्येतयोः एतौ तिसृ-चतसृ इत्येतौ भवतः इत्यर्थः। यथा तिस्रः। त्रिशब्दात् जसि अनुबन्धलोपे त्रि अस्। 'त्रिचतुरोः स्त्रियां' तिसृ चतसृ इति तिस्रादेशे तिसृ अस्। 'अचि र ऋतः' इति सूत्रेण ऋकारस्य रेफादेशे तिस्रस्। रुत्वे विसर्गे च तिस्रः।

### 10. अचि र ऋतः (७.२.१००)

ऋकारस्य रेफादेशः

अचि र ऋतः इति पदच्छेदः। तिसृचतसृ एतयोः ऋकारस्य रेफादेशः स्यादचि इति सूत्रार्थः। गुणदीर्घोत्त्वानामपवादः। तिस्रः। तिसृभिः। तिसृभ्यः। आमि नुट्। अत्र 'तिसृचतसृ' इति अनुवर्तते। गुणदीर्घोत्त्वानाम् अपवादः। ऋतो ङि सर्वनामस्थानयोः इति गुणस्य 'प्रथमयोः पूर्वसवर्णः' इति पूर्वसवर्णदीर्घस्य, 'ऋत उत्' इति उत्वस्य च रत्वम् अपवादः इत्यर्थः। यथा तिस्रः। एवं तिसृभिः, तिसृभ्यः।

### 11. न तिसृचतसृ (६.४.४)

तिसृचतस्रोः नामि दीर्घः न

न तिसृचतसृ इति पदच्छेदः। एतेन दीर्घः न विधीयते। एतयोर्नामि दीर्घो न इति सूत्रार्थः। अत्र 'तिसृचतसृ' इति लुप्तषष्ठीकं पदम्। 'दीर्घः' 'नामि' इति अनुवर्तेते। यथा तिसृणाम्। अत्र ऋवर्णान्नस्य णत्वं वाच्यमिति वार्तिकेन नकारस्य णकारः। त्रिशब्दात् आम्प्रत्यये त्रि आम्। 'ह्रस्वनद्यापो नुट्' इति नुटि तिसृ नाम्। 'नामि' इति सूत्रेण विधीयमानं दीर्घं 'न तिसृचतसृ' इति सूत्रेण निषिध्यते। ऋवर्णान्नस्य णत्वं वाच्यम् इति णत्वे तिसृणाम्। एवं तिसृषु।

**द्वे-** द्विशब्दात् प्रथमाविभक्तौ द्विवचने औप्रत्यये इति स्थिते 'त्यदादीनामः' इत्यकारान्तादेशे 'अजाद्यतष्टाप्' इति टापि अनुबन्धलोपे द्वा-औ इति जाते 'औङः आपः' इति 'औ' इत्यस्य शी इत्यादेशे अनुबन्धलोपे गुणे द्वे इति सिद्धम्। एवं द्वाभ्याम्, द्वयोः।

**गौर्य्यौ -** गौरी-शब्दात् प्रथमाद्विवचने औ प्रत्यये 'प्रथमयोः पूर्वसवर्णः' इति पूर्वसवर्णदीर्घे प्राप्ते 'दीर्घाज्जसि' च इति निषेधे यणि 'अचो रहाभ्यां द्वे' इति द्वित्वे 'गौर्य्यौ' इति सिद्धम्। एवं गौर्य्या,

**हे गौरि -** गौरीशब्दात् सम्बोधनप्रथमैकवचन सुप्रत्यये 'एकवचनं सम्बुद्धिः' इति सम्बुद्धिसंज्ञायां 'गौरी सु-' इति स्थिते 'यूस्त्र्याख्यौ नदी' इति नदीसंज्ञायां 'अम्बार्थनद्योर्ह्रस्वः' इति ह्रस्वे 'एङ्ह्रस्वात् सम्बुद्धौ' इति सुलोपे कृते हे गौरि इति सिद्धम्। एवं लक्ष्मीः (गौरीवत्)। तथा स्त्री, हे स्त्री।

**12. स्त्रियाः (६,४:७९)**

स्त्रीशब्दस्य इयङ्ङादेशः

स्त्रियाः इति एकं पदं वर्तते। अनेन सूत्रेण इयङादेशः विधीयते। स्त्रीशब्दस्य इयङ्ङादेशः स्याद् अजादौ प्रत्यये परे इति सूत्रार्थः। यथा स्त्रियौ। स्त्रियः। अचि, इयङ् इति च अनुवर्तते। यस्मिन् विधिस्तदादावल्ग्रहणे इत्यनेन तदादिविधिः। 'अलोऽन्त्यस्य' परिभाषया स्त्रीशब्दस्य अन्त्यस्य स्थाने इयङ् आदेशः स्यात्। यथा- स्त्रियौ। स्त्री औ विभक्तौ स्त्री औ। इयङि स्त्रिय् औ स्त्रियौ इति।

**13. वाऽम्शसोः (६.४.८०)**

इयङ् वा स्यात्

वा अम्शसोः इति पदच्छेदः। अनेन सूत्रेण विकल्पेन इयङादेशः विधीयते। अमि शसि च स्त्रिया इयङ् वा स्यात् इति सूत्रार्थः। यथा स्त्रियम्, स्त्रीम्। 'स्त्रियाः' इति इयङ् इति च अनुवर्तते। स्त्रियम् इति इयङि रूपम्। स्त्रीम् इति इवङभावे 'अमि पूर्वः' इति अमि (अम्-प्रत्यये)। शसि (शस्-प्रत्यये च परे स्त्रियाः (स्त्री-शब्दस्य) श्थाने इयङ् स्यात् इति सूत्रार्थः। स्त्री अम्। 'वाऽम्शसोः' इति विकल्पेन इयङि स्त्रिय अम्। पूर्वरूपे स्त्रियम्। इयङः अभावे स्त्रीम् इति।

**स्त्रियः/स्त्रीः**- स्त्रीशब्दात् द्वितीयाबहुवचने शसि अनुबन्धलोपे 'स्त्री-अस्' इति जाते 'वाऽम्शसोः' इति विकल्पनेन इयङादेशे सकारस्य रुत्वे विसर्गे च 'स्त्रियः' इति। इयङ् अभावपक्षे 'प्रथमयोः पूर्वसवर्णः' इति पूर्वसवर्णदीर्घे सकारस्य रुत्वे विसर्ग च कृते 'स्त्रीः' इति च सिद्ध्यति। एवं स्त्रिया, स्त्रियै, स्त्रियाः, स्त्रीणाम्, स्त्रीषु। श्रीः, श्रियौ,श्रियः।

**14. नेयङुवङ्स्थानावस्त्री (१.४.४)**

नदीसंज्ञानिषेधः

न इयङ्-उवङ् स्थानौ अस्त्री इति पदच्छेदः। एतेन नदीसंज्ञानिषेधः विधीयते। इयङ्उवङोः स्थितिर्ययोस्तावीदूतो नदीसंज्ञो न स्तः, न तु स्त्री इति सूत्रार्थः। यथा हे श्रीः। श्रिये, श्रिये। श्रियाः २, श्रियः २ । न स्त्री अस्त्री इति। अत्र 'यू स्त्र्याख्यो नदी' इत्यतः यू नदी च अनुवर्तते। ई च ऊ च यू । इयङ् उवङयोग्यो इति यावत्। इयङ्-उवडोः स्थितिः ययोः तौ ईकार ऊकार नदीसंज्ञौ न स्तः। किन्तु स्त्रीशब्दस्य प्रसङ्गे अयं नियमः न प्रवर्तते । यथा हे श्रीः। श्रीशब्दात् सम्बोधनप्रथमैकवचने हे श्री सु। 'नेयङुवङ्स्थानावस्त्री' इति नदीसंज्ञाभावात् ह्रस्वस्य गुणः न। अनुबन्धलोपे रुत्वे विसर्गे च हे श्रीः।

**15. वाऽऽमि (१.४.५)**

अमि नदीसंज्ञा विकल्पेन

वा अमि इति पदद्वयं वर्तते। अनेन नदीसंज्ञा विकल्पेन विधीयते। इयङुवङ्स्थानी स्त्र्याख्यौ यू आमि वा नदीसंज्ञौ न स्तः, न तु स्त्री इति सूत्रार्थः। यथा श्रीणाम्, श्रियाम्। श्रियाम्, श्रियि। अत्र 'यू, स्त्र्याख्यौ नदी' इत्यनुवर्तते। नेयङुवङ् अनुवर्तते। अमि नदीकार्याभावात्। यथा श्रीशब्दात् आमि 'वाऽऽमि' इति नदीसंज्ञायां 'ह्रस्वनद्यापो नुट्' इति नुटि अनुबन्धलोपे 'नामि' इति दीर्घे 'अट्कुप्वाङ्नुम्व्यवायेऽपि' इति णत्वे च श्रीणाम्। नदीत्वाभावे इयङि श्रियाम्।

**16. स्त्रियां च (७.१.९६)**

क्रोष्टु इत्यस्य स्थाने तृज्वद्भावः

स्त्रियाम् च इति पदच्छेदः। अनेन सूत्रेण तृज्वद्भावः विधीयते। स्त्रीवाची क्रोष्टुशब्दस्तृजन्तवद् रूपं लभते इति सूत्रार्थः। स्त्रियाम् इति स्त्रीशब्दस्य सप्तम्येकवचनान्तम्। च इत्यव्ययपदम्। अत्र 'तृज्वत्क्रोष्टुः' इति अनुवर्तते। एवम् स्त्रीवाची क्रोष्टुशब्दात् तृजन्तवद् रूपं लभते इति सूत्रार्थः। अर्थकृता आन्तर्येण सादृश्येन क्रोष्टु इत्यस्य स्थाने क्रोष्टृ आदेशः भवति। यथा क्रोष्टु सु इत्यत्र स्त्रीयां च इति तृज्वद्भावे क्रोष्टृ सु।

**17. ऋन्नेभ्यो ङीप् (४.१.५)**

स्त्रियां ङीप्

ऋन्नेभ्यः ङीप् इति पदच्छेदः। अनेन ङीप् विधीयते। ऋदन्तेभ्यो नान्तेभ्यश्च स्त्रियां ङीप् स्यात् इति सूत्रार्थः। यथा क्रोष्ट्री। गौरीवत्। भ्रूः श्रीवत्। स्वयम्भूः पुंवत्। 'स्त्रियाम्' इत्यधिकृतम्। 'ङ्याप्प्रातिपदिकात्' इत्यतः प्रातिपदिकग्रहणम् अनुवृत्तम्। ततः तदन्तविधिः। यथा क्रोष्ट्री। क्रोष्टुशब्दात् प्रथमैकवचनप्रत्यये क्रोष्टु सु। स्त्रियां च इति तृज्वद्भावे क्रोष्टृ सु। 'ऋन्नेभ्यो ङीप्' इति ङीपि क्रोष्टृ ई सु। अनुबन्धलोपे अपृक्तलोपे च क्रोष्टृ ई। यणि क्रोष्ट्री इति।

**18. न षट्स्वस्रादिभ्यः।(४. १. १०)**

ङीप्टापौ न

द्विपदं सूत्रमिदम्। ङीप्टापौ न स्तः। अत्र टावृचि इत्यतः टाप् इति 'ऋन्नेभ्यो ङीप्' इत्यतः ङीप् अनुवर्तते। यथा - स्वसा, स्वसारौ, माता (पितृवत्)।

**स्वसा-** स्वसृशब्दात् प्रथमैकवचने सुप्रत्यये 'ऋनेभ्यो ङीप्' इति डीपि न 'षट्स्वस्रादिभ्यः' इति ङीपो निषेधे ततः सुप्रत्यये अनुबन्धलोपे 'दुशनस्पुरुदंसोऽनेहसां च' इति अनङि अनुबन्धलोपे च 'स्वसन्स्' इति जाते पुनः 'अप्तृन्तृच्स्वसृनप्तृनेष्टृत्वष्टृक्षत्तृहोतृपोतृप्रशास्तृणाम्' इति दीर्घे 'हल्ङ्याब्भ्ये ……' इति सलोपे 'नलोपः प्रातिपदिकान्तस्य' इति नलोपे 'स्वसा' इति सिद्धम्।

**मातृः** - मातृशब्दात् प्रथमा बहुवचने शसि अनुबन्धलोपे 'ऋन्नेभ्यो ङीप्' इति ङीपि प्राप्ते 'न षट्स्वस्रादिभ्यः' इति तन्निषेधे 'मातृ-अस्' इति स्थिते 'प्रथमयोः पूर्वसवर्णः' इति पूर्वसवर्णदीर्घे सकारस्य रुत्वे विसर्गे च 'मातृः ' इति सिद्धम्।

## 1.3.2 अजन्तनपुंसकलिङ्गप्रकरणम्

**1. अतोऽम् (७.१.२४)**

स्वमोः अम्

अतः अम् इति पदच्छेदः। अतोऽङ्गात् क्लीवात् स्वमोरम् इति सूत्रार्थः। अनेन सूत्रेण अम् विधीयते। अत्र अतः इति पञ्चमी। अङ्गस्य इत्यधिकृतं पञ्चम्या विपरिणम्यते। तेन तदन्तविधिः। स्वमोर्नपुंसकात् इत्यनुवर्तते। यथा ज्ञानम्।

**ज्ञानम् -**

ज्ञानशब्दात् प्रथमैकवचनविवक्षायां सुप्रत्यये स्वमोर्नपुंसकात् इति सोलुकि प्राप्ते तं बाधित्वा अतोऽम् इति अमि ज्ञान अम्। अमिपूर्वः इति पूर्वरूपे ज्ञानम् इति सिद्धम्।

**2. नपुंसकाच्च (७.१.१९)**

क्लीबाद् औङः शी

नपुंसकात् च इति पदच्छेदः। क्लीबाद् औङः शी स्यात् इति सूत्रार्थः। अनेन सूत्रेण शी विधीयते। नपुंसकात् इति पञ्चम्येकवचनान्तम्। च इति अव्ययपदम् अत्र 'शी' औङ्' इति, च अनुवर्तते। औकारविभक्तेः संज्ञा इति। यथा ज्ञाने। ज्ञानशब्दात् प्रथमा द्विवचनविवक्षायां औप्रत्यये नपुंसकाच्च इति सूत्रेण शीभावे अनुबन्धलोपे ज्ञान ई। आद्गुणः इति गुणे ज्ञाने इति।

भसंज्ञकस्य इवर्णस्य, अवर्णस्य लोपः

**3. यस्येति च (६.४.१८४)**

यस्य इति च इति पदच्छेदः। अनेन सूत्रेण अवर्णस्य लोपः विधीयते। ईकारे तद्धिते च परे भस्य इवर्णावर्णयोः लोपः स्यात् इति सूत्रार्थः। भस्य इत्यधिकृतम्। 'नस्तद्धिते' इत्यतः तद्धित इति अनुवर्तते। यथा ज्ञान औ इत्यत्र 'नपुंसकाच्च' इति शीभावे अनुबन्धलोपे ज्ञान ई। अत्र 'यस्येति च' इति अकारस्य लेपप्रसक्तिः।

**4. औङः श्यां प्रतिषेधो वाच्यः (वार्तिकम्)**

अवर्णस्य लोपप्रतिषेधः

औङः श्यां प्रतिषेधः वाच्यः इति चतुष्पदं वार्तिकम्। औङः यः 'शी'आदेशः तस्मिन् परतः यस्येति च इति लोपस्य प्रतिषेधः वक्तव्यः इति वार्तिकार्थः। यथा ज्ञाने। ज्ञान ई इत्यत्र यस्येति च इत्यनेन प्राप्तस्य अकारलोपस्य प्रस्तुत वार्तिकेन निषेधे सति 'आद्गुणः' इत्यनेन गुणे एकारे च 'ज्ञाने' इति प्सिद्ध्यति।

**ज्ञाने -**

ज्ञानशब्दाद् औप्रत्यये 'नपुंसकाच्च' इति श्यादेशे ज्ञानेत्यस्य भसंज्ञायाम् 'यस्येति च' इत्यकारलोपे प्राप्ते 'औङः श्यां प्रतिषेधो वाच्यः' इति निषेधे 'आद्गुणः' इति गुणे ज्ञाने इति सिद्धम्।

**5. जश्शसोः शिः (७.१.२०)**

जस्शसोः शिः

जस् शसोः शिः इति पदच्छेदः। क्लीवाद् अनयोः जश्शसोः शिः स्यात् इति सूत्रार्थः। अनेन सूत्रेण जश्शसोः शिः विधीयते। ज श्च शश्च जस्शसौ तयोः जश्शसोः। अत्र नपुंसकात् इति अनुवर्तते। यथा ज्ञान जस् इत्यत्र जश्शसोः शिः इति शीभावे ज्ञान शि।

**6. शि सर्वनामस्थानम् (१.१.४१)**

शिः सर्वनामस्थानसंज्ञं

शि सर्वनामस्थानम् इति द्विपदं सूत्रम्। शि इत्येतद् सर्वनामस्थानसंज्ञं स्यात् इति सूत्रार्थः। अनेन सूत्रेण सर्वनामस्थानसंज्ञं विधीयते। तेन सर्वनामस्थानकार्यं लभते। यथा ज्ञान जस् इत्यत्र शिभावे 'शि सर्वनामस्थानम्' इति सूत्रेण सर्वनामस्थामसंज्ञा। तेन नुमादयः आगमाः स्युः।

**7. नपुंसकस्य झलचः (७.१.७२)**

नुमागमः

नपुंसकस्य झलचः इति पदच्छेदः। झलन्तस्याजन्तस्य च क्लीवस्य नुम् स्यात् सर्वनामस्थाने इति सूत्रार्थः। अनेन सूत्रेण नुम् विधीयते। झल् च अच्च इति झलचः इति। तेन च अङ्गस्य इत्यधिकृतं विशेष्यते। नपुंसकस्य विशेषणत्वात् झलचः तदन्तविधिः। नुम् सर्वनामस्थाने इत्येतौ अनुवर्तेते। यथा ज्ञानानि।

अन्त्यावयवः

**8. मिदचोऽन्त्यात्परः (१.१ .४६)**

मित् अचः अन्त्यात् परः इति पदच्छेदः। अचां मध्ये योऽन्त्यः, तस्मात्परस्तस्यैवान्तावयवो मित् स्यात् इति सूत्रार्थः। म् (मकार) इत् यस्य सः मित् (बहुव्रीहि समासः)। अचः इति निर्धारणे षष्ठी। तेन अन्यादचः परः भवति इत्यर्थः। यथा ज्ञानानि।( शेषं पुंवत्) । एवं धनवनफलादयः।

**ज्ञानानि -**

ज्ञानशब्दात् प्रथमाबहुवचनप्रत्यये ज्ञान जस्। 'जश्शसोः शिः' इति शिभावे ज्ञान शि। 'शि सर्वनामस्थानम्' इति सर्वनामस्थानसंज्ञायां 'नपुंसकस्य झलचः' इति नुमागमे 'मिदचोऽन्त्यात्परः' इति सूत्रसाहाय्येन अन्त्यावयवे ज्ञानान् शि। अनुबन्धलोपे 'सर्वनामस्थाने चासम्बुद्धौ' इत्युपधादीर्घे ज्ञानानि इति सिद्ध्यति।

## Summarised Overview

एतावता अस्मिन् एकके भवद्भिः अजन्तस्त्रीलिङ्गप्रकरणे अष्टादश सूत्राणि पठितानि। टाप् ङीप् ङीष् इत्यादीः स्त्रीप्रत्ययाः अवगच्छन्ति। आकारान्त- स्त्रीलिङ्गशब्दप्रक्रियासम्बन्धानां सर्वेषां सूत्राणाम् च अध्ययनं कृत्वा तेषां शुद्धप्रयोगे समर्थाः सञ्जाताः। अजन्तनपुंसकलिङ्गप्रकरणे अष्टसूत्राणि तेषां उदाहरणानि शब्दप्रक्रियाः च अधीतः। सामान्यतया अस्माभिः साधारणतया संभाषणमध्ये उपयोक्तुं अर्हेषु कतिपयानां प्रक्रियाः ज्ञातुं शक्ताः आसन्। प्रक्रियानिष्पत्तिद्वारा विज्ञानमार्जयितुं शक्यते।
भाषापठने व्याकरणस्यस्थानं नितरामुन्नतमेव। अजन्तानां पुंलिग-स्त्रीलिंग-नपुंसकलिंगशब्दानां रूपज्ञानेन साकं अनेकानि सूत्राणि व्याख्यातुम् आशयमागत्य प्रयोक्तुं च शक्यते।

## Assignments

1. औङ आपः इति सूत्रं सोदाहरणं व्याख्यात।
2. विभाषा दिक्समासे बहुव्रीहौ इति सूत्रस्य उदाहरणं लिखत।
3. अचि र ऋत इति सूत्रेण किं विधीयते? व्याख्यात।
4. मिदचोऽन्त्यात्परः लक्षणं उदाहरणसहितं विशदयत।

**यथासूचितं पञ्च अधिकृत्य सप्रमाणं प्रक्रियां साधयत।**

1. रमा तृतीया विभक्तिः।
2. मतीशब्दस्य चतुर्थीविभक्तिः।
3. तिसृशब्दस्य प्रथमाविभक्तिः।
4. स्त्रीशब्दस्य षष्ठीविभक्तिः।

5. ज्ञानशब्दस्य प्रथमाविभक्तिः।

## Suggested Readings


1. पदसंस्कारचन्द्रिका. कैकुलका रामवारियर्, केरलसाहित्य अकादमि, तृश्शूर २००५
2. लघुपाणिनीयम्. ए आर् राजराजवर्मा, केरलसर्वकलाशाला, तिरुवनन्तपुरम्।
3. पाणिनीयप्रद्योतम्. ऐसि चाक्को, भाषा इन्स्टिट्यूट, तिरुवनन्वपुरम्।
4. प्रक्रियाभाष्यम्. फा. जोन् कुन्नपप्लि, नाषणल् बुक् स्टाल्, कोट्टयम्।


## References


1. लघुसिद्धान्तकौमुदी.वरदराजः, चौखम्बा संस्कृत सीरीस अकादमि, वाराणसी २००५
2. श्रीवरदराजाचार्यकृतः लघुसिद्धान्तकौमुदी, श्रीसूर्यनारायणशुक्लः 'बालमनोरमा' संस्कृत - हिन्दीटीका सहित प्रकाशक: वाराणासी. संस्कृत संस्थान सीरीज २०००
3. श्रीमद्वरदराजाचार्यप्रणीता लघुसिद्धान्तकौमुदी. श्रीधरमुखोल्लासिनी-हिन्दी-व्याख्यासमन्विता व्याख्याकारः गोविन्द प्रसाद शर्मा, चौखम्बा, सुरभारती प्रकाशन, वाराणसी, २००७
4. लघुसिद्धान्तकौमुदी प्रथमो भागः. प्रोफसर् आर् वासुदेवन् पोट्टि, सर्वकारीयसंस्कृतकलालयः, तृप्पूणित्तुरा, १९९३


**Space for Learner Engagement for Objective Questions**

Learners are encouraged to develop objective questions based on the content in the paragraph as a sign of their comprehension of the content. The Learners may reflect on the recap bullets and relate their understanding with the narrative in order to frame objective questions from the given text. The University expects that 1 - 2 questions are developed for each paragraph. The space given below can be used for listing the questions.

UNIT 4

# हलन्तपुंलिङ्गः, हलन्तस्त्रीलिङ्गः, हलन्तनपुंसकलिङ्गः

## Learning Outcomes

- हलन्तशब्दान् परिचाययति।
- हलन्तशब्दानां सिद्धिप्रक्रियाणां अवगमनम्।
- हलन्तशब्दान्तर्गतात् हकारान्त-वान्त-रान्त-मान्त-नान्तान् शब्दान् ज्ञात्वा तान् वर्गीकर्तुं समर्थाः भवन्ति।
- हलन्तशब्दानां प्रयोगमपि कर्त्तुं प्रभविष्यन्ति।

## Background

अस्य खण्डस्य तृतीये एकके अजन्तस्त्रीलिङ्ग-नपुंसकलिङ्गप्रकरणस्य परिचायेनेन सह प्रथमः ग्रन्थपाठः समुपन्यस्तः। अजन्तस्त्रीलिङ्ग-नपुंसकलिङ्ग- प्रकरणस्थानां केषाञ्चित् सूत्राणाम् अर्थः, तेषाम् उदाहरणानि तथा तेषां तेषाम् उदाहरणानां सिद्धिप्रक्रियाः च अत्र प्रतिपादिताः सन्ति। के हलन्ताः भवन्ति ? येषां शब्दानाम् अन्ते हलः (व्यञ्जनवर्णाः) भवन्ति ते शब्दाः हलन्ताः कथ्यन्ते। सम्प्रति हलन्तपुंलिङ्ग-स्त्रीलिङ्ग-नपुंसकलिङ्ग-प्रकरणगतानाम् केषाञ्चित् सूत्राणाम् अर्थं, तेषाम् उदाहरणानि तथा तेषां प्रयोगाणां रूपनिष्पत्तिः च सङ्कलिताः सन्ति। तम् अधिकृत्य पठामः।

## Keywords

ढः, सम्प्रसारणम्, ऊठ्, उपधा, धः, अन्वादेशः, कः, मः, अहन् , सः, पूर्वरूपं, आमादेशः, विसर्गः, ऐस् निषेधः, तृ अन्त्यादेशः, न्यादेशः, औश्, उपधादीर्घः, अभ्यस्तसंज्ञा, तकारः, नलोपः

# Discussion

## 1.4.1 हलन्तपुल्लिङ्गः

### हकारान्तशब्दाः

**1. होढः (८.२.३९)**

हकारस्य ढः

हः ढः इति द्विपदं सूत्रमिदम्। हस्य ढः स्यात् झलि पदान्ते च इति सूत्रार्थः। अनेन सूत्रेण हकारस्य ढः विधीयते। झलि पदस्य अन्ते इत्यादि पदानि अनुवर्तन्ते। हः इति षष्ठी एकवचनान्तम्। ढः इति प्रथमा एकवचनान्तम्। यथा- लिट्।

**लिट्/लिड्**

लिह्शब्दात् प्रथमैकवचने सुप्रत्यये 'हल्ङ्याब्भ्यो दोघात्सुतिस्यपृक्तं हल्' इति सुलोपे 'होढः' इति हकारस्य ढकारे 'झलां जशोऽन्ते' इति जश्त्वेन डकारे 'वावसाने' इति वैकल्पिके चर्त्वे लिट् इति चर्त्वाभावपक्षे लिड् इति च सिद्धम्।

**लिड्भ्याम्-**

लिह्शब्दात् भ्यामि विभक्तौ 'लिह् भ्याम्' इत्यत्र 'हो ढः' इति हकारस्य ढकारे 'स्वादिष्वसर्वनामस्थाने' इति पदत्वात् 'झलां झशोऽन्ते' इति ढकारस्य डकारे लिड्भ्याम् इति रूप सिद्धम्।

**लिट्त्सु / लिटसु-**

लिह्शब्दात् सुप् विभक्तौ 'लिट्-सुप्' इत्यत्र 'हो ढः' इति सूत्रेण हकारस्य ढकारे 'स्वादिष्वसर्वनामस्थाने' इति सूत्रेण पदसंज्ञायां 'झलां जशोऽन्ते' इति सूत्रेण ढस्य डत्वे 'डः सि धुट्' इति सूत्रेण सस्य घुटागमे टित्वाद् आद्यावयवे अनुबन्धलोपे 'खरि च' इति सूत्रेण चर्त्वे पुनश्च डकारस्य 'खरि च' इति सूत्रेण चर्त्वे कृते 'लिट्त्सु' इति रूपं सिद्धम्।
अत्र' धुडागमाभावे लिट्सु इति च रूपम्।

**2. इग्यणः सम्प्रसारणम् (१.१.४५)**

यणः स्थाने वर्तमानस्य इकः सम्प्रसारणसंज्ञा

इक्, यणः, सम्प्रसारणम् इति त्रिपदं सूत्रमिदम्। अनेन सूत्रेण सम्प्रसारणसंज्ञा विधीयते। यणः स्थाने प्रयुज्यमानो य इक् स सम्प्रसारणसंज्ञः स्यात् इति सूत्रार्थः। तत्र यकारस्य इकारः, वकारस्य उकारः, रेफस्य ऋकारः, लस्य च ऌकारः इति ज्ञेयम्। एवं यणः (य.व.र.ल इत्येतेषां) स्थाने प्रयुज्यमानः यः इक् (इ,उ,ऋ,ऌ) स सम्प्रसारणसंज्ञः स्यात्।

**3. वाह ऊठ् (६.४.१३२)**

वाह् इत्यस्य स्थाने सम्प्रसारणम् ऊठ्

वाहः ऊठ् इति द्विपदं सूत्रमिदम्। अनेन सूत्रेण ऊठ् विधीयते। भस्य वाहः सम्प्रसारणमूठ् स्यात् इति सूत्रार्थः। भस्य सम्प्रसारणम् इत्येते पदे अनुवर्तेते। तेन वाहः यः यण् वकारस्य तस्य ऊठ् लभ्यते। भस्य वाहः सम्प्रसारणमुठ् इति। अर्थात् भसंज्ञकस्य वाह् इत्यस्य स्थाने सम्प्रसारणम् ऊठ् इति भवति। यथा विश्वौहः। विश्वाह्शब्दात् द्वितीयाबहुवचनप्रत्यये शसि अनुबन्धलोपे विश्वाह् अस्। 'वाह ऊठ्' इति सूत्रेण वरूपस्य सम्प्रसारणस्य ऊठि विश्व ऊ आह् अस् इति।

**4. सम्प्रसारणाच्च (६.१.१०८)**

पूर्वरूपमेकादेशः

सम्प्रसारणात् च इति द्विपदं सूत्रमिदम्। सम्प्रसारणादचि पूर्वरूपमेकादेशः इति सूत्रार्थः। अनेन सूत्रेण पूर्वरूपमेकादेशः विधीयते। यथा - विश्वौहः।

**विश्वौहः -**

विश्वाह्शब्दात् द्वितीयाबहुवचनप्रत्यये शसि अनुबन्धलोपे विश्वाह् अस्, इत्यत्र सम्प्रसारणे प्राप्ते 'वाह ऊठ्' इति सूत्रेण वकारस्य स्थाने ऊकारे विश्व-ऊ-आह्-अस् इति जाते 'सम्प्रसारणाच्च' इति पूर्वरूपमेकादेशे ऊकारआकारयोः पूर्वरूपे ऊकारः भवति। तदा विश्व- ऊह् अस् इत्यत्र 'एत्येधत्युठ्सु' इति पूर्वपरयोः स्थाने वृद्धिरेकादेशे रुत्वे विसर्गे च विश्वौहः इति रूपम्।

**5. चतुरनडुहोरामुदात्तः (७.१.१८)**

चतुरनडुहोः आम्

चतुरनडुहोः, आम्, उदात्तः इति त्रिपदं सूत्रमिदम्। अनेन सूत्रेण चतुरनडुहोः आम् विधीयते। अनयोराम् स्यात् सर्वनामस्थाने परे इति सूत्रार्थः। 'इतोऽत्सर्वनामस्थाने' इत्यतः: 'सर्वनामस्थाने' इति अनुवर्तते। तदा अनयोराम् स्यात् सर्वनामस्थाने परे। यथा - अनडुह्-स् इत्यत्र 'चतुरनडुहोरामुदात्तः' इत्यामि अनडु आह् स् इति। 'सावडुहः' इति नुमि अनडु आन् ह् स्। 'हल्ङ्याब्भ्यो दीर्घात्सुतिस्यापृक्तं हल्' इति सलोपे अनडु आ न् ह्। 'संयोगान्तस्य लोपः' इति सकारलोपे अनडु आ न्। 'इकोयणचि' इति यणि अनड्वान् इति।

**6. अम् सम्बुद्धौ (७.१.१९)**

चतुरनडुहोरम्

अम् सम्बुद्धौ इति द्विपदं सूत्रमिदम्। चतुरनडुहोरम् स्यात्सम्बुद्धौ इति सूत्रार्थः। अत्र 'चतुरनडुहोः' इति पदं अनुवर्तते। यथा हे अनड्वान्, हे अनड्वाहौ, हे अनड्वाहः।

**हे अनड्वान् -**

अनडुशब्दात् सम्बुद्धौ हे अनडुह् स्। 'अम् सम्बुद्धौ' इति सूत्रेण अमि हे अनडु अ ह्स्। 'सावनडुहः' इति नुमि हे अनडु अ न् ह् स्। सलोपे 'संयोगान्तस्य लोपः' संयोगान्तलोपे यणि च हे अनड्वन्। एवं अनडुहः, अनडुहा।

### 7. षट्चतुर्भ्यश्च (७.१.५५)

षड्चतुर्भ्यः नुड्

षट्चतुर्भ्यः च इति द्विपदं सूत्रमिदम्। अनेन सूत्रेण नुडागमः। षट्संज्ञकेभ्यः चतुरश्च परस्यामो नुडागमः स्यात् इति सूत्रार्थः। अत्र 'षट्चतुर्भ्यः' इति पञ्चमी। 'आमि सर्वनाम्नः सुट्' इत्यतः आमि इति अनुवृत्तं षष्ठ्या विपरिणम्यते। षड् इति षट्संज्ञकेभ्यः इति। एवम् एभ्यः षट्चतुर्भ्यः आमः नुडागमः स्यात्। यथा चतुर्णाम्। चतुर् आम् इत्यत्र 'षट्चतुर्भ्यश्च' इति सूत्रेण चतुरशब्दात् परम् आम् इत्यस्य नुडागमे टित्वात् अन्तावयवे चतुर् नाम् णत्वे, द्वित्वे चतुर्ण्णाम् इति रूपम्।

### 8. रोः सुपि (८.३.१६)

रेफस्य विसर्गः सुपि

रोः सुपि इति द्विपदं सूत्रमिदम्। अनेन सूत्रेण रेफस्य विसर्गः विधीयते । रोरेव विसर्गः सुपि इति सूत्रार्थः। विसर्जनीयः इत्यनुवर्तते। सुप् इति सप्तमीबहुवचनप्रत्ययः भवति न तु प्रत्याहारः। रोः इति ऋकारस्य षष्ठ्यन्तं वर्तते। सुपि इति सप्तम्यन्तम्, रोः एव विसर्गः सुपि इति। यथा चतुर्षु। चतुर्शब्दात् सुप्प्रत्यये 'चतुर् सुप्' इति स्थिते 'खरवसानयोर्विसर्जनीयः' इति सूत्रेण रेफस्य विसर्गे प्राप्ते 'रोः सुपि' इति सूत्रेण निषेधे चतुर् सु। 'आदेशप्रत्यययोः' इति सूत्रेण सस्य षत्वे चतु र्षु इति।

### 9. शरोऽचि (८.४.४९)

शरः द्वित्वं न

शरः अचि इति द्विपदं सूत्रमिदम्। अचि परे शरो न द्वे स्तः इति सूत्रार्थः। यथा चतुर्षु। अत्र द्वे, न इत्यादि पदानि अनुवर्तन्ते। अचि परे शरः न द्वे स्तः। यथा- चतुर्षु। चतुर् षु इति स्थिते 'अचो रहभ्यां द्वे' इति सूत्रेण षस्य द्वित्वे प्राप्ते 'शरोऽचि' इति सूत्रेण द्वित्वनिषेधे चतुर्षु इति रूपसिद्धम्।

## मकारान्तशब्दाः

### 10. किमः कः (७.२.१०३)

कादेशः

किमः कः इति द्विपदं सूत्रमिदम्। कादेशः विधीयते। विभक्तौ इति पदं अनुवर्तते। किमः कः स्यात् विभक्तौ इति सूत्रार्थः। यथा - कः कौ के। यथा किम् – सु इति स्थिते अनुबन्धलेपे 'किमः कः' इति कादेशे क स् इति जाते रुत्वे विसर्गे च कृते कः इति रूपम्।

**11. इदमो मः (७.२.१०८)**

इदमः दकारस्य मकारः

इदमः मः इति द्विपदं वर्तते। इदमो मस्य मः स्यात् सौ इति सूत्रार्थः। त्यदाद्यत्वापवादः। सौ इत्यनुवर्तते। अत्र 'अलोऽन्त्यस्य' इत्यन्त्यस्य दस्य मः। 'त्यदादीनामः' इति सूत्रेण प्राप्तस्य अकारादेशस्य निषेधः अनेन सूत्रेण विधीयते। इदम: मकारस्य मकारः एव भवति इति भावः। यथा - अयम्।

**12. इदोऽय् पुंसि (७.२.१११)**

इद्- अय् पुंसि

इदः, अय्, पुंसि इति त्रिपदं सूत्रमिदम्। सै इदमः इत्यनुवर्तते। इदमः इति अवयवषष्ठी। इदमः इदोऽय् स्यात् सौ पुंसि। इदमः त्यदाद्यत्वापवादः। यथा – अयम्।

**अयम्**

इदम्-शब्दात् प्रथमैकवचने सुप्रत्यये अनुबन्धलोपे इदम् स्। 'इदमो मः' इति मस्य मत्वे इदम् स्। 'इदोऽय् पुंसि' इत्यनेन इदमः इद्भागस्य अयादेशे अयम् स्। 'हल्ङ्याब्भ्यो दीर्घात् सुतिस्यापृक्तं हल्' इति सलोपे अयम् रूपम्।

**13. अतो गुणे (६.१.९७)**

पररूपमेकादेशः

अतः गुणे इति द्विपदं वर्तते। पररूपं, अपदान्तात्, एकः पूर्वपरयोः इत्यादीनि पदानि अनुवर्तन्ते। अपदान्तादतो गुणे परतः पररूपमेकादेशः स्यात् इति सूत्रार्थः। यथा - पच अन्ति - पच् अ न्ति पचन्ति। यदि अत् पदान्तः भवति तर्हि पररूपमेकादेशः न भवति यथा - दैत्य अरिः दैत्यारिः।

**14. दश्च (७.२.१०९)**

इदमः मकारस्य मकारः एव

दः च इति द्विपदं सूत्रमिदम्। इदमः मः विभक्तौ इत्यादी अनुवर्तन्ते। दः इति षष्ठी प्रयोगः। इदमो दस्य मः स्याद् विभक्तौ इति सूत्रार्थः। अर्थात् विभक्तौ परे सति इदमः दकारस्य मः स्यात्। यथा - इमौ इमे। इदम्–औ इत्यत्र दश्च इत्यनेन दकारस्य मकारे 'त्यदादीनामः' इत्यत्वे 'वृद्धिरेचि' इति वृद्धौ इमौ इति सिद्ध्यति। एवं इमे।

**15. अनाप्यकः (७.२.११२)**

इदः अनादेशः

अन् आपि अकः इति त्रिपदं सूत्रे वर्तते। इदमः इदः विभक्तौ इत् च अनुवर्तते। अत्र आप् इति प्रत्याहारः टा इत्यस्य आकारात् इत्यारभ्य सुप् इत्यस्य प् पर्यन्तं प्रत्याहारः निर्मितः। अर्थात् तृतीया चतुर्थी पञ्चमी-षष्ठी-सप्तमीत्यादीनां सप्त विभक्तीनाम् आप्प्रत्याहारेण ग्रहणम्। नास्ति कः (ककारः) यस्मिन् सः अक् (बहुव्रीहिः) तस्य अकः। अककारस्य इदमः इदः अनापि विभक्तौ अर्थात्

अककारस्य (ककार- रहितस्य) इदमः इदः अन् स्यात् आपि विभक्तौ। यथा – अनेन।

**अनेन-**

इदम्-शब्दात् टा प्रत्यये अनुबन्धलोपे 'इदम्-आ' इति जाते 'त्यदादीनामः' इति सूत्रेण मस्य अत्वे 'अतो गुणे' इति सूत्रेण पररूपमेकादेशे 'अनाप्यकः' इति सूत्रेण इदः अनादेशे अन आ इति जाते 'टाङसि ङसामिनात्स्याः' इत्यनेन इनादेशे 'आद् गुणः' इति गुणे 'अनेन' इति रूपं सिद्धम्।

**16. हलि लोपः (७.२.११३)**

इदमः इदः लोपः

हलि लोपः इति पदच्छेदः। इदमः अकः इदः आपि विभक्तौ इत्यादीनि अनुवर्तन्ते। अककारस्येदम इदो लोपः स्यादापि हलादौ इति सूत्रार्थः। हलि इति विभक्तिविशेषणम्। अर्थात् अककारस्य (ककाररहितस्य) इदमः इदः लोपः स्यात् आपि हलादौ विभक्ती सत्याम्। न अनर्थके अलोऽन्त्यविधिः अनभ्यासविकारे इति परिभाषाबलात् आभ्यम् इति रूपम्।

**17. आद्यन्तवदेकस्मिन् (१.१.२१)**

तदादौ तदन्ते इव

आद्यन्तवत् एकस्मिन् इति पदच्छेदः। एकस्मिन् क्रियमाणं कार्यमादाविवान्त इव स्यात्। यस्य पूर्वः नास्ति स आदिः, यस्य परः नास्ति सोऽन्तः अथवा यस्मात् पूर्व नास्ति परमस्ति स आदिः यस्मात् पूर्वमस्ति परं च नास्ति सः अन्तः इति लोके प्रसिद्धम्। तद् उभयम् एकस्मिन् असहाये न सम्भवति इति तत्र आद्यन्त व्यपदिष्टानि कार्याणि न स्युः। अतः अयम् अतिदेशः आरभ्यते। तदादि तदन्तयोः क्रियमाणं कार्यं तदादौ तदन्त इव च असहाये अपि स्याद् इत्यर्थः।

**यथा- आभ्याम्।**

इदम्शब्दात् भ्याम् प्रत्यये 'इदम्-भ्याम्' इत्यत्र 'त्यदादीनामः' इति सूत्रेण मस्य अत्वे 'अतो गुणे' इति सूत्रेण पररूपमेकादेशे 'हलि लोपः' इति सूत्रेण इदभागस्य लोपे 'नानर्थकेऽलोन्त्यविधिरवभ्यासविकारे' इति परिभाषया अलोऽन्त्यविध्यभावे इद् भागस्य एव लोपे 'अ भ्याम्' इति जाते 'सुपि च' इति दीर्घ प्राप्ते 'आद्यन्तवदेकस्मिन्' इति एकस्मिन् एवाकारे अन्तवद्भावेन अदन्तत्वं मत्वा दीर्घे 'आभ्याम्' इति रूपं सिद्धम्।

**18. नेदमदसोरकोः (७.१.११)**

भिसः ऐसादेशः न

न, इदमदसोः, अकोः इति पदच्छेदः। भिसः ऐस् इति अनुवर्तते। अककारयोरिदमदसोर्भिस् ऐस् न स्यात् इति सूत्रार्थः। अको इति षष्ठी। न विद्यते ककारः ययोः इति अककारः (बहुब्रीहिः) तयोः अककारयोः। अककारयोः इदमदसोः भिस ऐस् न स्यात्। अर्थात् ककार-रहितयोः

इदम्-अदसो भिसः ऐस् न स्यात्। यथा - एभिः। आभ्याम्। एभ्यः। अस्य। अनयोः। एषाम्। अस्मिन्। अनयोः। एषु।

**एभिः -**

इदम्-शब्दात् भिस्प्रत्यये 'इदम्' भिस् इति जाते 'त्यदादीनामः' इति सूत्रेण मस्य अत्वे 'अतो गुणे' इति सूत्रेण पूर्वरूपमेकादेशे 'हलि लोपः' इति सूत्रेण इद्भागस्य लोपे 'अतो भिस् ऐस्' इति सूत्रेण भिसः ऐस् आदेशे प्राप्ते 'नेदमदसोरकोः' इति सूत्रेण निषेधे 'बहुवचने झल्येत्' इति सूत्रेण एत्वे सकारस्य रुत्वे विसर्गे च 'एभिः' इति रूपं सिद्धम्।

## नकारान्तशब्दाः

**19. न ङिसम्बुद्ध्योः**

नस्य लोपः न

न, ङिसम्बुद्ध्योः इति पदच्छेदः। एतेन नकारस्य लोपः विधीयते। अत्र नलोपः प्रातिपदिकान्तस्य इति अनुवर्तते। नस्य लोपो न स्यात् ङौ सम्बुद्धौ च परतः इति सूत्रार्थः। ङिश्च सम्बुद्धिश्च ङिसम्बुद्धौ (इतरेतर द्वन्द्रः) तयोः ङिसम्बुद्ध्योः। ततश्च ङिसम्बुद्ध्योः परतः प्रातिपादिकान्तस्य नस्य लोपः न भवति इत्यर्थः। यथा- हे राजन्। एवं राजानौ, राजानः, राज्ञः।

**हे राजन्**

राजन्शब्दात् सम्बोधने सुप्रत्यये अनुबन्धलोपे 'राजन् स्' इति जाते 'हल्ङ्याब्भ्यो दीर्घात् सुतिस्यापृक्तं हल्' इति सूत्रेण स्लोपे 'एकवचनं सम्बुद्धिः' इति सूत्रेण सम्बुद्धिसंज्ञायां 'नलोपः प्रातिपदिकान्तस्य' इति सूत्रेण नलोपे प्राप्ते 'न ङिसम्बुदध्योः' इति सूत्रेण तन्निषेधे 'हे राजन्' इति रूपसिद्धम् ।

**राज्ञः**

राजन् शब्दात् द्वितीया बहुवचने शसि विभक्तौ अनुबन्धलोपे 'राजन्- अस्' इति स्थिते 'यचि भम्' इति भत्वे 'अल्लोपोऽनः' इति जकार - उत्तरवर्तिनः अकारस्य लोपे राज् न- अस् इत्यत्र 'स्तोः श्चुना श्चुः' इति नस्य श्चुत्वे सकारस्य रुत्वे विसर्ग च कृते 'राज्ञः' इति रूपं सिद्धम्।

**20. मघवा बहुलम् (६.४.१२८)**

नस्य लोपः न

मघवा बहुलम् इति द्विपदं सूत्रम्। मघवन्शब्दस्य वा तृ इत्यन्तादेशः स्यात् इति सूत्रार्थः। छन्दोवत्सूत्राणि भवन्ति इति नियमानुसारं 'मघवा' इति षष्ठ्यर्थे प्रथमा। 'तृ' इति अनुवर्तते। तच्च लुप्तप्रथमाकम्। एवं मघवन् शब्दस्य वा तृ इति अन्तादेशः स्यात् इति सूत्रार्थः। यथा मघवान्, मघवा वा।

### 21. उगिदचां सर्वनामस्थानेऽधातोः (७.१.७०)

अधातोः-उगितोः-न लोपपञ्चधातोः नुमागमः

उगिदचां सर्वनामस्थाने अधातोः इति पदच्छेदः। अधातोरुगितो नलोपनोपञ्चतेश्च नुम् स्यात् सर्वनामस्थाने परे इति सूत्रार्थः। यथा – मघवान्। मघवन्तौ। मघवन्तः। हे मघवन्। मघवद्भ्याम्। तृत्वाभावे – मघवा सुटि राजवत्। अर्वन्तौ अर्वन्तः अर्वद्भ्यामित्यादि।

**मघवान्**

मघवन् शब्दात् सु-प्रत्यये 'मघवन्-सु' इति जाते 'मघवा बहुलम्' इति सूत्रेण 'तृ' इति अन्तादेशे 'मघवतृ-सु' इति स्थिते ऋकारस्य इत्संज्ञायां लोपे च 'उगिदचां सर्वनामस्थानेऽधातोः' इति सूत्रेण नुमि मित्वाद् अन्त्याद् अचः परे नुमि गते 'मघवन्त्-सु' इति स्थिते सोः उकारस्य इत्संज्ञायां लोपे च 'हल्ङ्याब्भ्यो दीर्घात् सुतिस्यपृक्तं हल्' इति सूत्रेण सलोपे 'संयोगान्तस्य लोपः' इत्यनेन तकारलोपे 'सर्वनामस्थाने चासम्बुद्धौ' इत्यनेन अन्तोपधायाः दीर्घत्वे मघवान् इति रूपं सिद्धम्। तृत्वाभावे मघवा इति।

### 22. श्वयुवमघोनामतद्धिते।(६.४.१३३)

अन्नन्तानां भसंज्ञकानां श्वयुवमघोनां सम्प्रसारणं

श्वयुवमघोनाम् अतद्धिते इति पदच्छेदः। श्वाश्च युवाश्च मघवाश्च श्वयुवमघवानः तेषां श्वयुवमघोनाम्। तदन्तविधिः। सम्प्रसारणं इति अनुवर्तते। अन्नन्तानां भसंज्ञकानां श्वयुवमघोनाम् सम्प्रसारणं भवेत् अतद्धितप्रत्यये परे इति सूत्रार्थः। यथा – मघोनः मघोना। मघवभ्यां। एवं श्वन्। युवन्।

**मघोनः**

मघवन्शब्दात् शसि अनुबन्धवोपे मघवन् अस्। श्वयुवमघोनामतद्धिते इति सम्प्रसारणो मघ उ वन् अस्। सम्प्रसारणाच्च इति पूर्वरूपे मघ उ नस्। गुणे रुत्वे विसर्गे च मघोनः इति।

### 23. न सम्प्रसारणे सम्प्रसारणम्

पूर्वस्य यणः सम्प्रसारणं न

न सम्प्रसारणे सम्प्रसारणे इति त्रिपदं सूत्रमिदम्। सम्प्रसारणे परतः पूर्वस्य यणः सम्प्रसारणं न स्यात् इति यकारस्य नेत्वम्। अत एव ज्ञापकादन्त्यस्य यणः पूर्वं सम्प्रसारणम् इति सूत्रार्थः। यथा – यूनः। यूना- युवाभ्यामित्यादि। अर्वा। हे अर्वन्।

**यूनः**

युवन् शब्दात् शस्प्रत्यये अनुबन्धलोपे 'यचि भम् ' इति सूत्रेण भत्वे 'श्वयुवमघोनामतद्धिते' इति सूत्रेण वकारस्य सम्प्रसारणे उकारे 'सम्प्रसारणाच्च' इति सूत्रेण पूर्वरूपमेकादेशे 'यु-उन्-अस्' इति जाते 'अकः सवर्णे दीर्घः' इति दीर्घे यून अस्। अत्र पुनरपि सम्प्रसारणे प्राप्ते 'न सम्प्रसारणे सम्प्रसारणम्' इति सूत्रेण तन्निषेधे इति सूत्रेण दीर्घे सकारस्य रुत्वे विसर्गे यूनः इति रूपं सिद्धम्।

**अर्वा**

अर्वन्शब्दात् सु प्रत्यये अनुबन्धलोपे 'अर्वन् स्' इत्यत्र सर्वनामस्थानत्वात् 'सर्वनामस्थाने चासम्बुद्धौ' इति सूत्रेण दीर्घे 'हल्ङ्याब्भ्यो दीर्घात् सुतिस्यपृक्तं हल्' इति सूत्रेण सुलोपे 'नलोपः प्रातिपदिकान्तस्य' इति सूत्रेण नलोपे 'अर्वा' इति रूपं सिद्धम्।

**24. थो न्थः (७.१.८७)**

न्यादेशः

थः न्थः इति पदच्छेदः। पथिमथोस्थस्य न्यादेशः स्यात् सर्वनामस्थाने परे। 'थ' इति षष्ठी। आदेशेऽकार उच्चारणार्थः। पथिमथिग्रहणम् अनुवर्तते। यथा - पन्थाः पन्थानो पन्थानः इति।

**पन्थाः**

पथिन्शब्दात् सुप्रत्यये पथिन् स् इति जाते 'पथिमथ्यृभुक्षामात्' इति सूत्रेण आकारान्तादेशे पथि-आ-से' इति स्थिते अत्र 'इतोऽत् सर्वनामस्थाने' इति सूत्रेण इकारस्य स्थाने अकारादेशे पथ-अ-स्' इति जाते 'थो न्थः' इत्यनेन थकारस्य न्थादेशे 'अकः सवर्ण दीर्घः' इति सूत्रेण सवर्णदीर्घे सकारस्य रुत्वे विसर्गे च कृते पन्थाः इति रूपं सिद्धम्।

**25. ष्णान्त षट् (७.३.५४)**

षट्संज्ञा

ष्णान्ता षट् इति द्विपदं सूत्रमिदम्। अनेन सूत्रेण षड्संज्ञा विधीयते। षान्ता नान्ता च संख्या षट्संज्ञा स्यात् इति सूत्रार्थः। संख्या इत्यनुवर्तते। तच्च पूर्वसूत्रे बहुगणवतु इति परमपि शब्दाधिकाराद् इह पञ्च षड् इत्यादि प्रसिद्धसंख्याबोधकशब्दपरम् आश्रीयते, बहुगणवतुडतिषु ष्णान्तत्वासम्भवात्। यथा - पञ्च पञ्चभिः पञ्चभ्यः पञ्चभ्यः । पञ्चन्-शब्दः नित्यं बहुवचनान्तः।

**पञ्च**

पञ्चन्शब्दात् जसप्रत्यये पञ्चन् जस् 'ष्णान्ताः षट्' इति सूत्रेण पञ्चन्शब्दस्य षट्संज्ञायां षट्भ्यो लुक् इति सूत्रेण जस् प्रययस्य लोपे नलोपे च 'पञ्च' इति रूपम्। एवं पञ्चभिः पञ्चभ्यः पञ्चभ्यः।

**26. नोपधायाः (६.४.७)**

उपधायाः दीर्घः

न उपधायाः इति द्विपदं सूत्रम्। नान्तस्योपधायाः दीर्घः स्यात् नामि परे इति सूत्रार्थः। न इति लुप्तषष्ठीकम्, अङ्गस्य इत्यधिकृतस्य विशेषणम्। 'अलोऽन्त्यस्य' परिभाषया अयं दीर्घः अन्त्यस्य अलः (नकारस्य) उपधायाः (अकारस्य) भवति। यथा- पञ्चानाम्, पञ्चसु।

**पञ्चानाम्**

पञ्चन्शब्दात् आमि विभक्तौ पञ्चन् - आम्' इति जाते 'ष्णान्ताः षट्' इति सूत्रेण पञ्चन्शब्दस्य षट्संज्ञायां 'षटचतुर्भ्यश्च' इति सूत्रेण नुडागमे अनुबन्धलोपे 'नोपधायाः' इति सूत्रेण दीर्घे 'पञ्चानाम्' इति रूपं सिद्धम्।

**27. अष्टन आ विभक्तौ (७.२.८४)**

अष्टन् शब्दस्य आकारः स्यात्

अष्टनः आ विभक्तौ इति पदत्रयं वर्तते। अष्टन आत्वं वा स्यात् हलादौ विभक्तौ इति सूत्रार्थः। 'रायो हलि' इत्यतः हलि इत्यपकृष्यते। तत् च विभक्तौ इत्यस्य विशेषणम्। यस्मिन् विधिस्तदादौ अल्ग्रहणे इत्यनेन तदादिविधौ हलादौ इति भवति। एवम् अष्टनः(अष्टन् शब्दस्य) आत्वं (आकारः) वा स्यात् हलादौ विभक्तौ इति सूत्रार्थः। यथा अष्टौ।

**28. अष्टाभ्य ओश् (७.१.२९)**

अष्टन् शब्दस्य जश्शसोरौश्

अष्टाभ्यः औश् इति पदच्छेदः। कृताकारादष्टनः परयोः जश्शसोरौश् स्यात्। अष्टभ्यः इति वक्तव्ये कृतात्वनिर्देशे। जश्शसोर्विषये आत्वं ज्ञापयति इति सूत्रार्थः। जश्शसोः इत्यनुवर्तते। 'अष्टाभ्यः' इति पञ्चमी। अत्र 'अष्टा' इति आकारान्त शब्दः विवक्षितः न तु अष्टन् शब्दः। यथा – अष्टौ। अष्टाभिः। अष्टाभ्यः।अष्टानां। अष्टासु। आत्वाभावे अष्ट इत्यादि पञ्चवत्।

**अष्टौ**

अष्टन्शब्दात् जसप्रत्यये 'अष्टन् जस्' इति जाते अष्टन आ विभक्तौ इति सूत्रेण आकारान्तादेशे 'अष्ट-आ-जस्' इति स्थिते 'अकः सवर्ण दीर्घः' इति सूत्रेण सवर्णदीर्घे 'अष्टाभ्य औश्' इति सूत्रेण जसः औशादेशे 'अष्टा औश्' इति जाते अनुबन्लोपे 'वृद्धिरेचि' इति सूत्रेण वृद्धौ' अष्टौ।

## जकारान्तशब्दाः

**29. कृदतिङ् (३.१.९३)**

कृत्संज्ञः

कृत्, अतिङ् इति द्विपदं सूत्रम्। अनेन सूत्रेण कृत्संज्ञः विधीयते। अत्र सन्निहिते धात्वधिकारे तिङ्भिन्नः प्रत्ययः कृत्संज्ञः स्यात् इति सूत्रार्थः। अत्र 'धातोः' इत्यधिकृतं प्रत्ययः इति च अधिक्रियते। 'कर्तरि कृत्' इत्यादावस्य प्रयोजनम्।

**30. चोः कुः (८.२.३०)**

चवर्गस्य कवर्गः

चोः कुः इति पदच्छेदः। चवर्गस्य कवर्गः स्याज्झलि पदान्ते च इति सूत्रार्थः। झलि पदान्ते इति अनुवर्तते। यथा - सुयुक् सुयुग् सुयुजा सुयुग्भ्याम्। खन् खञ्जौ खन्भ्याम्।

### सुयुग् -

सुयुज्शब्दात् प्रथमैकवचने सुयुज् सु। 'चोः कुः' इति सूत्रेण कुत्वे गकारे सुयुग्। 'वाऽवसाने' इति विकल्पेन चर्त्वे सुयुक्। चर्त्वाभावे सुयुग्।

**31. स्कोः संयोगाद्योरन्ते च (८.२.२९)**

सकारककारयोः लोपः

स्कोः संयोगाद्योः अन्ते च इति त्रिपदं वर्तते। पदान्ते झलि च परे यः संयोगः तदाद्योः सकारककारयोः लोपः। पदस्य, अन्ते, झलि, लोपः इत्यनुवर्तन्ते। यथा - भृट् भृड् वा।

### भृट्/ भृड्

भृस्ज् सू इत्यवस्थायाम् अनुबन्धलोपे भृस्ज् स्। हल्ङ्याब्भ्यादिना सलोपे भृस्ज्। अत्र 'स्कोः संयोगाद्योरन्ते च' इति सूत्रेण सलोपे भृज्। 'व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः' इति षत्वे 'झलां जशोऽन्ते' इति जश्त्वे भृड्। 'वाऽवसाने' इति विकल्पेन चर्त्वे भृट्। चर्त्वाभावे भृड्।

**32. तदोः सः सावनन्त्ययोः (७.२.१०६)**

अनन्त्ययोः तकार दकारयोः सः

तदोः सः सौ अनन्त्ययोः इति चतुष्पदं सूत्रम्। एतेन आत्सन्तस्य उपधा दीर्घः विधीयते। त्यदादीनां तकारदकारयोरनन्त्ययोः सः स्यात् सौ इति सूत्रार्थः। त्यादादीनां इत्यनुवर्तते। तकाराद् अकारा उच्चारणार्थः। आदेशे अपि अकारः उच्चारणार्थः। यथा- स्यः, त्यौ, त्ये। सः तौ ते। यः यौ ये। एषः एतौ एते।

**सः -**

तद्शब्दात् प्रथमैकवचने तद् सु। अनुबन्धलोपे तद् स्। 'तदोः सः सावनन्त्यस्य' इति सकारादेशे सस्। सकारस्य रुत्वे विसर्गे च सः।

**33. अत्वसन्तस्य चाधातोः (६.४.१४)**

आत्वसन्तस्य उपधा दीर्घः

अत्वसन्तस्य च अधातोः पदत्रयं वर्तते। अत्वन्तस्योपधाया दीर्घे धातुभिन्नस्यासन्तस्य चासम्बुद्धौ सौ परे। उगित्वान्नुम्। यथा धीमान् धीमन्तो धीमन्तः, भवान् भवन्तौ भवन्तः, हे धीमन्। उपधायाः, असम्बुद्धौ, दीर्घः इति अनुवर्तन्ते। अत्यन्तस्य धातुभिन्न-असन्तस्य च उपधायाः इति लभ्यते। 'अतु' इति लुप्त षष्ठीकं पृथक् पदम्। अधातोः इति असन्तस्य विशेषणम्।

**धीमान् -**

धीमत् शब्दात् सौ उगिदचां सर्वनाम्नोऽधातोः इति नुमि धीमन् त् स्। अत्वसन्तस्य चाधातोः इति उपधादीर्घे सलोपे संयोगान्तलोपं च धीमान्।

**34. .उभे अभ्यस्तम् (६.१.५)**

अभ्यस्तसंज्ञा षठध्याय विहितस्य शब्दस्वरूपस्य

उभे अभ्यस्तम् इति पदच्छेदः। षष्ठ-द्वित्व-प्रकरणे ये द्वे विहिते ते उभे समुदिते अभ्यस्तसंज्ञे स्तः। कथनस्य तात्पर्यमिदमस्ति यद्वित्वविधायनाय अष्टाध्याय्यां द्वे प्रकरणे भवतः। १. अष्टाध्याय्याः षष्ठाध्यायस्य प्रथमपादगतात् प्रथमसूत्राद् आरभ्य द्वादशसूत्र यावत्। २. अष्टाध्याय्याः अष्टमाध्यायस्य प्रथमपादगतात् प्रथमसूत्राद् आरभ्य पञ्चदशसूत्रं यावत्। अत्र अभ्यस्त संज्ञा षष्ठाध्याय विहितस्य शब्दस्वरूपस्य एव भवति इति आशयः। अस्य सूत्रस्य अत्र कारणम् अस्ति 'अनन्तरस्य विधिर्वा भवति प्रतिषेधो वा' इति परिभाषा। एतत् परिभाषानुसारेण विधिनिषेधौ समीपे पठितस्य एव भवति न तु दूरपठितस्य। नाभ्यस्ताच्छतुः इत्यादावस्य प्रयोजनम्।

## 1.4.2. हलन्तस्त्रीलिङ्गः

1. **नहो धः (८.२.३४)**

धकारादेशः

नहः धः इति पदच्छेदः। अनेन सूत्रेण धकारादेशः विधीयते। नहो हस्य धः स्याज्झलि पदान्ते च इति सूत्रार्थः। पदस्य, अन्ते, झलि इति अनुवर्तन्ते। धकाराद् अकार उच्चारणार्थः। अलोऽन्त्यपरिभाषया नह् धातोः अन्त्यस्य अलः हकारस्य एव धकारादेशः भवति। होः ढः इति सूत्रेण प्राप्तस्य ढत्वस्य अपवादरूपमेतत् सूत्रम्। यथा उपानत्,उपानद् वा।

**उपानत्/उपानद्**

उपपूर्व नह् धातोः क्वापि क्विपः सर्वापहारे उपानह्। नहि-वृति-व्यधि-रुचि-सहि-तनिषु क्वौ इति पूर्वपदस्य दीर्घे उपानह्। तस्मात् सौ उपानह् सु। 'नहो धः' इति हस्य धत्वे 'झलां जशोऽन्ते' इति जश्त्वे दकारे 'वाऽवसाने' इति चर्त्वे 'हल्ङ्याब्भ्यो..' इत्यादिना सुलोपे उपानत्। चर्त्वाभावपक्षे उपानद्।

**2. अपो भि (७.४.४८)**

अपः तकारादेशः

अप: भि इति पदच्छेदः। अपस्तकारो भादौ प्रत्यये परे इति सूत्रार्थः। अत्र तः इति अनुवर्तते। अङ्गस्य इत्यधिकृतम्। यथा - अद्भिः अद्भ्यः अद्भ्यः अपाम् अप्सु। दिक् दिग् दिशो दिशः दिग्भ्याम्।

**अद्भिः**

अपशब्दात् भिसि अप् भिस्। 'अपो भि' इति अपः पकारस्य तकारे अत् भिस्। जश्त्वे दकारे रुत्वे विसर्गे च अद्भिः इति रूपम्।

## 1.4.3 हलन्तनपुंसकलिङ्गः

**'स्वनडुत्'**

सु शोभनाः अनड्वाहः (वृषभाः यस्य (कुलस्य) तत् स्वनडुत् इति विग्रहे बहुव्रीहिसमासः। समासत्वात् कृत्तद्धितसमासाश्च इति सूत्रेण प्रातिपदिकसंज्ञा। ततश्च स्वादयः प्रत्ययाः प्रथमाविभक्तौ स्वनडुह्-सु इत्यवस्थायां स्वमोर्नपुंसकात् इत्यनेन 'सोः लोपे वसुस्रंसुध्वस्वनडुहां दः' इति सूत्रेण हस्य दत्वे 'वाऽवसाने' इति वैकल्पिकेन चर्त्वे दस्य तकारे 'स्वनडुत्' इति रूपं सिद्ध्यति। पक्षे चर्त्वाभावे च 'स्वनडुद्' ।

**1. अन्वादेशे नपुंसके एनद्वक्तव्यः (वार्तिकम्)**

इदमः एनद् आदेशः

अन्वादेशे नपुंसके एनद् वक्तव्यः इति पदच्छेदः। अनेन वार्तिकेन इदमः एनद् आदेशः विधीयते। यथा एनत्, एनद्, एने, एनानि, एनेन, एनयोः। एतद् वार्तिकं द्वितीयाटोस्स्वेनः इति सूत्रान्तर्गते भाष्ये पठितम्। अतः एतद् अपि तद्विषयकम्। अर्थात् अन्वादेशे नपुंसकप्रसङ्गे इदमः एनद्-आदेशः वक्तव्यः इति वार्तिकार्थः। यथा एनत्। इदम् शब्दात्सौ प्रत्यये अन्वादेशे नपुंसके 'एनद् वक्तव्यः' इति वार्तिकेन इदमः एनदादेशे 'स्वमोर्नुपुंसकात्' इति सोर्लोपे 'वाऽवसाने' इति वैकल्पिकेन चर्त्वे 'एनत् एनद्' इति रूपं सिद्धम्

**2. अहन् (८.२.६८)**

अहन् इत्यस्य रुः स्यात्

एकपदं सूत्रमिदम्। एतेन रुः विधीयते। अहन्नित्यस्य रुः स्यत् पदान्ते इति सूत्रार्थः। यथा अहोभ्याम्। अहन् इति लुप्तषष्ठीकं पदम्। अत्र रुः अन्त इति अनुवर्तते। 'अलोऽन्त्यपरिभाषया' अयमादेशः अन्त्यस्य अलः नकारस्य स्थाने एव भवति । यथा- अहोभ्याम् दण्डि दण्डिनी दण्डीनि।

**अहोभ्याम्**

अहन्शब्दात् भ्याम प्रत्यये परे अहन् भ्याम् । स्वादिष्वसर्वनामस्थाने इति पदसंज्ञायाम् अहन् इति सूत्रेण नकारस्य रुत्वे अहन् भ्याम् । हशि च इति उत्वे अह उ भ्याम् ' आद्गुणः इति गुणे अहोभ्याम् ।

**3. सम्बुद्धो नपुंसकानां नलोपो वा वाच्यः (वार्तिकम्)**

नलोपः

सम्बुद्धौ नपुंसकानां नलोपः वा वाच्यः इति पदच्छेदः। अनेन वार्तिकेन विकल्पेन नलोपः विधीयते। अस्य वार्तिकस्य अर्थः अयमस्ति सम्बुद्धौ (सम्बोधने एकवचने) नपुंसकानां (नकारान्त नपुंसकलिङ्गशब्दानां) नलोपः (अन्त्यनकारस्य लोपः) भवतीति वक्तव्यम्। यथा दण्डिन् शब्दस्य सम्बोधने सुप्रत्यये तस्य लोपे 'सम्बुद्धौ नपुंसकानां नलोपे वा वाच्यः' इति वार्तिकेन वैकल्पिकेन नलोपे हे दण्डि। नलोपाभावे च हे दण्डिन् इति रूपद्वयं सिद्ध्यति।

**5. आच्छीनद्योर्नुम् (७.१.८०)**

विकल्पेन नुम्

आत् शीनद्योः नुम् इति पदच्छेदः। अनेन सूत्रेण विकल्पेन नुमागमः विधीयते। अवर्णान्तादङ्गात्परो यः शतुरवयवः तदन्तस्य नुम् वा स्यात् शीनद्योःपरतः। शतुः वा इति अनुवर्त्तते। आद् इति पञ्चमी। अङ्गस्य इत्यधिकृतं पञ्चम्यां विपरिणम्यते। यथा - तुदन्ती तुदती तुदन्ति।

**तुदन्ती**

तुदत् शब्दात् औ प्रत्यये तुदत् औ। नपुंसकाच्च इति शी। उदत् इत्यत्र 'आच्छीनद्योर्नुम्' इति विकल्पेन नुमि तुदन्ती इति नुमः अभावे तुदती ।

**6. शप्श्यनोर्नित्यम् (७.१.८१)**

नपुंसकस्य नित्यं नुम्

शप्श्यनोः नित्यम् इति द्विपदम् सूत्रम्। अनेन सूत्रेण नुमागमः विधीयते। शप्श्यनोरात्परो यः शतुरवयवः तदन्तस्य नित्यं नुम् स्यात् शीनद्योः परतः इति सूत्रार्थः। यथा पचन्ती पचन्ति। आत् शीनद्योः नुम् शतुः अङ्गस्य इत्यादीनि अनुवर्तन्ते। अवयव इति च अध्याह्रियते।

**पचन्ती**

पच्धातोः लटः शतृशानचौ इति शतृप्रत्यये पच् अत्। तस्मात् औ विभक्तौ 'नपुंसकाच्च' इति शीभावे पचत् ई 'शप्श्यनोर्नित्यम्' इति नुमागमे पचन्ती इति।

# Summarised Overview

अस्मिन् पाठे भवन्तः हलन्तपुंलिङ्ग-स्त्रीलिङ्ग-नपुंसकलिङ्ग-प्रकरणान्तर्गतान् हकारान्त- रान्त मान्त- नान्त- जान्त शब्दान् तत्सम्बन्धीनि सूत्राणि च पठितवन्तः। हयवरट् इति प्रत्याहार-सूत्रस्य क्रमानुसार सर्वप्रथमं हकारान्तस्य शब्दस्य प्रारम्भः कृतः अस्ति। हकारान्त शब्दान्तर्गतानि भवन्तः सूत्राणि पठितवन्तः। लिह्-विश्ववाह्- अनड्वाह्-चेति शब्दाः हकारान्ताः सन्ति। रान्त शब्दानां विषये उदाहरणत्वेन चतुर् इति शब्दः प्रयुक्तः। राजन्, यज्वन्, ब्रह्मन् चेति नकारान्ताः सन्ति। इत्थं भवन्तः हलन्तपुंलिङ्ग सर्वे नान्तजान्तादीनां शब्दानां विषये अध्ययनं कृतवन्तः । अपि च मघवन्, श्वन्, युवन्, अर्वन् पथिन्, पञ्चन्, अष्टन्, चेति शब्दाः पठिताः।
हलन्तेषु स्त्रीलिङ्गनपुंसकलिङ्गेषु कतिपयानि मुख्यानि सूत्राणि, तेषां प्रक्रियाः च सूचिताः। अस्यैककस्य पठनेन सामान्यतया रूपनिष्पत्तिकौशलं सम्पादयितुं शक्यते।

# Assignments

1. हकारस्य ढः केन सूत्रेण विधीयते? व्याख्यात।
2. किं नाम सम्प्रसारणम् विशदयत।
3. किमः मः इति सूत्रं व्याख्यात।
4. अनाप्यकः इति सूत्रस्य व्याख्यानं कुरुत।
5. अन्वादेशः इत्यस्य कः अर्थः?
6. विश्वैहः इत्यत्र विश्व ऊह् अस्' इत्यवस्थायां पूर्वपरयोः स्थाने वृद्धिरेकादेशः केन सूत्रेण भवति? विशदयत।
7. हे राजन् इत्यत्र केन सूत्रेण सलोपः विधीयते ? निरूपयत।
8. 'थो न्थः' इति सूत्रं व्याख्यात।
9. अदस्- शब्दस्य पञ्चमी-विभक्तौ रूपम्। एतस्य सिद्धि-प्रक्रियां लिखत ।

# Suggested Readings


1. पदसंस्कारचन्द्रिका. कैकुलका रामवारियर्, केरलसाहित्य अकादमि, तृश्शूर।
2. लघुपाणिनीयम्. ए आर् राजराजवर्मा, केरलसर्वकलाशाला, तिरुवनन्तपुरम्।
3. पाणिनीयप्रद्योतम्. ऐसि चाक्को, भाषा इन्स्टिट्यूट, तिरुवनन्वपुरम्।
4. प्रक्रियाभाष्यम्. जोन् कुन्नपप्लि, नाषणल् बुक् स्टाल्, कोट्टयम्।

## References

1. लघुसिद्धान्तकौमुदी.वरदराजः, चौखम्बा संस्कृत सीरीस अकादमि, वाराणसी २००५.
2. श्रीवरदराजाचार्यकृतः लघुसिद्धान्तकौमुदी. श्रीसूर्यनारायणशुक्लः, 'बालमनोरमा' संस्कृत - हिन्दीटीका सहित प्रकाशक: वाराणासी, संस्कृत संस्थान सीरीज १०००
3. श्रीमद्वरदराजाचार्यप्रणीता लघुसिद्धान्तकौमुदी. श्रीधरमुखोल्लासिनी- हिन्दी- व्याख्यासमन्विता व्याख्याकारः गोविन्द प्रसाद शर्मा, चौखम्बा सुरभारती प्रकाशन वाराणसी २००७
4. लघुसिद्धान्तकौमुदी प्रथमो भागः. प्रोफसर् आर् वासुदेवन् पोट्टि,सर्वकारीयसंस्कृतकलालयः, तृप्पूणित्तुरा, १९९३

**Space for Learner Engagement for Objective Questions**

Learners are encouraged to develop objective questions based on the content in the paragraph as a sign of their comprehension of the content. The Learners may reflect on the recap bullets and relate their understanding with the narrative in order to frame objective questions from the given text. The University expects that 1 - 2 questions are developed for each paragraph. The space given below can be used for listing the questions.

# धातुप्रकरणम्

## BLOCK- 2

UNIT 1

# भ्वादिगणपरिचयः
## (भू एध् धातूनां प्रक्रियाविचारः)

## Learning Outcomes

- धातूनां क्रियापदानां च विशेषपरिचयः।
- लकाराणां सुष्ठु प्रयोगक्षमतां सम्पादयति।
- क्रियारूनिष्पत्तिं जानाति।
- परस्मैपदि-आत्मनेपदि धातूनां भेदं अर्थं अवगच्छति।

## Background

लोके मानवानां व्यवहारः वाक्यं विना न संभवति। भाषारचनायां वाक्यसंरचनायां वा तिङन्तपदानां प्रयोगस्य महत्वं सर्वविदितम्। पदानि प्रधानतया त्रिधा नामपदानि, क्रियापदानि, अव्ययानि च। क्रियाणां पठनाथ धातूनां पठनं कार्यम्। अस्माकं पाठ्यक्रमे भ्वादिप्रकरणात् भूधातोः एध्धातोः तथा धातूनां सविशेषताः अस्माभिः ज्ञातव्याः। अतः प्रथमं धातु परिचयामः।

**किं नाम धातुः ?**

'धीयते सर्वम् अस्मिन् इति धातुः'। धात्वनुसारणेनैव पदनिष्पत्तिः अर्थकथनं च। सर्वाणि पदानि धातु जानि इति शाकटायनाचार्यः। धात्वनुसारेण क्रियाः।

धातवः त्रिधा। परस्मैपदिनः, आत्मनेपदिनः उभयपदिनः चेति । यद्यपि परस्मै (परोद्देशार्थफलकं) सूचकः परस्मैपदमिति, आत्मने सूचकं (तेषां फलं कर्तारं अभिगच्छति) आत्मनेपदमिति वक्तुं शक्यते तथापि अयमर्थः सर्वत्र न युज्यते । ज्ञातुं शक्यते यत् केचन धातवः परस्मैपदिनः केचन आत्मनेपदिनः अन्ये केचन उभयाः (परस्मैपदिनः आत्मनेपदिनः च) चेति।पुरुषाः पुरुषोचितं वस्त्रधारणं, स्त्रियः स्त्रीजनोचितं वस्त्रं अन्ये कतिपये उभयरीत्यापि वर्तमानं वस्त्रं धरन्ति । तद्वत्।धातुभ्यः एव विविध प्रकारकाणि क्रियारूपाणि कृदन्तरूपाणि च निष्पद्यन्ते। ते च धातवः दश गणेषु विभक्ताः सन्ति। भ्वादिः, अदादिः, जुहोत्यादिः, दिवादि, स्वादिः, तुदादिः, रूधादिः, तनादिः, क्र्यादिः, चुरादिः च। अस्मिन् एकके भ्वादिगणे परस्मैपदि-आत्मनेपदि धातूनां

प्रक्रियासम्बन्धानि कानिचन सूत्राणि व्याख्यातानि। येन लकार-पुरुष-वचन धातुरूपं स्पष्टं भवन्तीति। तानि रूपाणि कथं भवतीति अयं पाठभागात् पठिष्यन्ति।

## Keywords

वर्तमाने लट्, परोक्षे लिट्, अनद्यतने लुट्, लृट् शेषे च, लोट् च, अनद्यतने लङ्, विधिनिमन्त्रणामन्त्रणाधीष्टसम्प्रश्नप्रार्थनेषु लिङ्, आशिषि लिङ्लोटौ, लुङ्, लिङ्निमित्ते लृङ् क्रियातिपत्तौ

## Discussion

### दश लकाराः

लट् लिट् लुट् ऌट् लेट् लोट् लङ लिङ् लुङ् लृङ् । एषु पञ्चमो लकारश्छन्दोमात्रगोचरः।

**1. लः कर्मणि च भावे चाकर्मकेभ्यः। (३.४.६९)**

लकाराः

लः कर्मणि च भावे च अकर्मकेभ्यः इति पदच्छेदः। लकाराः सकर्मकेभ्यः कर्मणि कर्तरि च स्युः अकर्मकेभ्यो भावे कर्तरिच इति सूत्रार्थः। अत्र 'लः कर्मणि च' इत्येकं वाक्यम्। लः इति बहुवचनं लकाराः इत्यर्थः। कर्तरि कृत् इत्यतः कर्तरि' इति अनुकृष्यते। धातोः इति अनुवर्तते। तथा वचन विपरिणामेन च धातुभ्यः इति रूपेण विपरिणमते। तेन लः लकाराः सकर्मकेभ्यः (धातुभ्यः) कर्मणि कर्तरि तथा अकर्मकेभ्यः (धातुभ्यः) भावे कर्तरि च स्युः इत्यर्थः लभते। सकर्मक धातुविषयकं च इदं वाक्यम्, अकर्मकेषु, कर्मणि' इत्यस्य बाधितत्वात्। 'भावे च अकर्मकेभ्यः' इति च अपरं वाक्यम्। चकारेण कर्तुः अनुकर्षः तेन अकर्मकेभ्यः धातुभ्यः भावे कर्तरि च लकारा: भवन्ति इत्यर्थः लभते।

**2. वर्तमाने लट् (३.२.१२३)**

वर्तमाने लट्

वर्तमाने लट् इति द्विपदं सूत्रमिदम्। अनेन सूत्रेण लट् विधीयते। वर्तमानक्रियावृत्तेः धातोः लट् स्यात् इति सूत्रार्थः। अटावितौ। उच्चारमसामर्थ्याल्लस्य नेत्वम्। भू सत्तायाम्। कर्तृविवक्षायां भू ल इति

स्थिते। वर्तमाने इति तत्र अन्वेति। लट् इत्यत्र अकारटकारौ इतौ भवतः। ल् एव अवशिष्यते।

### 3. तिप्तस्झिसिप्थस्थमिप्वस्मस्ताताञ्झथासाथांध्वमिड्वहिङ्महिङ् (पा.३.४.७८)

अष्टादशप्रत्ययाः

अत्र एकमेव पदं वर्तते, तत् समस्तपदं च भवति। एतेन अष्टादशप्रत्ययाः विधीयन्ते। एतेऽष्टादश लादेशाः स्युः इति सूत्रार्थः। लस्य इति अनुवर्तते। तिप्तस्झिसिप्थस्थमिप्वस्मस्ताताञ्झथासार्थाध्वमिङ्व-हिङ्गहिङ् (तिप् तस् झि सिप् थस् थ मिप् वस् मस् त आताम् झ थास् आथाम् ध्वम् इड् वहिङ् महिङ) चेति। अतः एतत् पदम् प्रथमा-एकवचनम् भवति। लस्य इति अनुवर्तते। तत् च स्थानषष्ठयन्तम् अतः ते लादेशाः इति कथ्यन्ते।

| **परस्मैपदिनः** | **आत्मनेपदिनः** |
|---|---|
| तिप् तस् झि | त आताम् झ |
| सिप् थस् थ | थास् आथाम् ध्वम् |
| मिप् वस् मस् | इड् वहिङ् महिङ् |

### 4. लः परस्मैपदम्। (१ .४ .९९)

लादेशाः परस्मैपदसंज्ञाः

लः परस्मैपदम् इति पदच्छेदः। अनेन परस्मैपदसंज्ञा विधीयते। लादेशाः परस्मैपदसंज्ञाः स्युः इति सूत्रार्थः। लः इति षष्ठी विभक्तिः। परस्मैपदम् इति प्रथमा विभक्तिः। लः इति स्थान - षष्ठ्या आदेशः इति अध्याहार्यः भवति। अतः एते अष्टादश लादेशाः तिप् - तस् - झि - सिप् थस् थ मिप् वस् – मस्– त-आताम्-झ- थास्-आथां- ध्वम्- इड् - वहि महिङ् चेति परस्मैपदसंज्ञकाः स्युः इति अर्थः लभते ।

### 5. तङानावात्मनेपदम्। (१.४.९९)

तङ् शानच् कानच् च आत्मनेपदसंज्ञा

तङानौ आत्मनेपदम् इति पदच्छेदः। अनेन सूत्रेण आत्मनेपदसंज्ञा विधीयते। तङ् प्रत्याहारः शानच्-कानचौ चैतत्संज्ञाः स्युः। पूर्वसंज्ञापवादः। अत्र 'लः इति अनुवर्तते। तङ्प्रत्याहारे त आताम् इति तशब्दम् आरभ्य महिङ् इत्यत्र ङकारपर्यन्तं। एवं तङ् प्रत्याहाराः। त -आताम्-झ-थास् आथाम्- ध्वम् - इड् -वहि -महिङ् चेति नव तिप्प्रत्ययाः अन्तर्भवन्ति। आन इत्युक्ते शानच्कानचौ प्रत्ययौ एव। एवं

तङ् प्रत्याहारः शानच्कानचौ च आत्मनेपदसंज्ञाः स्युः इति अर्थः। एतत् सूत्रं परस्मैपदसंज्ञायाः अपवादः भवति ।

| | | |
|---|---|---|
| त | आताम् | झ |
| थास् | आथाम् | ध्वम् |
| इड् | वहि | महिङ् |

### 6. अनुदात्तङित आत्मनेपदम्। (१.३.१२)

आत्मनेपदम्

अनुदात्तङितः आत्मनेपदम् इति पदच्छेदः। अनुदात्तेतो ङितश्च धातोरात्मनेपदं स्यात्। अत्र धातोः इति अनुवर्तते। अनुदात्तश्च ङि च अनुदात्तङौ तौ च इतौ यस्य स अनुदात्तङित्, तस्मात् अनुदात्तङितः। द्वन्द्वान्ते इत् शब्दस्य प्रत्येकमन्वयः। अतः अनुदात्तेतः ङितः च धातोः आत्मनेपदं स्यात् इति सूत्रार्थः भवति। अर्थात् यस्य धातोः परे अनुदात्तेतः ङितः वा भवति तस्य धातोः परे आत्मनेपदप्रत्ययाः भवन्ति।

### 7. स्वरितञितः कर्त्रभिप्राये क्रियाफले। (१.३.७२)

स्वरितेतः ञितः आत्मन्पदसंज्ञाः

स्वरितञितः कर्त्रभिप्राये क्रियाफले इति पदच्छेदः। स्वरितेतो ञितश्च धातोरात्मनेपदं स्यात् कर्तृगामिनि क्रियाफले इति सूत्रार्थः। अत्र धातोः इति पदम् अनुवर्तते। स्वरितश्च ञश्च स्वरितञौ इतौ यस्य सः स्वरितञित् तस्मात्। द्वन्द्वान्ते इत्-शब्दः प्रत्येकं सम्बध्यते। अतः स्वरितेतः ञितश्चेति धातोः इत्यन्तरं लस्य स्थाने इति शेषः। कर्त्तारम् अभिप्रैति गच्छति इति कर्त्रभिप्रायम्। एवं स्वरितेतः ञितः च धातोः आत्मनेपदं स्यात् कर्तृगामिनि क्रियाफले इति अर्थः प्राप्तः।

### 8. शेषात् कर्तरि परस्मैपदम् (१.३.७८)

आत्मनेरदनिमित्त-हीनद्धातोः कर्तरि परस्मैपदम्

शेषात् कर्तरि परस्मैपदम् इति त्रिपदं सूत्रमिदम्। आत्मनेपदनिमित्तहीनाद्धातोः कर्तरि परस्मैपदं स्यात् इति सूत्रार्थः। आत्मनेपदविषयादन्यः उक्तः शेषः, तस्मात् शेषात्। 'अनुदात्तङितः इति 'स्वरिततञितः इति च उक्ताद् आत्मनेपदविषयाद् अन्यः शेषः इति पदस्य अर्थः यस्मिन् धातौ आत्मनेपदनिमित्तकलक्षणानि न स्यात् तत्र कर्तरि परस्मैपदप्रत्ययाः स्युः इति अर्थः लभते।

प्रथमा-मध्यमा-उत्तमा इति संज्ञाः

### 9. तिङस्त्रीणि त्रीणि प्रथममध्यमोत्तमाः (१.४.१००)

तिङः त्रीणि त्रीणि प्रथममध्यमोत्तमाः इति चतुष्पदं सूत्रं वर्तते। तिङः उभयोः पदयोस्त्रयस्त्रिकाः क्रमादेतत्संज्ञाः स्युः इति सूत्रार्थः। तिङ उभयोः अपि इति भावः। परस्मैपदम् आत्मनेपदम् इति च अनुवर्तते। तत् च षष्ठ्यन्ततया विपरिणमते। एवं परस्मैपदस्य आत्मनेपदस्य चेति उभयोः अपि प्रत्येकं त्रयस्त्रिकाः सन्ति। प्रथमादिसंज्ञाः प्रवर्तन्ते इति भावः। प्रथमादिषु पुरुषसंज्ञा तु प्राचीनाचार्य शास्त्रसिद्धा इति बोध्यम्। तत्र प्रत्येकं नव प्रत्ययाः यथासंख्यन्यायेन क्रमशः भवन्ति ।

| | परस्मैपदम्/ | आत्मनेपदम् / | संज्ञा |
|---|---|---|---|
| प्रथमत्रिकाः | तिप् तस् झि / | त आताम्-झ / | प्रथम-पुरुषः |
| द्वितीयत्रिकाः | सिप्-थस्-थ/ | थास्-आथां ध्वम्/ | मध्यम पुरुषः |
| तृतीयत्रिकाः | मिप्-वस्-मस्/ | इड्-वहिङ्-महिङ्/ | उत्तम पुरुषः |

तिङ् प्रत्येकं एकवचनं-द्विवचनं-बहुवचनं संज्ञानि

### 10. तान्येकवचनद्विवचनबहुवचनान्येकशः (१.४.१०१)

तानि एकवचनद्विवचनबहुवचनानि एकशः इति पदच्छेदः। लब्धप्रथमादिसंज्ञानि तिङस्त्रीणि त्रीणि प्रत्येकम् एकवचनादिसंज्ञानि स्युः इति सूत्रार्थः। अथ प्रथमादिषु एकैकस्मिन् पुरुषे प्रत्ययत्रिकात्मके युगपत् पर्यायेण वा एकैकप्रत्यये प्राप्ते द्वयोकयोर्द्विवचनैकवचने, 'बहुषु बहुवचन'मिति व्यवहारार्थमेकवचनादिसंज्ञां कथ्यते। अत्र तानि इति पदेन प्रथम-मध्यम-उत्तमाख्यानि तिङः त्रीणि त्रीणि परामृश्यन्ते। अतः लब्ध प्रथमादिसंज्ञानि इति। एकश इत्यस्य विवरणं प्रत्येकम् इति । संख्यैकवचनाच्च वीप्सायाम् इति शस् इति भावः। अधोलिखितेन फलकेन सूत्रमेतत् सम्यग अवगन्तुं शक्यते -

| | | परस्मैपदम् | आत्मनेपदम् |
|---|---|---|---|
| त्रिकाः | पुरुषा | एक. द्वि. बहु/ | एक. द्वि. बहु. |
| प्रथमत्रिकाः | (प्र.पु.) | तिप-तस्- झि / | त-आताम्-झ |
| द्वितीयत्रिकाः | (म.पु.) | सिप्-थस्-थ / | थास्-आथां-ध्वम् |
| तृतीयत्रिकाः | (उ.पु.) | मिप्-वस्-मस् / | इड् वहि महिङ् |

**11. युष्मद्युपपदे समानाधिकरणे स्थानिन्यपि मध्यमः (१.४.१०४)**

युष्मादि प्रयुज्यमाने अप्रयुज्यमाने च मध्यमः

युष्मदि,उपपदे,समानाधिकरणे,स्थानानि,अपि,मध्यमः इति पदच्छेदः। तिङ्वाच्यकारकवाचिनि युष्मदि प्रयुज्यमाने अप्रयुज्यमाने च मध्यमः। अत्र अव्ययपदेन प्रयुज्यमाने अपि इति भावः। समानाधिकरणे युष्मदि उपपदे इत्यन्वयः। उप समीपे उच्चरितं पदम् उपपदं तस्मिन् उपपदे। अधिकरणशब्दः अभिधेयवचनः। समानम् अधिकरणं (वाच्यम्) यस्य तत् समानाधिकरणम् तस्मिन् समानाधिकरणे। तेन समानार्थे इत्यर्थलाभः। सामानाधिकरण्यञ्च अत्र युष्मदः तिङ्स्थानीभूतलकारेणैव विवक्षितम्। तिङ्- वाच्य कारकवाचिनि युष्मदि प्रयुज्यमाने प्रयुज्यमाने च मध्यमः इति अर्थः लभते।

**12. अस्मद्युत्तमः। (१.४.१०६)**

अस्मदि प्रयुज्यमाने अप्रयुज्यमाने च उत्तमः

अस्मदि उत्तमः इति पदच्छेदः। तथाभूते अस्मद्युत्तमः स्यात् इति सूत्रार्थः। उपपदे, समानाधिकरणे, स्थानिन्यपि, इति च अनुवर्तते। एवं तिङ्वाच्यकारकवाचिनि अस्मदि अप्रयुज्यमाने प्रयुज्यमाने च उत्तमः पुरुषः स्याद् इति अर्थः लभते ।

**13. शेषे प्रथमः (१.४.१०७)**

युष्मद् अस्मद् विहाय तिङ् प्रथमः

शेषे प्रथमः इति द्विपदं सूत्रमिदम्। मध्यमोत्तमयोरविषये प्रथमः स्यात् इति सूत्रार्थः। भू ति इति जाते। उपपदे, समानाधिकरणे, स्थानिन्यपि, इति च अनुवर्तते। उक्तात् मध्यम-उत्तम-विषयाद् अन्यः शेषः इति। एवं युष्मद् अस्मद् इति पदे विहाय तिङ्वाच्य- कारक वाचिषु अप्रयुज्यमानेषु प्रयुज्यमानेषु पदेषु प्रथमः पुरुषः स्याद् इति।

**14. तिङ्शित्सार्वधातुकम् (३.४. ११३)**

सार्वधातुकसंज्ञा

तिङ्शित् सार्वधातुकम् इति पदच्छेदः। अनेन सार्वधातुकसंज्ञा विधीयते। तिङः शितश्च धात्वधिकारोक्ता एतत्संज्ञाः स्युः। अत्र धातोः इति अधिक्रियते। तेन तिङशितश्च धातुः अधिकारोक्ताः सार्वधातुक संज्ञाः स्युः इति सूत्रार्थः। सार्वधातुकार्धातुकयोः इत्यादावस्य प्रयोजनम्।

**15. कर्तरि शप् (३.१.६८)**

शप् प्रत्ययः

कर्तरि शप् इति द्विपदं सूत्रमिदम्। कर्त्रर्थे सार्वधातुके परे धातोः शप् स्यात् इति सूत्रार्थः। अत्र धातोः इति पदम् अनुवर्तते। अत्र 'सार्वधातुके

यक्' इत्यस्मात् सार्वधातुके' इति। अतः कर्त्रर्थे सार्वधातुके परे धातोः परः शप्-प्रत्ययः स्यात् इति अर्थः लभते ।

**भू-धातुः लट् लकाररूपाणि**

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| **प्रथमपुरुषः** | भवति | भवत: | भवन्ति |
| **मध्यमपुरुषः** | भवसि | भवथः | भवथ |
| **उत्तमपुरुषः** | भवामि | भवावः | भवामः |

**16. सार्वधातुकार्धधातुकयोः (७.३.८४)**

गुणः विधीयते

सार्वधातुकाऽऽर्धधातुकयोः इति संमस्तपदं भवति। अनयोः परयोरिगन्ताङ्गस्य गुणः। यथा- भूधातोः लटि प्रथमपुषैकवचने तिप्प्रत्यये 'कर्तरिशप्' इति शप् प्रत्यये भू अ ति। अत्रानेन सूत्रेण गुणे भो अ ति। अवादेशे भवति।

**भवति**

भू सत्तायाम्' इति "भूवादयो धातवः इति धातुसंज्ञायां 'वर्तमाने लट्' इति सूत्रेण लट्प्रत्यये अनुबन्धलोपे लकारस्य 'तिप्तस्झिसिप्थस्थमिब्वस्मस्ता-ताञ्झथासाथाध्वमिड्वहिङ्महिङ्'इति सूत्रेण तिबादयः अष्टादश लादेशाः प्राप्ते 'तङानावात्मनेपदम्' इति सूत्रेण त आताम् झ थास् आथाम् ध्वम्, इड् वहि महिङ् इत्येतेषां प्रत्ययानाम् आत्मनेपदसंज्ञायां 'शेषात् कर्तरि' 'लः परस्मैपदम्' इति भू-धातोः परस्मैपदे 'तिङस्त्रीणि त्रीणि प्रथममध्यमोत्तमाः' इत्यनेन त्रयाणां त्रिकाणां प्रथम-मध्यम-उत्तम संज्ञायां 'तान्येकवचनद्विवचन- बहुवचनान्येकशः' इति तिङः त्रयाणां वचनानां क्रमशः एकवचन द्विवचन बहुवचन-संज्ञायां, प्राप्ते 'शेषे प्रथमः' इति सूत्रेण प्रथम पुरुषे 'द्वयोकयोर्द्विवचनैकवचने' इति एकवचने तिप्प्रत्यये अनुबन्धलोपे 'भू ति'। भूते 'तिङ्शित्सार्वधातुकम्' इति सूत्रेण सार्वधातुक संज्ञायां 'सार्वधातुकार्धधातुकयोः इति सूत्रेण गुणे प्राप्ते 'भूसुवोस्तिङ्' इति निषेधे 'कर्तरि शप्' इति सूत्रेण शप् प्रत्यये अनुबन्धलोपे' भू अ ति' इति। सार्वधातुकत्वात् 'सार्वधातुकार्धधातुकयोः' इति गुणे 'भोअ ति'। 'एचोऽयवायावः' इति सूत्रेण अवादेशे भवति' इति रूपं सिद्ध्यति।

**भवतः**

भूधातोः लट् लकारे 'वर्तमाने लट्  इति सूत्रेण लट् प्रत्यये अनुबन्धलोपे 'तिप्तस्झिसिप्थस्थमिब्वस्मस्ताताञ्झथासाथाध्वमिड्वहिङ्गहिङ्' इति सूत्रेण तस् प्रत्यये 'भू तस्'। 'तिङ्शित्सार्वधातुकम् इति सार्वधातुकसंज्ञायां 'सार्वधातुकार्धधातुकयोः' इति गुणे 'कर्तरि शप्' इति सूत्रेण शप् प्रत्यये अनुबन्धलोपे भू अ तस्' इति। सार्वधातुकत्वात् 'सार्वधातुकार्धधातुकयोः' इति गुणे अवादेशे भवतस्' सकारस्य रुत्वे विसर्गे च भवतः इति रूपं सिद्ध्यति।

### 17. झोऽन्तः। (७.१.३)

झस्य अन्तादेशः

झः अन्तः इति पदच्छेदः। प्रत्ययावयवस्य झस्यान्तादेशः स्यात् इति सूत्रार्थः। प्रत्ययावयवस्य झस्य अन्तादेशः भवति इति अर्थः। यथा- भवन्ति।

**भवन्ति**

भू-धातोः लट् इति लकारे तत्स्थाने प्रथम-पुरुष-बहुवचन-विवक्षायां 'तिप्तस्झिसिप्थस्थमिब्वस्मस्ताताञ्झथासाथाध्वमिड्वहिङ्गहिङ्' इति सूत्रेण झि प्रत्यये 'झोऽन्तः' इत्यनेन अन्तादेशे 'भु-अन्ति' इति स्थिते सार्वधातुकत्वात् 'कर्तरि शप्' इत्यनेन शप् प्रत्यये अनुबन्धलोपे 'सार्वधातुकार्धधातुकयोः' इति सूत्रेण गुणे अवादेशे 'अतो गुणे' इति सूत्रेण पररूपे भवन्ति' इति रूपं सिद्ध्यति ।

**भवसि**

भूधातोः लट् लकारे 'वर्तमाने लट्  इति सूत्रेण लट्प्रत्यये अनुबन्धलोपे मध्यमपुरुष एकवचने 'तिप्तस्झिसिप्थस्थमिब्वस्मस्ताताञ्झथासा-थाध्वमिड्वहिङ्गहिङ्' इति सूत्रेण सिप्रत्यये अनुबन्धलोपे 'भू सि'। 'तिङ्शित्सार्वधातुकम्' इति सार्वधातुकसंज्ञायां 'सार्वधातुका-र्धधातुकयोः' इति गुणे 'कर्तरि शप्' इति सूत्रेण शप् प्रत्यये अनुबन्धलोपे 'भू अ सि' इति। सार्वधातुकत्वात् 'सार्वधातुकार्धधातुकयोः' इति गुणे अवादेशे भवसि' इति रूपं सिद्ध्यति।

**भवथः**

भूधातोः लट् लकारे 'वर्तमाने लट्  इति सूत्रेण लट्प्रत्यये अनुबन्धलोपे मध्यमपुरुष द्विवचने 'तिप्तस्झिसिप्थस्थमिब्वस्मस्ताताञ्झथासाथा-ध्वमिड्वहिङ्गहिङ्' इति सूत्रेण थस् प्रत्यये 'भू थस्'।

तिङ्शित्सार्वधातुकम् इति सार्वधातुकसंज्ञायां 'सार्वधातुकार्धधातुकयोः इति गुणे कर्तरि शप्' इति सूत्रेण शप् प्रत्यये अनुबन्धलोपे 'भू अ थस्' इति। सार्वधातुकत्वात् 'सार्वधातुकार्धधातुकयोः इति गुणे अवादेशे भवथस्' सकारस्य रुत्वे विसर्गे च भवथः इति रूपं सिद्ध्यति।

**भवथ**

भूधातोः लट् लकारे 'वर्तमाने लट्' इति सूत्रेण लट्प्रत्यये अनुबन्धलोपे मध्यमपुरुषबहुवचने 'तिप्तस्झिसिप्थस्थमिब्वस्मस्ताताञ्झथासाथा-ध्वमिड्वहिङ्महिङ्' इति सूत्रेण थ प्रत्यये 'भू थ'। 'तिङ्शित्सार्वधातुकम्' इति सार्वधातुकसंज्ञायां 'सार्वधातुकार्धधातुकयोः' इति गुणे 'कर्तरि शप्' इति सूत्रेण शप्प्रत्यये अनुबन्धलोपे 'भू अ थ' इति। सार्वधातुकत्वात् 'सार्वधातुकार्धधातुकयोः' इति गुणे अवादेशे संयोगे भवथ इति रूपं सिद्ध्यति।

**18. अतो दीर्घो यञि। (७.३.१०१)**

अदन्तस्य अङ्गस्य दीर्घः

अतः दीर्घः यञि इति पदच्छेदः। अतोऽङ्गस्य दीर्घो यञादौ सार्वधातुके इति सूत्रार्थः। यथा -भवामि भवावः भवामः।

**प्रथमपुरुषः** सः भवति, तौ भवतः, ते भवन्ति ।

**मध्यमपुरुषः** त्वं भवसि, युवां भवथः, यूयं भवथ।

**उत्तमपुरुषः** अहं भवामि, आवां भवावः, वयं भवामः। व्यवहारे इति प्रयोक्तव्यम्।

**भवामि**

भूधातोः लट् लकारे 'वर्तमाने लट्' इति सूत्रेण लट्प्रत्यये अनुबन्धलोपे उत्तमपुरुषे एकवचने 'तिप्तस्झिसिप्थस्थमिब्वस्मस्ताताञ्झथासाथा-ध्वमिड्वहिङ्महिङ्' इति सूत्रेण मिप्प्रत्यये अनुबन्धलोपे 'भू मि'। 'तिङ्शित्सार्वधातुकम्' इति सार्वधातुकसंज्ञायां 'सार्वधातुकार्ध-धातुकयोः' इति गुणे 'कर्तरि शप्' इति सूत्रेण शप्प्रत्यये अनुबन्धलोपे' भू अ मि इति। सार्वधातुकसंज्ञायां 'सार्वधातुकार्धधातुकयोः' इति गुणे अवादेशे भव् अ मि इति जाते 'अतो दीर्घो यञि' इति अदन्ताङ्गस्य दीर्घे' भवामि इति रूपं सिद्धम्।

**भवावः**

भूधातोः लट् लकारे 'वर्तमाने लट्' इति सूत्रेण लट्प्रत्यये अनुबन्धलोपे उत्तमपुरुषे द्विवचने 'तिप्तस्झिसिप्थस्थमिब्वस्मस्ताताञ्झथासाथाध्वमिड्वहिङ्महिङ्' इति सूत्रेण वस्प्रत्यये अनुबन्धलोपे 'भू वस्'। 'तिङ्शित्सार्वधातुकम्' इति सार्वधातुकसंज्ञायां 'सार्वधातुकार्धधातुकयोः' इति गुणे 'कर्तरि शप्' इति सूत्रेण शप्प्रत्यये अनुबन्धलोपे 'भू अ वस्' इति। सार्वधातुकसंज्ञायां 'सार्वधातुकार्धधातुकयोः' इति गुणे अवादेशे भव् अ वस् इति जाते 'अतो दीर्घो यञि' इति अदन्ताङ्गस्य दीर्घे संयोगे' भवावस् इति स्थिते सकारस्य रुत्वे विसर्गे च कृते भवावः रूपं सिद्धम्।

**भवामः**

भूधातोः लट् लकारे 'वर्तमाने लट्' इति सूत्रेण लट्प्रत्यये अनुबन्धलोपे उत्तमपुरुषे बहुवचने 'तिप्तस्झिसिप्थस्थमिब्वस्मस्ताताञ्झथासाथाध्वमिड्वहिङ्महिङ्' इति सूत्रेण मस्प्रत्यये अनुबन्धलोपे 'भू वस्'। 'तिङ्शित्सार्वधातुकम्' इति सार्वधातुक संज्ञायां 'सार्वधातुकार्धधातुकयोः' इति गुणे कर्तरि शप्' इति सूत्रेण शप्प्रत्यये अनुबन्धलोपे 'भू अ मस्' इति। सार्वधातुकसंज्ञायां 'सार्वधातुकार्धधातुकयोः' इति गुणे अवादेशे भव् अ मस् इति जाते 'अतो दीर्घो यञि' इति अदन्ताङ्गस्य दीर्घे संयोगे' भवामस् इति स्थिते सकारस्य रुत्वे विसर्गे च कृते भवामः रूपं सिद्धम्।

**भू-धातुः लिट् लकाररूपाणि**

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| **प्रथमपुरुषः** | बभूव | बभूवतुः | बभूवुः |
| **मध्यमपुरुषः** | बभूविथ | बभूवथुः | बभूव |
| **उत्तमपुरुषः** | बभूव | बभूविम | बभूविव |

**19. परोक्षे लिट्। (३.२.११५)**

भूतानद्यतनपरोक्षार्थवृत्तेर्धातोर्लिट्

परोक्षेलिट् इति पदच्छेदः। भूतानद्यतनपरोक्षार्थवृत्तेर्धातोर्लिट् स्यात्। लस्य तिबादयः। अत्र धातोः इति भूते चाधिक्रियते। 'अनद्यतने लङ्' इत्यतः इति अनद्यतने इत्यनुवर्तते। परोक्षत्वं धातोः विशेषणम्। अतीतायाः रात्रेः पश्चार्धेन आगामिन्याश्च पूर्वार्द्धेन सहित दिवसः

अद्यतनः। तद्भिन्नः अनद्यतनः इति। अतः भूत- अनद्यतनपरोक्षार्थवृत्तेः धातोः लिट् स्यात् इति अर्थः। यथा बभूव। भूधातोः परोक्षेलिट् इति लिट्लकारः।

**20. परस्मैपदानां णलतुसुस्थलथुसणल्वमाः।(३.४. ८२)**

नवानां तिप्प्रत्ययानां णलादयाः

परस्मैपदानां णलतुसुस्थलथुसणल्वमाः इति पदच्छेदः। लिटस्तिबादीनां नवानां णलादयः स्युः इति सूत्रार्थः। भू अ इति स्थिते। अत्र 'लिटस्तझयोरेशिरेच्' इत्यतः लिट् इति अनुवर्तते। परस्मैपदे लिट्लकारे तिप् तस् झि, सिप् थस् थ, मिव् वस् मस् इत्येतेषां नवानां तिप्प्रत्ययानां यथाक्रमं णल्, अतुस्, उस्, थल्, अथुस्, अ, णल्, व, म इत्येते नव प्रत्ययाः स्युः इति। यथा बभूव। भूधातोः लिटि तिपि अनेन सूत्रेण णल् (अ)। भू अ।

**21. भुवो वुग्लुङ्लिटोः। (६.४.८८)**

वुगागमः

भुवः वुक् लिङ्लिटोः  इति पदच्छेदः। अनेन सूत्रेण वुगागमः विधीयते। भुवो वुगागमः स्यात् लुङ्लिटोरचि इति सूत्रार्थः। अत्र 'अचि श्नुधातुभ्रुवाय्वोरियङ्ङुवङौ' इत्यतः 'अचि इति अनुवर्तते । अतः भुवः वुक् इति आगमः स्यात् लुङ्लिटौ अच् परे इति। यथा भूधातोः लिटि तिपि णलि अनेन सूत्रेण वुगागमे भूव् अ।

**22. लिटि धातोरनभ्यासस्य। (६.१.८)**

द्वित्वं

लिटि धातोः अनभ्यासस्य इति पदच्छेदः। लिटि परेऽनभ्यासधात्ववयवस्यैकाचः प्रथमस्य द्वे स्तः आदिभूतादचः परस्य तु द्वितीयस्य इति सूत्रार्थः। भूव् भूव अ इति स्थिते। न अभ्यासः अनभ्यासः तस्य अनभ्यासस्य। एकः अच् यस्य सः एकाच् तस्य। धातोः इति अवयवषष्टी। एकाचः प्रथमस्य इत्यादि धात्वावयवस्य विशेषणम्। 'अत्र एकाचो द्वे प्रथमस्य अजादेर्द्वितीयस्य' इति च सूत्रद्वयम् अधिक्रियते। अतः लिटि परे अनभ्यास धात्ववयवस्य एकाचः प्रथमस्य द्वे स्तः। परन्तु यदि धातोः आदिभूतवर्ण अच् स्यात् तर्हि परस्य द्वितीयस्य वा एकाचः द्वित्वं भवति इति अर्थः। एवं भूव् भूव् अ।

**23. पूर्वोऽभ्यासः।( ६.१.४)**

अभ्याससंज्ञा

पूर्वः अभ्यासः इति पदच्छेदः। अनेन सूत्रेण अभ्याससंज्ञः विधीयते। अत्र ये द्वे विहिते तयोः पूर्वोऽभ्याससंज्ञः स्यात् इति सूत्रार्थः। षष्ठाध्याये

द्वित्वप्रकरणे विधीयमाने द्वित्वे प्रथमः अभ्यासः भवति। अत्र पूर्वसूत्रे ये द्वे विहिते तयोः पूर्वः अभ्याससंज्ञः स्यात् इति। यथा भूव् भूव् अ इत्यत्र पूर्वस्य भूव् इत्यस्य अभ्याससंज्ञा।

**24. हलादिः शेषः (पा.७.४.६०)**

अभ्यासस्यादिर्हल्

हलादिः शेषः इति पदच्छेदः। अभ्यासस्यादिर्हल् शिष्यते। अन्ये हलो लुप्यन्ते। शिष्यते इति शेषः। अत्र 'लोपोऽभ्यासस्य' इत्यतः अभ्यासस्य इति अनुवर्तते। अतः अभ्यासस्य आदि हल् शिष्यते तथा अन्ये च हल् लुप्यन्ते इति सूत्रानुसारं भुव् इत्यस्य अभ्यासस्य आदि भू एव अवशिष्यते वकारस्य लोपः भवति। भू भूव् अ।

**25. ह्रस्वः (७.४.५९)**

अभ्यासस्याचो ह्रस्वः

ह्रस्वः इति एकपदं सूत्रम्। अभ्यासस्याचो ह्रस्वः स्यात्। अत्र 'लोपोऽभ्यासस्य' इत्यतः अभ्यासस्य इति अनुवर्तते। ह्रस्वग्रहणात् 'अचश्च' इति परिभाषोपतिष्ठते। अभ्यासस्य अचः ह्रस्वः स्याद् इति। भू इत्यस्य ह्रस्वे भु भूव् अ।

**26. भवतेरः (७.४.७३)**

अभ्यासस्य उकारस्य अकारः

भवतेः अः इति पदच्छेदः। अनेन सूत्रेण उकारस्य अकारः विधीयते। भवतेरभ्यासस्योकारस्य अ स्याल्लिटि इति सूत्रार्थः। भवतेः इति श्तिपा धातुनिर्देशः। भवतेः इत्यस्य भूधातोः इत्यर्थः। अभ्यासस्य इति अनुवर्तते। भवतेः अभ्यासस्य उकारस्य स्यात् लिटि इति। 'अलोऽन्त्यस्य' इत्यनया परिभाषया अन्तस्य उकारस्य अकारो भवति इत्यर्थः। यथा भूधातोः लिटि तिपि णलि 'भूवो वुग्लुङ्लिटोः' इति वुगागमे भूव् अ। द्वित्वे हलादिः शेषे ह्रस्वे भवतेरः इत्यत्वे बभूव।

**27. अभ्यासे चर्च (८.४.५३)**

अभ्यासे झलां -चरः जशश्च, झशां-जशः, खयां -चर् एते स्युः

अभ्यासे चर् च इति पदच्छेदः। अभ्यासे झलां चरः स्युः जशश्च। झशां जशः, खयां चर् इति विवेकः। बभूव बभूवतुः बभूवुः। अत्र 'झलां जश् झशि' इत्यतः झलाम् इति चकारात् जश् इति च अनुवर्तते। अभ्यासे झलां चरः स्युः चकारात् जशश्च। अत्र झशां जशः स्युः खयां च चरः स्युः इति विवेकः। यथा- भभूव अ इति जाते अभ्यासे चर्च इति अभ्याससंज्ञकस्य भस्य बकारे कृते बभूव'

**बभूव –**

'भूधातोः 'परोक्षे लिट्' इति सूत्रेण लिट्लकारे अनुबन्धलोपे लकारस्य स्थाने प्रथमपुरुषैकवचने 'तिप्तस्झि —' इत्यादि सूत्रेण तिप्प्रत्यये भू ति। 'परस्मैपदानां णलतुसुस्थलथुसणल्वमाः' इति सूत्रेण तिपः णलादेशे अनुबन्धलोपे 'भू-अ' इति स्थिते नित्यत्वाद् गुणवृद्धौ बाधित्वा 'भुवो वुग्लुङ्लिटोः' इति सूत्रेण भूधातोः वुगागमे अनुबन्धलोपे कित्वाद् अन्त्यावयवे भूव् अ इति स्थिते 'लिटि धातोरनभ्यासस्य' इति सूत्रेण द्वित्वे 'पूर्वोऽभ्यासः' इति प्रथमस्य भूव् इत्यस्याभ्याससंज्ञायां 'हलादिः शेषः' इति वलोपे 'ह्रस्वः' इति उकारस्य ह्रस्वे 'भवतेरः' इति अभ्यासोकारस्य अकारे 'अभ्यासे चर्च' इति पूर्वभकारस्य जश्त्वेन बकारे बभूव इति सिद्धम् ।

**28. आर्धधातुकस्येड् वलादेः (७.३.३५)**

आर्धाधातुकस्य इडागमः

आर्धधातुकस्य इट् वलादेः इति पदच्छेदः। आर्धधातुकस्य इडागमः स्यात् इति सूत्रार्थः। वल् (प्रत्याहारं) आदिः यस्य तत्। अत्र नेड्वशिकृतिः' इत्यतः इट् इति अनुवर्तमाने अस्मिन् सूत्रे पुनः इड्ग्रहणं निषेधसम्बद्धस्य इडः निवृत्त्यर्थम्। यथा -बभूविथ। भूधातोः लिटि सिपि वुगागमे थालि भूव् थ। अत्रानेन सूत्रेण इडागमे भूव् इ थ।

**बभूविथ -**

भू-धातोः 'परोक्षे लिट्' इति लिटि अनुबन्धलोपे लकारस्य स्थाने 'तिप्तस्झिसिप्थस्थमिब्वस्मस्ताताञ्झथासाथांध्वमिड्वहिङ्महिङ्' इति सूत्रेण मध्यमपुरुषैकवचने सिप्प्रत्यये 'परस्मैपदानाम् णलतुसुस्थलथुसणल्वमाः' इति सूत्रेण सिपः थलादेशे अनुबन्धलोपे 'भू थ' इति स्थिते 'आर्धधातुकस्येड् वलादेः' इति इडागमे अनुबन्धलोपे भू इ थ। 'भुवो वुग्लुङ्लिटोः' इति वुगागमे भूव् इ थ। 'लिटि धातोरनभ्यासस्य' इति सूत्रेण द्वित्वे 'पूर्वोऽभ्यासः' इति अभ्यास संज्ञायाम्, 'हलादिः शेषः' इति व लोपे भूव् भू इ थ। 'ह्रस्वः' इति सूत्रेण ह्रस्वे 'भवतेरः' इति सूत्रेण उकारस्य अकारे 'अभ्यासे चर्च' इति भस्य बत्वे 'बभूविथ' इति रूपं सिद्धम् । एवं बभूवथुः, बभूव। बभूव, बभूविव, बभूविम।

## भू-धातुः लुट् लकाररूपाणि

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| **प्रथमपुरुषः** | भविता | भवितारौ | भवितारः |
| **मध्यमपुरुषः** | भवितासि | भवितास्थः | भवितास्थ |
| **उत्तमपुरुषः** | भवितास्मि | भवितास्वः | भवितास्मः |

भविष्यत्यनद्यतनेऽर्थे धातोर्लुट्

**29. अनद्यतने लुट् (३.३.१५)**

अनद्यतने लुट् इति पदच्छेदः। अनेन सूत्रेण लुट् विधीयते। भविष्यत्यनद्यतनेऽर्थे धातोर्लुट् इति सूत्रार्थः। अत्र 'धातोः' इति अधिक्रियते। भविष्यति गम्यादयः इत्यतः भविष्यति इति अनुवर्तते। भविष्यत् क्रियायां अनद्यतने अर्थे धातोः लुट् स्यात् इति अर्थः। यथा - भविता।

**30. स्यतासी लृलुटोः (३.१.३३)**

लृट् लृङ् लकारयोः स्य लुट् लकारस्य तासि च

स्यतासी लृलुटोः इति पदच्छेदः। एतेन स्यतासी प्रत्ययौ विधीयेते। धातोः स्यतासी एतौ प्रत्ययौ स्तः लृलुटोः परतः। शबाद्यपवादः। लृ इति लृङ्लुटोर्ग्रहणम् इति सूत्रार्थः। स्यतासी इति प्रथमान्तं, लृलुटोः इति सप्तम्यन्तम्। स्यश्च तासिश्च स्यतासी। धातोरित्यधिक्रियते। लृश्च लुट्च लृलुटौ तयोः लृलुटोः। लृट् लृङ् लकारयोः स्य लुट् लकारस्य तासि च स्तः। अतः धातोः स्य-तासी इत्येतौ प्रत्ययौ स्तः लृलुटोः परतः इति। यथा भविता।

**31. आर्धधातुकं शेषः (३.४.११४)**

आर्धधातुकसंज्ञः

आर्धधातुकम् शेषः इति पदच्छेदः। अनेन आर्धधातुकसंज्ञः विधीयते। तिङ्शिद्भ्योऽन्यो धातोरिति विहितः प्रत्ययः आर्धधातुकसंज्ञः स्यात्। आर्धाधातुकस्येड् वलादेः इत्यादावस्य प्रयोजनम्।

**32. लुटः प्रथमस्य डारौरसः (२.४.८५)**

डा-रौ-रस् एते क्रमात् भवति

लुटः प्रथमस्य डारौरसः इति पदच्छेदः। डा-रौ-रस् एते क्रमात् स्युः। डित्त्वसामर्थ्यादभस्यापि टेर्लोपः। लुटः प्रथमस्य षष्ठ्यन्तं डा रौ रसः प्रथमान्तं भवति। लृट्लकारस्य प्रथमपुरुषस्य स्थाने क्रमशः अर्थात् तिप्

इत्यस्य डा, तस् इत्यस्य रौ, तथा झि इत्यस्य रस् इति आदेशाः भवन्ति। डा इत्यस्य डकारस्य इत् भवति। यथा भविता।

**भविता -**

भूधातोः कर्त्रर्थे 'अनद्यतने लुट्' इति लुट्लकारे अनुबन्धलोपे लकारस्य स्थाने 'तिप्तस्झि ...' इत्यादि सूत्रेण तिप्प्रत्यये अनून्धलोपे भू ति इति जाते 'तिङ्शित्सार्वधातुकम्' इति सूत्रेण सार्वधातुकत्वे 'कर्तरि शप्' इति शप्प्रत्यये प्राप्ते 'स्यतासी लृलुटोः' इति सूत्रेण तन्निषेधे तासिप्रत्यये अनुबन्धलोपे भू तास् ति। अत्र 'आर्धधातुक शेषः' इति सूत्रेण आर्धधातुकसंज्ञायाम् 'आर्धधातुकस्येड् वलादेः' इति सूत्रेण तास् इत्यस्य इडागमे 'भू-इ-तास्-ति' इति जाते 'सार्वधातुकार्धधातुकयोः' इति गुणे अवादेशे भ् अव् इ ति। अत्र 'लुटः प्रथमस्य डारौरसः' इति सूत्रेण तिपः 'डा' इति आदेशे अनुबन्धलोपे डित्वसामर्थ्याद् अभस्यापि 'टेः' लोपे इति तासघटकस्य आसः लोपे 'भविता' इति रूपम्

**33. तासस्त्योर्लोपः (७.४.५०)**

तास् प्रत्ययस्य अस् धातोः च सस्य लोपः सादौ

तासस्त्योः लोपः इति पदच्छेदः। तासेरस्तेश्च सस्य लोपः स्यात् सादौप्रत्यये परे इति सूत्रार्थः। तास् च अस्तिश्चेति तासस्ति तयोः तासस्त्योः। अङ्गस्य इति। तास् प्रत्ययस्य अस् धातोः च सस्य लोपः स्यात् सस्य सकारादौ प्रत्यये परे इति। यथा भवितासि। भूधातोः लुटि सिप् तासि इडागमे भू इ तास् सि। अत्र 'तास्स्त्योर्लोपः' इति लोपः। गुणे अवादेशे भवितासि।

**34. रि च (७.४.५१)**

तास् प्रत्ययस्य अस् धातोः च सस्य लोपः

रि च इति पदच्छेदः। रि सप्तम्यन्तं, च अव्ययपदं च भवति। तास् प्रत्ययस्य अस् धातोः च सस्य लोपः स्यात् रेफादि प्रत्यये परे इति। यथा-भवितारौ भवितारः। भवितासि भवितास्थः। भवितारथ। भवितास्मि भवितास्व भवितास्मः।

**भवितारौ -**

भू-धातोः कर्त्रर्थे 'अनद्यतने लुट्' इति सूत्रेण लुट्लकारे तत्स्थाने 'तिप्तस्झि.....' इत्यादि सूत्रेण प्रथमपुरुषद्विवचने तस्प्रत्यये भूत स्' इति जाते 'तिङ्शित्सार्वधातुकम्' इति सूत्रेण सार्वधातुकसंज्ञायां, 'कर्तरि शप्' इति शपं प्रबाध्य 'स्यतासी लृलुटोः' इत्यनेन तास्प्रत्यये अनुबन्धलोपे भू

तास् तस्। अत्र 'आर्धधातुकं शेषः' इति सूत्रेण आर्धधातुकसंज्ञायां 'आर्धधातुकस्येड् वलादेः' इति सूत्रेण तास् इत्ययस्य इडागमे भू इ तास् तस्। अत्र 'सार्वधातुकार्धधातुकयोः' इति गुणे अवादेशे संयोगे भवितास् तस् इति स्थिते 'लुटः प्रथमस्य डारौरसः' इति सूत्रेण तस् इत्यस्य 'रौ' इति आदेशे भवितास् रौ। 'रि च' इति सूत्रेण तास् इत्यस्य सकारस्य लोपे 'भवितारौ' इति रूपम्।

**भवितारः-**

भूधातोः कर्त्रर्थे 'अनद्यतने लुट्' इति सूत्रेण लुट्लकारे तत्स्थाने 'तिप्तस्झि.....' इत्यादि सूत्रेण प्रथमपुरुषबहुवचने झिप्रत्यये भू झि इति जाते 'तिङ्शित्सार्वधातुकम्' इति सूत्रेण सार्वधातुकसंज्ञायां, 'कर्तरि शप्' इति शपं प्रबाध्य 'स्यतासी लृलुटोः' इत्यनेन तास्प्रत्यये अनुबन्धलोपे भू तास् झि। अत्र 'आर्धधातुकं शेष': इति सूत्रेण आर्धधातुकसंज्ञायां 'आर्धधातुकस्येड् वलादेः' इति सूत्रेण तास् इत्ययस्य इडागमे भू इ तास् झि। अत्र 'सार्वधातुकार्धधातुकयोः' इति गुणे अवादेशे संयोगे भवितास् तस् इति स्थिते 'लुटः प्रथमस्य डारौरसः' इति सूत्रेण झि इत्यस्य 'रस्' इति आदेशे भवितास् रस्। 'रि च' इति सूत्रेण तास् इत्यस्य सकारस्य लोपे 'भवितारस्' सकारस्य रुत्वे विसर्गे च भवितारः इति रूपम्।

**भवितासि**

भूधातोः कर्त्रर्थे 'अनद्यतने लुट्' इति सूत्रेण लुट्लकारे तत्स्थाने 'तिप्तस्झि..... ' इत्यादि सूत्रेण मध्यमपुरुषैकवचने सिप्प्रत्यये भू सि' इति जाते 'तिङ्शित्सार्वधातुकम्' इति सूत्रेण सार्वधातुकसंज्ञायां, 'कर्तरि शप्' इति शपं प्रबाध्य 'स्यतासी लृलुटोः' इत्यनेन तास् प्रत्यये अनुबन्धलोपे भू तास् झि। अत्र 'आर्धधातुकं शेषः' इति सूत्रेण आर्धधातुकसंज्ञायाम् 'आर्धधातुकस्येड् वलादेः' इति सूत्रेण तास् इत्ययस्य इडागमे भू इ तास् सि। अत्र 'सार्वधातुकार्धधातुकयोः' इति गुणे अवादेशे संयोगे भवितास् सि। 'तासस्त्योर्लोपः' इति सूत्रेण तास् इत्यस्य सकारस्य लोपे भवितासि इति रूपम्।

**भवितास्थः**

भू-धातोः कर्त्रर्थे 'अनद्यतने लुट्' इति सूत्रेण लुट्लकारे तत्स्थाने 'तिप्तस्झि.....' इत्यादि सूत्रेण मध्यमपुरुषद्विवचने थस्प्रत्यये भू थस्' इति जाते 'तिङ्शित्सार्वधातुकम्' इति सूत्रेण सार्वधातुकसंज्ञायां, 'कर्तरि

शप्’ इति शपं प्रबाध्य ‘स्यतासी लृलुटोः’ इत्यनेन तास्प्रत्यये अनुबन्धलोपे भू तास् थस्। अत्र 'आर्धधातुकं शेषः’ इति सूत्रेण आर्धधातुकसंज्ञायाम् 'आर्धधातुकस्येड् वलादेः' इति सूत्रेण तास् इत्ययस्य इडागमे भू इ तास् थस्। अत्र ‘सार्वधातुकार्धधातुकयोः' इति गुणे अवादेशे संयोगे भवितास् थस् इत्यत्र सकारस्य रुत्वे विसर्गे च भवितास्थः इति रूपम्।

**भवितास्थ**

भू-धातोः कर्त्रर्थे ‘अनद्यतने लुट्’ इति सूत्रेण लुट्लकारे तत्स्थाने ‘तिप्तस्झि..... ‘इत्यादि सूत्रेण मध्यमपुरुषबहुवचने थस्प्रत्यये भू थ इति जाते ‘तिङ्शित्सार्वधातुकम्’ इति सूत्रेण सार्वधातुकसंज्ञायां, ‘कर्तरि शप्’ इति शपं प्रबाध्य ‘स्यतासी लृलुटोः’ इत्यनेन तास्प्रत्यये अनुबन्धलोपे भू तास् थ। अत्र 'आर्धधातुकं शेषः’ इति सूत्रेण आर्धधातुकसंज्ञायां 'आर्धधातुकस्येड् वलादेः' इति सूत्रेण तास् इत्ययस्य इडागमे भू इ तास् थ। अत्र ‘सार्वधातुकार्धधातुकयोः' इति गुणे अवादेशे संयोगे भवितास्थ इति रूपम्।

**भवितास्मि**

भू-धातोः कर्त्रर्थे ‘अनद्यतने लुट्’ इति सूत्रेण लुट्लकारे तत्स्थाने ‘तिप्तस्झि.....’ इत्यादि सूत्रेण उत्तमपुरुषैकवचने मिप्प्रत्यये अनुबन्धलोपे भू मि' इति जाते ‘तिङ्शित्सार्वधातुकम्’ इति सूत्रेण सार्वधातुकसंज्ञायां, ‘कर्तरि शप्’ इति तं प्रबाध्य ‘स्यतासी लृलुटोः’ इत्यनेन तास् प्रत्यये अनुबन्धलोपे भू तास् मि। अत्र 'आर्धधातुकं शेषः’ इति सूत्रेण आर्धधातुकसंज्ञायाम् 'आर्धधातुकस्येड् वलादेः' इति सूत्रेण तास् इत्ययस्य इडागमे भू इ तास् मि। अत्र ‘सार्वधातुकार्धधातुकयोः' इति गुणे अवादेशे संयोगे भवितास्मि इति रूपम्।

**भवितास्वः -**

भू-धातोः कर्त्रर्थे ‘अनद्यतने लुट्’ इति सूत्रेण लुट्लकारे तत्स्थाने ‘तिप्तस्झि.....’ इत्यादि सूत्रेण उत्तमपुरुषद्विवचने वस्प्रत्यये भू वस्' इति जाते ‘तिङ्शित्सार्वधातुकम्’ इति सूत्रेण सार्वधातुकसंज्ञायां, ‘कर्तरि शप्’ इति शपं प्रबाध्य ‘स्यतासी लृलुटोः’ इत्यनेन तास्प्रत्यये अनुबन्धलोपे भू तास् मस्। अत्र 'आर्धधातुकं शेषः’ इति सूत्रेण आर्धधातुकसंज्ञायाम् 'आर्धधातुकस्येड् वलादेः' इति सूत्रेण तास् इत्ययस्य इडागमे भू इ तास्

वस्। अत्र 'सार्वधातुकार्धधातुकयोः' इति गुणे अवादेशे संयोगे भवितास् वस्। अत्र सकारस्य रुत्वे विसर्गे च भवितास्वः इति रूपम्।

**भवितास्मः -**

भू-धातोः कर्त्रर्थे 'अनद्यतने लुट्' इति सूत्रेण लुट्लकारे तत्स्थाने 'तिप्तस्झि.....' इत्यादि सूत्रेण उत्तमपुरुषबहुवचने मस्प्रत्यये भू मस्' इति जाते 'तिङ्शित्सार्वधातुकम्' इति सूत्रेण सार्वधातुकसंज्ञायां, 'कर्तरि शप्' इति शपं प्रबाध्य 'स्यतासी लृलुटोः' इत्यनेन तास्प्रत्यये अनुबन्धलोपे भू तास् मस्। अत्र 'आर्धधातुकं शेषः' इति सूत्रेण आर्धधातुकसंज्ञायाम् 'आर्धधातुकस्येड् वलादेः' इति सूत्रेण तास् इत्ययस्य इडागमे भू इ तास् मस्। अत्र 'सार्वधातुकार्धधातुकयोः' इति गुणे अवादेशे संयोगे भवितास् मस्। अत्र सकारस्य रुत्वे विसर्गे च भवितास्मः इति रूपम्।

**भू-धातु लृट् लकाररूपाणि**

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचन** |
|---|---|---|---|
| **प्रथमपुरुषः** | भविष्यति | भविष्यतः | भविष्यन्ति |
| **मध्यमपुरुषः** | भविष्यसि | भविष्यथः | भविष्यथ |
| **उत्तमपुरुषः** | भविष्यामि | भविष्यावः | भविष्यामः |

**35. लृट् शेषे च (३.३.१३)**

भविष्यत् अर्थात् धातोः लृट्

लृट् शेषे च इति पदच्छेदः। अनेन सूत्रेण लृट्लकारः विधीयते। भविष्यदर्थाद्धातोर्लृट् क्रियार्थायां क्रियायां सत्यामसत्यां वा। भविष्यति भविष्यतः भविष्यन्ति भविष्यसि भविष्यथः भविष्यथ। भविष्यामि भविष्यावः भविष्यामः। धातोः इति अधिक्रियते। 'भविष्यति गम्यादयः' इत्यतः 'भविष्यति' इति अनुवर्तते।

**भविष्यति**

भू-धातोः कर्त्रर्थे 'लृट् शेषे' च इति सूत्रेण लृट् लकारे तत्स्थाने 'तिप्तस्झि.....' इत्यादि सूत्रेण प्रथमपुरुषैकवचने तिप्प्रत्यये अनूबन्धलोपे भूति' इति जाते 'तिङ्शित्सार्वधातुकम्' इति सूत्रेण सार्वधातुकसंज्ञायां, 'कर्तरि शप्' इति शपं प्रबाध्य 'स्यतासी लृलुटोः' इत्यनेनस्य प्रत्यये अनुबन्धलोपे भू स्य तिप्। अत्र 'आर्धधातुकं शेषः' इति सूत्रेण

आर्धधातुकसंज्ञायां 'आर्धधातुकस्येड् वलादेः' इति सूत्रेण स्य इत्ययस्य इडागमे भू इ स्य ति। अत्र 'सार्वधातुकार्धधातुकयोः' इति गुणे अवादेशे संयोगे भवि स्य ति। अत्र स्य इत्यत्र 'आदेशप्रत्ययोः' इति सूत्रेण षत्वे भविष्यति इति रूपम्। तथैव भविष्यतः भविष्यन्ति भविष्यसि भविष्यथः भविष्यथ। भविष्यामि भविष्यावः भविष्यामः।

**भू-धातु लोट् लकाररूपाणि**

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| **प्रथमपुरुषः** | भवतु, भवतात् | भवताम् | भवन्तु |
| **मध्यमपुरुषः** | भव भवतात् | भवतम् | भवत |
| **उत्तमपुरुषः** | भवानि | भवाव | भवाम |

**36. लोट् च। (३.३.१६२)**

विधिनिमन्त्रणामन्त्रण अधीष्ट सम्प्रश्न प्रार्थनेषु धातोः लोट्

लोट् च इति पदच्छेदः। अनेन सूत्रेण लृट्लकारः विधीयते। विध्याद्यर्थेषु धातोर्लोट् इति सूत्रार्थः। लोट् प्रथमान्तं अव्ययपदं च भवति। धातोः इति अधिक्रियते। 'विधिनिमन्त्रणामन्त्रणाधीष्ट- सम्प्रश्नप्रार्थनेषु लिङ्' इति सम्पूर्ण सूत्र लिङ्वर्जम् अनुवर्तते। अतः विधि-निमन्त्रण-आमन्त्रणा-अधीष्ट-सम्प्रश्न-प्रार्थनाद्यर्थेषु धातोः लोट्लकारः इति। यथा - भवतु

**37. आशिषि लिङ्लोटौ। (३.३.१७३)**

लोट्

आशिषि लिङ्लोटौ इति पदच्छेदः। उत्वविधायकं विधिसूत्रम्। अत्र धातोः, प्रत्ययः, परश्च इति च अधिकृतम्। लिङ् च लोट् च लिङ्लोटौ इति। आशिषीति सप्तम्यन्तं, लिङ्लोटौ इति प्रथमान्तम्। आशीर्वाद अर्थे धातोः लिङ्लोटौलकारौ स्तः।

**38. एरुः (३.४.८६)**

इकारस्य उः (उकारस्य) आदेशः

एः. उः इति पदच्छेदः। अनेन सूत्रेण उत्वं विधीयते। लोट् इकारस्य उः। भवतु। एः उः इति पदच्छेदः। एः इति इवर्णस्य षष्ठ्यन्तम् उः इति प्रथमान्तम्। 'लोटो लङ्वत्' इत्यतः लोट् इति अनुवर्तते ।अतः लोट् लकास्य इकारस्य उः (उकारस्य) आदेशः भवति इति। यथा-भवतु।

भूधातोः लोटि तिपि शपि भू अ ति। गुणे अवादेशे एरुः इति इकारस्य उकारे भवतु।

**39. तुह्योस्तातङ्ङाशिष्यन्यतरस्याम्। (७.१.३५)**

तुह्योस्तातङ् वा स्यात्

तुह्योः, तातङ्, आशिषि, अन्यतरस्याम् इति पदच्छेदः। आशिषि तुह्योस्तातङ् वा। परत्वात्सर्वदिशः। भवतात्। तुश्च हिश्च तुही तयोः तुह्योः। तुह्योः इति षष्ठ्यन्तं, तातङ् प्रथमान्तम्। ङितः इति अनुवर्तते। आशीर्वाद अर्थे तुह्योः स्थानयोः तातङ् वा स्याद् इति सूत्रार्थः। तातङ् इत्यत्र अकारङकारौ इतौ भवतः। तात् एव अवशिष्यते। अतः ङिच्च इत्यनेन तुह्योः अन्तादेशः।

**भवतु-भवतात्**

भू-धातोः 'लोट् च', 'आशिषि लिङ्लोटौ' इति लोट्लकारे तत्स्थाने 'तिप्तस्झि...' इत्यादि सूत्रेण प्रथमपुरुषैकवचने तिप्प्रत्यये अनुबन्धलोपे भू ति। सार्वधातुकसंज्ञायां 'कर्तरि शप्' इति सूत्रेण शपि अनुबन्धलोपे भू अ ति। 'तिङ्शित्सार्वधातुकम्' इति शित्वात् शपः अकारस्य अपि सार्वधातुकसंज्ञायां गुणे अवादेशे भ् अव् अ ति। 'एरुः' इति सूत्रेण इकारस्य उकारे भवतु इति रूपम्। आशिष्यर्थे 'तुह्योस्तातङ्ङाशिष्यन्यतरस्याम्' इति सूत्रेण 'तु' इत्यस्य तातङादेशे अनुबन्धलोपे भवतात्' इति च रूपं सिद्ध्यति।

**40. लोटो लङ्वत् (३.४.८५)**

लोटः लङ् इव कार्यं स्यात्

लोटः लङ्वत् इति पदच्छेदः। लोटस्तामादयः सलोपश्च। तामाद्यादेशविधायकं सूत्रम् ।लङः इव लङ्वत् इति विग्रहः। लोटः षष्ठ्यन्तं लङ्वत् अव्ययं च भवति। लोट्लकारे अपि लङ्लकारवत् तस्थस्थमिपां तामादयः स्युः। लङ्लकारे नित्यं ङितः इत्यनेन सकारस्य लोपः भवति इति ।

**41. तस्थस्थमिपां तान्तन्तामः (३.४.१०१)**

तस्थस्थामिपां तमादयः

तस्थस्थमिपाम्तान्तन्तामः इति पदच्छेदः। ङितश्चतुर्णां तामादयः क्रमात् स्युः इति सूत्रार्थः। भवताम् भवन्तु। तश्च थश्च थश्च मिप् तेषां तस्थस्थमिपाम्। तां च तं च तश्च अम् च तान्तन्तामः। अत्र 'नित्यं ङितः' इत्यतः ङितः इति अनुवर्तते। अतः ङित्-लकारस्य स्थाने चतुर्णां

तस्-थस्-थ- मिपाम् क्रमात् तामादयः (ताम् तम् त, अम् ) आदेशाः स्युः इति । यथा-भवताम्

**भवताम्**

भू-धातोः 'लोट् च' इति सूत्रेण लोट्लकारे अनुबन्धलोपे तत्स्थाने 'तिप्तस्झि ....'इत्यादि सूत्रेण प्रथमपुरुषद्विवचने तस्प्रत्यये भू तस्। तस् प्रत्ययस्य सार्वधातुकसंज्ञायां शपि अनुबन्धलोपे शित्त्वात् सार्वधातुकत्वे गुणे अवादेशे च 'भव तस्' इति स्थिते 'लोटो लङ्वत्' इति सूत्रेण लोट् लकारसम्बन्धि तस् इत्यस्य ङिद्वद्भावे तस्प्रत्ययस्य स्थाने 'तस्थस्थामिपां तान्तन्तामः' इति सूत्रेण तामादेशे 'भवताम्' इति रूपं सिद्धम् ।

**भवन्तु**

भू-धातोः 'लोट् च' इति सूत्रेण लोट् लकारे अनुबन्धलोपे तत्स्थाने 'तिप्तस्झि .....' इत्यादि सूत्रेण प्रथमपुरुषबहुचने झिप्रत्यये भू झि। झि प्रत्ययस्य सार्वधातुकसंज्ञायां शपि अनुबन्धलोपे भू अ झि। 'झोऽन्तः' इति सूत्रेण अन्तादेशे भू अ अन्ति। गुणे अवादेशे संयोगे च भव अन्ति। 'अतो गुणे' इति सूत्रेण पररूपमेकादेशे भवन्ति। 'एरुः' इति सूत्रेण न्ति इत्यस्य इकारस्य स्थाने उकारे भवन्तु इति रूपं सिद्धम् ।

**42. सेर्ह्यपिच्च (३.४.८७)**

लोटः सेः स्थाने हिः

सेः हि अपित् च इति पदच्छेदः। लोटः सेर्हिः सोऽपिच्च। सेः षष्ठ्यन्तं, हिः प्रथमान्तं, अपित् प्रथमान्तं, च अव्ययपदं च। 'लोटो लङ्वत्' इत्यतः लोट्' इति अनुवर्तते। लोट् लकारस्य सेः स्थाने हि आदेशः स्यात् सोऽपि अपित् च भवति इति अर्थः। अत्र अनेकात्वात् सवदिशे सम्पूर्णस्य सिप् इत्यस्य स्थाने हि इत्यादेशः भवति । यथा भूधातोः लोटि सिपि गुणे 'एचोऽयवायावः' इत्यवादेशे भव सि। 'सेर्ह्यपिच्च' इति हित्वे भव हि।

**43. अतो हेः (६.४.१०५)**

अकारात् परस्य हेः लुक्

अतः हेः इति पदच्छेदः। अतः परस्य हेर्लुक् इति सूत्रार्थः ।अतः इति पञ्चम्यन्तं, हेः इति षष्ठ्यन्तं। 'चिणो लुक् इत्यतः लुक् इति अनुवर्तते। अतः अदन्ताद् ह्रस्व अकारात् परस्य हेः लुक् स्यात् इति। यथा -भव।

**भव, भवतात् -**

भू-धातोः 'लोट् च' इति सूत्रेण लोट् लकारे, तत्स्थाने 'तिप्तस्झि .....' इत्यादि सूत्रेण मध्यमपुरुषैकवचने सिप्प्रत्यये अनुबन्धलोपे सार्वधातुकसंज्ञायां शपि अनुबन्धलोपे गुणे अवादेशे भव सि इत्यत्र 'सेर्ह्यपिच्च' इति सेः स्थाने ही आदेशे भवहि। 'अतो हेः' इति सूत्रेण हेः इत्यस्य लोपे प्राप्ते 'तुह्योस्तातङ्ङाशिष्यन्यतरस्याम्' इति सूत्रेण विकल्पेन तुह्योः तातङादेशे अनुबन्धलोपे 'भवतात्' इति। तातङ् अभावे 'अतो हेः' इत्यनेन हेः लोपे 'भव' इति रूपं सिद्धम् ।

**भवतम्**

भू-धातोः 'लोट् च' इति सूत्रेण लोटि तत्स्थाने 'तिप्तस्झि ......' इत्यादि सूत्रेण मध्यमपुरुषद्विवचने थस्प्रत्यये भू थस्। सार्वधातुसंज्ञायां, शपि, अनुबन्धलोपे गुणे अवादेशे भवथम्। 'लोटो लङ्वत्' इति सूत्रेण लङ्कार्यातिदेशेन ङित्वात्, 'तस्थस्थमिपां तान्तन्तामः इति सूत्रेण थसः स्थाने तमादेशे भवतम् इति रूपं सिद्धम्।

**भवत**

भव भू-धातोः 'लोट् च' इति सूत्रेण लोटि तत्स्थाने 'तिप्तस्झि ......' इत्यादि सूत्रेण मध्यमपुरुषबहुवचने थप्रत्यये भू थ। सार्वधातुकसंज्ञायां, शपि अनुबन्धलोपे गुणे अवादेशे भव थ' इत्यत्र 'लोटो लङ्वत्' इति सूत्रेण लङ्कार्यातिदेशेन ङित्वात्, 'तस्थस्थमिपां तान्तन्तामः' इति सूत्रेण तादेशे भवत इति रूपं सिद्धम्।

**44. मेर्निः (३.४.८९)**

निः

मेः निः इति पदच्छेदः। लोटो मेर्निः स्यात् इति सूत्रार्थः। मेः षष्ठ्यन्तं, निः प्रथमान्तम्। 'लोटो लङ्वत्' इत्यतः 'लोटः' इति अनुवर्तते। लोट् लकारस्य मि इत्यस्य स्थाने निः स्याद् इति अर्थः। यथा भवानि। भू लोट् मिपि गुणे अवादेशे भवमि। मेर्निः इति नित्वे भवनि।

**45. आडुत्तमस्य पिच्च (पा.३.४.९२)**

लोटः उत्तमस्य आट्

आट् उत्तमस्य पिच्च इति पदच्छेदः। लोडुत्तमस्याट् स्यात् पिच्च। हिन्योरुत्वं न, इकारोच्चारणसामर्थ्यात् इति सूत्रार्थः। अस्मिन् सूत्रे आड् इति प्रथमान्तं, उत्तमस्य षष्ठ्यन्तं, पित् प्रथमान्तं, च अव्ययपदम्। 'लोटः लङ्वत्' इत्यतः 'लोटः' इति अनुवर्तते । लोट् लकारस्य उत्तम पुरुषस्य आट् (आडागमः ) स्यात् तत् आट् सहित उत्तमपुरुषः पितः

समानं भवति। आट् इत्यत्र टकारस्य टित्वात् प्रत्ययस्य आदिः वर्तते। यथा- भवानि।

**भवानि**

भू-धातोः 'लोट् च' इति सूत्रेण लोट्लकारे अनुबन्धलोपे 'तिप्तस्झि .....' इत्यादि सूत्रेण उत्तमपुरुषैकवचने मिप्प्रत्यये अनुबन्धलोपे भू मि। मिप्प्रत्ययस्य सार्वधातुकसंज्ञायां शपि अनुबन्धलोपे, गुणे अवादेशे 'लोटो लङ्वत्' इति सूत्रेण लङ्कार्यातिदेशेन इकारोच्चारणसामर्थ्यात् 'मेर्निः' इति नित्वे 'आडुत्तमस्य पिच्च' इति सूत्रेण आडागमे टित्वात् आद्यावयवे 'अकः सवर्णे दीर्घः' इत्यनेन दीर्घमेकादेशे भवानि इति रूपम्।

**46. नित्यं ङितः (३.४.९९)**

सकारान्तस्य ङिदुत्तमस्य लोपः

नित्यं ङितः इति पदच्छेदः। सकारान्तस्य ङिदुत्तमस्य नित्यं सकारस्य लोपः। नित्यं इति द्वितीयान्तं क्रियाविशेषणं, ङितः षष्ठ्यन्तं भवति। अतः येन विधिस्तदन्तस्य इत्यतः तदन्तविधिः। यथा भवाव। भवाम।

**भवाव**

भू-धातोः 'लोट् च' इति सूत्रेण लोट्लकारे 'तिप्तस्झि .....' इत्यादि सूत्रेण उत्तमपुरुषद्विवचने वस्प्रत्यये भू वस्। वस्प्रत्ययस्य सार्वधातुकसंज्ञायां शपि अनुबन्धलोपे, गुणे अवादेशे 'आडुत्तमस्य पिच्च' इति सूत्रेण आडागमे टित्वात् आद्यावयवे 'अकः सवर्णे दीर्घः' इत्यनेन दीर्घमेकादेशे 'लोटो लङ्वत्' इति सूत्रेण लङ्कार्यातिदेशेन ङित्वात् नित्यं ङितः इत्यनेन सकारस्य लोपे भवाव इति रूपम्।

**भवाम**

भू-धातो लोटि, तत्स्थाने मसि शपि गुणे अवादेशे मसः आडागमे अनुबन्धलोपे सवर्णदीर्घे लङ्वदतिदेशेन ङित्वात् 'नित्यं ङितः' इति सलोपे 'भवाम' इति रूपं सिद्धम्।

**भू-धातुलङ् लकाररूपाणि**

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| **प्रथमपुरुषः** | अभवत् | अभवताम् | अभवन् |

| | | | |
|---|---|---|---|
| **मध्यमपुरुषः** | अभवः | अभवतम् | अभवत |
| **उत्तमपुरुषः** | अभवम् | अभवाव | अभवाम |

### 47. अनद्यतने लङ् (३.२.१११)

अनद्यतने भूतकाले लङ् लकारः

अनद्यतने लङ् इति पदच्छेदः। अनद्यतनभूतार्थवृत्तेर्धातोर्लङ् स्यात् इति सूत्रार्थः। अनद्यतने सप्तम्यन्तं, लङ् प्रथमान्तं च अविद्यमानः अद्यतनः यस्मिन् सः अनद्यतनः तस्मिन् अनद्यतने। अत्र भूते ,धातोः, प्रत्ययः, परश्च इति' इति च अधिक्रियन्ते। अर्थात् अनद्यतन वह ऽभूतार्थवृत्तेः धातोः लङ् स्यात् इति सूत्रार्थः। यथा अभवत्।

### 48. लुङ्लङ्लृङ्क्ष्वडुदात्तः (६.४.७१)

लुङ्लङ्लृङ्षु अडागमः

लुङ्लङ्लृङ्षु अट् उदात्तः इति पदच्छेदः। एष्वङ्गस्याट् इति सूत्रार्थः। अत्र अङ्गस्य इति अधिकृतम्। लुङ् च लङ् च लृङ् च लुङ्लङ्लृङः तेषु लुङ्लङ्लृङ्क्षु। अत्र अङ्गस्य इत्यधिक्रियते। लुङ् - लङ्- लृङ्षु लकारेषु परेषु धातु रूपाङ्गस्य अट् आगमः स्यात् इति सूत्रार्थः। अट् इत्यत्र टकारस्य इत्संज्ञायां टित्वात् 'आद्यन्तौ टकितौ' इत्यनेन आद्यावयवश्च भवति। यथा भूधातोः लङि तिपि लुङ्लङ्लृङ्क्ष्वडुदात्तः इत्यागमे अ भू ति।

### 49. इतश्च (३.४.१००)

इकारस्य लोपः

इतः च इति पदच्छेदः। ङितो लस्य परस्मैपदमिकारान्तः यत्तदन्तस्य लोपः स्यात् इति सूत्रार्थः। अत्र इतः इति षष्ठ्यन्तं च इति अव्ययपदं च भवति। नित्यं ङितः इत्यतः ङितः इति पदम् अनुवर्तते। तथा इतश्च लोपः परस्मैपदेषु इत्यतः लोपः इति परस्मैपदेषु इति च अनुवर्तते। ङित्लकारस्य स्थाने यत् परस्मैपद-ह्रस्व-इकारन्तः भवति तस्य अन्त्यस्य (इकारस्य) लोपः स्यात् इति अर्थः। यथा-अभवत् अभवताम् अभवन् अभवः अभवतम् अभवत अभवम् अभवाव अभवाम।

### अभवत्

भू-धातोः अनद्यतनभूतकालार्थे 'अनद्यतने लङ्' इति सूत्रेण लङ्लकारे लुङ्लङ्लृङ्क्ष्वडुदात्तः इत्यनेन धातोः अडागमे टित्वात् आद्यवयवे,अ भू ल् इति जाते 'तिप्तस्झि .....' इत्यादि सूत्रेण प्रथमपुरुषैकवचने तिप्प्रत्यये अनुबन्धलोपे अ भू ति। ति इत्यस्य सार्वधातुकसंज्ञायां शपि

अनुबन्धलोपे अ भू अ ति। 'सार्वधातुकार्धधातुकयोः' इत्यनेन गुणे अवादेशे संयोगे अभवति। 'इतश्च' इति सूत्रेण तिपः इकारलोपे अभवत् इति रूपम्।

**अभवताम्**

भू-धातोः अनद्यतनभूतकालार्थे 'अनद्यतने लङ्' इति सूत्रेण लङ्लकारे 'लुङ्लङ्लृङ्क्ष्वडुदात्तः' इत्यनेन धातोः अडागमे ङित्वात् आद्यवयवे,अ भू ल् इति जाते 'तिप्तस्झि .....' इत्यादि सूत्रेण प्रथमपुरुषद्विवचने तस्प्रत्यये अ भू तस्। तस् इत्यस्य सार्वधातुकसंज्ञायां शपि अनुबन्धलोपे अ भू अ तस्। 'सार्वधातुकार्धधातुकयोः' इत्यनेन गुणे अवादेशे संयोगे अभवतस्। 'तस्थस्थमिपां तान्तन्तामः' इति सूत्रेण तस् इत्यस्य स्थाने तामादेशे 'अभवताम्" इति रूपम्।

**अभवन्**

भू-धातोः अनद्यतनभूतकालार्थे 'अनद्यतने लङ्' इति सूत्रेण लङ्लकारे 'लुङ्लङ्लृङ्क्ष्वडुदात्तः' इत्यनेन धातोः अडागमे ङित्वात् आद्यवयवे,अ भू ल् इति जाते 'तिप्तस्झि .....' इत्यादि सूत्रेण प्रथमपुरुषबहुवचने झिप्रत्यये अ भू झि। 'झोऽन्तः' इति सूत्रेण अन्तादेशे अ भू अन्ति। 'सार्वधातुकार्धधातुकयोः' इत्यनेन गुणे अवादेशे संयोगे अभव अन्ति। 'अतो गुणे' इत्यतः पररूपे अभवन्ति। 'इतश्च' इति सूत्रेण न्ति इत्यस्य इकारलोपे अभवन्त्। 'संयोगान्तस्य लोपः' इति सूत्रेण तकारस्य लोपे 'अभवतन्" इति रूपम्।

**अभवः**

भू-धातोः अनद्यतनभूतकालार्थे 'अनद्यतने लङ्' इति सूत्रेण लङ्लकारे 'लुङ्लङ्लृङ्क्ष्वडुदात्तः' इत्यनेन धातोः अडागमे ङित्वात् आद्यवयवे,अ भू ल् इति जाते 'तिप्तस्झि .....' इत्यादि सूत्रेण मध्यमपुरुषैकवचने सिप्प्रत्यये अनुबन्धलोपे अ भू सि। सिपः सार्वधातुकसंज्ञायां शपि अनुबन्धलोपे अ भू अ सि। 'सार्वधातुकार्धधातुकयोः' इत्यनेन गुणे अवादेशे संयोगे अभवसि। 'इतश्च' इति सूत्रेण सि इत्यस्य इकारलोपे अभवस्। सकारस्य रुत्वे विसर्गे च कृते 'अभवः" इति रूपम्।

**अभवतम्**

भू-धातोः अनद्यतनभूतकालार्थे ‘अनद्यतने लङ्’ इति सूत्रेण लङ्लकारे ‘लुङ्लङ्लृङ्क्ष्वडुदात्तः’ इत्यनेन धातोः अडागमे ङित्वात् आद्यवयवे,अ भू ल् इति जाते ‘तिप्तस्झि .....’ इत्यादि सूत्रेण मध्यमपुरुषद्विवचने थस्प्रत्यये अ भू थस्। थस् इत्यस्य सार्वधातुकसंज्ञायां शपि अनुबन्धलोपे अ भू अ थस्। 'सार्वधातुकार्धधातुकयोः' इत्यनेन  गुणे अवादेशे संयोगे अभवथस्। ‘तस्थस्थमिपां तान्तन्तामः’ इति सूत्रेण थस् इत्यस्य स्थाने तमादेशे 'अभवतम्" इति रूपम्।

**अभवत**

भू-धातोः अनद्यतनभूतकालार्थे ‘अनद्यतने लङ्’ इति सूत्रेण लङ्लकारे ‘लुङ्लङ्लृङ्क्ष्वडुदात्तः’ इत्यनेन धातोः अडागमे ङित्वात् आद्यवयवे,अ भू ल् इति जाते ‘तिप्तस्झि .....’ इत्यादि सूत्रेण मध्यमपुरुषबहुवचने थप्रत्यये अ भू थ। थ इत्यस्य सार्वधातुकसंज्ञायां शपि अनुबन्धलोपे अ भू अ थ। 'सार्वधातुकार्धधातुकयोः' इत्यनेन  गुणे अवादेशे संयोगे अभवथ। ‘तस्थस्थमिपां तान्तन्तामः’ इति सूत्रेण थ इत्यस्य स्थाने तादेशे 'अभवत" इति रूपम्।

**अभवम्**

भू-धातोः अनद्यतनभूतकालार्थे ‘अनद्यतने लङ्’ इति सूत्रेण लङ्लकारे ‘लुङ्लङ्लृङ्क्ष्वडुदात्तः’ इत्यनेन धातोः अडागमे ङित्वात् आद्यवयवे,अ भू ल् इति जाते ‘तिप्तस्झि .....’ इत्यादि सूत्रेण उत्तमपुरुषैकवचने मिप्प्रत्यये अ भू मि। मि इत्यस्य सार्वधातुकसंज्ञायां शपि अनुबन्धलोपे अ भू अ मि। 'सार्वधातुकार्धधातुकयोः' इत्यनेन  गुणे अवादेशे संयोगे अभवमि। ‘तस्थस्थमिपां तान्तन्तामः’ इति सूत्रेण मि इत्यस्य स्थाने अमादेशे  अतो गुणः इत्यनेन पररूपे 'अभवम्’ इति रूपम्।

**अभवाव**

भू-धातोः अनद्यतनभूतकालार्थे ‘अनद्यतने लङ्’ इति सूत्रेण लङ्लकारे ‘लुङ्लङ्लृङ्क्ष्वडुदात्तः’ इत्यनेन धातोः अडागमे ङित्वात् आद्यवयवे,अ भू ल् इति जाते ‘तिप्तस्झि .....’ इत्यादि सूत्रेण उत्तमपुरुषद्विवचने वस् प्रत्यये अ भू वस्। वस् इत्यस्य सार्वधातुकसंज्ञायां शपि अनुबन्धलोपे अ भू अ वस्। 'सार्वधातुकार्धधातुकयोः' इत्यनेन  गुणे अवादेशे संयोगे अभवस्। ‘अतो दीर्घो यञि’ इत्यतः दीर्घे अभवावस्। ‘नित्यं ङितः’ इति सूत्रेण सकारलोपे 'अभवाव" इति रूपम्।

**अभवाम**

भू-धातोः अनद्यतनभूतकालार्थे 'अनद्यतने लङ्' इति सूत्रेण लङ्लकारे 'लुङ्लङ्लृङ्क्ष्वडुदात्तः' इत्यनेन धातोः अडागमे डित्वात् आद्यवयवे,अ भू ल् इति जाते 'तिप्तस्झि .....' इत्यादि सूत्रेण उत्तमपुरुषबहुचने मस्प्रत्यये अ भू मस्। मस् इत्यस्य सार्वधातुकसंज्ञायां शपि अनुबन्धलोपे अ भू अ मस्। 'सार्वधातुकार्धधातुकयोः' इत्यनेन गुणे अवादेशे संयोगे अभमस्। 'अतो दीर्घो यञि' इत्यतः दीर्घे अभवामस्। 'नित्यं ङितः' इति सूत्रेण सकारलोपे 'अभवाम" इति रूपम्।

**भू-धातुविधिलिङ्लकाररूपाणि**

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| **प्रथमपुरुष** | भवेत् | भवेताम् | भवेयुः |
| **मध्यमपुरुष** | भवेः | भवतम् | भवेत |
| **उत्तमपुरुषः** | भवेयम् | भवेव | भवेम |

**50. विधिनिमन्त्रणामन्त्रणाधीष्टसम्प्रश्नप्रार्थनेषु लिङ्। (३.३.१६१)**

विधिलिङ्

विधिनिमन्त्रणामन्त्रणाधीष्टसम्प्रश्नप्रार्थनेषुलिङ् इति पदच्छेदः। एष्वर्थेषु धातोर्लिङ् स्यात् इति सूत्रार्थः। 'धातोः प्रत्ययः परश्च' इत्यधिक्रियते। विधिः प्रेरणम्- भृत्यादैनिकृष्टस्य प्रवर्तनम्। यथा त्वं वस्त्रं क्षालयेति। निमन्त्रणम् नियोगकरणम्। आवश्यके श्राद्धभोजनादौ दौहित्रादेः प्रवर्तनम्। तद्यथा दौहित्रादीन् प्रति इह श्राद्धे भवान् भुञ्जीत इति। आमन्त्रणं कामचारानुज्ञा। यथेच्छं क्रियतामित्यभ्यनुज्ञानमित्यर्थः। अधीष्टं सत्कारपूर्वको व्यापारः। सत्कृत्य प्रवर्तनमित्यर्थः। यथा भवान् पुत्रमध्यापयेदिति। इदं कार्य न वेति विचार्य निर्धारण संप्रयनः। यथा किं भोः भवान् व्याकरणमधीयेति। प्रार्थनं याच्या। यथा भवानन्नं मे दद्यादिति। प्रवर्तनासंप्रश्नप्रार्थनेषु लिङित्येव सुवचम्। विधि-निमन्त्रण-आमन्त्रण- अधीष्ट - सम्प्रश्न- प्रार्थनेषु अर्थेषु धातोः लिड़-लकारः स्यात्। यथा भवेत्।

लिङः परस्मैपदानां यासुडागमः

**51. यासुट् परस्मैपदेषूदात्तो ङिच्च। (३.४.१०३)**

यासुट्परस्मैपदेषु उदात्तः ङित् च इति पदच्छेदः। लिङः परस्मैपदानां यासुडागमः ङिच्च इति सूत्रार्थः। यासुट् प्रथमान्तं, परस्मैपदेषु

सप्तम्यन्तं, उदात्तः प्रथमान्तं, ङित् प्रथमान्तं च अव्ययपदं च भवति। अत्र 'लिङः सीयुट्  इत्यतो 'लिङः' इति अनुवर्तते। लिङ्लकारस्य परस्मैपदप्रत्ययानां यासुट् आगमः भवति, सागमः च उदात्तः ङित् च स्यात् इति। यथा - भवेत्

**52. लिङः सलोपोऽनन्त्यस्य। (७.२.७९)**

सकारस्य लोपः

लिङ स लोपः अनन्त्यस्य इति पदच्छेदः। सार्वधातुकलिङोऽनन्त्यस्य सस्य लोपः। अन्ते भवोऽन्त्यः, न अन्त्यः अनन्त्यः, तस्य अनन्त्यस्य। लिङः षष्ठ्यन्तं, लोपः प्रथमान्तम्, अनन्त्यस्य षष्ठ्यन्तम्। रुदादिभ्यः सार्वधातुके इत्यतः सार्वधातुके इत्यनुवर्तते। तस्य षष्ठ्यन्तत्वेन विपरिणामः। सार्वधातुकलिङः अन्त्यसकारस्य लोपः भवति इति। यथा भवेत्।

**53. अतो येयः। (७.२.८० )**

यास् इत्यस्य इय् आदेशः

अतः या  इयः इति पदच्छेदः। अतः परस्य सार्वधातुकावयवस्य यास् इत्यस्य इय्। अत्र 'रुदादिभ्यः सार्वधातुके' इत्यतः 'सार्वधातुके  इति अनुवर्त्य अवयवषष्ठ्यन्तत्वेन विपरिणामः। अतः इति पञ्चमी। परस्य इत्यध्याह्रियते। यासः इति लुप्तषष्ठीकम्। येयः  इत्यत्र यास् इय् इति स्थिते रुत्वे यलोपः। इय इत्यत्र अकारः उच्चारणार्थः। अदन्ताङ्गात् परस्य सार्वधातुकावयवस्य यास् इत्यस्य स्थाने इय् आदेशः भवति इति।

**54. लोपोव्योर्वलि। (६.१.६६)**

वल् प्रत्याहारे वकारयकारयोः लोपः

लोपः व्योः वलि इति पदच्छेदः। भवेत्। भवेताम्। व् च य् च व्यौ, तयोः व्योः। लोपः प्रथमान्तं, व्योः षष्ठ्यन्तं, वलि सप्तम्यन्तं च भवति। वल् प्रत्याहारस्य परे सति वकारयकारयोः लोपः स्यात् इति अर्थः। यथा-भवेत्,भवेताम्।

**भवेत्-**

भू-धातोः 'विधिनिमन्त्रणामन्त्रणाधीष्टसम्प्रश्नप्रार्थनेषु लिङ्' इति लिङ्लकारे 'तिप्तस्झि .....' इत्यादि सूत्रेण प्रथमपुरुषैकवचने तिप् प्रत्यये अनुबन्धलोपे भू ति। तिपि सार्वधातुकसंज्ञायां, शप्प्रत्यये अनुबन्धलोपे भू अ ति। गुणे अवादेशे भव ति। 'यासुट् परस्मैपदेषूदात्तो ङिच्च' इत्यनेन यासुडागमे अनुबन्धलोपे ङित्वात् आद्यवयवे भव यास् ति। 'लिङः सलोपोऽनन्त्यस्य' इति सूत्रेण सकारस्य लोपे तन्निषेधात्

‘अतो येयः’ इति सूत्रेण यास् इत्यस्य स्थाने इय् आदेशे भव इय् ति इति जाते आद्गुणः इति सूत्रेण गुणे भवेय् ति। 'लोपो व्योर्वलि' इति सूत्रेण यकारस्य लोपे भवेति। ‘इतश्च' इति सूत्रेण इकारलोपे भवेत् इति रूपं सिद्धम् ।

**भवेताम्-**

भू-धातोः 'विधिनिमन्त्रणामन्त्रणाधीष्टसम्प्रश्नप्रार्थनेषु लिङ्’ इति विधिलिङ्। ‘तिप्तस्झि ..... इत्यादि सूत्रेण प्रथमपुरुषद्विवचने तस्प्रत्यये भू तस्। तस् इत्यस्य सार्वधातुकसंज्ञायां, शप्प्रत्यये अनुबन्धलोपे गुणे अवादेशे भव तस्। ‘तस्थस्थमिपां तान्तन्तामः’ इति सूत्रेण तस् इत्यस्य ताम् आदेशे भव ताम्। ‘यासुट् परस्मैपदेषूदात्तो ङिच्च' इत्यनेन यासुडागमे अनुबन्धलोपे ङित्वात् आद्यवयवे भव यास् ताम्। 'लिङः सलोपोऽनन्त्यस्य’ इति सूत्रेण सकारस्य लोपे तन्निषेधात् ‘अतो येयः’ इति सूत्रेण यास् इत्यस्य स्थाने इय् आदेशे भव इय् ताम् इति जाते ‘आद्गुणः’ इति सूत्रेण गुणे भवेय् ताम्। 'लोपो व्योर्वलि' इति सूत्रेण यकारस्य लोपे भवेताम् इति रूपं सिद्धम् ।

**55. झेर्जुस्। (३.४.१०८)**

झि इत्यस्य जुस्

झेः जुस् इति पदच्छेदः। लिङो ‘झेर्जुस्’ स्यात् इति सूत्रार्थः। भवेयुः भवेः भवेतम् भवेत, भवेयम्, भवेव भवेम। झेः इति षष्ठ्यन्तं जुस् इति प्रथमान्तं च। अत्र लिङः सीयुट् इत्यतः 'लिङः' इति अनुवर्तते। लिङ्लकारस्य झि इत्यस्य जुस् आदेशः भवति। जुसि जकारस्य ‘चुटु’ इत्यनेन इत्संज्ञायां, ‘तस्य लोपः’ इति ज् इत्यस्य लोपे उस् एव अवशिष्यते। यथा- भवेयुः।

**भवेयुः -**

भू-धातोः 'विधिनिमन्त्रणामन्त्रणाधीष्टसम्प्रश्नप्रार्थनेषु लिङ्’ इति विधिलिङ्। ‘तिप्तस्झि .....’ इत्यादि सूत्रेण प्रथमपुरुषबहुवचने झिप्रत्यये भू झि। ‘झोऽन्तः’ इति सूत्रेण झस्य अन्तादेशे प्राप्ते तं प्रबाध्य झेर्जुस् इति सूत्रेण झेः जुस् आदेशे अनुबन्धलोपे भू उस्। झि इत्यस्य सार्वधातुकसंज्ञायां, शप्प्रत्यये अनुबन्धलोपे गुणे अवादेशे ‘यासुट् परस्मैपदेषूदात्तो ङिच्च’ इति यासुडागमे अनुबन्धलोपे भव यास् उस्। ‘लिङ् सलोपोऽनन्त्यस्य’ इति सूत्रेण सकारस्य लोपे प्राप्ते तं प्रबाध्य

'अतो येयः' इति यासः इयादेशे भव इय् उस्। 'आद्गुणः' इति गुणे सस्य रुत्वे विसर्गे भवेयुः" इति रूपं सिद्धम् ।

**भवेः**

भू-धातोः 'विधिनिमन्त्रणामन्त्रणाधीष्टसम्प्रश्नप्रार्थनेषु लिङ्' इति विधिलिङ् 'तिप्तस्झि .....' इत्यादि सूत्रेण मध्यमपुरुषैकवचने सिप् प्रत्यये अनुबन्धलोपे भू सि। सिपि शपि गुणे अवादेशे भव सि इति स्थिते 'परस्मैपदेषूदात्तो ङिच्च' इति यासुडागमे अनुबन्धलोपे भव यास् सि। 'अतो येय:' इति यासः स्थाने इयादेशे, गुणे, यलोपे, 'इतश्च' इति सूत्रेण इकारलोपे रुत्वे विसर्गे भवेः इति रूपं सिद्धम्।

**भवेतम्**

भू-धातोः 'विधिनिमन्त्रणामन्त्रणाधीष्टसम्प्रश्नप्रार्थनेषु लिङ्' इति विधिलिङ्। तत्स्थाने 'तिप्तस्झि.....' इत्यादि सूत्रेण मध्यमपुरुषद्विवचने थस्प्रत्यये भू थस्। थस् इत्यस्य सार्वधातुकसंज्ञायां, शप् प्रत्यये अनुबन्धलोपे गुणे अवादेशे भव थस्। 'तस्थस्थमिपां तान्तन्तामः' इति सूत्रेण थस् इत्यस्य तम् आदेशे भव तम्। यासुट् 'परस्मैपदेषूदात्तो ङिच्च' इत्यनेन यासुडागमे अनुबन्धलोपे डित्वात् आद्यवयवे भव यास् तम्। 'लिङः सलोपोऽनन्त्यस्य' इति सूत्रेण सकारस्य लोपे प्राप्ते तन्निषेधात् 'अतो येयः' इति सूत्रेण यास् इत्यस्य स्थाने इय् आदेशे भव इय् तम् इति जाते 'आद्गुणः' इति सूत्रेण गुणे भवेय् ताम्। 'लोपो व्योर्वलि' इति सूत्रेण यकारस्य लोपे भवेताम् इति रूपं सिद्धम्।

**भवेत**

भू-धातोः 'विधिनिमन्त्रणामन्त्रणाधीष्टसम्प्रश्नप्रार्थनेषु लिङ्' इति विधिलिङ्। तत्स्थाने 'तिप्तस्झि .....' इत्यादि सूत्रेण मध्यमपुरुष बहुवचने थ प्रत्यये भू थ। थ इत्यस्य सार्वधातुकसंज्ञायां, शप् प्रत्यये अनुबन्धलोपे गुणे अवादेशे भव थ। 'तस्थस्थमिपां तान्तन्तामः' इति सूत्रेण थ इत्यस्य तादेशे भव त। 'यासुट् परस्मैपदेषूदात्तो ङिच्च' इत्यनेन यासुडागमे अनुबन्धलोपे डित्वात् आद्यवयवे भव यास् त। 'लिङः सलोपोऽनन्त्यस्य' इति सूत्रेण सकारस्य लोपे प्राप्ते तन्निषेधात् 'अतो येयः' इति सूत्रेण यास् इत्यस्य स्थाने इय् आदेशे भव इय् त इति जाते 'आद्गुणः' इति सूत्रेण गुणे भवेय् त। 'लोपो व्योर्वलि' इति सूत्रेण यकारस्य लोपे भवेत इति रूपं सिद्धम् ।

**भवेयम्**

भू-धातोः 'विधिनिमन्त्रणामन्त्रणाधीष्टसम्प्रश्नप्रार्थनेषु लिङ्' इति विधिलिङ्। तत्स्थाने 'तिप्तस्झि .....' इत्यादि सूत्रेण उत्तमपुरुषैकवचने मिप्प्रत्यये अनुबन्धलोपे भू मि। मिपः सार्वधातुकसंज्ञायां, शप् प्रत्यये अनुबन्धलोपे गुणे अवादेशे भव मि। 'तस्थस्थमिपां तान्तन्तामः' इति सूत्रेण मिपः अमादेशे भव अम्। 'यासुट् परस्मैपदेषूदात्तो ङिच्च' इत्यनेन यासुडागमे अनुबन्धलोपे डित्वात् आद्यवयवे भव यास् अम्। 'लिङः सलोपोऽनन्त्यस्य' इति सूत्रेण सकारस्य लोपे प्राप्ते तन्निषेधात् 'अतो येयः' इति सूत्रेण यास् इत्यस्य स्थाने इय् आदेशे भव इय् अम् इति जाते 'आद्गुणः' इति सूत्रेण गुणे भवेय् अम् संयोगे भवेयम् इति रूपं सिद्धम्।

**भवेव**

भू-धातोः 'विधिनिमन्त्रणामन्त्रणाधीष्टसम्प्रश्नप्रार्थनेषु लिङ्' इति विधिलिङ्। तत्स्थाने 'तिप्तस्झि .....' इत्यादि सूत्रेण उत्तमपुरुषद्विवचने वस्प्रत्यये भू वस्। वसः सार्वधातुकसंज्ञायां, शप् प्रत्यये अनुबन्धलोपे गुणे अवादेशे भव वस्। 'यासुट् परस्मैपदेषूदात्तो ङिच्च' इत्यनेन यासुडागमे अनुबन्धलोपे डित्वात् आद्यवयवे भव यास् वस्। 'लिङः सलोपोऽनन्त्यस्य' इति सूत्रेण सकारस्य लोपे प्राप्ते तन्निषेधात् 'अतो येयः' इति सूत्रेण यास् इत्यस्य स्थाने इय् आदेशे भव इय् वस् इति जाते 'आद्गुणः' इति सूत्रेण गुणे भवेय् वस्। 'लोपो व्योर्वलि' इति सूत्रेण यकारस्य लोपे भवे वस्। 'नित्यं ङितः' इत्यनेन सकारलोपे भवेव इति रूपं सिद्धम् ।

**भवेम -**

भू-धातोः 'विधिनिमन्त्रणामन्त्रणाधीष्टसम्प्रश्नप्रार्थनेषु लिङ्' विधिलिङ्। तत्स्थाने तिप्तस्झि ..... इत्यादि सूत्रेण उत्तमपुरुषबहुवचने मस्प्रत्यये भू मस्। मसः सार्वधातुकसंज्ञायां, शप्प्रत्यये अनुबन्धलोपे गुणे अवादेशे भव मस्। 'यासुट् परस्मैपदेषूदात्तो ङिच्च' इत्यनेन यासुडागमे अनुबन्धलोपे डित्वात् आद्यवयवे भव यास् मस्। 'लिङः सलोपोऽनन्त्यस्य' इति सूत्रेण सकारस्य लोपे प्राप्ते तन्निषेधात् 'अतो येयः' इति सूत्रेण यास् इत्यस्य स्थाने इय् आदेशे भव इय् मस् इति जाते 'आद्गुणः' इति सूत्रेण गुणे भवेय् मस्। 'लोपो व्योर्वलि' इति सूत्रेण यकारस्य लोपे भवे मस्। 'नित्यं ङितः' इत्यनेन सकारलोपे भवेम इति रूपं सिद्धम् ।

### भू-धातुः आशीर्लिङ्लकाररूपाणि

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| **प्रथमपुरुषः** | भूयात् | भूयास्ताम् | भूयासुः |
| **मध्यमपुरुषः** | भूयाः | भूयास्तम् | भूयास्त |
| **उत्तमपुरुषः** | भूयासम् | भूयास्व | भूयास्म |

**56. लिङाशिषि। (३.४.११६)**

आशिषि लिङ्स्तिङ् आर्धाधातुकसंज्ञा

लिङ् आशिषि इति पदच्छेदः। आशिषि लिङस्तिङ् आर्धधातुकसंज्ञः स्यात् इति सूत्रार्थः। अत्र लिङ् इति लुप्त-षष्ठीकम्। तिङिशत्सार्वधातुकम् इत्यतः तिङ् इति 'आर्धधातुकं शेषः' इत्यतः आर्धधातुकम् इति च अनुवर्तते। आशीर्वादे अर्थे लिङ्स्थानीयस्य तिङ्प्रत्ययस्य आर्धधातुक संज्ञा भवति इत्यर्थः ।फलतः आशिर्लिङः आर्धधातुकसंज्ञा भवति। आर्धाधातुकस्येड् वलादेः इत्यदावस्य प्रयोजनम्।

**57. किदाशिषि (३.४.१०४)**

लिङः यासुट् आगमः कित् च

कित् आशिषि। आशिषि लिङो यासुट् कित्। कित् प्रथमान्तं, आशिषिः सप्तम्यन्तम्। अत्र 'लिङः सीयुट्' इत्यतः लिङः 'यासुट् परस्मैपदेषूदात्तो ङिच्च' इत्यतः यासुट् इति चानुवर्तते। आशिषि (आशीर्वादार्थे) लिङ लकारस्य (लिङ्- स्थानीयस्य) यासुट् आगमः कित् च भवति। 'स्कोः संयोगाद्योः' इति सलोपः च भवति। यथा भूयात्।

**58. ग्क्ङति च। (१.१.५)**

इकः स्थाने गुणवृद्धौ न स्तः

ग्क्ङति च इति पदच्छेदः। गित्किन्ङिन्निमित्ते इग्लक्षणे गुणवृद्धौ न स्तः इति सूत्रार्थः। भूयात्, भूयास्ताम्, भूयासुः भूयाः भूयास्तम् भूयास्त भूयासम् भूयास्वः, भूयास्म। अत्र ग् च क् च ङ् च तेषां ग्क्ङत्। ते इतः यस्य स ग्क्ङतः तस्मिन्। ग्क्ङति सप्तम्यन्तं, च अव्ययपदम् च। 'इको गुणवृद्धौ' इति सूत्रम् अनुवर्तते। न धातुलोप आर्धधातुके इत्यतः न इति अनुवर्तते। गित् कित् ङित् च निमित्ते इकः स्थाने गुण-वृद्धौ न स्तः इति अर्थः। यथा भूयात्।

**भूयात्**

भू-धातोः 'आशिषि लिङ्लोटौ' इति सूत्रेण आशिर्लिङ्लकारे तत्स्थाने 'तिप्तस्झि .....' इत्यादि सूत्रेण प्रथमपुरुषैकवचने तिप्प्रत्यये अनुबन्धलोपे भू ति। तिपः तिङ्शित्सार्वधातुकम् इत्यनेन सार्वधातुकसंज्ञायां, प्राप्ते तं प्रबाध्य 'लिङाशिषि' इति सूत्रेण आर्धधातुकसंज्ञायां, 'यासुट् परस्मैपदेषूदात्तो ङिच्च' इत्यनेन यासुडागमे अनुबन्धलोपे ङित्वात् आद्यवयवे भूयास् ति। 'किदाशिषि' इति सूत्रेण किद्भावात् भू यास् ति इत्यस्य आर्धाधातुकत्वात् सार्वधातुकार्धधातुकयोः इति सूत्रेण ऊकारस्य गुणे प्राप्ते 'ग्क्ङिति च' इति सूत्रेण गुणेनिषेधे भू यास् ति इति जाते 'इतश्च' इति सूत्रेण इकारलोपे भू यास् त्। 'स्कोः संयोगाद्योरन्ते च' इति सूत्रेण सकारस्य लोपे भूयात् इति रूपं सिद्धम्।

**भूयास्ताम्**

भू-धातोः 'आशिषि लिङ्लोटौ इति सूत्रेण आशिर्लिङ्लकारे तत्स्थाने तिप्तस्झि ..... इत्यादि सूत्रेण प्रथमपुरुषद्विवचने तस्प्रत्यये भू तस्। तसः तिङ्शित्सार्वधातुकम् इत्यनेन सार्वधातुकसंज्ञायां, प्राप्ते तं प्रबाध्य लिङाशिषि इति सूत्रेण आर्धधातुकसंज्ञायां, यासुट् परस्मैपदेषूदात्तो ङिच्च' इत्यनेन यासुडागमे अनुबन्धलोपे ङित्वात् आद्यवयवे भू यास् तस्। किदाशिषि इति सूत्रेण किद्भावात् भू यास् तस् इत्यस्य आर्धाधातुकत्वात् 'सार्वधातुकार्धधातुकयोः' इति सूत्रेण ऊकारस्य गुणे प्राप्ते 'ग्क्ङिति च' इति सूत्रेण गुणनिषेधे भू यास् तस् इति जाते 'तस्थस्थमिपां तान्तान्तामः' इति सूत्रेण तसः तामादेशे भू यास् ताम्। संयोगे भूयास्ताम् इति रूपं सिद्धम् ।

**भूयासुः**

भू-धातोः 'आशिषि लिङ्लोटौ' इति सूत्रेण आशिर्लिङ्लकारे तत्स्थाने 'तिप्तस्झि ....'. इत्यादि सूत्रेण प्रथमपुरुषबहुवचने तस्प्रत्यये भू झि। झेः तिङ्शित्सार्वधातुकम् इत्यनेन सार्वधातुकसंज्ञायां, प्राप्ते तं प्रबाध्य 'लिङाशिषि' इति सूत्रेण आर्धधातुकसंज्ञायां, 'यासुट् परस्मैपदेषूदात्तो ङिच्च' इत्यनेन यासुडागमे अनुबन्धलोपे ङित्वात् आद्यवयवे भू यास् झि। 'किदाशिषि' इति सूत्रेण किद्भावात् भू यास् झि इत्यस्य आर्धाधातुकत्वात् 'सार्वधातुकार्धधातुकयोः' इति सूत्रेण ऊकारस्य गुणे प्राप्ते 'ग्क्ङिति च' इति सूत्रेण गुणनिषेधे भू यास् झि इति जाते 'झेर्जुस्' इति सूत्रेण झेः जुसादेशे अनुबन्धलोपे भू यास् उस्। सस्य रुत्वे विसर्गे च भूयासुः इति रूपं सिद्धम् ।

**भूयाः**

भू-धातोः 'आशिषि लिङ्लोटौ" इति सूत्रेण आशिर्लिङ्लकारे तत्स्थाने 'तिप्तस्झि .....' इत्यादि सूत्रेण मध्यमपुरुषैकवचने सिप्प्रत्यये अनुबन्धलोपे भू सि। सिपः 'तिङ्शित्सार्वधातुकम्' इत्यनेन सार्वधातुकसंज्ञायां, प्राप्ते तं प्रबाध्य 'लिङाशिषि' इति सूत्रेण आर्धधातुकसंज्ञायां, 'यासुट् परस्मैपदेषूदात्तो ङिच्च' इत्यनेन यासुडागमे अनुबन्धलोपे ङित्वात् आद्यवयवे भू यास् सि। 'किदाशिषि' इति सूत्रेण किद्भावात् भू यास् सि इत्यस्य आर्धधातुकत्वात् 'सार्वधातुकार्धधातुकयोः' इति सूत्रेण ऊकारस्य गुणे प्राप्ते 'ग्क्ङिति च' इति सूत्रेण गुणनिषेधे भू यास् सि इति जाते 'इतश्च' इति सूत्रेण इकारलोपे भू यास् स्। 'स्कोः संयोगाद्योरन्ते च' इति सूत्रेण सकारस्य लोपे भूयास्, ततः सस्य रुत्वे विसर्गे च भूयाः इति रूपं सिद्धम्।

**भूयास्तम्**

भू-धातोः 'आशिषि लिङ्लोटौ' इति सूत्रेण आशिर्लिङ्लकारे तत्स्थाने 'तिप्तस्झि .....' इत्यादि सूत्रेण मध्यमपुरुषद्विवचने भू थस्। थसः 'तिङ्शित्सार्वधातुकम्' इत्यनेन सार्वधातुकसंज्ञायां, प्राप्ते तं प्रबाध्य 'लिङाशिषि' इति सूत्रेण आर्धधातुकसंज्ञायां, 'यासुट् परस्मैपदेषूदात्तो ङिच्च' इत्यनेन यासुडागमे अनुबन्धलोपे ङित्वात् आद्यवयवे भू यास् थस्। 'किदाशिषि' इति सूत्रेण किद्भावात् भू यास् थस् इत्यस्य आर्धधातुकत्वात् 'सार्वधातुकार्धधातुकयोः' इति सूत्रेण ऊकारस्य गुणे प्राप्ते 'ग्क्ङिति च' इति सूत्रेण गुणनिषेधे भू यास् थस् इति जाते 'तस्थस्थमिपां तान्तान्तामः' इति सूत्रेण थसः तमादेशे भू यास् तम् संयोगे भूयास्तम् इति रूपं सिद्धम्।

**भूयास्त**

भू-धातोः 'आशिषि लिङ्लोटौ' इति सूत्रेण आशिर्लिङ्लकारे तत्स्थाने 'तिप्तस्झि .....' इत्यादि सूत्रेण मध्यमपुरुषबहुवचने थप्रत्यये भू थ। थः 'तिङ्शित्सार्वधातुकम्' इत्यनेन सार्वधातुकसंज्ञायां, प्राप्ते तं प्रबाध्य 'लिङाशिषि' इति सूत्रेण आर्धधातुकसंज्ञायां, 'यासुट् परस्मैपदेषूदात्तो ङिच्च' इत्यनेन यासुडागमे अनुबन्धलोपे ङित्वात् आद्यवयवे भू यास् थ। 'किदाशिषि' इति सूत्रेण किद्भावात् भू यास् थ इत्यस्य आर्धधातुकत्वात् 'सार्वधातुकार्धधातुकयोः' इति सूत्रेण ऊकारस्य गुणे प्राप्ते 'ग्क्ङिति च'

इति सूत्रेण गुणनिषेधे  भू यास् थ इति जाते ‘तस्थस्थमिपां तान्तान्तामः’ इति सूत्रेण थः तादेशे भू यास् त। संयोगे भूयास्त इति रूपं सिद्धम् ।

**भूयासम्**

भू-धातोः 'आशिषि लिङ्लोटौ’ इति सूत्रेण लिङ्लकारे तत्स्थाने ‘तिप्तस्झि .....’ इत्यादि सूत्रेण उत्तमपुरुषैकवचने मिप्प्रत्यये अनुबन्धलोपे भू मि। मिपः ‘तिङ्शित्सार्वधातुकम्’ इत्यनेन सार्वधातुकसंज्ञायां, प्राप्ते तं प्रबाध्य ‘लिङाशिषि’ इति सूत्रेण आर्धधातुकसंज्ञायां, ‘यासुट् परस्मैपदेषूदात्तो ङिच्च' इत्यनेन यासुडागमे अनुबन्धलोपे ङित्वात् आद्यवयवे भू यास् मि। ‘किदाशिषि’ इति सूत्रेण किद्भावात् भू यास् मि इत्यस्य आर्धाधातुकत्वात् ‘सार्वधातुकार्धधातुकयोः’ इति सूत्रेण ऊकारस्य गुणे प्राप्ते ‘ग्क्ङिति च’ इति सूत्रेण गुणनिषेधे  भू यास् मि इति जाते ‘तस्थस्थमिपां तान्तान्तामः’ इति सूत्रेण मिपः अमादेशे भू यास् अम्। संयोगे भूयासम् इति रूपं सिद्धम् ।

**भूयास्व**

भू-धातोः 'आशिषि लिङ्लोटौ’ इति सूत्रेण आशिर्लिङ्लकारे तत्स्थाने ‘तिप्तस्झि .....’ इत्यादि सूत्रेण उत्तमपुरुषद्विवचने वस्प्रत्यये भू वस्। वसः ‘तिङ्शित्सार्वधातुकम्’ इत्यनेन सार्वधातुकसंज्ञायां, तं प्रबाध्य ‘लिङाशिषि’ इति सूत्रेण आर्धधातुकसंज्ञायां, ‘यासुट् परस्मैपदेषूदात्तो ङिच्च' इत्यनेन यासुडागमे अनुबन्धलोपे ङित्वात् आद्यवयवे भू यास् वस्। ‘किदाशिषि’ इति सूत्रेण किद्भावात् भू यास् वस् इत्यस्य आर्धाधातुकत्वात् ‘सार्वधातुकार्धधातुकयोः’ इति सूत्रेण ऊकारस्य गुणे प्राप्ते ‘ग्क्ङिति च’ इति सूत्रेण गुणनिषेधे  भू यास् वस् इति जाते ‘नित्यं ङितः’ इति सूत्रेण सकारस्य लोपे संयोगे भूयास्व इति रूपं सिद्धम् ।

**भूयास्म**

भू-धातोः 'आशिषि लिङ्लोटौ’ इति सूत्रेण आशिर्लिङ्लकारे तत्स्थाने ‘तिप्तस्झि .....’ इत्यादि सूत्रेण उत्तमपुरुषद्विवचने मस्प्रत्यये भू मस्। मसः ‘तिङ्शित्सार्वधातुकम्’ इत्यनेन सार्वधातुकसंज्ञायां, तं प्रबाध्य ‘लिङाशिषि इति सूत्रेण आर्धधातुकसंज्ञायां, ‘यासुट् परस्मैपदेषूदात्तो ङिच्च' इत्यनेन यासुडागमे अनुबन्धलोपे ङित्वात् आद्यवयवे भू यास् मस्। ‘किदाशिषि’ इति सूत्रेण किद्भावात् भू यास् मस् इत्यस्य

आर्धधातुकत्वात् 'सार्वधातुकार्धधातुकयोः' इति सूत्रेण ऊकारस्य गुणे प्राप्ते 'ग्क्ङिति च' इति सूत्रेण गुणनिषेधे भू यास् मस् इति जाते नित्यं ङितः इति सूत्रेण सकारस्य लोपे संयोगे भूयास्म इति रूपं सिद्धम् ।

**भू-धातुः लुङ्लकाररूपाणि**

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| **प्रथमपुरुषः** | अभूत् | अभूताम् | अभूवन् |
| **मध्यमपुरुषः** | अभूः | अभूतम् | अभूत |
| **उत्तमपुरुषः** | अभूवम् | अभूव | अभूम |

**59. लुङ्। (३.२.११०)**

सामान्यभूतकाले लुङ्

लुङ् इति एकं पदं वर्तते। भूतार्थे धातोः लुङ् स्यात् इति सूत्रार्थः। अत्र धातोः 'भूते' प्रत्ययः परश्च इति च अधिक्रियन्ते। लुङ् प्रथमान्तम्। पूर्वम् अनद्यतनभूते लङ् तथा अनद्यतनभूते परोक्षे च लिट् कृतः। सम्प्रति सामान्यभूतकाले धातो लुङ् भवति इति। यथा अभूत्।

**60. माङि लुङ्। (३.३.१७५)**

माङि प्रयुज्यमाने धातोः लुङ्

माङि लुङ् इति पदच्छेदः। सर्वलकारापवादः। माङि इति सप्तम्यन्तं, लुङ् प्रथमान्तम्। माङि प्रयुज्यमाने धातोः लुङ् स्यात् इति सूत्रार्थः। यथा मा भूत्। अत्र अडागमनिषेधस्य।

**61. स्मोत्तरे लङ् च। (३.३.१७६)**

स्मोतरे माङि प्रयुज्यमाने धातोः लङ्लुङ् स्तः

स्मोत्तरे लङ् च इति पदच्छेदः। स्मोत्तरे माङि लङ् स्याच्चाल्लुङ्। स्म-शब्द उत्तरो यस्मात् स्मोत्तरं, तस्मिन् स्मोत्तरे। अत्र माङि लुङ् इत्यतः माङि इति अनुवर्तते। धातोः प्रत्ययः परश्च इति च अधिक्रियते। यथा मा स्मा भूः इति लुङ्। मा स्म भावः इति लङ्।

**62. च्लि लुङि। (३.१.४३)**

लुङ्लकारस्य परे धातोः च्लिप्रत्ययः

च्लि लुङि इति पदच्छेदः। शबाद्यपवादः। च्लिप्रत्ययविधायकसूत्रम्। च्लि इति प्रथमान्तं लुङि सप्तम्यन्तम्। धातोरेकाचो हलादेः क्रियासमभिहारे

यङ् इत्यतः धातोः इति अनुवर्तते। प्रत्ययः परश्च  इत्येतद् द्वयम् अधिकृतम्। लुङ् लकारस्य परे धातोः च्लि प्रत्ययः स्यात् इति अर्थः। च्लि इति प्रत्यये चकारः 'चुटु' इत्यनेन इत्संज्ञा स्यात्। लेः इकारः उच्चारणार्थकः भवति। ततः केवलं ल् एव अवशिष्यते।

### 63. च्लेः सिच् (३.१.४४)

धातोः सिच्

च्लेः सिच्  इति पदच्छेदः। इचावितौ। च्लेः इति षष्ठ्यन्तं , सिच्  इति प्रथमान्तम्। च्लेः  इत्यस्य स्थाने सिच् आदेशः स्यात् इति सूत्रार्थः। सिच् इत्यस्य चकारस्य 'हलन्त्यम्' इत्यनेन तथा इकारस्य 'उपदेशेऽजनुनासिक इत्' इत्यनेन च इत् संज्ञा भवति। 'तस्य लोपः' इत्यनेन इत् इत्यस्य लोपः भवति। ततः केवलं सकार एवं अवशिष्यते। यथा भूधातोः लुङि तिपि अडागमे 'च्लि लुङि'' इति च्लौ अभू च्लि ति। अनेन सिचः लोपप्रसक्तिः।

### 64. गातिस्थाघुपाभूभ्यः सिचः परस्मैपदेषु। (२.४.७७)

सिच् इत्यस्य लोपः

गातिस्थाघुपाभूभ्यः सिचः परस्मैपदेषु इति पदच्छेदः। एभ्यः सिचो लुक् स्यात्। गापाविहेणादेशपिबती गृह्येते इति सूत्रार्थः। गातिश्च स्थाश्च घूश्च पाश्च भूश्च गतिस्थाघुपाभूः, तेभ्यो गतिस्थाघुपाभूभ्यः। इण् धातोः स्थाने गाधातु, स्थाधातु, घुसंज्ञकधातु पाधातु भूधातुभ्यः परे सिच् इत्यस्य लोपः भवति। यथा भूधातोः लुङिप्रत्यये सिचादेशे अनेन सिचः लोपप्रसक्तिः।

### 65. भूसुवोस्तिङि (७.३.८८)

गुणो न

भूसुवोः तिङि इति पदच्छेदः। भूसुवोः सार्वधातुके तिङि परे गुणो न इति सूत्रार्थः। भूश्च सूश्च भूसुवौ, तयोः भूसुवोः। भूसुवोः षष्ठ्न्तं तिङि सप्तम्यन्तम्। अत्र 'मिदेर्गुणः' इत्यतो गुणः इति 'नाभ्यस्तस्याचि पिति सार्वधातुके' इत्यतो नेति सार्वधातुक इति चानुवर्तते। सू इत्यनेन षूङ् प्राणिगर्भाविमोचने इत्यस्यैव ग्रहणम्। भू सु एतयोः धातोः सार्वधातुक तिङि परे इकः गुणः न स्तः इति अर्थः। यथा- अभूत्, अभूताम्, अभूवन्। अभूः, अभूतम्, अभूत। अभूव, अभूव, अभूम।

### अभूत्

भू-धातोः सामान्यभूतकालार्थे 'लुङ्' इति सूत्रेण लुङ्लकारे तत्स्थाने 'तिप्तस्झि .....' इत्यादि सूत्रेण प्रथमपुरुषैकवचने तिप्प्रत्यये अनुबन्धलोपे भू ति। 'लुङ्लङ्लृङ्क्ष्वडुदात्तः' इति सूत्रेण अडागमे अनुबन्धलोपे अ भू ति। तिपः 'तिङ्शित्सार्वधातुकम्' इत्यनेन सार्वधातुकसंज्ञायां, 'कर्तरि

शप्' इति सूत्रेण शप् प्राप्ते तं प्रबाध्य 'च्लि लुङि' इत्यतः च्लिप्रत्यये अनुबन्धलोपे 'च्लेः सिच्' इत्यतः सिचादेशे अनुबन्धलोपे अभू स् ति। सिचः 'आर्धधातुकं शेषः' इत्यतः आर्धधातुकसंज्ञायां 'गातिस्थाघुपाभूभ्यः सिचः परस्मैपदेषु' इति सूत्रेण सकारस्य लोपे अभू ति। 'सार्वधातुकार्धातुकयोः' इत्यतः भू इत्यस्य ऊकारस्य गुणे प्राप्ते 'भूसुवोस्तिङि'' इति सूत्रेण तन्निषेधे अभू ति। 'इतश्च' इति सूत्रेण इकारलोपे अभूत् इति रूपं सिद्धम्।

**अभूताम्**

भू-धातोः सामान्यभूतकालार्थे 'लुङ्' इति सूत्रेण लुङ्लकारे तत्स्थाने 'तिप्तस्झि .....' इत्यादि सूत्रेण प्रथमपुरुषद्विवचने तस्प्रत्यये भू तस्। 'तस्थस्थमिपां तान्तान्तामः' इति सूत्रेण तस् इत्यस्य ताम् अदेशे भू ताम्। 'लुङ्लङ्लृङ्क्ष्वडुदात्तः' इति सूत्रेण अडागमे अनुबन्धलोपे अ भू ताम्। तसः 'तिङ्शित्सार्वधातुकम्' इत्यनेन सार्वधातुकसंज्ञायां, 'कर्तरि शप्' इति सूत्रेण शप् प्राप्ते तं प्रबाध्य 'च्लि लुङि' इत्यतः च्लि प्रत्यये अनुबन्धलोपे 'च्लेः सिच्' इत्यतः सिचादेशे अनुबन्धलोपे अभू स् ताम्। सिचः 'आर्धधातुकं शेषः' इत्यतः आर्धधातुकसंज्ञायां 'गातिस्थाघुपाभूभ्यः सिचः परस्मैपदेषु' इति सूत्रेण सकारस्य लोपे अभू ताम्। 'सार्वधातुकार्धातुकयोः' इत्यतः भू इत्यस्य ऊकारस्य गुणे प्राप्ते 'भूसुवोस्तिङि' इति सूत्रेण तन्निषेधे अभूताम् इति रूपं सिद्धम्।

**अभूवन्**

भू-धातोः सामान्यभूतकालार्थे 'लुङ्' इति सूत्रेण लुङ्लकारे तत्स्थाने 'तिप्तस्झि .....' इत्यादि सूत्रेण प्रथमपुरुषबहुवचने झि प्रत्यये भू झि। 'झोऽन्तः' इति सूत्रेण झेः इत्यस्य अन्तादेशे भू अन्ति। 'लुङ्लङ्लृङ्क्ष्वडुदात्तः' इति सूत्रेण अडागमे अनुबन्धलोपे अ भू अन्ति इति जाते 'भुवो वुग्लुङ्लिटोः' इति सूत्रेण वुगागमे अ भू व् अन्ति। झेः 'तिङ्शित्सार्वधातुकम्' इत्यनेन सार्वधातुकसंज्ञायां, 'कर्तरि शप्' इति सूत्रेण शप्प्राप्ते तं प्रबाध्य 'च्लि लुङि' इति च्लिप्रत्यये 'च्लेः सिच्' इति सिचादेशे अनुबन्धलोपे अभू व् स् अन्ति। सिचः 'आर्धधातुकं शेषः' इत्यतः आर्धधातुकसंज्ञायां 'गातिस्थाघुपाभूभ्यः सिचः परस्मैपदेषु' इति सूत्रेण सकारस्य लोपे अभूव् अन्ति। इकारस्य लोपे 'संयोगान्तस्य लेपः' इति सूत्रेण तकारस्य लोपे अभूवन्।

**अभूः**

भू-धातोः सामान्यभूतकालार्थे 'लुङ्' इति सूत्रेण लुङ्लकारे तत्स्थाने 'तिप्तस्झि .....' इत्यादि सूत्रेण मध्यमपुरुषैकवचने सिप्प्रत्यये अनुबन्धलोपे भू सि। 'लुङ्लङ्लृङ्क्ष्वडुदात्तः' इति सूत्रेण अडागमे अनुबन्धलोपे अ भू सि। सिपः 'तिङ्शित्सार्वधातुकम्' इत्यनेन सार्वधातुकसंज्ञायां, 'कर्तरि शप्' इति सूत्रेण शप्प्राप्तौ तं प्रबाध्य 'च्लि लुङि' इति च्लि प्रत्यये 'च्लेः सिच्' इति सिचादेशे अनुबन्धलोपे अभू स् सि। सिचः 'आर्धधातुकं शेषः' इत्यतः आर्धधातुकसंज्ञायां 'गातिस्थाघुपाभूभ्यः सिचः परस्मैपदेषु' इति सूत्रेण सकारस्य लोपे अभू सि। 'सार्वधातुकार्धातुकयोः' इत्यतः भू इत्यस्य ऊकारस्य गुणे 'भूसुवोस्तिङि' इति सूत्रेण तन्निषेधे अभू सि। 'इतश्च' इति सूत्रेण इकारलोपे अभूस्। ततः सकारस्य रुत्वे विसर्गे च अभूः इति रूपं सिद्धम् ।

**अभूतम्**

भू-धातोः सामान्यभूतकालार्थे 'लुङ्' इति सूत्रेण लुङ्लकारे तत्स्थाने 'तिप्तस्झि .....' इत्यादि सूत्रेण मध्यमपुरुषद्विवचने थस् प्रत्यये भू थस्। 'तस्थस्थमिपां तान्तान्तामः' इति सूत्रेण तस् इत्यस्य तम् आदेशे भू तम्। 'लुङ्लङ्लृङ्क्ष्वडुदात्तः' इति सूत्रेण अडागमे अनुबन्धलोपे अ भू तम्। थसः 'तिङ्शित्सार्वधातुकम्' इत्यनेन सार्वधातुकसंज्ञायां, 'कर्तरि शप्'' इति सूत्रेण शप्प्राप्तै तं प्रबाध्य 'च्लि लुङि' इति च्लिप्रत्यये 'च्लेः सिच्' इति सिचादेशे अनुबन्धलोपे अभू स् तम् । सिचः 'आर्धधातुकं शेषः' इत्यतः आर्धधातुकसंज्ञायां 'गातिस्थाघुपाभूभ्यः सिचः परस्मैपदेषु' इति सूत्रेण सकारस्य लोपे अभू तम्। 'सार्वधातुकार्धातुकयोः इत्यतः भू इत्यस्य उकारस्य गुणे 'भूसुवोस्तिङि' इति सूत्रेण तन्निषेधे अभूतम् इति रूपं सिद्धम् ।

**अभूत**

भू-धातोः सामान्यभूतकालार्थे 'लुङ्' इति सूत्रेण लुङ्लकारे 'तिप्तस्झि .....' इत्यादि सूत्रेण मध्यमपुरुषबहुवचने थप्रत्यये भू थ। "तस्थस्थमिपां तान्तान्तामः' इति सूत्रेण थ इत्यस्य तादेशे भू त। 'लुङ्लङ्लृङ्क्ष्वडुदात्तः' इति सूत्रेण अडागमे अनुबन्धलोपे अ भू त। थसः 'तिङ्शित्सार्वधातुकम्' इत्यनेन सार्वधातुकसंज्ञायां, कर्तरि शप्' इति सूत्रेण शप्प्राप्तौ तं प्रबाध्य 'च्लि लुङि' इति च्लिप्रत्यये 'च्लेः सिच्' इति सिचादेशे अनुबन्धलोपे अभू स् त। सिचः 'आर्धधातुकं शेषः' इत्यतः

आर्धधातुकसंज्ञायां 'गातिस्थाघुपाभूभ्यः सिचः परस्मैपदेषु इति सूत्रेण सकारस्य लोपे अभू त। 'सार्वधातुकार्धातुकयोः' इत्यतः भू इत्यस्य ऊकारस्य गुणे 'भूसुवोस्तिङि' इति सूत्रेण तन्निषेधे अभूत इति रूपं सिद्धम्।

**अभूवम्**

भू-धातोः सामान्यभूतकालार्थे 'लुङ्' इति सूत्रेण लुङ्लकारे 'तिप्तस्झि ..... इत्यादि सूत्रेण उत्तमपुरुषैकवचने मिप्प्रत्यये अनुबन्धलोपे भू मि। 'तस्थस्थमिपां तान्तान्तामः' इति सूत्रेण मिपः अमादेशे भू अम्। 'लुङ्लङ्लृङ्क्ष्वडुदात्तः' इति सूत्रेण अडागमे अनुबन्धलोपे अ भू अम् इति जाते 'भुवो वुग्लुङ्लिटोः' इति सूत्रेण वुगागमे अ भू व् अम्। मिपः 'तिङ्शित्सार्वधातुकम्' इत्यनेन सार्वधातुकसंज्ञायां, 'कर्तरि शप्' इति सूत्रेण शप्प्राप्तौ तं प्रबाध्य 'च्लि लुङि' इति च्लिप्रत्यये 'च्लेः सिच्' इति सिचादेशे अनुबन्धलोपे अभूव् स् अम्। सिचः 'आर्धधातुकं शेषः' इत्यतः आर्धधातुकसंज्ञायां 'गातिस्थाघुपाभूभ्यः सिचः परस्मैपदेषु' इति सूत्रेण सकारस्य लोपे अभू व् अम्। 'सार्वधातुकार्धातुकयोः' इत्यतः भू इत्यस्य ऊकारस्य गुणे प्राप्तौ 'भूसुवोस्तिङि' इति सूत्रेण तन्निषेधे अभूवम् इति रूपं सिद्धम्।

**अभूव**

भू-धातोः सामान्यभूतकालार्थे 'लुङ्' इति सूत्रेण लुङ्लकारे तत्स्थाने 'तिप्तस्झि .....' इत्यादि सूत्रेण उत्तमपुरुषद्विवचने वस् प्रत्यये भू वस्। 'लुङ्लङ्लृङ्क्ष्वडुदात्तः' इति सूत्रेण अडागमे अनुबन्धलोपे अ भू वस्। वसः 'तिङ्शित्सार्वधातुकम्' इत्यनेन सार्वधातुकसंज्ञायां, 'कर्तरि शप्' इति सूत्रेण शप्प्राप्तै तं प्रबाध्य 'च्लि लुङि' इति च्लिप्रत्यये 'च्लेः सिच्' इत्यतः सिचादेशे अनुबन्धलोपे अभू स् वस्। सिचः 'आर्धधातुकं शेषः' इत्यतः आर्धधातुकसंज्ञायां 'गातिस्थाघुपाभूभ्यः सिचः परस्मैपदेषु' इति सूत्रेण सकारस्य लोपे अभू वस्। सार्वधातुकार्धातुकयोः इत्यतः भू इत्यस्य ऊकारस्य गुणे प्राप्तौ भूसुवोस्तिङि इति सूत्रेण तन्निषेधे अभूवस्। ततः नित्यं ङितः इति सूत्रेण वसः सकारस्य लोपे अभूव इति रूपं सिद्धम् ।

**अभूम**

भू-धातोः सामान्यभूतकालार्थे 'लुङ् इति सूत्रेण लुङ्लकारे तत्स्थाने तिप्तस्झि ..... इत्यादि सूत्रेण उत्तमपुरुषबहुवचने मस्प्रत्यये भू मस्।

‘लुङ्लङ्लृङ्क्ष्वडुदात्तः’ इति सूत्रेण अडागमे अनुबन्धलोपे अ भू मस्। मसः ‘तिङ्शित्सार्वधातुकम्’ इत्यनेन सार्वधातुकसंज्ञायां, ‘कर्तरि शप्’ इति सूत्रेण शप्प्राप्तौ तं प्रबाध्य ‘च्लि लुङि’ इति च्लिप्रत्यये सिच् इत्यतः सिचादेशे अनुबन्धलोपे अभू स् मस्। सिचः ‘आर्धधातुकं शेषः’ इत्यतः आर्धधातुक- संज्ञायां ’गातिस्थाघुपाभूभ्यः सिचः परस्मैपदेषु’ इति सूत्रेण सकारस्य लोपे अभू मस्। ‘सार्वधातुकार्धातुकयोः’ इत्यतः भू इत्यस्य ऊकारस्य गुणे प्राप्तौ ‘भूसुवोस्तिङि’ इति सूत्रेण तन्निषेधे अभूमस्। ततः ‘नित्यं ङितः’ इति सूत्रेण मसः सकारस्य लोपे अभूम इति रूपं सिद्धम् ।

### 66. न माङ्योगे। (६.४.७४)

माङ्योगे अडाटौ न स्तः

न, माङ्योगे इति पदच्छेदः। अडाटौ न स्तः इति सूत्रार्थः। मा भवान् भूत्। मा स्म भवत्। मा स्म भूत्। न अव्ययपदं, माङ्-योगः। अत्र ‘लुङ्लङ्लृङ्क्ष्वडुदात्तः’ इत्यतः अट् 'आडजादीनाम्’ इत्यतः च आट् इति च अनुवर्तते। माङ- योगाव्ययस्य अट्-आटौ न स्तः इति अर्थः। मा भवान् भूत्। मास्म भवत्। मा स्म भूत्।मा भवान् भूत्। माङ् इत्यस्य ङकारस्य इत्संज्ञायां लोपे मा एव अवशिष्यते।

**भू-धातुः लृङ्लकाररूपाणि**

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| **प्रथमपुरुषः** | अभविष्यत् | अभविष्यताम् | अभविष्यन् |
| **मध्यमपुरुषः** | अभविष्यः | अभविष्यतम् | अभविष्यत |
| **उत्तमपुरुषः** | अभविष्यम् | अभविष्याम | अभविष्याम |

### 67. लिङ्निमित्ते लृङ् क्रियातिपत्तौ (३.३.१३९)

भविष्यत्यर्थे लृङ्

लिङ्निमित्ते लृङ् क्रियातिपत्तौ इति पदच्छेदः। हेतुहेतुमद्भावादिलिङ्निमित्तं तत्र भविष्यत्यर्थे लृङ् स्यात् क्रियायां अनिष्पत्तौ गम्यमानायाम्। क्रियायाः अतिपत्ति क्रियातिपत्तिः, तस्याम् क्रियातिपत्तौ षष्ठी तत्पुरुषः। लिङ्निमित्ते सप्तम्यन्तं, लृङ् प्रथमान्तं, क्रियातिपत्तौ सप्तम्यन्तं च। मर्यादावचनेऽवरस्मिन्' इत्यतो भविष्यतीत्यनुवर्तते। यथा- अभविष्यत् अभविष्यताम् अभविष्यन्। अभविष्यः अभविष्यतम् अभविष्यत। अभविष्यम् अभविष्याव

अभविष्याम। सुवृष्टिश्चेदभविष्यत्तदा सुभिक्षमभविष्यत् इत्यादि ज्ञेयम्। यथा अभविष्यत्

**अभविष्यत् –**

भू-र्धातोः हेतुहेतुमद्भावक्रियायाः अनिष्पत्तौ च भविष्यकाले 'लिङ्निमित्ते लृङ् क्रियातिपत्तौ' इति लृङ्लकारे तत्स्थाने 'तिप्तस्झि …….' इत्यादि सूत्रेण प्रथमपुरुषैकवचने तिप्प्रत्यये 'लुङ्लङ्लृङ्क्ष्वडुदात्तः' इति सूत्रेण अडागमे अनुबन्धलोपे अ भू ति। तिपः 'तिङ्शित्सार्वधातुकम्' इत्यनेन सार्वधातुकसंज्ञायां, 'कर्तरि शप्' इति सूत्रेण शप्प्राप्तौ तं प्रबाध्य 'स्यतासी लृलुटोः' इति सूत्रेण स्यादेशे, 'आर्धधातुकं शेषः' इति आर्धधातुकत्वे 'आर्धधातुकस्येड् वलादेः' इति इडागमे अ भू इ स्य ति इति जाते 'सार्वधातुकार्धधातुकयोः' इति गुणे अवादेशे संयोगे अभवि स्य ति। ततः 'आदेशप्रत्यययोः' इति सूत्रेण षत्वे अभविष्यति इति स्थिते 'इतश्च' इति सूत्रेण अभविष्यत् इति रूपं सिद्धम्।

**अभविष्यताम्–**

भू-र्धातोः हेतुहेतुमद्भावक्रियायाः अनिष्पत्तौ च भविष्यकाले 'लिङ्निमित्ते लृङ् क्रियातिपत्तौ' इति लृङ्लकारे तत्स्थाने 'तिप्तस्झि …….' इत्यादि सूत्रेण प्रथमपुरुषद्विवचने तस्प्रत्यये 'लुङ्लङ्लृङ्क्ष्वडुदात्तः' इति सूत्रेण अडागमे अनुबन्धलोपे अ भू तस्। 'तस्थस्थमिपां तान्तान्तामः' इति सूत्रेण तस् इत्यस्य ताम् आदेशे अ भू ताम्। तसः 'तिङ्शित्सार्वधातुकम्' इत्यनेन सार्वधातुकसंज्ञायां, 'कर्तरि शप्' इति सूत्रेण शप्प्राप्तौ तं प्रबाध्य 'स्यतासी लृलुटोः' इति सूत्रेण स्यादेशे, 'आर्धधातुकं शेषः' इति आर्धधातुकत्वे 'आर्धधातुकस्येड् वलादेः' इति इडागमे अ भू इ स्य ताम् इति जाते 'सार्वधातुकार्धधातुकयोः इति गुणे अवादेशे संयोगे अभवि स्य ताम्। ततः 'आदेशप्रत्यययोः' इति सूत्रेण षत्वे अभविष्यताम् इति रूपं सिद्धम्।

**अभविष्यन् –**

भू-र्धातोः हेतुहेतुमद्भावक्रियायाः अनिष्पत्तौ च भविष्यकाले 'लिङ्निमित्ते लृङ् क्रियातिपत्तौ' इति लृङ्लकारे तत्स्थाने 'तिप्तस्झि ……'. इत्यादि सूत्रेण प्रथमपुरुषबहुवचने झिप्रत्यये 'लुङ्लङ्लृङ्क्ष्वडुदात्तः' इति सूत्रेण अडागमे अनुबन्धलोपे अ भू झि। 'झोऽन्तः' इति अन्तादेशे, 'तिङ्शित्सार्वधातुकम्' इत्यनेन सार्वधातुकसंज्ञायां, 'कर्तरि शप्' इति

सूत्रेण शप्प्राप्तौ तं प्रबाध्य 'स्यतासी लृलुटोः' इति सूत्रेण स्यादेशे, 'आर्धधातुकं शेषः' इति आर्धधातुकत्वे 'आर्धधातुकस्येड् वलादेः' इति इडागमे अ भू इ स्य अन्ति इति जाते 'सार्वधातुकार्धधातुकयोः' इति गुणे अवादेशे संयोगे अभवि स्य अन्ति। पररूपे 'आदेशप्रत्यययोः' इति सूत्रेण षत्वे अभविष्यन्ति इति जाते 'स्कोः संयोगाद्योरन्ते च' इति सूत्रेण तकारलोपे 'इतश्च' इति इकारलोपे अभविष्यन् इति रूपं सिद्धम्।

**अभविष्यः -**

भूधातोः लृङिः सिपि स्ये अटि इटि गुणेऽवादेशे 'इतश्च' इतीकारलोपे षत्वे रुत्वे विसर्गे च अभविष्यः।

**अभविष्यतम्-**

भूधातोर्लृङः थसि तस्य तमादेशे स्ये अटि गुणेऽवादेशे षत्वे अभविष्यतम्।

**अभविष्यम्-**

भूधातोः लृङः मिपि मिपोऽमादेशे स्ये अटि इटि गुणेऽवादेशे 'अमि पूर्वः' इति पूर्वरूपे षत्वं अभविष्यम्।

**अभविष्याव-**

भू धातोर्लृङ् वसि स्ये अटि इटि गुणेऽवादेशे 'अतो दीर्घो यञि' इति दीर्घ 'नित्यं ङितः' इति सलोपे 'आदेशप्रत्यययोः' इति षत्वे अभविष्याव।

**अभविष्याम-**

भू धातोर्लृङ् मसि स्ये अटि इटि गुणेऽवादेशे 'अतो दीर्घो यञि' इति दीर्घ 'नित्यं ङितः' इति सलोपे 'आदेशप्रत्यययोः' इति षत्वे अभविष्याम।

## 2.1.2 एध् – धातुः

**आत्मनपदिनप्रत्ययाः**

| **पुरुषः** | **एकवचनं** | **द्विवचनं** | **बहुवचनं** |
|---|---|---|---|
| **प्रथमपुरुषः** | त | आताम् | झ |

| | | | |
|---|---|---|---|
| **मध्यमपुरुषः** | थास् | आताम् | ध्वम् |
| **उत्तमपुरुषः** | इट् | वहिङ् | महिङ् |

**एध् धातोः लट् लकारः**

| | **एकवचनं** | **द्विवचनं** | **बहुवचनं** |
|---|---|---|---|
| **प्रथमपुरुषः** | एधते | एधेते | एधन्ते |
| **मध्यमपुरुष** | एधसे | एधेथे | एधध्वे |
| **उत्तमपुरुषः** | एधे | एधावहे | एधामहे |

**68. टित आत्मनेपदानां टेरे। (३.४.७९)**

टितः एत्वम्

टितः आत्मनेपदानाम् टेः ए इति पदच्छेदः। टितो लस्यात्मनेपदानां टेरेत्वम्। टितः षष्ठ्यन्तं, आत्मनेपदानां षष्ठ्यन्तं, टेः षष्ठ्यन्तं, ए लुप्तप्रथमान्तम्। अत्र 'लस्य' इति अधिकृतम्। टितः इति तद्विशेषणम्। टितः लकारस्य आत्मनेपदानां प्रत्ययानां स्थाने एकारादेशः स्यात् इति अर्थः। यथा-एधते।

**एधते**

एध् धातोः लट्लकारे तत्स्थाने 'तिप्तस्झि ....' इत्यादि सूत्रेण आत्मनेपदे प्रथमपुरुषैकवचने तप्रत्यये 'तिङ्शित्सार्वधातुकम्' इति सार्वधातुकत्वात् 'कर्तरि शप्' इति शप्प्रत्यये अनुबन्धलोपे एध् अ त। तकारोत्तरवर्त्तिनः अन्त्यस्य अचः अकारस्य 'अचोऽन्त्यादि टि' इति टिसंज्ञायां 'टित आत्मनेपदानां टेरे' इति एत्वे एधते इति रूपं सिद्धम्।

**69. आतो ङितः। (७.२.८१)**

आकारस्य इय्

द्विपदं सूत्रम्। अनेन सूत्रेण आकारस्य इय् विधीयते। अतः परस्य ङितामकारस्य इय् स्यात्। यथा एधेते।

**एधेते**

एध्-धातोः लट्लकारे तत्स्थाने 'तिप्तस्झि ...'. इत्यादि सूत्रेण आत्मनेपदे प्रथमपुरुषद्विवचने आताम्प्रत्यये 'तिङ्शित्सा- र्वधातुकम्' इति सार्वधातुकत्वात् 'कर्तरि शप्' इति शप्प्रत्यये अनुबन्धलोपे एध् अ

आताम्। सार्वधातुकत्वे 'सार्वधातुकमपित्' इति सूत्रेण ङित्वे, 'आतो ङितः' इत्यतः आकरात् परस्य इयादेशे एध् अ इय् ताम्। 'लोपो व्योर्वलि' इति सूत्रेण सलोपे एध् अ इ ताम्। 'आद्गुणः' इति गुणे, टित्वे 'टित आत्मनेपदानां टेरे' इति टिसंज्ञकस्य एत्वे एधेते सिद्धिः।

**एधन्ते**

एध-धातोः लट्लकारे तत्स्थाने 'तिप्तस्झि ....' इत्यादि सूत्रेण आत्मनेपदे प्रथमपुरुषबहुवचने झप्रत्यये 'तिङ्शित्सार्वधातुकम्' इति सार्वधातुकत्वात् 'कर्तरि शप्' इति शप्प्रत्यये अनुबन्धलोपे एध् अ झ। 'झोऽन्तः' इति सूत्रेण झस्य अन्तादेशे अनुबन्धलोपे एध् अ अन्त। 'अतो गुणे' इति पररूपे, एध् अन्त। 'टित आत्मनेपदानां टेरे' इति एत्वे एधन्ते इति रूपम्।

**70. थासः से। (३.४.८०)**

थासः से

द्विपदं सूत्रम्। अनेन सूत्रेण थासः से विधीयते। टितो लस्य थासः से स्यात्।

**एधसे**

एध् धातोः लट्लकारे तत्स्थाने 'तिप्तस्झि ....' इत्यादि सूत्रेण आत्मनेपदे मध्यमपुरुषैकवचने थास्प्रत्यये एध् थास्। 'तिङ्शित्सार्वधातुकम्' इति सार्वधातुकत्वात् 'कर्तरि शप्' इति शप्प्रत्यये अनुबन्धलोपे एध् अ थास्। 'थासः से' इति सूत्रेण थासः से आदेशे संयोगे एधसे इति रूपम्।

**एधेथे**

एध्-धातोः लट्लकारे तत्स्थाने 'तिप्तस्झि ....' इत्यादि सूत्रेण आत्मनेपदे मध्यमपुरुषद्विवचने आथाम्प्रत्यये 'तिङ्शित्सार्वधातुकम्' इति सार्वधातुकत्वात् 'कर्तरि शप्' इति शप्प्रत्यये अनुबन्धलोपे एध् अ आथाम्। सार्वधातुकत्वे 'सार्वधातुकमपित्' इति सूत्रेण ङित्वे, 'आतो ङितः' इत्यतः अकरात् परस्य इयादेशे एध् अ इय् थाम्। 'लोपो व्योर्वलि' इति सूत्रेण सलोपे एध् अ इ थाम्। 'आद्गुणः' इति गुणे, टित्वे 'टित आत्मनेपदानां टेरे' इति टिसंज्ञकस्य एत्वे एधेथे सिद्धिः ।

**एधध्वे**

एध्धातोः लट्लकारे तत्स्थाने 'तिप्तस्झि ....' इत्यादि सूत्रेण आत्मनेपदे मध्यमपुरुषबहुवचने ध्वम्प्रत्यये 'तिङ्शित्सार्वधातुकम्' इति सार्वधातुकत्वात् 'कर्तरि शप्' इति शप्प्रत्यये अनुबन्धलोपे एध् अ ध्वम्। ध्वम् इत्यत्र अमः टिसंज्ञायां 'टित आत्मनेपदानां टेरे' इति एत्वे एधध्वे इति रूपं सिद्धम्।

**एधे**

एध्धातोः लट्लकारे तत्स्थाने 'तिप्तस्झि ....' इत्यादि सूत्रेण आत्मनेपदे उत्तमपुरुषैकवचने इट्प्रत्यये अनुबन्धलोपे 'तिङ्शित्सार्वधातुकम्' इति सार्वधातुकत्वात् 'कर्तरि शप्' इति शप्प्रत्यये अनुबन्धलोपे एध् अ इ इति जाते टिसंज्ञायां 'टित आत्मनेपदानां टेरे' इति एत्वे एध् अ ए। 'अतो गुणे' इत्यतः पररूपमेकादेशे एधे इति रूपं सिद्धम्।

**एधावहे**

एध्धातोः लट्लकारे तत्स्थाने 'तिप्तस्झि ....' इत्यादि सूत्रेण आत्मनेपदे उत्तमपुरुषे द्विवचने वहिङ्प्रत्यये अनुबन्धलोपे एध् वहि। 'तिङ्शित्सार्वधातुकम्' इति सार्वधातुकत्वात् 'कर्तरि शप्' इति शप्प्रत्यये अनुबन्धलोपे एध् अ वहि इति जाते टिसंज्ञायां 'टित आत्मनेपदानां टेरे' इति एत्वे एध् अ वहे। 'अतो दीर्घो यञि' इत्यनेन दीर्घे एधावहे इति रूपं सिद्धम्।

**एधामहे**

एध्धातोः लट्लकारे तत्स्थाने 'तिप्तस्झि ....' इत्यादि सूत्रेण आत्मनेपदे उत्तमपुरुषे बहुवचने महिङ् प्रत्यये अनुबन्धलोपे एध् महि। 'तिङ्शित्सार्वधातुकम्' इति सार्वधातुकत्वात् 'कर्तरि शप्' इति शप्प्रत्यये अनुबन्धलोपे एध् अ महि इति जाते टिसंज्ञायां 'टित आत्मनेपदाना टेरे' इति एत्वे एध् अ महे। 'अतो दीर्घो यञि' इत्यनेन दीर्घे एधामहे इति रूपं सिद्धम्।

**लिट् लकारः कृ इत्यस्य अनुप्रयोगः**

| | एकवचनं | द्विवचनं | बहुवचनं |
|---|---|---|---|
| **प्रथमपुरुषः** | एधाञ्चक्रे | एधाञ्चाक्राते | एधाञ्चक्रिरे |
| **मध्यमपुरुषः** | एधाञ्चकृषे | एधाञ्चक्राथे | एधाञ्चकृढ्वे |

| | | | |
|---|---|---|---|
| **उत्तमपुरुषः** | एधाञ्चक्रे | एधाञ्चकृवहे | एधाञ्चकृमहे |

**लिट् लकारः भू इत्यस्य अनुप्रयोगः**

| | **एकवचनं** | **द्विवचनं** | **बहुवचनं** |
|---|---|---|---|
| **प्रथमपुरुषः** | एधाम्बभूव | एधाम्बभूवतुः | एधाम्बभुवुः |
| **मध्यमपुरुषः** | एधाम्बभूविथ | एधाम्बभूवथुः | एधाम्बभुव |
| **उत्तमपुरुषः** | एधाम्बभूव | एधाम्बभूविव | एधाम्बभूविम |

**लिट् लकारः अस् इत्यस्य अनुप्रयोगः**

| | **एकवचनं** | **द्विवचनं** | **बहुवचनं** |
|---|---|---|---|
| **प्रथमपुरुषः** | एधामास | एधामासतुः | एधामासुः |
| **मध्यमपुरुषः** | एधामासिथ | एधामासथुः | एधामास |
| **उत्तमपुरुषः** | एधामास | एधामासिव | एधामासिम |

**71. आम्प्रत्ययवत्कृञोऽनुप्रयोगस्य। (१.३.६३)**

आत्मनेपदम्

आम्प्रत्ययवत् कृञः अनुप्रयोगस्य इति पदच्छेदः। आम्प्रत्ययो यस्मादित्यतद्गुणसंविज्ञानो बहुव्रीहिः। आम्प्रकृत्या तुल्यमनुप्रयुज्यमानात् कृञोऽप्यात्मनेपदम्। आम्प्रत्ययेन तुल्यं आम्प्रत्ययवत्। आम्प्रत्ययवत् अव्ययपदं, कृञः षष्ठ्यन्तं, अनुप्रयोगस्य षष्ठ्यन्तं च भवति। अत्र 'अनुदात्तङित आत्मनेपदम्' इत्यतः आत्मनेपदम् इति पदम् अनुवर्तते। अनुप्रयुज्यते इति अनुप्रयोगः। यथा एधाञ्चक्रे। एध्धातोः आमि, आमः लुकि कृञ् चानुप्रयुज्यते। अत्रत्यस्य कृञः आत्मनेपदत्वमनेन सूत्रेण विधीयते।

**72. लिटस्तझयोरेशिरेच्।(३.४.८१)**

लिटः तझयोः स्थाने एश् इरेच्

लिटः तझयोः एशिरेच् इति पदच्छेदः। लिडादेशयोः झयोरेशिरेजेतौ स्तः। तश्च झश्च तझौ तयोः तझयोः। लिटः षष्ठ्यन्तं, तझयोः षष्ठ्यन्तं एशिरेच् प्रथमान्तं। लिट् लकारादेशयोः तझयोः स्थाने क्रमात् एश् इरेच् एतौ स्तः इति अर्थः। यथासंख्य परिभाषया तकारस्य एश् झकारस्य

इरेच् च भवति। यथा- एधाञ्चक्रे एधाञ्चक्राते। एधाञ्चक्रिरे। एधाञ्चकृषे। एधाञ्चक्राथे।

**एधाञ्चक्रे -**

एधधातोर्लिटि 'इजादेव गुरुमतोऽनृच्छः' इत्यामि 'आमः' इति लिटो लुकि 'कृञ्चानुप्रयुज्यते लिटि' इति लिट्परकृप्रयोगे परगामिनि क्रियाफले कृञः परस्मैपदे प्राप्ते 'आम्प्रयवत्कृञोऽनुप्रयोगस्य' इति आत्मनेपदत्वात् तप्रत्यये 'लिटस्तझयोरेशिरेच्' इति तस्येशादेशेऽनुबन्धलोपे 'असंयोगाल्लिट् कित्, इति कित्त्वाद् गुणाभावे द्वित्वात्परत्वाद्यणि प्राप्ते 'द्विर्वचनेचि इति तन्निषेधे द्वित्वेऽभ्यासकार्ये अनुस्वारे परसवर्णे यणि एधाञ्चक्रे इति सिद्धम् ।

**एधाञ्चक्राते -**

एधधातोः लिटि आमि आमः इति लिटो लुकि कृञः अनुप्रयोगे तस्य आत्मनेपदत्वे प्रथमापुरुषद्विवचनप्रत्यये आतामि एधाम् कृ आताम्। कृइत्यस्य द्वित्वे 'हलादिः शेषः' इति हलादिशेषे च एधाम् क कृ आताम्। कुत्वे एधाम् चकृ आताम्। अनुस्वारे परसवर्णे 'इकोयणचि' इति यणि सवर्णदीर्घे एधाञ्चक्राताम्। टेरेत्वे एधाञ्चक्राते। एवं एधाञ्चक्रिरे।

**एधाञ्चकृषे -**

एधधातोः लिटि आमि लिटो लुकि कृञ्चानुप्रयुज्यते लिटि एध् आम् कृ लिट्। आत्मनेपदे मध्यपुरुषैकवचने थासि द्वित्वे उरत् इत्यत्वे रपरत्वे च एधाम् क कृ थास्। 'थासः से' आदेशे कुत्वे 'मोऽनुस्वारः' इत्यनुस्वारे एधां च कृ से। परसवर्णे षत्वे च एधाञ्चकृषे। एवं एधाञ्चक्राथे।

**73. इणः षीध्वं लुङ्लिटां धोऽङ्गात् (८.३.७८)**

धस्य ढः

इणः षीध्वं लुङ्लिटाम् धः अङ्गात् इति पदच्छेदः। इणन्तादङ्गात्परेषां षीध्वंलुङ्लिटां धस्य ढः स्यात् इति सूत्रार्थः। षीध्वं च लुङ् च लिट् च इत्येतेषाम्। इणः पञ्चम्यन्तम्। षीध्वं लुङ्लिटाम् षष्ठ्यन्तम्। धः इति षष्ठ्येकवचनम्। इण इत्यङ्गविशेषणम् तदन्तविधिः। अपदान्तस्य मूर्धन्यः इत्यतः मूर्धन्यः अधिक्रियते। इणन्तादङ्गात् परेषां षीध्वं, लुङ्लिटां लकाराभ्यां धकारस्य स्थाने मूर्धन्यादेशः भवति अर्थात् ढकारादेशः भवति इति अर्थः। यथा- एधाञ्चकृढ्वे। एधाञ्चक्रे,

एधाञ्चकृवहे, एधाञ्चकृमहे, एधाम्बभूव, एधामास, एधिता, एधितारौ, एधितारः, एधितासे, एधितासाथे ।

**एधाञ्चकृढ्वे।**

एध् धातोलिटि 'इजादेश्च गुरुमतोऽनृच्छः' इत्यामप्रत्यये 'आम' इति लिटो लुकि कृञ्चानुप्रयुज्यते लिटि' इति लिट्परकृञोऽनुप्रयोगे लिटो मध्यमपुरुषबहुवचने ध्वमि' द्वित्वेऽभ्यासकार्ये 'टित आत्मनेपदानां टेरे' इति ढेरेत्वे 'इणः षीध्वलुङ्लिटां 'धोऽङ्गात्' इति धस्य ढत्वे अनुस्वारे परसवर्णे च कृते एधाञ्चकृढ्वे। एवं एधाञ्चक्रे, एधाञ्चकृवहे, एधाञ्चकृमहे,

लिट्लकारस्य अस् इत्यस्य अनुप्रयोगस्य रूपाणि स्वाभावतः परस्मैपदानुसारं भवति। एधाम्बभूव, एधामास इति लिटिरूपे।

**एध् धातोः लुट् लकाररूपाणि**

| | **एकवचनं** | **द्विवचनं** | **बहुवचनं** |
|---|---|---|---|
| **प्रथमपुरुषः** | एधिता | एधितारौ | एधितारः |
| **मध्यमपुरुषः** | एधितासे | एधितासाथे | एधिताध्वे |
| **उत्तमपुरुषः** | एधिताहे | एधितास्वहे | एधितास्महे |

**74. धि च। (८.२.२५)**

धादौ प्रत्यये परे सस्य लोपः

द्विपदं सूत्रम्। अनेन सूत्रेण सस्य लोपः विधीयते। धादौ प्रत्यये परे सस्य लोपः स्यात्।

**एधिताध्वे**

एध् धातोर्लुटो मध्यमपुरुषबहुवचने ध्वमि टेरेत्वे तास्प्रत्यये तस्यार्धधातुकत्वादिटि च 'धि च' इति तासः सस्य लोपे एधिताध्वे।

**75. ह एति (७.४.५२)**

सस्य हः

द्विपदं सूत्रम्। अनेन सूत्रेण सस्य हः विधीयते। तासस्त्योः सस्य स्यादेति परे। यथा एधिताहे। एधितास्वहे, एधितास्महे। एधिष्यते, एधिष्येते, एधिष्यन्ते, एधिष्यसे, एधिष्येथे, एधिष्यध्वे, एधिष्ये, एधिष्यावहे, एधिष्यामहे।

**एधिताहे**

एध् धातोर्लुटो उत्तमपुरुषैकवचने 'टित आत्मनेपदानां टेरे' इति इट एत्वे कृते तास्प्रत्यये तस्यार्धधातुकत्वादिटि 'ह एति' इति सस्य हकारे एधिताहे इति।

**एध् धातोः लृट्लकाररूपाणि**

| | **एकवचनं** | **द्विवचनं** | **बहुवचनं** |
|---|---|---|---|
| **प्रथमपुरषः** | एधिष्यते | एधिष्येते | एधिष्यन्ते |
| **मध्यमपुरुषः** | एधिष्यसे | एधिष्येते | एधिष्यन्ते |
| **उत्तमपुरुषः** | एधिष्ये | एधिष्यावहे | एधिष्यामहे |

**एध् धातोः लोट्लकाररूपाणि**

| | **एकवचनं** | **द्विवचनं** | **बहुवचनं** |
|---|---|---|---|
| **प्रथमपुरुषः** | एधताम् | एधेताम् | एधन्ताम् |
| **मध्यमपुरुषः** | एधस्व | एधेथाम् | एधध्वम् |
| **उत्तमपुरुषः** | एधै | एधावहै | एधामहै |

**76. आमेतः। (३.४.९०)**

एकारस्य आम्

आम् एतः इति पदच्छेदः। लोट एकारस्याम् स्यात् इति सूत्रार्थः। एधताम् एधेताम् एधन्ताम्। लोटो लङ्वत् इत्यतः लोटः इति अनुवर्तते। लोटः लकारस्य एकारस्य स्थाने आमादेशः भवति इति अर्थः। यथा- एधताम्,एधेताम्,एधन्ताम्।

**एधताम्**

एध् धातोर्लोटः प्रथमपुरुषैकवचने तप्रत्यये टेरेत्वे शपि 'आमेतः' इत्यामि एधताम् इति।

**एधेताम्**

एध्धातोः लोटः प्रथमपुरुषद्विवचने आतामि टेरेत्वे शपि 'सार्वधातुकमपित्' इति "ङित्त्वात् 'आतो ङितः' इत्याकारस्य इयादेशे गुणे 'लोपोव्योर्वलि' इति यलोपे 'आमेतः' इति एकारस्य आमि एधेताम्।

**77. सवाभ्यां वाऽमौ (३.४.९१)**

सवाभ्यां वामौ

सवाभ्यां वाऽमौ इति पदच्छेदः। सवाभ्यां परस्य लोडेतः क्रमाद्वामौ स्तः इति सूत्रार्थः। लोटो लङ्वत् इत्यतः लोट: इति 'आमेतः' इत्यतः एतः इति च अनुवर्तते। सश्च वश्च सवौ ताभ्यां सवाभ्याम्। वश्च अम् च वामौ। सकारवकाराभ्यां परस्य लोट् लकारस्य एकारस्य स्थाने क्रमात् वामादेशः स्तः इति अर्थः। यथा-एधस्व एधेथाम् एधध्वम्।

**एधस्व -**

एध् धातोः लोटि मध्यमपुरुषैकवचने थासि शपि 'थासः से' इति थासः से इत्यादेशे आमं बाधित्वा 'सवाभ्यां वाऽमौ' इति एकारस्य वादेशे एधस्व।

**एधेथाम् -**

एध् धातोः लोटि मध्यमपुरुषद्विवने आथामि 'टित आत्मनेपदानां टेरे' इत्येत्वे एध आथे। शपि अकारस्य इयादेशे गुणे एधेय् थे। 'लोपे व्यर्वलि' इति यलोपे 'आमेतः' इत्यामि एधेथाम्।

**एधध्वम्**

एध् धातेः लोटः मध्यमपुरुषबहुवचने ध्वमि टेरेत्वे शपि आमं बाधित्वा 'सवाभ्यां वाऽमौ' इति एकारस्य अमादेशे एधध्वमिति सिद्धम्।

**78. एत ऐ। ( ३.४.९३)**

एतः ऐ

एत: ऐ इति पदच्छेदः। लोडुत्तमस्य एतः ऐ स्यात् इति सूत्रार्थः। एधै एधावहै एधामहै। आटश्च ऐधत ऐधेताम् ऐधन्त। ऐधथाः ऐधेथाम् ऐधध्वम् ऐधे ऐधावहि एत ऐधामहि। एत: षष्ठ्यन्तं। ऐ इति लुप्त प्रथमाकम्। लोटो लङ्वत्' इत्यतः लोट: इति 'आडुत्तमस्य पिच्च' इत्यतः उत्तमस्य इति च अनुवर्तते। लोट् लकारस्य उत्तमस्य (उत्तम पुरुषस्य) एकारस्य स्थाने ऐ स्यात् इति। यथा एधै।

**एधै**

एध् धातोः लोटि उत्तमपुरुषैकवचने इटि तस्य एत्वे शपि आमं बाधित्वा एत ऐ, इति एकारस्य ऐकारे 'आडुमस्य पिच्च' इति आटि'आटश्च' इति वृद्धौ 'वृद्धिरेचि' इति वृद्धौ एधै इति सिद्धम्।

**एधावहै-**

एध् धातोः लेटि उत्तमपुरुषद्विचने वहिप्रत्यये एत्वे शपि आमं बाधित्वा 'एत ऐ' इत्येकारस्य ऐकारे 'आडुत्तमस्य पिच्च' इति आटि सवर्णदीर्घे एधावहै।

**एधामहै**

एध् धातोः लोटि उत्तमपुरुषबहुवचने महिङि टेरेत्वे एध् महे। 'कर्तरि शप्' इति शपि एकारस्य ऐत्वे 'अडुत्तमस्य पिच्च' इति आडागमे एध् अ आ महै। सवर्णदीर्घे एधामहै।

**एध् धातोः लङ्लकाररूपाणि**

| | **एकवचनं** | **द्विवचनं** | **बहुवचनं** |
|---|---|---|---|
| **प्रथमपुरुषः** | ऐधत | ऐधेताम् | ऐधन्त |
| **मध्यपुरुषः** | ऐधथाः | ऐधेथाम् | ऐधध्वम् |
| **उत्तमपुरुषः** | ऐधे | ऐधावहि | ऐधामहि |

**ऐधत**

एध् धातोः से लङि,प्रथमपुरुषैकवचने तप्रत्यये, एध् त। 'लुङ्लङ्लृङ्क्ष्वडुदात्तः' इति प्राप्तौ 'आडजादीनाम्' इति तन्निषेधे आडागमे आ एध् त। सार्वधातुकसंज्ञा, शपि, अनुबन्धलोपे आ अध् अ त। 'आटश्च' इत्यनेन वृद्धौ संयोगे ऐधत। एवं ऐधत, ऐधेताम् ऐधन्त, ऐधथाः, ऐधेथाम् एधध्वम्, ऐधे, ऐधावहि, ऐधामहि।

**एध् धातोः विधिलिङ्लकाररूपाणि**

| | **एकवचनं** | **द्विवचनं** | **बहुवचनं** |
|---|---|---|---|
| **प्रथमपुरुषः** | एधेत | एधेयताम् | एधेरन् |
| **मध्यपुरुषः** | एधेथाः | एधेयथाम् | एधेध्वम् |

| **उत्तमपुरुषः** | एधेय | एधेवहि | एधेमहि |
|---|---|---|---|

**79. लिङः सीयुट्। (३.४.१०२)**

सियुडागमः

लिङः सीयुट् इति पदच्छेदः। लिङः इति षष्ठ्यन्तं सीयुट् इति प्रथमान्तम्। लिङः सीयुडागमः भवति ततः सलोपे एधेत एधेयाताम् इतिरूपे। सीयुट् इत्यत्र ट् इत्संज्ञकः उकारश्च उच्चारणार्थः। परस्मैपदेषु अस्य यासुडागमः भवति ।

**एधेत -**

एधधातोः विधिलिङ्ः प्रथमपुरुषैकवचने तप्रत्यये शपि 'लिङः सीयुट्' इति सीयुट् अनुबन्धलोपे 'लिङः' 'सलोपोऽनन्त्यस्य' इति सलोपे गुणे 'लोपो व्योर्वलि' इति यलोपे एधेत इति।

**80. झस्य रन्। (३.४.१०५)**

रन् आदेशः

द्विपदं सूत्रमिदम्। अनेन सूत्रेण रन् आदेशः विधीयते। लिङो झस्य रन् स्यात्। यथा एधेरन्। एधेथाः। एधेयाथाम्। एधेध्वम्।

**एधेरन् -**

एध धातोः लिङि प्रथमपुरुषबहुवचने झप्रत्यये झस्य रन्' इति रन्प्रत्यये शपि सीयुटि सलोपे 'आद्गुणः' इति गुणे य लोपे एधेरन्।

**81. इटोऽत् (३.४.१०६)**

इट अत्

इटः अत् इति पदच्छेदः। अनेन सूत्रेण इट अत् विधीयते। विधिलिङः इटोऽत् स्यात्। यथा एधेय। एधेवहि एधेमहि।

**एधेय**

एध् धातोः लिङि उत्तमपुरुषैकवचने इट् अनुबन्धलोपे, शपि एध् अ इ। सीयुट् आगमे, अनुबन्धलोपे, सकारस्य लोपे एध् अ इय् इ। इकारस्य स्थाने 'इटोऽत्' इति अकारादेशे एध् अ इय् अ। 'आद्गुणः' इति गुणे संयोगे एधेय इति।

**एध् धातोः आशिर्लिङ्लकाररूपाणि**

| | **एकवचनं** | **द्विवचनं** | **बहुवचनं** |
|---|---|---|---|

| | | | |
|---|---|---|---|
| **प्रथमपुरुषः** | एधिषीष्ट | एधिषीयस्ताम् | एधिषीरन् |
| **मध्यमपुरुषः** | एधिषीष्ठाः | एधिषीयास्थाम् | एधिषीध्वम् |
| **उत्तमपुरुषः** | ऐधिषिय | एधिषीवहि | एधिषीमहि |

**82. सुट् तिथोः। (३.४.१०७)**

सुडागमः

द्विपदं सूत्रम्। अनेन सुडागमः विधीयते। लिङः तकारथकारयोः सुट् स्यात्। यथा- एधिषीष्ट। एधिषीयास्ताम्। एधिषीरन्। एधिषीष्ठाः। एधिषीयास्थाम्। एधिषीध्वम्। एधिषीय। एधिषीवहि। एधिषीमहि। ऐधिष्ट। ऐधिषाताम्।

**एधिषीष्ट -**

एध् धातोराशीर्लिङः प्रथमपुरुषैकवचने तप्रत्यये 'लिङाशिषि' इति तस्यार्धधातुकत्वे 'लिङः सीयुट्' इति सीयुडागमे अनुबन्धलोपे एध् सीय् त। आर्धधातुकत्संज्ञायां 'आर्धधातुकस्येड् वलादेः' इति इडागने अनुबन्धलोपे एध् इ सीय् त। तकारस्य 'सुट् तिथोः' इति सुडागमे अनुबनाधलोपे एध् इ सीय् स्त। 'लोपो व्योर्वलि' इति यकारलोपे 'आदेशप्रत्यययोः' इत्यनेन सीय् इत्यस्य सकारस्य षत्वे, तकारस्य 'ष्टुना ष्टुः' इत्यनेन ष्टुत्वे एधिषीष्ट इति।

**एधिषीयास्ताम्**

एध्धातोः आशीर्लिङि प्रथमपुरुषद्विवचने आतामि सीयुटि 'सुट् तिथोः' इति सुटि इटि षत्वे एधिषीयास्ताम्।

**एधिषीरन्**

एध्धातोः आशीर्लिङि प्रथमपुरुषबहुवचने झप्रत्यये झस्य रन् इति सीयुटि इटि यलोपे षत्वे एधिषीरन्।

**एध् धातोः लुङ्लकाररूपाणि**

| | **एकवचनं** | **द्विवचनं** | **बहुवचनं** |
|---|---|---|---|
| **प्रथमपुरुषः** | ऐधिष्ट | ऐधिषाताम् | ऐधिषत |
| **मध्यमपुरुषः** | ऐधिष्ठाः | ऐधियाथाम् | ऐधिढ्वम् |

| | | | |
|---|---|---|---|
| **उत्तमपुरुषः** | ऐधिषि | ऐधिष्वहि | ऐधिष्महि |

**ऐधिष्ट -**

एध्धातोः लुङि प्रथमपुरुषैकवचने तप्रत्यये, 'आडजादीनाम्' इत्यतः आडागमे अनुबन्धलोपे आ एध् त। 'च्लि च्लेः' अनुबन्धलोपे, सकार स्य षत्वे इडागमे आ एध् इ ष् त। 'आटश्च' इति वृद्धौ ष्टुत्वे ऐधिष्ट इति।

**83. आत्मनेपदेष्वनतः। (७.१.५)**

अदित्यादेशः

आत्मनेपदेषु अनतः। अनकारात्परस्यात्मनेपदेषु झस्य अदित्यादेशः स्यात्। न अत् अनत् तस्मात् अनतः। आत्मनेपदेषु सप्तम्यन्तं, अनतः पञ्चम्यन्तम्। 'झोऽन्तः' इत्यतः 'झः' इति षष्ठ्यन्तम् अनुवर्तते। 'अदभ्यस्तात्' इत्यतः अद् इति अनुवर्तते। अनकारात् परस्य आत्मनेपदेषु झस्य अद् इत्यादेशः स्यात् इति अर्थः। यथा -ऐधिषत ऐधिष्ठा ऐधिषाताम् ऐधित्वम् ऐधिषि ऐधिष्वहि ऐधिष्महि ऐधिष्यत ऐधिष्येताम् ऐधिष्यन्त ऐधिष्यथाः ऐधिष्येथाम् ऐधिष्यध्वम् ऐधिष्ये ऐधिष्यावहि ऐधिष्यामहि।

**एधिषत।**

एध् धातोर्लुङि मध्यमपुरुषबहुवचने झप्रत्यये 'आत्मनेपदेष्वनतः' इति झस्य अत् इत्यादेशे एध् अत। आडागमे च्लौ च्लेः सिचि इडागमे आ एध् इस् अत। आदिवृद्धौ षत्वे संयोगे ऐधिषत इति।

**ऐधिढ्वम्**

एध्धातोः लुङि ध्वमि च्लेः सिचि इटि आटि वृद्धों 'धि च' इति सलोपे 'इणः षीध्वंलुङ्लिटां घोऽङ्गात्' इति धस्य ढत्वे ऐधिढ्वम्।

**एध् धातोः लृङ्लकाररूपाणि**

| | एकवचनं | द्विवचनं | बहुवचनं |
|---|---|---|---|
| **प्रथमपुरुषः** | ऐधिष्यत | ऐधिष्येताम् | ऐधिष्यन्त |
| **मध्यमपुरुषः** | ऐधिष्यथाः | ऐधिष्येथाम् | ऐधिष्यध्वम् |
| **उत्तमपुरुषः** | ऐधिष्ये | ऐधिष्यावहि | ऐधिष्यमाहि |

**ऐधिष्यत-**

एध् धातोः लृङि प्रथमपुरुषैकवचने तप्रत्यये 'आडजादीनाम्' इति आडागमे अनुबन्धलोपे आ एध् त। 'स्यतासी लृलुटोः' इति स्यादेशे, आर्धधातुकसंज्ञायां, 'आर्धधातुकस्येड् वलादेः' इति इडागमे, आ एध् इ त। 'आटश्च' इति वृद्धौ आदेशप्रत्यययोः इत्यनेन षत्वे संयोगे ऐधिष्यत इति। तथैव ऐधिष्येताम्, ऐधिष्यन्त, ऐधिष्यथाः, ऐधिष्येथाम्, ऐधिष्यध्वम् ,ऐधिष्ये ,ऐधिष्यावहि, ऐधिष्यामहि। इत्यादि रूपसिद्धिः।

## Summarised Overview

भू- एध् धातुभ्यां सर्वेषु लकारेषु सूत्राणि तेषां व्याख्यानं, रूपाणां सिद्धिप्रक्रियाः च पठिताः। भ्वादि गणे परस्मैपदे सप्तषष्ठिः सूत्राणि पठनाय उपयुक्तानि सन्ति। आत्मनेपदे पञ्चदशसूत्राणि पठनाय स्वीकृताः। तत्र भू धातौ वर्तमानकालार्थे – वर्तमाने लट् – भवति ,भवतः इत्यादीनि रूपाणि। तेषु सप्तदश सूत्राणि प्रयुक्तानि। भूतानद्यतनपरोक्षार्थे- परोक्षे लिट्- बभूव,बभूवतुः इत्यादीनि रूपाणि। तेषु एकादश सूत्राणि प्रयुक्तानि। भविष्यति अनद्यतनेअर्थे – अनद्यतने लुट् -भविता, भवितारौ इत्यादीनि रूपाणि। तेषु षष्ठ सूत्राणि सन्ति। भविष्यत् सामान्यऽर्थे -लृट् शेषे च- भविष्यत्, भविष्यतः इत्यादीनि रूपाणि। तत्र एकं सूत्रमस्ति। विध्यार्थेषु आशिषि च अर्थे – लोट् च,आशिषि लिङ्लोटौ –भवतु, भवतात्,भवतां इत्यादीनि रूपाणि। तत्र एकादश सूत्राणि सन्ति। अनद्यतनभूतार्थे –अनद्यतने

लङ्- अभवत्, अभवताम्, अभवन् इत्यादीनि रूपाणि। तत्र त्रीणि सूत्राणि प्रयुक्तानि। विध्यर्थे - विधिनिमन्त्रणामन्त्रणाधीष्टसम्प्रश्नप्रार्थनेषु लिङ्- भवेत् ,भवेताम्, इत्यादीनि नवरूपाणि। तत्र षट् सूत्राणि सन्ति। आशीरर्थे- आशिषि लिङ्लोटौ- भूयात्, भूयास्ताम् इत्यादिभिः नव रूपाणि-तत्र त्रीणि सूत्राणि च सन्ति। भूतार्थे- लुङ्- अभूत्, अभूताम् इत्यादि नव रूपाणि-सप्त सूत्राणि च सन्ति। हेतुहेतुमद्भावादिलिङ्निमित्ते भविष्यति काले -लृङ् – अभविष्यत्,अभविष्यताम्-द्वौ सूत्रौ स्तः।

आत्मनेपदे एध् धातौ लट्- एधते, एधेते इत्यादीनि नव रूपाणि - तत्र एकं सूत्रमस्ति। लिट् –एधाञ्चक्रे,एधाञ्चक्राते इत्यादीनि नव रूपाणि-तत्र त्रीणि सूत्राणि प्रयुक्तानि। लुट्- एधिता,एधितारौ इत्यादि रूपाणि लृट् – एधिष्यते, एधिष्येते इत्यादि रूपाणि। लोट् – एधताम्, एधेताम् प्रभृतयः। तत्र त्रीणि सूत्राणि प्रयुक्तानि। लङ् – ऐधत, ऐधेताम् प्रभृतयः। विधिलिङ्- एधेत, एधेयताम् एकं सूत्रमस्ति।आशिर्लिङ्- एधिषीष्ठ,एधिषीयास्ताम् प्रभृतयः। लुङ् – ऐधिष्ट ,ऐधिषाताम् इत्यादि नवरूपाणि। लुङ्- ऐधिष्यत, ऐधिष्येताम् इत्यादि नव रूपाणि- तत्र एकं सूत्रमस्ति।अस्य पाठभागस्य पठनेन सामान्यतया तिङन्तरूपाणि पठितुं ज्ञातुं प्रयोक्तुं च शक्यते।

# Assignments

**सप्रमाणं प्रक्रियां लिखत।**

1. अभवत्
2. एधते
3. ऐधिष्येताम्
4. भविता
5. भव, भवतात्

**लघुटिप्पणीं लिखत**

1. आमेतः
2. आर्धधातुकं शेषः
3. कर्तरि शप्
4. आदेशप्रत्यययोः
5. आर्धाधातुकस्येड् वलादेः

**सूत्राणि व्याख्यात -**

1. तस्थस्थमिपां तान्तन्तामः
2. सार्वधातुकार्धधातुकयोः
3. आडुत्तमस्य पिच्च
4. इतश्च
5. च्लि लुङि
6. आत्मनेपदेष्वनतः
7. लिङाशिषि

# Suggested Readings


1. पदसंस्कारचन्द्रिका कैकुलका रामवारियर केरलसाहित्य अकादमि तृश्शूर।
2. लघुपाणिनीयम् ए आर् राजराजवर्मा केरलसर्वकलाशाला तिरुवनन्तपुरम्।
3. पाणिनीयप्रद्योतम् ऐसि चाक्को भाषा इन्स्टिट्यूट, तिरुवनन्वपुरम्।
4. प्रक्रियाभाष्यम् का जोन् कुन्नपप्ल्लि नाषणल बुक स्टाल् कोट्टयम्।

## References


1. लघुसिद्धान्तकौमुदी,वरदराजा चौखम्बा संस्कृत सीरीस अकादमि, वाराणसी २००५.
2. श्रीवरदराजाचार्यकृतः लघुसिद्धान्तकौमुदी श्रीसूर्यनारायणशुक्लः "बालमनोरमा" संस्कृत - हिन्दीटीका सहित प्रकाशक :वाराणासी संस्कृत संस्थान सीरीज १०००
3. श्रीमद्वरदराजाचार्यप्रणीता लघुसिद्धान्तकौमुदी श्रीधरमुखोल्लासिनी - हिन्दी- व्याख्यासमन्विता भाग-2व्याख्याकारः गोविन्द प्रसाद शर्मा चौखम्बा सुरभारती प्रकाशन वाराणसी २००७
4. लघुसिद्धान्तकौमुदी द्वितीयो भागः, प्रोफसर् आर् वासुदेवन् पोट्टि, सर्वकारीय संस्कृतकलालयः,तृप्पूणित्तुरा, १९९३


### Space for Learner Engagement for Objective Questions

Learners are encouraged to develop objective questions based on the content in the paragraph as a sign of their comprehension of the content. The Learners may reflect on the recap bullets and relate their understanding with the narrative in order to frame objective questions from the given text. The University expects that 1 - 2 questions are developed for each paragraph. The space given below can be used for listing the questions.

UNIT 2

# इतरनवगणनां प्रथमधातूनां परिचयः (प्रक्रिया नावश्यकी)

## Learning Outcomes

- अदादिः आरभ्य चुरादिः पर्यन्तं वर्तमानानां धातूनां सामान्यपरिचयः।
- शप्,श्लु, श्यन् इत्यादि विकरणप्रत्ययानामवगमनम्।
- नवगणधातूनां अर्थान् जानाति।
- धातुरूपाणां निष्पत्तौ सामर्थ्यं सम्पादयति।

## Background

लोके मानवानां व्यवहारः वाक्यं विना न संभवति। भाषारचनायां वाक्यसंरचनायां वा तिङन्तपदानां प्रयोगस्य महत्वं सर्वविदितम्। धातुभ्यः एव विविध प्रकारकाणि क्रियारूपाणि कृदन्तरूपाणि च निष्पद्यन्ते। ते च धातवः दश गणेषु विभक्ताः सन्ति। भ्वादिः, अदादिः, जुहोत्यादिः, दिवादिः, स्वादिः, तुदादिः, रूधादिः, तनादिः, क्र्यादिः, चुरादिः च। प्रथमे एकके भ्वादिगणे पदसिद्धिः प्रक्रिया सम्बन्धानि कानिचन सूत्राणि व्याख्यातानि। अस्मिन् एकके अदादिं आरभ्य चुरादिः पर्यन्तं नवगणधातूनां सामान्यपरिचयः, तेषां भेदाः, सविशेषताः अर्थान् च प्रतिपादितानि। एवं नवगणधातूनां परिचयपुरस्सरं रूपाणि च पठिष्यति।

## Keywords

अदिप्रभृतिभ्यः शपः, शपः श्लुः, दिवादिभ्यः श्यन्, स्वादिभ्यः श्नु, तुदादिभ्यः शः, रुधादिभ्यः श्नम्, तनादिभ्यः उः, क्रयादिभ्यः श्न, चुरीदिभ्यः णिच्

# Discussion

## 2.2.1 अदादिगणपरिचयः

लघुसिद्धान्तकौमुद्याः तिङन्तपदेषु द्वितीयं प्रकरणमस्ति अदादिः। अस्मिन् प्रकरणे षट्चत्वारिंशत् सूत्राणि प्रतिपादितानि। भ्वादिप्रकरणे शप् विकरणप्रत्ययः। अस्मिन् अदादिप्रकरणे लुगविकरणान् धातून् सूचयति। धातूनां पृथक्तया उपस्थापनं विहितम्। 'अद' भक्षणे इत्यस्मात् धातोः आरभ्य 'उर्णुञ्' आच्छादने इति धातुपर्यन्तं पञ्चविंशति धातूनां सङ्कलनं विधाय अदादिप्रकरणं कृतम्। प्रायशः सर्वेषु तिङन्तपदप्रकरणेषु किमपि स्वकीयं वैशिष्ट्यमस्ति। पूर्वस्मिन् भ्वादिप्रकरणे तावत् शप् विकरणं भवति। अस्मिन् अदादिप्रकरणे तु 'अदिप्रभृतिभ्यः शपः' इत्यनेन सूत्रेण लुक् जायते इति रीत्या अदादिघटिता: सर्वेऽपि प्रयोगाः शब्विकरणेन रहिताः भवन्ति।

शप् अधिकरणस्य लुक् भवति

अद् धातुरादिः येषां ते अदादयः। अस्मिन् अदादिगणे 'अद्' भक्षणे इत्ययं धातुः प्रथमप्रयुक्तः। अत एव अस्य नाम अदादिगणः। तिङन्तरूपप्रक्रिया नवगणेषु पृथग् रूपेण विभक्ताः वर्तते। एकस्य धातो: लेट्लकारं विहाय नवतिसंख्याकाः प्रयोगाः सिध्यन्ति। एकस्मिन् लकारे नवरूपाणि भवन्ति। प्रकरणेऽस्मिन् धातूनां प्रयोगः कस्मिन्नर्थे भवति इत्यपि सम्यक्तया विशदयति। यथा अद् धातुः भक्षणरूपेऽर्थे भवति। अयं धातुः परस्मैपदे प्रयुज्यते। यथा अत्ति इत्यस्य अर्थः भोजनं करोति। देवदत्तः अत्ति इत्यस्य अर्थः देवदत्तः भोजनं करोति।

अदादिगणधातवः

अद् भक्षणे,'हन हिंसागत्योः' हन्-धातुः हिंसा इति अर्थ गत्यर्थे च, 'यु' मिश्रणामिश्रणयोः, 'या' प्रापणे, 'वा' गति गन्धनयोः (गत्यर्थे वायुसञ्चलने) 'भा' दीप्तौ, 'ष्णा' शौचे 'श्रा' पाकार्थे, 'द्रा' कुत्सायाम् गतौ ,'प्सा भक्षणे', 'रा' दाने, 'ला' आदाने, 'दाप् लवने' लवनं नाम कर्तनम्, 'पा' रक्षणे पाति, पातः, पान्ति, एतानि रूपाणि 'ख्या' प्रकथने प्रकथनं नाम प्रत्युत्तरम्, निगदनं वा। 'विद' ज्ञाने जानातीत्यर्थे, 'अस् भुवि' अस्य प्रयोगः सत्ता अर्थ, 'इण् गतौ' इण् धातुः गमनरूपेऽर्थे, 'शीङ् स्वप्ने', 'इङ् अध्ययने' अयं धातु सर्वदैव अधि उपसर्गपूर्वकं एव प्रयुज्यते, 'दुह्', 'प्रपूरणे', 'दिह उपचये', लिह् आस्वादने', 'ब्रूव् व्यक्तायां वाचि', 'उर्णुञ् आच्छादने' इत्येते धातवः सन्ति।

सर्वत्र गणे समानानि सूत्राणि

भ्वादिगणे यानि सूत्राणि सन्ति तेषु कानिचन सूत्राणि अन्येष्वपि गणेषु अपि सन्ति, तद्यथा- 'वर्तमाने लट्', 'तिप्तस्झि' इत्यादि 'कर्तरि शप्' 'लुङ्लङ्लृङङ्क्ष्वडुदात्तः' 'लुटः प्रथमस्यडारौरसः' 'परोक्षे लिट्', 'लिट् च', 'हलादिशेषः', 'पूर्वोऽभ्यासः' 'लृट् शेषे च' 'लोट् च' इत्यादीनि सूत्राणि, तद्विहितानि कार्याण्येव सामान्यकार्याणि पदेन उच्यन्ते।

**अद् धातोः लट्लकारः (अद्,भक्षणे)**

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| **प्रथमपुरुषः** | अत्ति | अत्तः | अदन्ति |
| **मध्यमपुरुषः** | अत्सि | अत्थः | अत्थ |
| **उत्तमपुरुषः** | अद्मि | अद्वः | अद्मः |

अदादिप्रकरणे अदिप्रभृतिभ्यः शपः इति सूत्रेण शप्प्रत्ययस्य लुक्।

**लिट्लकारः**

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| **प्रथमपुरुषः** | जघास | जक्षतुः | जक्षुः |
| **मध्यमपुरुषः** | जयसिथ | जक्षथुः | जक्ष |
| **उत्तमपुरुषः** | जघास, जघस | जक्षिव | जक्षिम |

**(घस्लादेशाऽभावपक्षे )**

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| **प्रथमपुरुषः** | आद | आदतुः | आदुः |
| **मध्यमपुरुषः** | आदिथ | आदथुः | आद |
| **उत्तमपुरुषः** | आद | आदिव | आदिम |

अद धातोः लिटि विकल्पेन घस्लृ आदेशाः स्यात्। अतः आद - आदतुः - आदुः इव जघास- जघासतुः - जघासुः इत्यदीनि रूपाण्यपि सिद्धयन्ति।

**लृट्लकारः**

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| **प्रथमपुरुषः** | अत्स्यति | अत्स्यतः | अत्स्यन्ति |
| **मध्यमपुरुषः** | अत्स्यसि | अत्स्यथः | अत्स्यथ |

| | | | |
|---|---|---|---|
| **उत्तमपुरुषः** | अत्स्यामि | अत्स्यावः | अत्स्यामः |

अद धातोः लुटि इडागमः न।

**लोट्लकारः**

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| **प्रथमपुरुषः** | अत्तु, अत्तात् | अत्ताम् | अदन्तु |
| **मध्यमपुरुषः** | अद्धि, अत्तात् | अत्तम् | अत्त |
| **उत्तमपुरुषः** | अदानि | अदाव | अदाम |

**लङ्लकारः**

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| **प्रथमपुरुषः** | आदत् | आत्ताम् | आदन् |
| **मध्यमपुरुषः** | आदः | आत्ताम् | आत्त |
| **उत्तमपुरुषः** | आदम् | आद्व | आद्म |

अदः परस्य अपृक्तसार्वधातुकस्य अडागमः स्यात्।

**विधिलिङ्लकारः**

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| **प्रथमपुरुषः** | अद्यात् | अद्याताम् | अद्युः |
| **मध्यमपुरुषः** | अद्याः | अद्यातम् | अद्यात |
| **उत्तमपुरुषः** | अद्याम् | अद्याव | अद्याम |

**आशिर्लिङ्लकारः**

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| **प्रथमपुरुषः** | अद्यात् | अद्यास्ताम् | अद्यासुः |
| **मध्यमपुरुषः** | अद्याः | अद्यास्तम् | अद्यास्त |
| **उत्तमपुरुषः** | अद्यासम् | अद्यास्व | अद्यास्म |

**लुङ्लकारः**

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| **प्रथमपुरुषः** | अघसत् | अघसताम् | अघसन् |
| **मध्यमपुरुषः** | अघसः | अघसतम् | अघसत |
| **उत्तमपुरुषः** | अघसम् | अघसाव | अघसाम |

अद धातोः लुङि अटः स्थाने घस्लृ स्यात्।

**लुङ्लकारः**

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| **प्रथमपुरुषः** | आत्स्यत् | आत्स्यताम् | आत्स्यन् |
| **मध्यमपुरुषः** | आत्स्यः | आत्स्यतम् | आत्स्यत |
| **उत्तमपुरुषः** | आत्स्यम् | आत्स्याव | आत्स्याम |

## 2.2.2 जुहोत्यादिगणः

शपः श्लु स्यात् ततः धातोः द्वित्वं भवति

अस्मिन् जुहोत्यादिप्रकरणे आदौ 'हु' इति धातुः। भ्वादि गणे विहितस्य 'शपः श्लुः' अत्र विधीयते श्लै इति भवति। धातोः द्वित्वं भवति। यथा 'हु' तिपि शपि शपः श्लौ धातोः द्वित्वे 'हु हु ति' इति जाते अभ्यासादिकार्ये 'जुहोति' इति। आदौ अस्मिन् गणे अस्य वैशिष्ट्यस्य प्रदर्शनं कृतम्। 'हु' धातोः दानाऽदनयोः इत्यर्थः भवति। जुहोत्यादिगणे दशसंख्यकाः धातवः सन्ति। हु दानाऽदनयोः, ञिभी भये, ह्री लज्जायाम्, पॄ पालनपूरणयोः, ओहाक् त्यागे, माङ् माने शब्दे च, ओहाङ् गतौ, डुभृज् धारणपोषयोः, डुदाञ् दाने, डुधाञ् धारणपोषणयोः। अस्मिन् प्रकरणे चतुर्विंशतिः सूत्राणि सन्ति। भ्वादिगणे वर्तमानानि कानिचन सूत्राणि अत्रापि प्रवृत्तिपन्थे सन्ति। श्लु इति विकरणप्रत्ययः। जुहोत्यादिगणे विशेषसूत्राणि वर्तन्ते। तैः विधीयमानानिकार्याणि इमानि सन्ति। हूधातोः परस्य शपः श्लुः भवति। श्लो इत्यनेन सूत्रेण द्वित्वं भवति। झप्रत्ययस्य स्थाने अत् आदेशः भवति। लिट् लकारे हूधातोः अम्,श्लु इव कार्यं च भवतः। जुस् प्रत्यये परे इगन्ताङ्गस्य गुणः भवति।

**हूधातोः रूपाणि (दानाऽदानयोः अर्थे)**

**लट्लकारः**

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| **प्रथमपुरुषः** | जुहोति | जुहुतः | जुह्वति |
| **मध्यमपुरुषः** | जुहोषि | जुहुथः | जुहुथ |
| **उत्तमपुरुषः** | जुहोमि | जुहुवः | जुहुमः |

हूधातोः लिटि आम् वा स्यात् आमि श्लौ द्वित्वादिकञ्च। तेन जुह्वाञ्चकार - जुहुवाञ्चक्रतुः - जुहवाञ्चक्रुः इत्यादीनि रूपाणि। पक्षे जुहाव-जुहुवतु-जुहुवुः इति रूपाण्यपि सन्ति।

हूधातोः लुटि, लृटि भूधातोरिव रूपाणि।

**लृट्लकारः**

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| **प्रथमपुरुषः** | होष्यति | होष्यतः | होष्यन्ति |
| **मध्यमपुरुषः** | होप्यसि | होष्यथः | होष्यथ |
| **उत्तमपुरुषः** | होष्यामि | होष्यावः | होष्यामः |

**लोट्लकारः**

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| **प्रथमपुरुषः** | जुहोतु/जुहुतात् | जुहुताम् | जुह्वतु |
| **मध्यमपुरुषः** | जुहुधि/ जुहतात् | जुहुतम् | जुहुत |
| **उत्तमपुरुषः** | जुहवानि | जुहवाव | जुहवाम |

**लङ्लकारः**

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| **प्रथमपुरुषः** | अजुहोत् | अजुहुताम् | अजुहवुः |
| **मध्यमपुरुषः** | अजुहोः | अजुहुतम् | अजुहुत |

| **उत्तमपुरुष:** | अजुहवम् | अजुहव | अजुहुम |
|---|---|---|---|

**विधिलिङ्लकारः**

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| **प्रथमपुरुष:** | जुहुयात् | जुहुयाताम् | जुहुयुः |
| **मध्यमपुरुषः** | जुहुया: | जुहुयातम् | जुहुयात |
| **उत्तमपुरुष:** | जुहुयाम् | जुहुयाव | जुहुयाम |

**आशिर्लिङ्लकारः**

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| **प्रथमपुरुष:** | हूयात् | हूयास्ताम् | हूयासुः |
| **मध्यमपुरुषः** | हूयाः | हूयास्तम् | हूयास्त |
| **उत्तमपुरुष:** | हूयासम् | हयास्व | हूयास्म |

**लुङ्लकारः**

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| **प्रथमपुरुष:** | अहौषीत् | अहौष्टाम् | अहौषुः |
| **मध्यमपुरुषः** | अहौषी: | अहौष्टम् | अहौष्ट |
| **उत्तमपुरुष:** | अहौषम् | अहौष्व | अहौष्म |

**लृङ्लकारः**

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| **प्रथमपुरुष:** | अहोष्यत् | अहोष्यताम् | अहोष्यन् |
| **मध्यमपुरुषः** | अहोष्यः | अहोष्यतम् | अहोष्यता |
| **उत्तमपुरुष:** | अहोष्यम् | अहोष्याव | अहोष्याम |

## 2.2.3 दिवादिगणपरिचयः

तिङन्ते चतुर्थं प्रकरणं भवति दिवादिप्रकरणम्। दिव् (दिवु धातुः) आदौ यत्र असौ दिवादिः दिवादिश्चासौ गणः दिवादिगणः। गणोऽयं अन्येभ्यः गणेभ्यः पृथक्। 'श्यन्' विकरणप्रत्ययः। यथा- दीव्यति, श्यति, सीव्यति

श्यन् इति विकरणप्रत्ययः

इत्यादि। अत्र लडादिलकारेषु मध्ये यकारः (यति, यते, यत् वा) यत्र श्रूयते स एव शब्दः दिवादिगणीयः इति बोधव्यः। यद्यपि चुरादिगणेऽपि यकारः, किन्तु तत्र अयति, अथवा अयत् इति अन्ते श्रूयमाणो भवति। दिवादिगणेऽनेके धातवः पठिताः सन्ति। तद्यथा- 'दिवु' धातोः क्रीडा, विजिगीषा (अर्थात् जेतुमिच्छा) व्यवहाराः, प्रकाशः, स्तुतिः, प्रसन्नता, मदः, शयनं, इच्छा, गमनार्थञ्च। एवं तत्रैव पठितः अपरः धातुः भवति 'षिवु' तन्तुसन्ताने। एवं 'नृती' गात्रविक्षेपे। गात्रस्य (शरीरस्य) इतस्ततः परिचालनम्। 'त्रसी' उद्वेगे। 'शो' तनूकरणे। तनूकरणं कृशीकरणम्। 'छो' छेदने छेदनं द्वैधीकरणम्। 'पुष्' पुष्टौ। पुष्टिर्नाम शरीरादेः वर्धनम्। 'शुष' शोषणे। शोषणं नाम शुष्कीकरणम्। 'णश' अदर्शने। 'षूङ्' प्राणिप्रसवे। प्राणीनामुत्पत्तिः। 'दूङ्' परितापे। परितापः दुःखीभवनम् । 'दीङ्' क्षये। क्षयः विनाशार्थकः। 'डीङ्' विहायसा गतौ। आकाशमार्गेण गमनम्। 'पीङ्' पाने। 'माङ्' माने। 'जनी' प्रादुर्भावः। प्रादुर्भवनं नाम जन्मग्रहणम्। 'दीपी' दीप्तौ। 'पद्' गतौ गतिर्गमनम्। 'विद्' सत्तायाम्। सत्ता अर्थात् कस्यचिद् वस्तुनः स्थितिः। 'बुध्' अवगमने। अवगमनं नाम ज्ञानम्। 'युध्' सम्प्रहारे। 'सृज्' विसर्गे। 'मृष' तितिक्षायाम्। णह् बन्धने रज्वादिना बन्धनीकरणम् इत्यदयः धातवः अस्मिन् प्रकरणे अन्तर्भवन्ति।

**'दिवु' धातोः रूपाणि**

**लट्लकारः**

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| **प्रथमपुरुषः** | दीव्यति | दीव्यतः | दीव्यन्ति |
| **मध्यमपुरुषः** | दीव्यसि | दीव्यथः | दीव्यथ |
| **उत्तमपुरुषः** | दीव्यामि | दीव्यावः | दीव्यामः |

दिवादिप्रकरणे वर्तमानस्य दिवुधातोः विकरणप्रत्ययेन श्यन्प्रत्ययेन वर्तमानं व्यतियानमेव प्राधान्यम्। अन्यात्सर्वं प्रायेण भ्वादिगणस्थानां सूत्राणामनुसारमेव।

**लिट्लकारः**

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| **प्रथमपुरुषः** | दिदेव | दिदिवतुः | दिदिवुः |

| | | | |
|---|---|---|---|
| **मध्यमपुरुषः** | दिदेविथ | दिदिवथुः | दिदिव |
| **उत्तमपुरुषः** | दिदेव | दिदिविव | दिदिविम |

**लुट्लकारः**

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| **प्रथमपुरुषः** | देविता | देवितारौ | देवितारः |
| **मध्यमपुरुषः** | देवितासि | देवितास्थः | देवितास्थ |
| **उत्तमपुरुषः** | देवितास्मि | देवितास्वः | देवितासमः |

**लृट्लकारः**

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| **प्रथमपुरुषः** | देविष्यति | देविष्यतः | देविष्यन्ति |
| **मध्यमपुरुषः** | देविष्यसि | देविष्यथः | देविष्यथ |
| **उत्तमपुरुषः** | देविष्यामि | देविष्यावः | देविष्यामः |

**लोट्लकारः**

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| **प्रथमपुरुषः** | दीव्यतु/दीव्यतात् | दीव्यताम् | दीव्यन्तु |
| **मध्यमपुरुषः** | दीव्य/ दीव्यतात् | दीव्यतम् | दीव्यत |
| **उत्तमपुरुषः** | दीव्यानि | दीव्यावः | दीव्यामः |

**लङ्लकारः**

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| **प्रथमपुरुषः** | अदीव्यत् | अदीव्यताम् | अदीव्यन् |
| **मध्यमपुरुषः** | अदीव्यः | अदीव्यतम | अदीव्यत |
| **उत्तमपुरुषः** | अदीव्यम् | अदीव्यावः | अदीव्यामः |

**विधिलिङ्लकारः**

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| **प्रथमपुरुषः** | दीव्येत् | दीव्येताम् | दीव्येयुः |

| | | | |
|---|---|---|---|
| **मध्यमपुरुषः** | दीव्येः | दीव्येतम् | दीव्येत |
| **उत्तमपुरुषः** | दीव्येयम् | दीव्येव | दीव्येम् |

**आशिर्लिङ्लकारः**

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| **प्रथमपुरुषः** | दीव्यात् | दीव्यास्ताम् | दीव्यासुः |
| **मध्यमपुरुषः** | दीव्याः | दीव्यास्तम् | दीव्यास्त |
| **उत्तमपुरुषः** | दीव्यासम् | दीव्यास्व | दीव्यासम् |

**लुङ्लकारः**

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| **प्रथमपुरुषः** | अदेवीत् | अदेविष्टाम् | अदेविषुः |
| **मध्यमपुरुषः** | अदेवीः | अदेविष्टम् | अदेविष्ट |
| **उत्तमपुरुषः** | अदेविषम् | अदेविष्व | अदेविष्म |

**लृङ्लकारः**

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| **प्रथमपुरुषः** | अदेविष्यत् | अदेविष्यताम् | अदेविष्यन् |
| **मध्यमपुरुषः** | अदेविष्यः | अदेविष्यतम् | अदेविष्यत |
| **उत्तमपुरुषः** | अदेविष्यम् | अदेविष्याव | अदेविष्याम |

## 2.2.4 स्वादिगणपरिचयः

शपं बाधित्वा श्नु विधीयते

तिङन्ते पञ्चमं प्रकरणमस्ति स्वादिप्रकरणम्। 'षुञ्' (धातुः) आदौ यत्र सः स्वादिः (अत्र 'धात्वादेः षः सः 'इति पाणिनिसूत्रेण 'षुञ्' इति मूर्धन्यषकारस्य स्थाने दन्त्यसकारो भवति) स्वादिश्चासौ गणः स्वादिगणः। गणेऽस्मिन् पठितेभ्यः धातुभ्यः 'श्नु' इति विकरणप्रत्ययः भवति। तदानीं सुनोति, धुनोति, चिनोति इत्यादयः प्रयोगाः सिद्ध्यन्ति। अन्येभ्यो गणेभ्यः पृथगस्ति श्नुप्रयोगः। 'षुञ्' परस्मैपदे लुङि सिच इडागमो भवति। 'चिञ्' चयनधातोरयं प्रयोगः 'पुष्पाणि चिनोति'। अर्थात्

पुष्पादीनां चयनं भवति। अयमप्युभयपदी। 'स्तृञ्' आच्छादने आच्छादनं नाम कस्यापि वस्तुनः दृष्टिपथाद्वारणम्। गित्वाद् अयमपि उभयपदी धातुः। 'धूञ्' कम्पने धातुरयं कम्पनार्थकः। सकर्मकोऽयं धातुः। एवमेव गणेऽस्मिन् धातवः। स्वादिगणेऽपि कानिचन नूतनानि सूत्राणि प्रवर्तन्ते। तैः विधीयमानानि विशेषकार्याणि इमानि सन्ति। अनिटः पुञ्धातोः परस्मैपदे सिचि इडागमो भवति। अतः असावीत् इति रूपम्, आत्मनेपदे तु 'असीष्ट' इति रूपं भवति। 'चिन्' धातौ लिट्लकारे अभ्यासात् परे कुत्वं भूत्वा 'चिकाय' इति रूपं सिद्धयति। 'स्तृञ्' धातौ आत्मनेपदे तङि लिङि सचो इड्वा भवति। अतः स्तरिषीष्ट स्तृषीष्ट इति रूपद्वयं सिद्धयति। 'धूञ्' धातौ 'श्रयुकः किति' इति सूत्रेण इटः निषेधेऽपि क्र्यादिनियमात् नित्यमिङ् भवति । अतः दुधुविव इति रूपं सिद्ध्यति।

**'षुञ्' धातोः परस्मैपदरूपाणि**

**लट्लकारः**

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| **प्रथमपुरुषः** | सुनोति | सुनुतः | सुन्वन्ति |
| **मध्यमपुरुषः** | सुनोषि | सुनुथः | सुनुथ |
| **उत्तमपुरुषः** | सुनोमि | सुन्वः/ सुनुवः | सुन्मः/सुनुमः |

आत्मनेपदि लटि सुनुते-सुन्वाते- सुन्वते इत्यादीनि

**लिट्लकारः**

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| **प्रथमपुरुषः** | सुषाव | सुषुवतुः | सुषुवुः |
| **मध्यमपुरुषः** | सुषविथ/सुषोथ | सुषुवथुः, | सुषुव |
| **उत्तमपुरुषः** | सुषाव /सुषव | सुषुविव | सुषुविम |

आत्मनेपदे तु सुषुवे-सुषुवाते-सुषुविरे इत्यादीनि रूपाणि।

**लिट्लकारः**

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| **प्रथमपुरुषः** | सोता | सोतारौ | सेतारः |

| | | | |
|---|---|---|---|
| **मध्यमपुरुषः** | सोतासि | सोतास्थः | सोतास्थ |
| **उत्तमपुरुषः** | सोतास्मि | सोतास्वः | सोतास्मः |

आत्मनेपदे लुटि प्रथमपुरुषे समानरूपाणि भवन्ति। मध्यमपुरुषे सोतासे, सोतासाथे, सोताध्वे।

**लृट्लकारः**

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| **प्रथमपुरुषः** | सोष्यति | सोष्यतः | सोष्यन्ति |
| **मध्यमपुरुषः** | सोष्यसि | सोष्यथः | सोष्यथ |
| **उत्तमपुरुषः** | सोष्यामि | सोष्यावः | सोष्यामः |

आत्मनेपदि लृटि सोष्यते-सोष्येते-सोष्यन्ते इत्यादीनि।

**लोट्लकारः**

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| **प्रथमपुरुषः** | सुनोतु/ सुनुतात् | सुनुताम् | सुन्वन्तु |
| **मध्यमपुरुषः** | सुनु/ सूनुतात् | सुनुतम् | सुनुत |
| **उत्तमपुरुषः** | सुनवानि | सुनवाव | सुनवाम |

आत्मनेपदि लोटि सुनुताम्-सुन्वाताम्-सुन्वताम् इत्यादीनि।

**लङ्लकारः**

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमपुरुषः | असुनोत् | असुनुताम् | असुन्वन् |
| मध्यमपुरुषः | असुनोः | असुनुतम् | असुनुत |
| उत्तमपुरुषः | असुनवम् | असुनुव/असुन्व | असुनुम/असुन्म |

आत्मनेपदि लङि असनुत-असन्वाताम्-असन्वत इत्यादीनि।

**विधिलिङ्लकारः**

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| **प्रथमपुरुषः** | सुनुयात् | सुनुयाताम् | सुनुयुः |

| | | | |
|---|---|---|---|
| **मध्यमपुरुषः** | सुनुयाः | सुनुयातम् | सुनुयात |
| **उत्तमपुरुषः** | सुनुयाम् | सुनुयाव | सुनुयाम |

आत्मनेपदि विधिलिङि सुन्वीत-सुन्वीयाताम्-सुन्वीरन् इत्यदीनि।

**आशीर्लिङ्लकारः**

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| **प्रथमपुरुषः** | सूयात् | सूयास्ताम् | सूयासुः |
| **मध्यमपुरुषः** | सूयाः | सूयास्तम् | सूयास्त |
| **उत्तमपुरुषः** | सूयासम् | सूयास्व | सूयास्म |

आत्मनेपदि तु सोपीष्ट-सोपीयास्ताम्-सोपीरन् इतायदीनि रूपाणि।

**लुङ्लकारः**

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| **प्रथमपुरुषः** | असावीत् | असाविष्टाम् | असाविषुः |
| **मध्यमपुरुषः** | असावी | असाविष्टम् | असाविष्ट |
| **उत्तमपुरुषः** | असाविषम् | असाविष्व | असाविष्मा |

आत्मनेपदि तु असोष्ट-असोषाताम्-असोषत इत्यादीनि रूपाणि।

**लृङ्लकारः**

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| **प्रथमपुरुषः** | असोष्यत् | असोष्यताम् | असोष्यन् |
| **मध्यमपुरुषः** | असोष्यः | असोष्यतम् | असोष्यत |
| **उत्तमपुरुषः** | असोष्यम् | असोष्याव | असोष्याम |

आत्मनेपदि तु असोष्यत - असोष्येताम् - असोष्यन्त इत्यादीनि रूपाणि।

## 2.2.5 तुदादिगणः

शपं बाधित्वा शः स्यत्

तिङन्तप्रकरणे षष्ठमं प्रकरणं भवति तुदादिप्रकणम्। तस्य प्रकरणस्य प्रथमः धातुः तुद् भवति। अतः अस्य प्रकरणं तुदादि इति नाम्ना व्ययह्रियते। तुद् धातोः अर्थः व्यथने'। पाणिनीयधातुपाठे १२८२ तः

१४३८ यावत् धातवः तुदादिगणस्थधातवः सन्ति। अस्मिन् प्रकरणे चतुर्दशसूत्राणि प्रतिपादितानि। अस्य गणस्य विकरणप्रत्ययः 'श' अस्ति। तुदादिभ्यः शः इत्यनेन शः। कर्त्र्थके सार्वधातुके लट्, लोट्, लङ्, विधिलिङ्लकारेषु प्रत्ययेषु परेषु शः विकरणः भवति। श इत्यत्र 'लशक्वतद्धिते' इति सूत्रेण शकारस्य इत्संज्ञा भवति। 'अ' शिष्यते।

**'तुद्' धातोः परस्मैपदरूपाणि**

**लट्लकारः**

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| **प्रथमपुरुषः** | तुदति | तुदतः | तुदन्ति |
| **मध्यमपुरुषः** | तुदसि | तुदथः | तुदथ |
| **उत्तमपुरुषः** | तुदामि | तुदावः | तुदामः |

आत्मनेपदि तुदते-तुदेते-तुदन्ते इत्यादीनि रूपाणि।

**लिट्कारः**

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| **प्रथमपुरुषः** | तुतोद | तुतुदतुः | वुतुदुः |
| **मध्यमपुरुषः** | तुतोदिथ | तुतुदथुः | तुतुद |
| **उत्तमपुरुषः** | तुतोद | तुतुदिव | तुतुदिम |

आत्मनेपदि लिटि तुतुदे-तुतुदाते-तुतुदिरे इत्यादीनि रूपाणि।

**लुट्कारः**

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| **प्रथमपुरुषः** | तोत्ता | तोत्तारौ | तोत्तारः |
| **मध्यमपुरुषः** | तोत्तासि | तोत्तास्थः | तोत्तास्थ |
| **उत्तमपुरुषः** | तोत्तास्मि | तोत्तास्वः | तोत्तास्मः |

आत्मनेपदि लुटि तोत्ता -तोत्तारौ-तोत्तारः इत्यादीनि रूपाणि।

**लृट्लकारः**

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|

| | | | |
|---|---|---|---|
| **प्रथमपुरुषः** | तोत्स्यति | तोत्स्यतः | तोत्स्यन्ति |
| **मध्यमपुरुषः** | तोत्स्यसि | तोत्स्यथः | तोत्स्यथ |
| **उत्तमपुरुषः** | तोत्स्यामि | तोत्स्यावः | तोत्स्यामः |

आत्मनेपदि - तोत्स्यते-तोत्स्येते-तोत्स्यन्ते इत्यदीनि रूपाणि।

**लोट्लकारः**

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| **प्रथमपुरुषः** | तुदतु/ तुदतात् | तुदताम् | तुदन्तु |
| **मध्यमपुरुषः** | तुद/ तुदतात् | तुदतम् | तुदत |
| **उत्तमपुरुषः** | तुदानि | तुदाव | तुदाम |

आत्मनेपदे तुदताम्-तुदेताम्-तुदन्ताम् इत्यदीनि रूपाणि।

**लङ्लकारः**

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| **प्रथमपुरुषः** | अतुदत् | अतुदताम् | अतुदन् |
| **मध्यमपुरुषः** | अतुदः | अतुदतम् | अतुदत |
| **उत्तमपुरुषः** | अतुदम् | अतुदाव | अतुदाम |

आत्मनेपदे अतुदत- अतुदेताम्-अतुदन्त इत्यादीनि रूपाणि।

**विधिलिङ्लकारः**

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| **प्रथमपुरुषः** | तुदत् | तुदेताम् | तुदयुः |
| **मध्यमपुरुषः** | तुदेः | तुदतम् | तुदेत |
| **उत्तमपुरुषः** | तुदेयम् | तुदेव | तुदेम |

आत्मनेपदे -तुदेत-तुदेयताम्- तुदेरन् इत्यदीनि रूपाणि।

**आशिर्लिङ्लकारः**

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| **प्रथमपुरुषः** | तुद्यात् | तुद्यास्ताम् | तुद्यासुः |

| | | | |
|---|---|---|---|
| **मध्यमपुरुषः** | तुद्याः | तुद्यास्तम् | तुद्यास्त |
| **उत्तमपुरुषः** | तुद्यासम् | तुद्यास्व | तुद्यास्म |

आत्मनेपदे -तुत्सीष्ठ-तुतुत्सीयास्ताम्- तुत्सीरन् इत्यदीनि रूपाणि।

**लुङ्लकारः**

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| **प्रथमपुरुषः** | अतौत्सीत् | अतौत्ताम् | अतौत्सुः |
| **मध्यमपुरुषः** | अतौत्सीः | अतौत्तम् | अतौत्त |
| **उत्तमपुरुषः** | अतौत्सम् | अतौत्स्व | अतौत्स्म |

आत्मनेपदे -अतुत्त-अतुत्साताम्- अनुत्सत इत्यदीनि रूपाणि।

**लृङ्लकारः**

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| **प्रथमपुरुषः** | अतोत्स्यत् | अतोत्स्यताम् | अतोत्वन् |
| **मध्यमपुरुषः** | अतोत्स्यः | अतोत्स्यतम् | अतोत्स्यत |
| **उत्तमपुरुषः** | अतोत्स्यम् | अतोत्स्याव | अतोत्स्याम |

आत्मनेपदे- अतोत्स्यत - अतोत्स्येताम् - अतोत्स्यन्त इत्यादीनि रूपाणि।

## 2.2.6 रुधादिगणः

शपं बाधित्वा श्नम् स्यात्

तिङन्तप्रकरणे सप्तमः गणः भवति रुधादिगणः। अस्य गणपाठस्य प्रथमः धातुः 'रुधिर्' आवरणे अस्ति, अनेन कारणेन अस्य गणस्य नाम रुधादिगणः अस्ति। पाणिनीयधातुपाठे १४३८ तः १४६२ यावत् धातवः रुधादिगणस्थ धातवः सन्ति। अस्य गणपाठस्य विकरणप्रत्ययः 'श्नम्' अस्ति। कर्त्रर्थके सार्वधातुके लट्, लोट्, लङ्, विधिलिङ् लकारेषु प्रत्ययेषु परेषु धातुभ्यः श्नम् विकरणप्रत्ययः भवति। श्नम् इत्यत्र 'लशक्वतद्धिते इत्यनेन सूत्रेण शकारस्य ततः 'हलन्त्यम्' इत्यनेन सूत्रेण मकारस्य इत्संज्ञा भवति 'न' इति श्ष्यते। श्नम् प्रत्ययः मित् अस्ति। अस्मिन् प्रकरणे दश सूत्राणि सन्ति। अस्मिन् गणे अनेके धातवः सन्ति। रुधिर् धातोः रुधाघिभ्यः श्नम्, श्नसोरल्लोपः इति सूत्रद्वयमेवाधिकतया प्रवर्तते।अन्यत्सर्वं पूर्ववदेव। उदाहरणाय लट् सूचयति।

## रुध् धातोः परस्मैपदरूपाणि

### लट्लकारः

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | रुणद्धि | रुन्धः | रुन्धन्ति |
| मध्यमपुरुषः | रुणत्सि | रुन्धः | रुन्ध |
| उत्तमपुरुषः | रुणध्मि | रुन्ध्वः | रुन्ध्मः |

आत्मनेपदि तु रुन्धे-रुन्धाते-रुन्धते इत्यादीनि रूपाणि।

### लिट्लकारः

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | रुरोध | रुरुधतुः, | रुरुधुः |
| मध्यमपुरुषः | रुरोधिथ | रुरुधथुः | रुरुध |
| उत्तमपुरुषः | रुरोध | रुरुधिव | रुरुधिम |

आत्मनेपदि तु रुरुधे- रुरुधाते- रुरुधिरे इत्यादीनि रूपाणि।

### लुट्लकारः

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | रोद्धा | रोद्धारौ | रोद्धारः |
| मध्यमपुरुषः | रोद्धासि | रोद्धास्थः | रोद्धास्थ |
| उत्तमपुरुषः | रोद्धास्मि | रोद्धास्वः | रोद्धास्मः |

आत्मनेपदि तु रोद्धा - रोद्धारौ - रोद्धारः इत्यादीनि रूपाणि।

### लोट्लकारः

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | रुणद्धु- रुन्द्धात् | रुन्द्धाम् | रुन्धन्तु |
| मध्यमपुरुषः | रुन्द्धि-रुन्द्धात् | रुन्द्धाम् | रुन्द्ध |
| उत्तमपुरुषः | रुणधानि | रुणधाव | रुणधाम |

आत्मनेपदि तु आत्मनेपद में- रुन्धाम्-रुन्धाम्- रुन्धाताम् - रुन्धताम् इत्यादीनि रूपाणि।

### लङ्लकारः

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| **प्रथमपुरुषः** | अरुन्द्ध | अरुन्धाताम् | अरुन्धन् |
| **मध्यमपुरुषः** | अरुन्धाः | अरुन्धाथाम् | अरुन्द्ध्वम् |
| **उत्तमपुरुषः** | अरुन्धि | अरुन्ध्वहि | अरुन्ध्महि |

आत्मनेपदि तु अरुन्ध-अरुन्ध, अरुन्धाताम्, अरुन्धत इत्यादीनि रूपाणि।

### विधिलिङ्लकारः

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| **प्रथमपुरुषः** | रुन्ध्यात् | रुन्ध्याताम् | रुन्ध्युः |
| **मध्यमपुरुषः** | रुन्ध्याः | रुन्ध्यातम् | रुन्ध्यात |
| **उत्तमपुरुषः** | रुन्ध्याम् | रुन्ध्याव | रुन्ध्याम |

आत्मनेपदि तु रुन्धीत- रुन्धीयाताम्- रुन्धीरन् इत्यादीनि रूपाणि।

### आशिर्लिङ्लकारः

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| **प्रथमपुरुषः** | रुध्यात् | रुध्यास्ताम् | रुध्यासुः |
| **मध्यमपुरुषः** | रुध्याः | रुध्यास्तम् | रुध्यास्त |
| **उत्तमपुरुषः** | रुध्यासम् | रुध्यास्व | रुध्यास्म |

आत्मनेपदि तु रुत्सीष्ट - रुत्सीयास्ताम् - रुत्सीरन् इत्यादीनि रूपाणि।

### लुङ्लकारः

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| **प्रथमपुरुषः** | अरुधत् | अरुधताम् | अरुधन् |
| **मध्यमपुरुषः** | अरुधः | अरुधतम् | अरुधत, |
| **उत्तमपुरुषः** | अरुधम् | अरुधाव | अरुधाम |

आत्मनेपदि तु  अरुद्ध-अरुत्साताम्- अरुत्सत  इत्यादीनि रूपाणि।

**लृङ्लकारः**

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| **प्रथमपुरुषः** | अरोत्स्यत् | अरोत्स्यताम् | अरोत्स्यन् |
| **मध्यमपुरुषः** | अरोत्स्यः | अरोत्स्यतम् | अरोत्स्यत |
| **उत्तमपुरुषः** | अरोत्स्यम् | अरोत्स्याव | अरोत्स्याम |

आत्मनेपदि तु अरोत्स्यत-अरोत्स्येताम्-अरोत्स्यन्त इत्यादीनि रूपाणि।

## 2.2.7 तनादिगणः

शपं बाधित्वा उः स्यात्

तिङन्त प्रकरणे अष्टमः गणपाठः तनादिगणः अस्ति। अस्य गणपाठस्य प्रथमः धातुः 'तनु' विस्तारे अस्ति। अनेन कारणेन अस्य गणस्य नाम तनादिगणः इति। पाणिनीयधातुपाठे १४६३ तः १४७२ यावत् धातवः तनादिगणे सन्ति। अस्य गणपाठस्य विकरणप्रत्ययः 'उ' अस्ति। तनादिगणे तनु विस्तारे ,ष्णु दाने, क्षणु हिंसायाम्, क्षिणु हिंसायाम्, तृणु अदने, वनु याचने, मनु अवबोधने, डुकृञ् करणे इत्यदयः धातवः सन्ति। तनादिकृञ्भ्य उः इत्यनेन सूत्रेण तनादेः उप्रत्ययः स्यादित्यर्थः। तनादिगणस्य विकरणः उः अस्ति। कर्त्रर्थके लट्, लोट्, लङ् विधिलिङ् लकारेषु परेषु एते धातव उ विकरणः स्यात्। अयं उविकरणः आर्धधातुकः। अतः अत्र आर्धधातुकविषयककार्याणि भवन्ति। आर्धधातुकं शेषः  इति सूत्रेण तिङ्शिद्भ्यो अन्यो धातारिति विहितः प्रत्ययः आर्धधातुकसंज्ञः स्यात्। अनेन सूत्रेण तिङ्शिभिन्नत्वे सति 'उ' विकरणस्य आर्धधातुकसंज्ञा भवति। अस्मिन् प्रकरणे एकादश सूत्राणि प्रतिपादितानि।

**तन् धातोः परस्मैपदरूपाणि**

**लट्लकारः**

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| **प्रथमपुरुषः** | तनोति | तनुतः | तन्वन्ति |
| **मध्यमपुरुषः** | तनोषि | तनुथः | तनुथ |
| **उत्तमपुरुषः** | तनोमि | तनुवः/ तन्वः | तनुमः/तन्मः |

आत्मनेपदे तनुते-तन्वाते-तन्वते इत्यदीनि रूपाणि।

**लिट्लकारः**

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| **प्रथमपुरुषः** | ततान | तेनतुः | तेनुः |
| **मध्यमपुरुषः** | तेनिथ | तेनथुः | तेन |
| **उत्तमपुरुषः** | ततान-ततन | तेनिव | तेनिम |

आत्मनेपदे - तेने-तेनाते-तेनिरे इत्यदीनि रूपाणि।

**लुट्लकारः**

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| **प्रथमपुरुषः** | तनिता | तनितारौ | तनितारः |
| **मध्यमपुरुषः** | तनितासि | तनितास्थः | तनितास्थ |
| **उत्तमपुरुषः** | तनितास्मि | तनितास्वः | तनितास्मः |

आत्मनेपदे - तनिता - तनितारौ- तनितारः इत्यदीनि रूपाणि।

**लृट्लकारः**

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| **प्रथमपुरुषः** | तनिष्यति | तनिष्यतः | तनिष्यन्ति |
| **मध्यमपुरुषः** | तनिष्यसि | तनिष्यथः | तनिष्यथ |
| **उत्तमपुरुषः** | तनिष्यामि | तनिष्यावः | तनिष्यामः |

आत्मनेपदे -तनिष्यते, तनिष्येते, तनिष्यन्ते इत्यदीनि रूपाणि।

**लोट्लकारः**

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| **प्रथमपुरुषः** | तनोतु/ तनुतात् | तनुताम् | तन्वन्तु |
| **मध्यमपुरुषः** | तनु/ तनुतात् | तनुतम् | तनुत |
| **उत्तमपुरुषः** | तनवानि | तनवाव | तनवाम |

आत्मनेपदे - तनुता, तन्वाताम्, तन्वतम् इत्यदीनि रूपाणि।

**लङ्लकारः**

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| **प्रथमपुरुषः** | अतनुत् | अतनुताम् | अतन्वन् |
| **मध्यमपुरुषः** | अतनोः | अतनुतम् | अतनुत |
| **उत्तमपुरुषः** | अतनवम् | अतनुव/अतन्व | अतनुम |

आत्मनेपदे - अतनुता, अतन्वाताम्, अतन्वत इत्यदीनि रूपाणि।

**विधिलिङ्लकारः**

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| **प्रथमपुरुषः** | तनुयात् | तनुयाताम् | तनुयुः |
| **मध्यमपुरुषः** | तनुयाः | तनुयातम् | तनुयात, |
| **उत्तमपुरुषः** | तनुयाम् | तनुयाव | तनुयाम |

आत्मनेपदे- तन्वीत, तन्वीयाताम्, तन्वीरन् इत्यदीनि रूपाणि।

**आशिर्लिङ्लकारः**

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| **प्रथमपुरुषः** | तन्यात् | तन्यास्ताम् | तन्यासुः |
| **मध्यमपुरुषः** | तन्याः | तन्यास्तम् | तन्यास्त |
| **उत्तमपुरुषः** | तन्यासम् | तन्यास्व | तन्यास्म |

आत्मनेपदे-तनिषीष्ट, तनिषीयास्ताम्, तनिषीरन् इत्यदीनि रूपाणि।

**लुङ्लकारः**

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| **प्रथमपुरुषः** | अतानीत् | अतानिष्टाम् | अतानिषुः |
| **मध्यमपुरुषः** | अतानीः | अतानिष्टम् | अतानिष्ट |
| **उत्तमपुरुषः** | अतानिषम् | अतानिष्व | अतानिष्म |

आत्मनेपदे- अतत-अतनिष्ट, अतनिषाताम्, अतनिषत इत्यदीनि रूपाणि।

### लृङ्लकारः

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| **प्रथमपुरुषः** | अतनिष्यत् | अतनिष्यताम् | अतनिष्यन् |
| **मध्यमपुरुषः** | अतनिष्यः | अतनिष्यतम् | अतनिष्यत |
| **उत्तमपुरुषः** | अतनिष्यम् | अतनिष्याव | अतनिष्याम |

आत्मनेपदे-अतनिष्यत, अतनिष्येताम्, अतनिष्यन्त इत्यादीनि रूपाणि।

## 2.2 8 क्रयादिगणः

शपं बाधित्वा श्ना स्यात्

तिङन्तप्रकरणे नवमप्रकरणं भवति क्रयादिगणः। अस्य गणपाठस्य प्रथमो धातुः 'डुक्रीञ् द्रव्यविनिमये अस्ति। अनेन कारणेन अस्य गणस्य नाम क्रयादिगणः अस्ति। पाणिनीयधातुपाठे १४७३ तः १५३३ यावत् धातवः क्रयादिगणस्य धातवः सन्ति। अस्य गणपाठस्य विकरण: 'श्नाप्रत्ययः' अस्ति। डुक्रीञ् द्रव्यविनिमये, प्रीञ् तर्पणे कान्तौ च, श्रीञ् पाके, मीञ् हंसायाम्, षिञ् बन्धने, स्कुञ् आप्लवणेन, युञ् बन्धने, स्कञ् शब्दे, पूञ् पवने, स्तृञ् आच्छादने, लूञ् छेदने, कृञ् हिंसायाम्, वृञ् वरणे, धूञ् कम्पने, पृ पालनपूरणयोः, वृङ् सम्भक्तौ, ज्ञा अवबोधने, कुष् निष्कर्षे, अश् भोजने, मुष् स्तेये इत्यादयः सर्वे क्रयादिगणस्य धातवः सन्ति। क्रयादिभ्यः श्ना इत्यनेन कर्त्रर्थे सार्वधातुके परे क्रयादिभ्यः श्ना प्रत्ययः स्यात् स्वार्थे। कर्त्रर्थक सार्वधातुके लट्, लोट्, लङ्, विधिलिङ् लकारेषु प्रत्ययेषु परेषु श्ना विकरणः भवति।

### क्री धातोः परस्मैपदरूपाणि

### लट्

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| **प्रथमपुरुषः** | क्रीणाति | क्रीणीतः | क्रीणन्ति |
| **मध्यमपुरुषः** | क्रीणासि | क्रीणीथः | क्रीणीथ |
| **उत्तमपुरुषः** | क्रीणामि | क्रीणीवः | क्रीणीमः |

**लिट्लकारः**

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| **प्रथमपुरुषः** | चिक्राय | चिक्रियतुः | चिक्रियुः |
| **मध्यमपुरुषः** | चिक्रयिथ-चिक्रेय | चिक्रियथुः | चिक्रिय |
| **उत्तमपुरुषः** | चिक्राय-चिक्रय | चिक्रियिव | चिक्रियिम |

आत्मनेपदे चिक्रिये, चिक्रियाते, चिक्रियिरे इत्यादि रूपाणि।

**लुट्लकारः**

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| **प्रथमपुरुषः** | क्रेता | क्रेतारी | क्रेतारः |
| **मध्यमपुरुषः** | क्रेतासि | क्रेतास्थः | क्रेतास्थ |
| **उत्तमपुरुषः** | क्रेतास्मि | क्रेतास्वः | क्रेतास्मः |

आत्मनेपदे क्रेता, क्रेतारौ, क्रेतारः इत्यादि रूपाणि।

**लृट्लकारः**

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| **प्रथमपुरुषः** | क्रेष्यति | क्रेष्यतः | क्रेष्यन्ति |
| **मध्यमपुरुषः** | क्रेष्यसि | क्रेष्यथः | क्रेष्यथ |
| **उत्तमपुरुषः** | क्रेष्यामि | क्रेष्यावः | क्रेष्यामः |

आत्मनेपदे क्रेष्यते, क्रेष्येते, क्रेष्यन्ते इत्यादि रूपाणि।

**लोट्लकारः**

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| **प्रथमपुरुषः** | क्रीणातु-क्रीणीतात् | क्रोणीताम् | क्रीणन्तु |
| **मध्यमपुरुषः** | क्रीणीहि-क्रोणीतात् | क्रीणीतम् | क्रीणीत |
| **उत्तमपुरुषः** | क्रीणानि | क्रीणाव | क्रीणाम |

आत्मनेपदे क्रीणीताम्, क्रीणाताम्, क्रीणताम् इत्यादि रूपाणि।

**लङ्लकारः**

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| **प्रथमपुरुषः** | अक्रीणात् | अक्रीणीताम् | अक्रीणीरन् |
| **मध्यमपुरुषः** | अक्रीणाः | अक्रीणीतम् | अक्रीणीत |
| **उत्तमपुरुषः** | अक्रीणाम् | अक्रोणीव | अक्रीणीम |

आत्मनेपदे अक्रीणीत, अक्रीणाताम्, अक्रोणत इत्यादि रूपाणि।

**विधिलिङ्लकारः**

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| **प्रथमपुरुषः** | क्रीणीयात् | क्रीणीयाताम् | क्रीणीयुः |
| **मध्यमपुरुषः** | क्रोणीयाः | क्रीणीयातम् | क्रीणीयात |
| **उत्तमपुरुषः** | क्रीणीयाम् | क्रोणीयाव | क्रोणीयाम |

आत्मनेपदे क्रीणीत, क्रोणीयाताम्, क्रोणीरन् इत्यादि रूपाणि।

**आशीर्लिङ्लकारः**

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| **प्रथमपुरुषः** | क्रीयात् | क्रीयास्ताम् | क्रीयासुः |
| **मध्यमपुरुषः** | क्रीयाः | क्रीयास्तम् | क्रीयास्त |
| **उत्तमपुरुषः** | क्रीयासम् | क्रीयास्व | क्रीयास्म |

आत्मनेपदे क्रेषीष्ट, क्रेषीयास्ताम्, क्रेषीरन् इत्यादि रूपाणि।

**लुङ्लकारः**

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| **प्रथमपुरुषः** | अक्रैषीत् | अक्रैष्टाम् | अक्रैषुः |
| **मध्यमपुरुषः** | अक्रैषीः | अक्रैष्टम् | अक्रैष्ट |
| **उत्तमपुरुषः** | अक्रैषम् | अक्रैष्व | अक्रैष्म |

आत्मनेपदे अक्रेष्ट, अक्रेषाताम्, अक्रेषत इत्यादि रूपाणि।

**लृङ्लकारः**

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| **प्रथमपुरुषः** | अक्रेष्यत् | अक्रेष्यताम् | अक्रेष्यन् |
| **मध्यमपुरुषः** | अक्रेष्यः | अक्रेष्यतम् | अक्रेष्यत |
| **उत्तमपुरुषः** | अक्रेष्यम् | अक्रेष्याव | अक्रेष्याम |

आत्मनेपदे अक्रेष्यत, अक्रेष्येताम्, अक्रेष्यन्त इत्यादि रूपाणि।

## 2.2.9 चुरादिगणः

विकरणं न भवति

अत्र दशमप्रकरणे, अन्येभ्यो नवप्रकरणेभ्यः विशिष्टः वर्तते चुरादिगणः। अस्य विशेषता एतदस्ति अन्येषु प्रकरणेषु धातोः लकारस्य च मध्ये शपादीनि विकरणानि भवन्ति, परन्तु अस्मिन् चुरादिप्रकरणे मूलधातोः विकरणं न भवति। अत्र मूलधातोः लकारागमनात् पूर्वमेव 'णिच्-प्रत्ययो' भवति। तदनन्तरं तस्य ण्यन्तस्य धातुसत्ता 'सनाद्यन्ता धातवः' इत्यनेन भवति। धातुसञ्ज्ञायां शप् विकरणं भवति। 'णिच्'प्रत्ययः कस्मिश्चित् अर्थे न भवति, प्रत्युत, प्रकृतेः (मूलधातोः) अर्थं परिपुष्टं कर्तुं विहितः भवति। कौमुद्यां चुरादिप्रकरणे त्रयः धातवः सन्ति। ते च - चुर स्तेये, कथावाक्यप्रबन्धे, गण संस्थाने। पाणिनीयगणपाठे चुरादिगणे बहवः धातवः सन्ति।

**चुर् धातोः परस्मैपदरूपाणि**

**लट्लकारः**

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| **प्रथमपुरुषः** | चोरयति | चोरयतः | चोरयन्ति |
| **मध्यमपुरुषः** | चोरयसि | चोरयथः | चोरयथ |
| **उत्तमपुरुषः** | चोरयामि | चोरयावः | चोरयामः |

**लिट्लकारः कृ इत्यस्य अनुप्रयोगः**

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| **प्रथमपुरुषः** | चोरयाञ्चकार | चोरयाञ्चक्रतुः | चोरयाञ्चक्रुः |
| **मध्यमपुरुषः** | चोरयाञ्चकर्थ | चोरयाञ्चक्रथुः | चोरयाञ्चक्र |

**उत्तमपुरुषः** चोरयाञ्चकार-चोरयाञ्चकर,चोरयाञ्चकृव,चोरयाञ्चक्रम

आत्मनेपदे चोरयाञ्चक्रे, चोरयाञ्चक्राते, चोरयाञ्चक्रिरे इत्यादि रूपाणि।

**लिट्लकारः भू इत्यस्य अनुप्रयोगः**

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| **प्रथमपुरुषः** | चोरयाम्बभूव, | चोरयाम्बभूवतुः, | चोरयाम्बभूवुः |
| **मध्यमपुरुषः** | चोरयाम्बभूविथ, | चोरयाम्बभूवथुः, | चोरयाम्बभूव |
| **उत्तमपुरुषः** | चोरयाम्बभूव, | चोरयाम्यभूविव, | चोरयाम्बभूविम |

**लिट्लकारः अस् इत्यस्य अनुप्रयोगः**

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| **प्रथमपुरुषः** | चोरयामास | चोरयामासतुः | चोरयामासुः |
| **मध्यमपुरुषः** | चोरयामासिथ | चोरयामासथुः | चोरयामास |
| **उत्तमपुरुषः** | चोरयामासम् | चोरयामासिव | चोरयामासिम |

**लुट्लकारः**

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| **प्रथमपुरुषः** | चोरयिता | चोरयितारौ | चोरयितारः |
| **मध्यमपुरुषः** | चोरयितासि | चोरयितास्थः | चोरयितास्थ |
| **उत्तमपुरुषः** | चोरयितास्मि | चोरयितास्वः | चोरयितास्मः |

आत्मनेपदे चोरयिता, चोरयितारौ, चोरयितारः इत्यादि रूपाणि।

**लृट्लकारः**

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| **प्रथमपुरुषः** | चोरयिष्यति | चोरयिष्यतः | चोरयिष्यन्ति |
| **मध्यमपुरुषः** | चोरयिष्यसि | चोरयिष्यथः | चोरयिष्यथ |
| **उत्तमपुरुषः** | चोरयिष्यामि | चोरयिष्यावः | चोरयिष्यामः |

आत्मनेपदे चोरयिष्यते, चोरयिष्येते, चोरयिष्यन्ते इत्यादि रूपाणि।

**लोट्लकारः**

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| **प्रथमपुरुषः** | चोरयतु-चोरयतात्, | चोरयताम् | चोरयन्तु |
| **मध्यमपुरुषः** | चोरय-चोरयतात्, | चोरयतम् | चोरयत |
| **उत्तमपुरुषः** | चोरयाणि, | चोरयाव | चोरयाम |

आत्मनेपदे चोरयताम्, चोरयेताम्, चोरयन्ताम् इत्यादि रूपाणि।

**लङ्लकारः**

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| **प्रथमपुरुषः** | अचोरयत् | अचोरयताम् | अचोरयन् |
| **मध्यमपुरुषः** | अचोरयः | अचोरयतम् | अचोरयत |
| **उत्तमपुरुषः** | अचोरयम् | अचोरयाव | अचोरयामा |

आत्मनेपदे अचोरयत्, अचोरयेताम्, अचोरयन्त इत्यादि रूपाणि।

**विधिलिङ्लकारः**

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| **प्रथमपुरुषः** | चोरयेत् | चोरयेताम् | चोरयेयुः |
| **मध्यमपुरुषः** | चोरयेः | चोरयेतम् | चोरयेत |
| **उत्तमपुरुषः** | चोरयेयम् | चोरयेव | चोरयेम |

आत्मनेपदे चोरयेत, चोरयेयाताम्, चोरयेरन् इत्यादि रूपाणि।

**आशीर्लिङ्लकारः**

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| **प्रथमपुरुषः** | चोर्यात् | चोर्यास्ताम् | चोर्यासुः |
| **मध्यमपुरुषः** | चोर्याः | चोर्यास्तम् | चोर्यास्त |
| **उत्तमपुरुषः** | चोर्यासम् | चोर्यास्व | चोर्यास्म |

आत्मनेपदे चोरयिषीष्ट, चोरयिषीयास्ताम्, चोरयिषीरन् इत्यादि रूपाणि।

**लुङ्लकारः**

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| **प्रथमपुरुषः** | अचूचुरत् | अचूचुरताम् | अचूचुरन् |
| **मध्यमपुरुषः** | अचूचुरः | अचूचुरतम् | अचूचुरत |
| **उत्तमपुरुषः** | अचूचुरम् | अचूचुराव | अचूचुराम |

आत्मनेपदे अचूचुरत, अचूचुरेताम्, अचूचुरन्त इत्यादि रूपाणि।

**लृङ्लकारः**

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| **प्रथमपुरुषः** | अचोरयिष्यत् | अचोरविष्यताम् | अचोरयिष्यन् |
| **मध्यमपुरुषः** | अचोरयिष्यः | अचोरयिष्यतम् | अचोरयिष्यत |
| **उत्तमपुरुषः** | अचोरयिष्यम् | अचारयिष्याव | अचारयिष्याम |

आत्मनेपदे अचोरयिष्यत, अचोरयिष्येताम्, अचोरयिष्यन्त इत्यादि रूपाणि।

## Summarised Overview

अस्मिन् एकके अदादि-जुहोत्यादि- दिवादि-स्वादि-तुदादि-रुधादि-तनादि-क्र्यादि-चुरादि इत्येतेषु गणेषु परिचयः कृतः। विशिष्टं करणं विकरणम्। धातूनां कर्त्रर्थे भिन्नानि विकरणानि वर्तन्ते। अत्र भ्वादिप्रकरणे शबादि विकरणं अदिप्रभृतिभ्यः शपः इत्यनेन लुक् भवति, जुहोत्यादि गणे विकरणं शपः श्लुः भवति, दिवादिप्रकरणे श्यन् विकरणं दिवादिभ्यः श्यन् सूत्रेण स्यात् , स्वादिगणे स्वादिभ्यः श्नु इति सूत्रेण विकरणं भवति, तुदादिगणे तुदादिभ्यः शः इत्यनेन विकरणं भवति, रुधादिगणे रुधादिभ्यः श्नम् इत्यनेन विकरणं भवति, तनादिप्रकरणे तनादिभ्यः उः इत्यनेन विकरणं स्यात्, क्र्यादिप्रकरणे क्र्यादिभ्यः श्ना इत्यनेन विकरणं च सिद्धाः किन्तु चुरादिगणे विकरणं न भवति, लकारात् पूर्वं णिच् प्रत्ययः स्यात्। नवगणधातून् अर्थान् लकाराणां रूपाणि च अत्र प्रतिपादितानि।

# Assignments

1. जुहोत्यादि प्रकरणस्य वैशिष्ट्यं किम्?
2. दिवादिगणे शपं प्रबाध्य कः प्रत्ययः आयाति? सूत्रं किम्? व्याख्यात।
3. श्यन् प्रत्ययः विधीयमानं सूत्रं किं व्याख्यात?
4. स्वादिगणे प्रथमः धातुः कः ? तस्य रूपाणि च लिखत।
5. उः इति विकरणप्रत्ययविधायकं सूत्रं किम् ? व्याख्यात।
6. स्वादि- तुदादिगणयोः भेदः कः?
7. दिवादिप्रकरणं चुरादि प्रकरणं च निरूपयत?

# Suggested Readings


1. लघुसिद्धान्तकौमुदी. वरदरादः, चौखम्बा संस्कृत सीरीस अकादमि, वाराणसी २००५.
2. पदसंस्कारचन्द्रिका. कैकुलका रामवारियर्, केरलसाहित्य अकादमि, तृश्शूर
3. लघुपाणिनीयम्. ए आर् राजराजवर्मा, केरलसर्वकलाशाला, तिरुवनन्तपुरम्
4. पाणिनीयप्रद्योतम्. ऐसि चाक्को. भाषा इन्स्टिट्यूट, तिरुवनन्वपुरम्
5. प्रक्रियाभाष्यम्. जोन् कुन्नपप्लि, नाषणल् बुक् स्टाल्, कोट्टयम्।


# References


1. लघुसिद्धान्तकौमुदी,वरदराजा चौखम्बा संस्कृत सीरीस अकादमि, वाराणसी २००५.
2. श्रीवरदराजाचार्यकृतः लघुसिद्धान्तकौमुदी 'बालमनोरमा' संस्कृत-हिन्दीटीका सहितपं० श्रीसूर्यनारायणशुक्लः प्रकाशक: वाराणसि संस्कृत संस्थान, वाराणसी १०००
3. श्रीमद्वरदराजाचार्यप्रणीता लघुसिद्धान्तकौमुदी श्रीधरमुखोल्लासिनी- हिन्दी- व्याख्या समन्विता भाग -2 व्याख्याकारः गोविन्द प्रसाद शर्माचौखम्बा सुरभारती प्रकाशन वाराणसी २००७
4. लघुसिद्धान्तकौमुदी द्वितीयो भागः, प्रोफसर् आर् वासुदेवन् पोट्टि, सर्वकारीय संस्कृतकलालयः, तृप्पूणित्तुरा, १९९३

## Space for Learner Engagement for Objective Questions

Learners are encouraged to develop objective questions based on the content in the paragraph as a sign of their comprehension of the content. The Learners may reflect on the recap bullets and relate their understanding with the narrative in order to frame objective questions from the given text. The University expects that 1 - 2 questions are developed for each paragraph. The space given below can be used for listing the questions.

UNIT 3

# ण्यन्तसन्नन्त आत्मनेपदी परस्मैपदी लकारार्थः

## Learning Outcomes

- णिच् प्रत्ययस्य सामान्यपरिचयं, तेषां रूपाणां प्रयोगक्षमतां च जानाति।
- सन्प्रत्ययस्य सामान्यपरिचयं द्वित्वविधानमं च अवगच्छति।
- आत्मनेपदविधायकसूत्राणाम् अवगमनम्।
- परस्मैपदविधायकसूत्राणां परिचयः।
- लकारार्थप्रकरणस्य सामान्यपरिचयः।

## Background

अस्मिन् खण्डे द्वितीये एकके कतिपयानां धातूनां प्रयोगमधिकृत्य अधीतम्। इदानीं ण्यन्तप्रकरणं, सन्नन्तप्रकरणं, परस्मैपदप्रकरणं, आत्मनेपदप्रकरणं, लकारार्थप्रकरणं पठामः।

ण्यन्तप्रकरणं - धातुभ्यः प्रेरणार्थे णिच् प्रत्ययः प्रयुज्यते। धातोः णिच् प्रत्ययविधानेन(प्रेरणार्थे) कर्तुः प्रेरणादशायां क्रियारूपाणि निर्मीयन्ते। यथा- पठ् - पाठयति।

सन्नन्तप्रकरणं - सनाद्यन्ता धातवः इत्यनेन धातुसंज्ञा विधीयते। ततः लटादि लकाराणां स्थाने धातुभ्यः इच्छार्थे सन् प्रत्ययः विकल्पेन भवति। यथा- पठितुं इच्छा पिपठिषति।

धातवः सामान्येन त्रिधा। आत्मनेपदिनः, परस्मैपदिनः, उभयपदिनः चेति। केचन धातवः आत्मनेपदिनः - स्वरितः कर्त्रभिप्राये क्रियाफले, अनुदात्तङित आत्मनेपदम् इति सूत्राभ्यां विहितम्। आत्मनेपदहीनात् धातोः परस्मैपदित्वम्। केषाञ्चित् धातूनाम् उभयत्वमपि सिद्धम्। अयं सामान्यः नियमाः। किन्तु केषुचिदवसरेषु व्यतियानमागच्छति। उपसर्गयोगेन अर्थात् उपसर्गेण धात्वर्थे रूपे पदे च बलात् परिवर्तनं भवति। आत्मनेपदिधातोः परस्मैपदित्वेन परिवर्तनम्। परस्मैपदिधातोः आत्मनेपदित्वेन परिवर्तनमिति उपसर्गस्य प्रभावेण पदपरिवर्तनमिति।

लकारार्थप्रकरणं - लकाराणां कासुचित् विशिष्टासु अवस्थासु व्यतियानमायाति। सामान्यतया वर्तमानकाले लट्,भूतकाले लङ् लुङ् लिट् वा, भविष्यकाले लृट्, विध्यार्थादिषु विधिलिङ् लोट् वा आशंसायां लोट्

आशिलिंङ् वा, क्रियानिष्पत्तौ लृङ् च प्रयुज्यन्ते। कदाचित् अस्य नियमस्य व्यतियानं सूचयन्तः सूत्राणि लकारप्रकरणे सन्ति। तानि वयं सोत्साहं पठामः।

## Keywords

णिच्, सन्, धातुः, उपसर्गः, लकारः, आत्मनेपदं, परस्मैपदं, पुगागमः, कर्मव्यतिहारः, समस्तृतीयायुक्तात्, अभिप्रत्यतिभ्यः क्षिपः, हेतुहेतुमतोर्लिङ्

## Discussion

### 2.3.1 ण्यन्तप्रकरणम्

कर्ता

**1. स्वतन्त्रः कर्ता। (१.४.५४)**

स्वतन्त्रः कर्ता इति द्विपदं सूत्रमिदम्। क्रियायां स्वातन्त्र्येण विवक्षितोऽर्थः कर्ता स्यात् इति सूत्रार्थः। यथा रामः पठति इत्यत्र रामः कर्ता भवति।

**2. तत्प्रयोजको हेतुश्च (१.४.५५)**

हेतुः कर्तृ च संज्ञाद्वयं

तत्प्रयोजकः हेतुः च इति त्रिपदं सूत्रमिदम्। कर्तुः प्रयोजको हेतुसंज्ञः कर्तृसंज्ञश्च स्यात्। तत्प्रयोजकः इति प्रथमैकवचनम् हेतुः इति प्रथमैकवचनम्। च इति अव्ययपदं भवति। तस्य प्रयोजकः तत्प्रयोजकः। तत् पदेन अत्र 'स्वतन्त्रः कर्त्ता' इति सूत्रात् कर्त्ता गृह्यते। 'च' इत्यनेनापि कर्त्ता एवं गृह्यते। अतः प्रयोजकस्य (प्रेरकस्य) हेतुसंज्ञा कर्तृसंज्ञा च संज्ञाद्वयं भवति इति अर्थः। हेतुमति च इत्यादावस्य प्रयोजनम्।

**3. हेतुमति च (३.१.२८)**

णिच्प्रत्ययः

हेतुमति च इति द्विपदं सूत्रमिदम्। प्रयोजकव्यापारे प्रेषणादौ वाच्ये धातोर्णिच् स्यात् इति सूत्रार्थः। णिच् इत्यनुवर्तते। हेतुमति इति सप्तम्यैकवचनम्। हेतुः (प्रयोजकः) अस्य अस्ति इति हेतुमान् तस्मिन् प्रयोजकनिष्ठप्रेषणादिव्यापारे। अतः प्रयोजकस्य व्यापारे प्रेषणादौ वाच्ये धातोः णिच् प्रत्ययो स्यात् इति सूत्रार्थः। यथा- भवन्तं प्रेरयति भावयति। 'भूवादयो धातवः', 'सनाद्यन्तः धातवः' इति सूत्रद्वयेन विहितौ धातुभिः च णिच् स्यात्।

**भावयति ।**

प्रयोजकनिष्ठायां प्रेरणायां भूधातोः 'हेतुमति च' इति सूत्रेण णिच् प्रत्यये अनुबन्धलोपे भू - इ। 'अचो ञ्णिति' इति सूत्रेण भू इत्यस्य उकारस्य वृद्धौ 'एचोऽयवायावः' इत्यनेन आवादेशे 'भावि' इति जाते 'सनाद्यन्ताः धातवः' इत्यनेन धातुसंज्ञायां लटि तिप्प्रत्यये सार्वधातुकत्वात् 'कर्तरि शप्' इति सूत्रेण शप्प्रत्यये अनुबन्धलोपे भावि अ ति। ततः 'सार्वधातुकार्धधातुकयोः' इति सूत्रेण गुणे अयादेशे संयोगे च भावयति इति रूपम्।

**4. ओः पुयण्ज्यपरे (७.४.८०)**

अभ्यासोकारस्य इत्वम्

ओः पुयण्जि अपरे इति पदच्छेदः। अनेन सूत्रेण इत्वं विधायते। सनि परे यदङ्गं तदवयवाभ्यासोकारस्य इत्स्यात् पवर्गयण्जकारेष्ववर्णपरेषु परतः इति सूत्रार्थः। ओः इति 'उ' इत्यस्य षष्ठ्येकवचनं, पुयण्जि इति सप्तम्यैकवचनं, पुश्च यण् च ज् च पुण्यजः, तस्मिन् पुयण्जि इति, अपरे इति सप्तम्यैकवचनम्। अः परो यस्मात् सः अपरः तस्मिन्। अत्र सनि अभ्यासस्य इत् इति च अनुवर्तते। अतः सनि परे यदङ्गं तदवयवाभ्यासस्य उकारस्य इत्वं स्यात् अवर्णपरकेषु पवर्गयण्जकारेषु परेषु इति अर्थः। यथा- अबीभवत्।

**अबीभवत् -**

भू धातोः 'हेतुमति च' इति णिच्प्रत्यये अनुबन्धलोपे 'भू - इ' इत्यत्र 'णिचश्च' 'सनाद्यन्ता धातवः' इति धातुसंज्ञायां 'लुङ्' इति सूत्रेण लुङ्लकारे तिप्प्रत्यये अनुबन्धलोपे 'इतश्च' इति सूत्रेण इकारलोपे 'लुङ्लङ्लृङ्क्ष्वडुदात्तः' इति अडागमे अनुबन्धलोपे अ भू इ त् इति जाते 'च्लि लुङि' इति सूत्रेण शपं प्रबाध्य च्लिप्रत्यये 'णिश्रिद्रुस्रुभ्यः कर्तरि चङ्' इत्यनेन चङ् प्रत्यये अनुबन्धलोपे अ भू इ अत् इति 'चङि' इति सूत्रेण भू इत्यस्य द्वित्वे अभ्याससंज्ञायां 'ह्रस्वः' इत्यनेन ह्रस्वे 'अभ्यासे चर्च' इत्यनेन भकारस्य बकारे कृते अबु भूइ अ त् इति स्थिते 'अचो ञ्णिति' इत्यनेन वृद्धौ आवादेशे अ बु भाव् इ अ त् इति जाते 'णौ चङ्युपधायाः ह्रस्वः' इति भकारोत्तरवर्त्तिनः आकारस्य ह्रस्वे 'णेरनिटि' इति णेः लोपे 'अ बु भव् अत्' 'सन्वल्लघुनि चङ्परेऽनग्लोपे' इति सन्वद् भावे 'ओः पुयज्यपरे' इति सूत्रेण अभ्यासोकारस्य इकारे 'दीर्घो लघोः' इति दीर्घे संयोगे अबीभवत् इति रूपम्।

### 5. अर्तिह्रीव्लीरीक्नुयीक्ष्माय्यातां पुङ् णौ (७.३.३६)

पुगागमः

त्रिपदं सूत्रमिदम्। अनेन सूत्रेण पुगागमः विधीयते। अर्ति, ह्री, व्ली, री, क्नूयी, क्ष्मायी, आकारान्तः धातुभ्यश्च पुगागमः णौ परे इति सूत्रार्थः। पुक् इत्यत्र प् इत्येव अवशिष्यते। पुगागमः कित्वात् स्था इत्यत्र आकारान्तात् धातोः अन्ते एव भवति। यथा- स्थापयति

**स्थापयति**

स्था धातोः 'हेतुमति च' इति सूत्रेण णिच्प्रत्यये अनुबन्धलोपे स्था इ। 'अर्तिह्रीव्लीरीक्नुयीक्ष्माय्यातां पुङ् णौ' इत्यनेन पुगागमे कित्वात् अन्तावयवे स्था प् इ। संयोगे स्थापि। धातुसंज्ञायां लट्लकारे तिप्प्रत्यये स्थापि ति। 'कर्तरि शप्' इति शपि स्था अ ति। इकारस्य गुणे अयादेशे च कृते स्थाप् अय् अति संयोगे स्थापयति इति रूपम्।

### 6. तिष्ठतेरित् (७.४.५)

ष्ठ इत्यङ्गस्य उपधायाः इकारदेशः

तिष्टतेः इत् इति द्विपदं सूत्रमिदम् । अनेन सूत्रेण इदादेशः विधीयते। उपधायाः इदादेशः स्यात् चङ् परे णौ इति सूत्रार्थः। तिष्टतेः इति षष्ठी एकवचनम् 'इत्' इति प्रथमैकवचनम् चेति। "उपधायाः चङ् परे णौ च इत्यनुवर्तते। अतः 'चङ् परे णौ परे ष्ठा इत्यङ्गस्य उपधायाः इकारादेशो स्यात्' इति सूत्रार्थः। यथा - अतिष्ठपत्

**अतिष्ठिपत्**

स्था धातोः णिच्प्रत्यये, पुगागमे धातुसंज्ञायां, 'स्थापि' इत्यवस्थायां धातुसंज्ञायां लुङ्लकारे, तिप्प्रत्यये, तिप् इत्यस्य इकारलोपे, अडागमे, च्लिप्रत्यये, तत्स्थाने चङादेशे, 'अ स्थाप् इ अत्'। अत्र 'णेरनिटि' इत्यनेन णेः लोपे 'तिष्ठतेरित्' इत्यनेन' स्थाप्' इत्यस्य उपधाभूतस्य आकारस्य इकारे 'अ स्थिप् अत्' इत्यत्र 'स्थिप्' इत्यस्य द्वित्वे अभ्याससंज्ञायां 'शर्पूर्वाः खयः' इति शर्पूर्वकस्य यवर्णस्य शेषे 'अ थि स्थिप् अत्' इति। अत्र 'अभ्यासे चर्च' इति अभ्यासथकारस्य 'तकारे' अ ति स्थिप् अत्' इति। अत्र 'आदेशप्रत्ययोः' इत्यनेन सकारस्य षत्वे 'ष्टुना ष्टुः' इति थकारस्य ठकारे संयोगे च 'अतिष्ठिपत्' इति रूपम्।

### 7. मितां ह्रस्वः (६.४.९२)

घटादीनां ज्ञपादीनां चोपधायाः ह्रस्वः

मितां ह्रस्वः इति द्विपदं सूत्रमिदम्। अनेन सूत्रेण ह्रस्वः विधीयते। घटादीनां ज्ञपादीनां चोपधायाः ह्रस्वः स्याण्णौ। मिताम् इति षष्ठीविभक्तिः, ह्रस्वः इति प्रथमा विभक्तिः। अत्र उपधा णौ इति च अनुवर्तते। यथा घटयति। ज्ञप ज्ञाने ज्ञापने च। ज्ञपयति।

**अजिज्ञपत्**

ज्ञप्धातोः णिचि ज्ञप् णिच्। उपधावृद्धौ 'मितां ह्रस्वः' इति ह्रस्वे ज्ञापि। तस्मात् धातुत्वात् लुङ्स्तिपि 'लुङ्लङ्लृङ्क्ष्वडुदात्तः' इत्याडागमे अ ज्ञापि ति। च्लिप्रत्यये णिश्रिद्रुस्रुभ्यः इति च्लेश्चङि 'णेरनिटि' इति णिर्लोपे अ ज्ञाप् अ ति। चङि इति द्वित्वे अभ्यासकार्ये 'सन्वल्लघुनि चङ्परेऽनग्लोपे' इति सूत्रेण सन्वद्भावे 'सन्यतः' इति इत्वे अजिज्ञपत्।

## 2.3.2 सन्नन्तप्रकरणम्

### 8. धातोः कर्मणः समानकर्तृकादिच्छायां वा (३.१.७)

सन्प्रत्ययः

धातोः कर्मणः समानकर्तृकात् इच्छायां वा इति पदच्छेदः। इषि कर्मणः इषिणैककर्तृकाद्धातोः सन् प्रत्ययो वा स्यादिच्छायाम् इति सूत्रार्थः। 'धातोः' इति पञ्चम्याः एकवचनम्, 'कर्मणः' इति पञ्चम्याः एकवचनम् समानकर्तकात् इत्यस्य समानः कर्त्ता यस्य तस्मात् पञ्चम्याः एकवचनम् 'इच्छायाम्' इति सप्तम्याः एकवचनम्, 'वा' इति। अव्ययपदं चेति। अत्र सन् इत्यनुवर्तते। यथा - पठितुमिच्छति पिपठिषति।

**पिपठिषति**

पठितुमिच्छति 'पिपठिषति' पठ व्यक्तायं वाचि 'धातोः कर्मणः समानकर्तृकादिच्छायां वा' इति सूत्रेण सन्प्रत्यये अनुबन्धलोपे 'आर्धधातुकं शेषः' इति सनः आर्धधातुकसञ्ज्ञायां 'आर्धधातुकस्येड् वलादेः' इति इडागमो पठ् इ स । अत्र 'सन्यङोः' इत्यनेन पठ् इत्यस्य द्वित्वे 'पठ् पठ् इ स। 'पूर्वोऽभ्यासः' इति सूत्रेण प्रथमस्य पठ् हत्यस्य अभ्याससज्ञायां 'हलादिः शेषः' इत्यनेन आदिहलः शेषे 'सन्यतः' इति अभ्यासस्य अकारस्य इत्वे 'पिपठिस'। 'आदेशप्रत्यययोः' इति सूत्रेण सकारस्य षत्वे 'सनाद्यन्ता धातवः' इति 'पिपठिष' इत्यत्र धातुसज्ञा। 'पिपठिष' इत्यत्र धातुत्वात् लट्लकारे तिप्प्रत्यये अनुबन्धलोपे पिपठिष 'ति। 'कर्त्तरि शप्' इत्यनेन शप्प्रत्यये अनुबन्धलोपे पिपठिष 'अति'। 'अतो गुणे' इति सूत्रेण पररूपे पिपठिषति इति रूपम्।

### 9. सन्यङोः (६.१.९)

द्वित्वम्

एकपदं सूत्रम्। अनेन सूत्रेण अनभ्यासस्य द्वित्वं विधीयते। सन्नन्तात् यङन्तस्य च धातोरनभ्यासस्य प्रथमस्यैकाचो द्वे स्तः अजादेस्तु द्वितीयस्य। यथा पिपठिषति।

**10. सः स्यार्धधातुके (७.४ .४९)**

सकारस्य तः आदेशः

सः सि आर्धधातुके इति त्रिपदं सूत्रमिदम्। सस्य तः स्यात्सादावार्धधातुके इति सूत्रार्थः। सः इति षष्ठी विभक्तिः। सि इति सप्तमी विभक्तिः। आर्धधातुके अपि सप्तमी विभक्तिः। तः इति पदं अनुवर्तते। सि सकारादौ आर्धधातुके परे सः सकारस्य स्थाने तः त् आदेशः स्यात् इति अर्थः । अत्तुमिच्छति जिघत्सति।

**जिघत्सति**

अत्तुमिच्छतीति विग्रहे अद्धातोः 'धातोः कर्मणः समानकर्तृकादिच्छायां वा' इति सनि अद् स्। 'लुङ्सनोः घस्लृ' इति घस्लादेशे अनुबन्धलोपे घस् स इति। सनः सस्य आर्धधातुकत्वात् इटि प्राप्ते 'एकाच उपदेशेऽनुदात्तात्' इति निषेधे 'सन्यङोः' इति द्वित्वे घस् घस् स इ ति। अभ्यासत्वे हलादिशेषे 'कुहोश्चुः' इति घस्य झत्वे झ घस् स इ ति। चर्वे सः स्यार्धधातुके इति तकारे पुनः धातुसंज्ञायां शपि पररूपे च जिघत्सति।

**11. अज्झनगमां सनि (६.४.१६)**

दीर्घः

अज्झनगमां सनि इति द्विपदं सूत्रमिदम्। 'अज्झनगमाम्' इति षष्ठी बहुवचनम्। अच्, इन्, गम् च इत्येतेषाम्। 'सनि' इति सप्तमी एकवचनम्। अत्र 'उपधायाः' अङ्गस्य 'दीर्घः इति अनुवर्तते। अतः झलादौ सन् प्रत्यये परे अजन्तानां धातूनां हन् धातोः गम् धातो: च दीर्घः भवतीति अर्थः। यथा- चिकीर्षति।

**12. इको झल् (१.२.९)**

झलादिः सन् कित् स्यात्

इकः झल् इति द्विपदं सूत्रमिदम्। अनेन सूत्रेण कित्वं विधीयते। इगन्तात् झलादिः सन् कित् स्यात् इति सूत्रार्थः। 'इकः पञ्चमी एकवचनम्। 'झल्' इति प्रथमैकवचनम्। 'सन्' 'कित्' इति च अनुवर्तते। यथा - चिकीर्षति।

**चिकीर्षति**

कृञ्धातोः सनि एकाच उपदेशेऽनुदात्तात् इति इट्निषेधे 'अज्झनगमां सनि' इति दीर्घे 'इको झल्' इति कित्वाद् गुणाभावे 'ऋत इद्धातो:' इति इत्त्वे रपरे द्वित्वेऽभ्यासकार्ये 'हलि च' इति दीर्घे षत्वे धातुत्वात् लडादिकार्ये चिकीर्षति।

**13. सनिग्रहगुहोश्च (७.२.१२)**

सन् इट् न भवति

सनि ग्रहगुहोः च इति त्रिपदं सूत्रमिदम्। अनेन सूत्रेण इड्निषेधः विधीयते। ग्रहेर्गृहेरुगन्ताच्च सन् इट् न स्यात् इति सूत्रार्थः। 'सनि' इति सप्तमी एकवचनं, 'ग्रहगुहो:' इति षष्ठी द्विवचनं, 'च' इति अव्ययपदम्। 'ठकः' 'नेड' चेत्यनुवर्तते। गुह् धातोः (गोपनार्थकधातुः) ग्रह् धातोः (ग्रहणार्थकः) उगन्तधातुभ्यश्च (उ ऋ लृ एते वर्णाः तेषां धातूनां अन्ते) सन् प्रत्यये इडागमः न स्यात् इति अर्थः। यथा- बुभूषति

**बुभूषति-**

भू धातोः सनि 'इको झल्' इति कित्वाद् गुणाभावे 'सनि ग्रहगुहोश्च' इति इट् निषेधे द्वित्वे ह्रस्वे षत्वे धातुत्वात् लट् लकारे तिप् प्रत्यये अनुबन्धलोपे शपि पररूपे बुभूषति इति रूपम्।

## 2.3.3 आत्मनेपदप्रकरणम्

**14. कर्तरि कर्मव्यतिहारे (१.३.१४)**

आत्मनेपदं

कर्तरि कर्मव्यतिहारे इति द्विपदं सूत्रमिदम्। अनेन सूत्रेण आत्मनेपदं विधीयते। क्रियाविनिमयाद्योत्ये कर्त्तर्यात्मनेपदं स्यात् इति सूत्रार्थः। आत्मनेपदं इति अनुवर्तते। कर्मव्यतिहारः इत्यत्र कर्मशब्दः क्रियापरः व्यतिहारशब्दो विनिमयपरः भवति। अतः कर्त्रर्थे आत्मनेपदं भवति। यथा व्यतिलुनिते।

**व्यतिलुनीते**

वि अति इति उपसर्गद्वयपूर्वकात् 'लूञ्' धातोः ञित्वादात्मनेपदे परस्मैपदे च प्राप्ते 'कर्तरि कर्मव्यतिहारे' इत्यात्मनेपदत्वात् लटः त प्रत्ययादिके व्यतिलुनीते इति सिद्धिः। व्यतिलुनिते इत्यत्स्य - शूद्रस्य योग्यं सस्यादिलवनं ब्राह्मणः करोतीत्यर्थः ।

**15. न गतिहिंसार्थेभ्य: (१.३.१५)**

आत्मनेपदं न

न गतिहिंसार्थेभ्यः इति द्विपदं सूत्रमिदम्। अनेन सूत्रेण आत्मनेपदनिषेधः विधीयते। कर्मव्यतिहारे द्योत्ये गत्यर्थेभ्यः हिंसार्थेभ्यश्च धातुभ्यः आत्मनेपदं न स्यात् इति सूत्रार्थः। यथा - व्यतिगच्छन्ति, व्यतिघ्नन्ति।

**व्यतिगच्छन्ति**

वि अति पूर्वात् गम् धतोः क्रियाविनिमयेऽर्थे 'कर्तरि कर्मव्यतिहारे' इति आत्मपनेपदत्वे प्राप्ते 'न गतिहिंसर्थिभ्यः' इति तन्निषेधे लटि त प्रत्ययादिके व्यतिगच्छन्ति इति सिद्धिः। तथैव व्यतिघ्नन्ति।

निपूर्वकात् विशः आत्मनेपदं

**16. नेर्विशः (१.३.१७)**

नेः विशः इति द्विपदं सूत्रमिदम्। अनेन सूत्रेण आत्मनेपदित्वं विधीयते। निपूर्वकाद् विश: आत्मनेपदं स्यात् इति सूत्रार्थः। यथा - निविशते।

**निविशते –**

'विश्' धातोः उदात्तत्वात् परस्मैपद प्राप्ते तं प्रबाध्य निपूर्वक विश् धातोः सत्वात् 'नेर्विशः' इत्यनेन आत्मनेपदविधानेन तप्रत्यये श विकरणप्रत्यये अनुबन्धकार्ये एत्वे 'निविशते' इति रूपं सिद्धम्।

क्रीञ् धातोः आत्मनेपदम्

**17. परिव्यवेभ्यः क्रियः (७.३.१८)**

परिव्यवेभ्यः क्रियः इति द्विपदं सूत्रमिदम्। अनेन सूत्रेण आत्मनेपदित्वं विधीयते। परि वि अव एभ्यः परे क्रीञ् धातोः आत्मनेपदं स्यात् इति सूत्रार्थः। यथा – परिक्रीणीते, विक्रीणीते, अवक्रीणीते।

**परिक्रीणीते**

परिपूर्वक 'क्रीञ्' धातोः लट् लकारे 'स्वरितञितः कत्रभिप्राये क्रियाफले' इति सूत्रेण आत्मनेपदे प्राप्ते तन्निषेधे 'परिव्यवेभ्यः क्रियः' इत्यात्मनेपदे तप्रत्यये, श्ना प्रत्यये 'ई हल्यघो:' इति ईत्वे णत्वे टेरेत्वे च परिक्रीणीते इति।

**विक्रीणीते**

विपूर्वक 'क्रीञ्' धातोः लटि 'स्वरितञितः कर्त्रभिप्राये क्रियाफले' इति सूत्रेण आत्मनेपदे प्राप्ते तन्निषेधे 'परिव्ययेभ्यः क्रियः' इत्यात्मनेपदे तप्रत्यये श्ना प्रत्यये 'ई हल्यघो:' इति इत्वे णत्वे टेरेत्वे च विक्रीणीते इति रूपम्।

**अवक्रीणीते**

अवक्रीणीते अवपूर्वक 'क्रीञ्' धातोः लट् लकारे 'स्वरितत्रितः कर्त्रभिप्राये क्रियाफले' इति सूत्रेण आत्मनेपदे प्राप्ते सम्प्रबाध्य 'परिव्यवेभ्यः क्रियः' इत्यात्मनेपदे तप्रत्यये, श्ना प्रत्यये 'ई हत्यधो:' इति इत्वे णत्वे टेरेत्वे च अवक्रीणीते।

जेः आत्मनेपदम्

**18. विपराभ्यां जेः (१.३.९७)**

विपराभ्यां जेः इति द्विपदं सूत्रमिदम्। अनेन सूत्रेण आत्मनेपदं विधीयते। वि पर इत्युपसर्गपूर्वक परस्मात् जि धातोः आत्मनेपदं स्यात् इति सूत्रार्थः। यथा - विजयते।

**विजयते**

'जि' धातोः उदात्तेत्वात् परस्मैपदे प्राप्ते विपूर्वक जि धातोः सत्वात् परस्मैपदं प्रबाध्य 'विपराभ्यां जेः' इति सूत्रेण आत्मनेपदविधानेन तप्रत्यये शप्विकरणप्रत्यये अनुबन्धकार्ये, 'सार्वधातुकार्धधातुकयो:' इति सूत्रेण गुणे, अयादेशे टेरेत्वे 'विजयते' इति रूपं सिद्धम्।

**पराजयते**

'जि' धातोः उदात्तेत्वात् परस्मैपदे प्राप्ते परापूर्वक जिधातोः सत्वात् परस्मैपद प्रबाध्य 'विपराभ्यां जेः' इति सूत्रेण आत्मनेपदविधानेन तप्रत्यये शप् विकरणप्रत्यये अनुबन्धकार्ये 'सार्वधातुकार्धधातुकयोः' इति सूत्रेण गुणे अयादेश रेत्वे 'विजयते' इति रूपं सिद्धम्।

**19. समवप्रविभ्यः स्थः (१.३.२२)**

समवप्रविभ्यः स्था आत्मनेपदम्

समवप्रविभ्यः स्थः इति द्विपदं सूत्रमिदम्। अनेन सूत्रेण आत्मनेपदं विधीयते। सम्, अव, प्र, वि एभ्यः उपसर्गपूर्वकात् स्था धातोः परे आत्मनेपदं स्यात् इति सूत्रार्थः। यथा - अवतिष्ठते, 'सन्तिष्ठते, प्रतिष्ठते, वितिष्ठते।

**अवतिष्ठते**

'स्था' धातोः उदात्तेत्वात् परस्मैपदं प्राप्ते अवपूर्वक 'स्थाधातोः सत्वात् परस्मैपदं प्रबाध्य 'समवप्रविभ्यः स्थः' इति सूत्रेण आत्मनेपदविधानेन तप्रत्यये शप्विकरणप्रत्यये अनुबन्धकार्ये, 'पाघ्रा'.... इति सूत्रेण तिष्ठदेशे 'टेरत्वे 'अवतिष्ठते' इति रूप सिद्धम्।

**सन्तिष्ठते**

'स्था' धातोः उदात्तेत्त्वात् परस्मैपदे प्राप्ते सम्पूर्वक 'स्थाधातोः सत्वात् परस्मैपदं प्रबाध्य 'समवप्रविभ्यः स्थः' इति सूत्रेण आत्मनेपदविधानेन तप्रत्यये शप्विकरणप्रत्यये अनुबन्धकार्ये 'पाघ्र....' इति सूत्रेण तिष्ठादेशे टेरेत्वे 'सन्तिष्ठते' इति रूप सिद्धम्।

**प्रतिष्ठते**

'स्था' धातोः उदात्तेत्वात् परस्मैपदे प्राप्ते प्रपूर्वक 'स्थाधातोः सत्वात् परस्मैपदं प्रबाध्य 'समवप्रविभ्यः स्थ:' इति सूत्रेण आत्मनेपदविधानेन तप्रत्यये शप्विकरणप्रत्यये अनुबन्धकार्ये, पाघ्रा...' इति सूत्रेण तिष्ठादेशे टेरेत्वे 'प्रतिष्ठते' इति रूप सिद्धम्।

**वितिष्ठते**

'स्था' धातोः उदात्तेत्वात् परस्मैपदे प्राप्ते विपूर्वक "स्थाधातोः सत्वात् परस्मैपदं प्रबाध्य 'समवप्रविभ्यः स्थः' इति सूत्रेण आत्मनेपदविधानेन तप्रत्यये शप्विकरणप्रत्यये अनुबन्धकार्ये, 'पाघ्रा... इति सूत्रेण तिष्ठादेशे ढेरेत्वे 'वितिष्ठते' इति रूप सिद्धम्।

अपह्नवार्थे ज्ञाधातोः आत्मनेपदं

**20. अपह्नवे ज्ञः (१.३.४४)**

अपह्नवे ज्ञः इति द्विपदं सूत्रमिदम्। अनेन सूत्रेण आत्मनेपदं विधीयते। अपह्नवः अपलापः इत्यर्थः। अपह्नवार्थे ज्ञा धातोः आत्मनेपदं स्यात् इति सूत्रार्थः। यथा शतमपजानीते अपपूर्वक 'ज्ञा' धातोः लटि 'अपह्नवे ज्ञः' इत्यात्मनेपदे तप्रत्यये श्ना प्रत्यये 'ई हल्यघोः' इति इत्वे टेरेत्वे च अपजानिते इति।

अकर्मकस्य ज्ञाधातोः आत्मनेपदं

**21. अकर्मकाच्च (१.३.४५)**

सूत्रम्। अनेन सूत्रेण आत्मनेपदं विधीयते। अकर्मकस्य ज्ञाधातोरात्मनेपदं स्यात्। यथा - सर्पिषो जानीते। सर्पिषोपायेन प्रवर्तते इत्यर्थः। ज्ञाधातोः अकर्मकाच्च इति आत्मनेपदे जानीते इति।

चरेः आत्मनेपदं

**22. उदश्चरः सकर्मकात् (१. ३.५३)**

उदश्चरः सकर्मकात् इति द्विपदं सूत्रमिदम्। अनेन सूत्रेण आत्मनेपदं उत् इत्युपसर्गपूर्वक सकर्मकात् चर् धातोः आत्मनेपदं स्यात् इति सूत्रार्थः। यथा धर्ममुच्चरते।

**धर्ममुच्चरते**

उत्पूर्वकात् 'चर्' धातोर्लटः स्थाने 'उदश्चरः सकर्मकात्' इति आत्मनेपदे शपि टेरेत्वे श्चुत्वे उच्चरते। उल्लङ्घ्य गच्छतीत्यर्थः।

चरेः आत्मनेपदं

**23. समस्तृतीयायुक्तात् (१.३.५४)**

द्विपदं सूत्रमिदम्। अनेन सूत्रेण आत्मनेपदं विधीयते। सम् पूर्वक तृतीयान्तयुक्तात् 'चर्' धातोः आत्मनेपदं स्यात् इति सूत्रार्थः। यथा – रथेन सञ्चरते।

**रथेन संचरते**

सम्पूर्वकस्य चर् धातोः रथेन इति तृतीयान्तेन च युक्तः ततः 'समस्तृतीयायुक्तात्' इति सूत्रेण आत्मनेपदे तप्रत्यये शपि, टेरेत्वे अनुस्वारे च रथेन संचरते।

### 24. दाणश्च सा चेच्चतुर्थ्यर्थे (१.३.५५)

दाणः आत्मनेपदं

बाणः च सा चतुर्थ्यर्थे इति पञ्चपदं सूत्रम्। अनेन सूत्रेण आत्मनेपदं विधीयते। सम्पूर्वाद् दाणस्तृतीयान्तेन युक्ताद् आत्मनेपदं भवति। यथा दास्या संयच्छते कामी। 'अशिष्टव्यवहारे दाणः प्रयोगे चतुर्थ्यर्थं तृतीया' इति वार्तिकेन दास्या इत्यत्र चतुर्थ्यर्थे तृतीया, ततश्च दास्या इति तृतीयान्तयुक्तात् सम्पूर्वाद् दाण्धातोः लटि तत्स्थाने प्रथमपुरुषैकविवक्षायां 'दाणश्च सा चेच्चतुर्थ्यर्थे' इत्यात्मनेपदत्वात् तप्रत्यये शपि 'पाघ्र...'इत्यादिना दाणो यच्छादेशे 'अतो गुणे' इति पररूपे टेरेत्वे च कृते संयच्छते।

### 25. पूर्ववत्सनः (१.३.६२)

सन्नन्ताद् आत्मनेपदम्

द्विपदं सूत्रम्। अनेन सूत्रेण आत्मनेपदं विधीयते। सनः पूर्वो यो धातुः तेन तुल्यं सन्नन्तात् अपि आत्मनेपदं स्यात् इति सूत्रार्थः। पूर्ववत् इति अव्ययपदम्। सनः इति पञ्चमीविभक्तिः। आत्मनेपदं इत्यनुवर्तते। अतः सनः पूर्वो यो धातुः तेन तुल्यं सन्नन्तात् धातोः अपि आत्मनेपदं भवति इति अर्थः लभ्यते। यथा- एदिधिषते।

### एदिधिषते

एध् धातोः सनि ईटि द्वित्वे षत्वे जश्त्वे धातुत्वात् लटि 'पूर्ववत्सन:' इति आत्मनेपदत्वात् लटि तप्रत्यये शपि पररूपे एदिधिषते इति रूपम्।

### 26. हलन्ताच्च (१.२.१०)

झलादिः कित्

हलनातात् च इति पदच्छेदः। अनेन सूत्रेण आत्मनेपदं विधीयते। इक् समीपात् हलः परो झलादिः सन् कित् स्यात् इति सूत्रार्थः। यथा निविविक्षते।

### निविविक्षते

निपूर्वाद् विश् धातोः सनि 'हलन्ताच्च' इति सनः कित्वात् गुणाभावे द्वित्वे अभ्यासकार्ये 'व्रश्च' इति शस्य षत्वे षस्य कत्वे धातुत्वात् लटि 'पूर्ववत्सनः' इति आत्मनेपदत्वात् लटः त प्रत्ययादिके निविविक्षते इति रूपम्।

### 27. गन्धनाऽवक्षेपणसेवनसाहसिक्यप्रतियत्नप्रकथनोपयोगेषु कृञः (१.३.३२)

गन्धनादिषु अर्थेषु आत्मनेपदं

द्विपदं सूत्रमिदम्। अनेन सूत्रेण आत्मनेपदं विधीयते। गन्धनं सूचनम्। उत्कुरुते- सूचयतीत्यर्थः। अवक्षेपण भर्त्सनम्। श्येनो वर्तिकामुत्कुरुते भवतीत्यर्थः। हरिमुपकुरुते - सेवत इत्यर्थः। परदारान् प्रकुरुते- तेषु

सहसा प्रवर्तते एधोदकस्योपस्कुरुते गुणमाधत्ते। कथाः प्रकुरुत -प्रकथयतीत्यर्थः। शतं प्रकुरुते धर्मार्थ विनिङ्क्ते। गन्धनादिष्वर्थेषु वर्तमानस्य कृञः आत्मनेपदं स्यात्। एषु किं? कटं करोति। गन्धनावक्षेपणसेवनसाहसि- क्यप्रतियत्नप्रकथन उपयोगाः तेषु गन्धनावक्षेपण..... उपयोगेषु इति सप्तमी। कृञः पञ्चमी। अत्र 'आत्मनेपदं' इत्यस्य अनुवृत्तिः। यत् उपसर्ग- योगे उपसर्गाभावे वा गन्धन- अवक्षेपण सेवन साहससिक्य प्रतियत्न- प्रकथन- उपयोग इत्येतेषु अर्थेषु विद्यमानः कृञ् धातोः आत्मनेपदं भवति। यथा- गन्धनं सूचनम् उत्कुरुते (दोषं प्रकटी करोति)। अवक्षेपणं भर्त्सनम् (निन्दयति) - श्येनो वर्तिकाम् उत्कुरुते। उत्कुरुते अर्थात् तिरस्कारं करोति उत् कृ त। सेवनम् (सेवते)- हरिम् उपकुरुते (सेवते) उपकृत। साहसिक्यम् (बलपूर्वक विचारहीनः निन्दित-कर्म) यथा- परदारान् प्रकुरुते। प्र कृ त। प्रतियत्नः - (गुणाधानम्) यथा - एधः च उदकं च एदओधकं। तस्य एदओधकं। उपस्कुरुते उप कृ त। 'उपात्प्रतियत्वैकृत वाक्याध्याहारेषु च' इत्यनेन सुट् आगमे- 'उपस्कुरुते' इति भवति। प्रकथनम् (सम्यक् रूपेण कथनम्) कथाः प्रकुरुते प्र कृ त। उपयोगः - (व्यर्थ न करोति) यथा- शतं प्रकुरुते। एषु किम्? घटं करोति इत्यत्र गन्धनादिषु अर्थेषु 'गन्धन कृञः' एषु अर्थेषु एवं आत्मनेपदं भवेति अन्यथा 'घटं करोति' इत्यत्र अपि आत्मनेपदं प्रसक्तं भवेत्। तत् तु न समीचीनम्।

**28. भुजोऽनवने (१.३.६६)**

भुज् धातोः भोजनार्थे आत्मनेपदं

भुजः अनवने इति द्विपदं सूत्रमिदम्। अनेन सूत्रेण आत्मनेपदं विधीयते। भुज् धातोः भोजनार्थे (अनवार्थे) आत्मनेपदं स्यात्। यथा ओदनं भुङ्क्ते। भुज् धातोः आत्मनेपदि भुङ्क्ते इति। रक्षणार्थे परस्मैपदम्। यथा महीं भुनक्ति। भुनक्ति इति परस्मैपदरूपम्। महीं रक्षति इत्यर्थः।

## 2.3.4 परस्मैपदप्रकरणम्

**29. अनुपराभ्यां कृञः (१.३.७९)**

अनुपराभ्यां कृञः परस्मैपदं

अनुपराभ्यां कृञः इति पदच्छेदः। अनेन सूत्रेण परस्मैपदं विधीयते। कर्तृगे च फले गन्धनादौ च परस्मैपदं स्यात् इति सूत्रार्थः। अनुपराभ्याम् इति पञ्चमीद्विवचनम्। कृञः - इति पञ्चमी एकवचनम्। अत्र परस्मैपदम् इत्यनुवर्तते। अनु तथा परा उपसर्गपूर्वक 'कृ' धातोः कर्तृगामी क्रियाफले तथा च गन्धन- अवक्षेपण आदि अर्थेषु परस्मैपदं स्यात् इति अर्थः। यथा - अनुकरोति, पराकरोति।

**अनुकरोति'**

अनुकरणं करोतीत्यर्थः। अनु उपसर्गपूर्वकस्य 'डुकृञ् करणे धातोः 'गन्धनाऽवक्षेपणसेवनसाहसिक्यप्रतियत्नप्रकथनोपयोगेषु कृञः' इति सूत्रेण आत्मनेपद प्राप्ते अनुपूर्वक 'कृ' धातुः वर्तते इत्यतः 'अनुपराभ्या कृञः' इति सूत्रेण आत्मनेपदस्थाने परस्मैपदे रूप परिवर्तितं भूत्वा अनुकरोति इति रूपम्।

**पराकरोति**

परा इत्युपसर्गपूर्वक डुकृञ् करणे धातोः अत्र 'गन्धनाऽवक्षेपणसेवनसाहसिक्यप्रतियत्नप्रकथनोपयोगेषु कृञः' इति सूत्रेण आत्मनेपदं प्राप्ते परं उपसर्गपूर्वक 'कृ' धातोः 'अनुपराभ्यां कृञः' इति सूत्रेण परस्मैपदे आत्मनेपदस्थाने परस्मैपदविधानेन पराकरोति इति रूपम्।

**30. अभिप्रत्यतिभ्यः क्षिपः (१.३.८०)**

क्षिपः परस्मैपदम्

अभिप्रत्यतिभ्यः क्षिपः इति पदच्छेदः। अनेन सूत्रेण परस्मैपदं विधीयते। क्षिप् प्रेरणे। स्वरितेत्। अभिक्षिपति। अभिप्रत्यतिभ्यः इति पञ्चमीबहुवचनम्। क्षिपः इति पञ्चमी एकवचनम्। 'अभि' 'प्रति' 'अति' उपसर्गपूर्वकं क्षिप्धातोः परस्मैपदं स्यात् इति अर्थः। यथा अधिक्षिपति।

**अभिक्षिपति**

क्षिप्-धातोः 'अभिप्रत्यतिभ्यः क्षिपः' इति सूत्रेण अभि प्रति तथा अति उपसर्गात् परेभ्यः 'क्षिप्' धातोः परस्मैपदे अभिक्षिपति इति रूपम्। एवमेव प्रतिक्षिपति अधिक्षिपति इत्यनयोरपि सिद्धिः भवति।

**31. प्राद्वहः (१.३.८१)**

वह्धातोः परस्मैपदम्

द्विपदं सूत्रमिदम्।अनेन सूत्रेण परस्मैपदं विधीयते। प्राद् इति पञ्चमी एकवचनम्। वहः इति पञ्चमी एकवचनम्। प्र इति उपसर्गात् वह् धातोः परस्मैपदसंज्ञः स्यात् इति सूत्रार्थः। यथा प्रवहति।

**प्रवहति**

'प्र' उपसर्गात् 'वह्' धातोः आत्मनेपदे प्राप्ते 'प्राद्वहः' इति सूत्रेण तं प्रबाध्य परस्मैपदे प्रवहति इति रूपम्।

**32. परेर्मुषः (१.३.८२)**

मृष्धातोः परस्मैपदम्

द्विपदं सूत्रमिदम्। अनेन सूत्रेण परस्मैपदं विधीयते। परेः इति पञ्चमी एकवचनम्। मृषः इति पञ्चमी एकवचनम्। अत्र परस्मैपदम् इति अनुवर्तते। परि पूर्वकात् मृष् धातोः परस्मैपदसंज्ञः स्यात् इति सूत्रार्थः।

**परिमृष्यति**

द्विपदं सूत्रमिदम्। परि उपसर्गपूर्वात् 'मृष्' धातोः लटि कर्त्रर्थे क्रियाफले स्वरितेत्वात् 'स्वरितञितः कर्त्रभिप्राये क्रियाफले' इति सूत्रेण आत्मनेपदे प्राप्ते 'परेर्मृषः' इति सूत्रेण तं प्रबाध्य परस्मैपदे तिप् प्रत्यये श्यनि परिमृष्यति इति रूपम्।

**33. व्याङ्परिभ्यो रमः (९.३.८३)**

रम्धातोः परस्मैपदम्

द्विपदं सूत्रमिदम्। अनेन सूत्रेण परस्मैपदं विधीयते। व्याङ्परिभ्यः इति पञ्चमी बहुवचनम्। रमः एकवचनम्। अत्र 'परस्मैपदम्' इति अनुवर्तते। वि आङ् परि उपसर्गपूर्वात् रम् धातोः परस्मैपदं स्यात् इति अर्थः। यथा - विरमति।

**विरमति**

वि इत्युपसर्गपूर्वक रम्धातोः लट् लकारे लटः स्थाने 'अनुदात्तङित आत्मनेपदम्' इति आत्मनेपदे प्राप्ते 'व्याङ्परिभ्यो रमः' इति तं प्रबाध्य परस्मैपदे तिप् प्रत्यये 'कर्तरि शप्' इति शपि विरमति इति।

**34. उपाच्च (१.३.५८)**

उपात् च इति द्विपदं सूत्रमित्रम्। अनेन सूत्रेण परस्मैपदं विधीयते। उपात् इति पञ्चमी विभक्तिः। च इति अव्ययपदम्। अत्र उप पूर्वक रम्धातोः परस्मैपदम्। यथा- यज्ञदत्तमुपरमति। यज्ञदत्तं उपरमयतीत्यर्थः।

## 2.3.5 लकारार्थप्रकरणम्

**35. अभिज्ञावचने लृट् (३.२.११२)**

भूतानद्यतनधातोः लृट्

अभिज्ञावचने लृट् इति द्विपदं सूत्रमिदम्। स्मृतिबोधिन्युपपदे भूतानद्यतने धातोर्लृट् स्यात् इति सूत्रार्थः। लङोऽपवादः। धातोः भूते अनद्यतने इति अनुवर्तन्ते। अभिज्ञावचनं स्मृतिबोधकं पदम् उपपदे स्यात् चेत् अनद्यतनभूतार्थे धातोः लृट्लकारः स्यात् इति अर्थः। यथा- 'स्मरसि कृष्ण गोकुले वत्स्यामः'।

**स्मरसि कृष्ण गोकुले वत्स्यामः।**

स्मरसि इति उपपदात् अत्र 'वस्' धातोः भूतानद्यतने लङि प्राप्ते तं बाधित्वा 'अभिज्ञावचने लृट्' इति लृटि तत्स्थाने मसि 'स्यातासी लृलुटोः' सूत्रेण स्य प्रत्यये 'सः स्यार्धधातुके' इति सस्य तकारे 'अतो दीर्घा यञि' इति दीर्घे सस्य रुत्वे विसर्गे वत्स्यामः।

### 36. न यदि (३.२.११३)

यद्योगे लृट् न

न यदि इति द्विपदं सूत्रम्। यद्योगे लृट् न इति सूत्रार्थः। यत् शब्दस्य प्रयोगे सति अभिज्ञावचनम् अर्थात् स्मृतिबोधके उपपदे अनद्यतनभूतार्थे धातोः लृट् न भविष्यति। यथा -अभिजानासि कृष्ण यद्वने अभुञ्जमहि।

**अभुञ्जमहि**

अभिजानासि इत्युपपदाद् भुज्धातोः 'अभिज्ञावचने लृट्' इति लृटि प्राप्ते तस्य 'न यदि' इति सूत्रेण निषेधात् लङिकार्ये अभुञ्जमहि इति।

### 37. लट् स्मे (३.२.११८)

स्मयोगात् लट्

द्विपदं सूत्रम्। अनेन सूत्रेण लट् विधीयते। लिटः विषये भूतकाले स्मयोगात् लट् स्यात्। लिटोऽपवादः। यथा यजति स्म युधिष्टिरः। इयाज इत्यस्य स्थाने यजति स्म इति। अत्र शब्दो भूतकालोद्योतकोऽव्ययः।

### 38. वर्तमानसामीप्ये वर्तमानवद्वा (३.३.१३१)

यद्योगे स्मृतिवाचक उपपदे भूतानद्यतन धात्वात् लृट् न

त्रिपदं सूत्रमिदम्। अनेन सूत्रेण वर्तमानवद्भावः विधीयते। प्रत्ययाः उक्ताः ते वर्तमानसामीप्ये भूते भविष्यति च वा स्युः इति सूत्रार्थः। समीपनेव सामिप्यम्। वर्तमानकालस्य समीपवर्ति- भूतकालस्य भविष्यत्कालस्य वा वर्तमानकालवत् एव विकल्पेन लट्लुटादि कार्याणि स्युः इति अर्थः। यथा - कदाऽऽगतोसि ? इति प्रश्ने सति अहमागच्छामि इति उत्तरयति। अतः भूतकालस्य लुङ्प्रयोगमर्हति। परञ्च तं प्रबाध्य अनेन सूत्रेण वर्तमानसामीप्ये वर्तमानवद्वा इत्यनेन विकल्पेन कदा आगतोऽसि। अयमागच्छामि, आगमं वा। कदा गमिष्यसि? एषः गच्छामि, गमिष्यामि वा।

### 39. हेतुहेतुमतोर्लिङ् (३.३.१५६)

विकल्पेन लिङ्

द्विपदं सूत्रमिदम्। अनेन सूत्रेण विधिलिङ् विधीयते। हेतुः (कारणम्) हेतुमत् (कार्यं फलम्) इति अर्थः। भविष्यत्काले धातोः विकल्पेन लिङ्लकारः भवति। लिङ्लकारस्य अभावपक्षे भविष्यत्काले सामान्यरूपेण 'लृट्शेषे च' इति सूत्रेण लृट् भविष्यति। यथा - कृष्णं नमेच्चेत्सुख यायात्। कृष्णं नस्यति चेत् सुखं यास्यति। (भविष्यत्येवेष्यते) नेह हन्तीति पलायते। विधिनिमन्त्रणेति लिङ्। विधि प्रेरणं भृत्यादेनिकृष्टस्य प्रवर्तनम्। यजेत। निमन्त्रणं नियोगकारणम्, आवश्यकेश्राद्ध भोजनादो दोहित्रादेः प्रवर्तनम्। इह भुञ्जीत। आमन्त्रणं कामचारानुज्ञा। इहासीत्। अधीष्टं सत्कारपूर्वको व्यापारः।

पुत्रमध्यापयेद्भवान्। संप्रश्नः सम्प्रधारणम्। किं भो वेदमधीयीय उत तर्कम्। प्रार्थनं याच्ञा। भो भोजनं लभेय। एवं लोट्।

**कृष्णमिति।**

अत्र कृष्णप्रणामः सुखहेतुरिति हेतुहेतुमद्भावसत्त्वात् नम्धातोः याधातोश्च लृटं बाधित्वा हेतुहेतुमतोर्लिङ्' इति लिङि तिबादयः।

## Summarised Overview

ण्यन्तप्रकरणे सप्त सूत्राणि सन्ति। धातुभ्यः प्रेरणार्थे 'णिच्' प्रत्ययो भवति। तत्र कर्तुः द्विविधत्वं भवति। प्रथमः तत्र क्रियायां स्वतन्त्रं कारकं कर्तृसञ्ज्ञकं भवति। यदि कर्मणि तस्य कर्तुः प्रेरकः अन्यः कश्चिद् अस्ति चेत्, विवक्षायां तस्यापि कर्तृसंज्ञा विधीयते इति। ण्यन्तप्रक्रियायां भावयति, स्थापयति, इत्यादीनि रूपाणि कथं भवतीति अधीतम्।

सन्नन्तप्रकरणे षट्सूत्राणि प्रतिपादितानि। धातोः कर्मणः समानकर्तृकादिच्छायां वा इत्यनेन विकल्पेन णिच्, सन्यङोः इति द्वित्वं सः स्यार्धधातुके इत्यनेन सस्य तः, अज्झनगमां सनि इको झल् इत्ययेन कित्, सनि ग्रहगुहोश्च इत्यनेन इडागमः भवति। तेषां रूपाणि अपि अधीतानि।

आत्मनेपदप्रकरणे पञ्चदश आत्मनेपदविधायकसूत्राणि, तेषां रूपाणि च प्रतिपादितानि।

परस्मैपदप्रकरणे षट्सूत्राणि प्रस्तूयते। अनु परा - कृञ् धातुः, अभि ,प्रति, अति, इत्युपसर्ग सहित, विश् धातुः, प्र पूर्वक वह् धातुः, परि पूर्वक मृष् धातुः, रम् धातुः, उप पूर्वक रम् इत्यादीनां परस्मैपदं विधीयते।

लकारार्थप्रकरणे पञ्चसूत्राणि, तेषां रूपाणि च प्रतिपादितानि। अभिज्ञावचने लुट् इत्यनेन लृट्,न यदि इत्यनेन लृट् निषेधः, वर्तमानसामीप्ये वर्तमानवद्वा इत्यनेन वर्तमानसामीप्ये भूते भावि च वर्तमानकाललकारः, हेतुहेतुमतोलिङ् इत्यनेन लिङ् च भवन्ति। तेषां रूपाणि अपि अधीतानि। सम्यक् पठतु। वाक्ये प्रयोगे चोपयोक्तुं पाटवं आर्जयन्ति।

## Assignments

1. पूर्ववत्सनः इति सूत्रं व्याख्यायत।
2. वर्तमानसामीप्ये वर्तमानवद्वा उदाहरणसहितं प्रतिपादयत।
3. अभिक्षिपति इत्यत्र कथं परस्मैपदं भवति।
4. उपाच्च सूत्रस्य वृत्तिः का ? उदाहरणसहितं लिखत।
5. समवप्रविभ्यः स्थः उदाहरणसहितं व्याख्यात।
6. नेर्विशः इति सूत्रेण किं विधीयते ?

7. इको झल् सनिग्रहगुहोश्च इति सूत्रद्वयं व्याख्यात।
8. उदश्चरः सकर्मकात् समस्तृतीययुक्तात् इति सूत्रद्वयं व्याख्यात।
9. अबीभवत् - सप्रमाणं प्रक्रियां लिखत।
10. अत्तुमिच्छति- जिघत्सति सप्रमाणं प्रक्रियां लिखत
11. ण्यन्तप्रकरणस्य सामान्यपरिचयः लघुसिद्धान्तकौमुदीं द्वारा विशदयत।

## Suggested Readings


1. पदसंस्कारचन्द्रिका. कैकुलका रामवारियर्, केरलसाहित्य अकादमि, तृश्शूर ,२००५
2. लघुपाणिनीयम्. ए आर् राजराजवर्मा, केरलसर्वकलाशाला, तिरुवनन्तपुरम्।
3. पाणिनीयप्रद्योतम्. ऐसि चाक्को. भाषा इन्स्टिट्यूट, तिरुवनन्वपुरम्।
4. प्रक्रियाभाष्यम्. फा. जोन् कुन्नपप्लि, नाषणल् बुक् स्टाल्, कोट्टयम्।


## References


1. लघुसिद्धान्तकौमुदी.वरदराजः, चौखम्बा संस्कृत सीरीस अकादमि, वाराणसी २००५.
2. श्रीवरदराजाचार्यकृतः लघुसिद्धान्तकौमुदी श्रीसूर्यनारायणशुक्लः 'बालमनोरमा' संस्कृत - हिन्दीटीका सहित प्रकाशक: वाराणासी संस्कृत संस्थान सीरीज १०००
3. श्रीमद्वरदराजाचार्यप्रणीता लघुसिद्धान्तकौमुदी श्रीधरमुखोल्लासिनी - हिन्दी- व्याख्यासमन्विता भाग-2व्याख्याकारः गोविन्द प्रसाद शर्मा चौखम्बा सुरभारती प्रकाशन वाराणसी २००७
4. लघुसिद्धान्तकौमुदी द्वितीयो भागः, प्रोफसर् आर् वासुदेवन् पोट्टि, सर्वकारीय संस्कृतकलालयः, तृप्पूणित्तुरा, १९९३


### Space for Learner Engagement for Objective Questions

Learners are encouraged to develop objective questions based on the content in the paragraph as a sign of their comprehension of the content. The Learners may reflect on the recap bullets and relate their understanding with the narrative in order to frame objective questions from the given text. The University expects that 1 - 2 questions are developed for each paragraph. The space given below can be used for listing the questions.

UNIT 4

# कृत्यप्रकरणम्
# पूर्वकृदन्तप्रकरणं चरेष्टः पर्यन्तम्

## Learning Outcomes

- कृत्प्रत्ययानां परिचयः।
- कृत् – तिङ् प्रत्यययोः भेदं अवगच्छति।
- कृत्यप्रत्ययशब्दरूपाणां प्रक्रियावगमनम्।
- धातुभ्यः नामरूपाणां निष्पत्तौ सामर्थ्यं सम्पादयति।

## Background

अस्मिन् एकके कृदन्तप्रकरणे कृत्यप्रकरणं पूर्वकृदन्तप्रकरणं च पठ्यक्रमे वर्तते। संस्कृतभाषायां द्विविधाः मूलशब्दाः भवन्ति। प्रातिपदिकानि धातवश्च। प्रातिपदिकानि यथा देवः, फलं , कर्तृ इत्यादयः शब्दाः भवन्ति। कृत्तद्धितसमासाश्च इत्यतः प्रातिपदिकसंज्ञा स्यात्। प्रातिपदिकानि द्विविधानि भवन्ति। तानि प्रकृतिप्रत्ययाभ्यां व्युत्पन्नानि प्रातिपदिकानि अव्युत्पन्नानि च। व्युत्पन्नानि प्रातिपदिकानि अपि द्विविधानि भवन्ति। धातुभ्यः व्युत्पन्नानि तद्धितशब्देभ्यः व्युत्पन्नानि च। धातुभ्यः द्विविधाः प्रत्ययाः भवन्ति। तिङ्-प्रत्ययाः कृत्-प्रत्ययाश्च । कृदतिङ् इत्यतः कृत्संज्ञा विधीयते। धातुभ्यः कृत्प्रत्ययानां योजनेन प्रातिपदिकं लभ्यते। प्रातिपदिकनिर्माणाय संस्कृतभाषायां कृत्प्रत्ययाः तद्धित-प्रत्ययाः च द्विधा प्रत्ययाः भवन्ति। कृदन्तस्य ज्ञानं विना व्याकरणस्य ज्ञानं पूर्णं न भवति। कौमुद्यां कृत् प्रत्ययान् चतुर्षु भागेषु वर्तते। ते च कृत्यप्रक्रिया, पूर्वकृदन्तप्रकरणं, उणादयः, उत्तरकृदन्तप्रकरणं चेति। अस्मिन् पाठे मुख्यतया कृत्यप्रकरणस्य, पूर्वकृदन्तप्रकरणस्य च सूत्राणां व्याख्यानं तेषां रूपाणां प्रक्रियां च सम्यक् प्रतिपाद्यते। पठतु।

## Keywords

तव्यत् (तव्य) तव्य, अनीयर् (अनीय), केलिमर् (एलिम), ण्यत् (य), यत् (य), क्यप् (य), ण्वुल्(वु), तृच्, अच्,

णिनि, कः(अ), अण्, ट

# Discussion

## 2.4.1 कदन्ते कृत्यप्रकिया

ये प्रत्ययाः ते धातोः परे स्युः

**1. धातोः (३.१.९१)**

एकपदं सूत्रमिदम्। अनेन सूत्रेण कृत्संज्ञा विधीयते। आतृतीयाध्यापरिसमाप्तेर्ये प्रत्ययास्ते धातोः परे स्युः इति सूत्रार्थः। धातोः इति पञ्चम्येकवचनान्तम्। 'कृदतिङिति' कृत्संज्ञा। पाणिनेः अष्टाध्यायां धातेः इत्यस्मात् अधिकारसूत्रात् तृतीयाध्यायसमाप्तिपर्यन्तं प्रत्ययाः तव्यादयः उच्यन्ते ते धातोः परे स्युः इति अर्थः लभ्यते। कृदतिङ् इति धातुभ्यः विधीयमानं अतिङ् प्रत्ययानां कृत्संज्ञा भवति। कृदतिङ् इत्यादावस्य प्रयोजनम्।

असरूप अपवादप्रत्ययः उत्सर्गस्य विकल्पेन बाधकः

**2. वासरूपोऽस्त्रियां (३.१.९४)**

वा, असरूपः, अस्त्रियां इति पदच्छेदः। अस्मिन् धात्वादिकारेऽसरुपोऽपवादप्रत्ययः उत्सर्गस्य बाधको वा स्यात् स्त्र्यधिकारोक्तं विना इति सूत्रार्थः। वा इति अव्ययम्। असरूपः इति प्रथमायाः एकवचनान्तम्। अस्त्रियाम् इति सप्तम्याः एकवचनान्तम्। समानं रूपं यस्य सः सरूपः बहुव्रीहिसमासः। न सरूपः असरूपः। न स्त्री अस्त्री, तस्याम् अस्त्रियाम्। स्त्र्यधिकारविहितप्रत्ययान् विहाय अस्मिन् धात्वधिकारे असमानरूपः प्रत्ययः विकल्पेन बाधकः भवति। अस्मिन् धात्वधिकारे असरूप अपवादप्रत्ययः उत्सर्गस्य नित्यं बाधकः न भवति, अपि तु विकल्पेन बाधकः भवति। यथा- 'ण्वुल्तृचौ'। इदम् उत्सर्गसूत्रम्। 'इगुपधज्ञाप्रीकिरः कः'. इदम् अपवादसूत्रम्। अत्र केवलम् अपवादसूत्रस्य एवं प्रवृत्तिः भवेत् किन्तु द्वे सूत्रे अस्मिन् धात्यधिकारे स्तः।

कृत्यसंज्ञकाः

**3. कृत्याः (३.१.९५)**

एकपदं सूत्रमिदम्। अनेन सूत्रेण कृत्यप्रत्ययाः विधीयन्ते। ण्वुल्तृचावित्यतः प्राक् कृत्यप्रत्ययाः स्युः इति सूत्रार्थः। कृत्याः इति प्रथमाविभक्तेः बहुवचनान्तम्। अत्र प्रत्ययः इत्यस्य अनुवर्तते।

अष्टाध्यायाः 'ण्वुल्तृचौ' इति सूत्रात् पूर्वं ये प्रत्ययाः विधीयन्ते ते कृत्यसंज्ञकाः भवन्ति इति अर्थः। कर्तरि कृत् इत्यदावस्य प्रयोजनम्।

### 4. कर्तरि कृत् (३.४.६७)

कृत्यप्रत्ययः कर्तरि

कर्तरि कृत् इति पदच्छेदः। अनेन सूत्रेण कर्तरि विधीयते। कृत्यप्रत्ययः कर्तरि स्यात्। 'कर्तरि' इति सप्तम्येकवचनान्तम्। कृत्' इति प्रथमाविभक्तेः एकवचनान्तम्। धातोः प्रत्ययः इति च अनुवर्तते। अतः अस्मिन् धात्वधिकारे कृत्संज्ञकाः प्रत्ययाः कर्तरि कारके भवन्ति इति सूत्रार्थः। कृ-ण्वुल् - कारकः, कृ - तृच् - कर्ता, इत्यादि उदाहरणेषु कृत्संज्ञकाः तृच्, ण्वुल्-प्रभृतयः प्रत्ययाः कर्तरि अर्थे प्रयुक्ताः ।

### 5. तव्यत्तव्यानीयरः (३.१.९६)

एकपदं सूत्रमिदम्। तव्यत्तव्यानीयरः भावकर्मणोरेव स्युः इति सूत्रार्थः। तव्यत् तव्य अनीयरः इति प्रथमाविभक्तेः बहुवचनान्तम्। तव्यत् च तव्यश्च अनीयर् च इति तव्यत्तव्यानीयर। अत्र धातोः प्रत्ययः परः च अनुवर्तते। अतः धातोः तव्यत् तव्य, अनीयर् इत्येते प्रत्ययाः भवन्ति। तव्यत् इत्यत्र अन्त्य तकार इत्सकः तव्यप्रत्ययः आद्युदात्तः भवति। अनीयर् इत्यत्र रेफः इत्संज्ञकः। रेफस्य लोपः भवति। अनीय इति शिष्यते। "कृत्याः" इति सूत्रेण एते प्रत्ययाः कृत्यसंज्ञकाः भवन्ति ।

तव्यत् तव्य अनीयरः प्रत्ययाः कर्मणि भावे विधीयन्ते

### 6. तयोरेव कृत्यक्तखलर्था (३.४.७०)

एते प्रत्ययाः सकर्मकेभ्यः धातुभ्यः कर्मणि अकर्मकेभ्यः धातुभ्यश्च भावे विधीयन्ते। भावे यथा - एधितव्यम् एधनीयम् त्वया। कर्मणि यथा - चेतव्यः चयनीयः वा धर्मः त्वया ।

### 7. केलिमर उपसंख्यानम् (वार्तिकम् )

केलिमर् प्रत्ययः

केलिमरः, उपसंख्यानम् इति द्विपदं वार्तिकम्। केलिमर्प्रत्ययः धातुभ्यः एव स्यात्। केलिमर इति प्रथमायाः एकवचनमत्तम्, उपसंख्यानम् इति प्रथमायाः एकवचनम्। इदं वार्तिकम् तव्यदर्थे एव सकर्मकेभ्यः धातुभ्यः कर्मणि अकर्मकेभ्यः धातुभ्यः च भावे केलिमर् इति प्रत्ययः भवति । केलिमर् इत्यत्र ककारस्य रेफस्य च इत्संज्ञा भवति। इत्संज्ञकवर्णानां लोपे 'एलिम' इति अवशिष्यते। यथा- पचेलिमाः भाषा पक्तव्याः इत्यर्थः, भिदेलिमाः सरला भेत्तव्याः।

**पचेलिमाः**

पचेलिमाः पक्तव्या इत्यर्थः। सकर्मकात् पच् धातोः 'केलिमर् उपसंख्यानम्' इति वार्तिकेन कर्मणि केलिमर प्रत्यये पच् केलिमर् इति

जाते 'लशक्वतद्धिते' इत्यनेन ककारस्य, 'हलन्त्यम्' इत्यनेन रेफस्य च इत्संज्ञा, ततः 'तस्य लोपः' इति सूत्रेण लोपे पच् एलिम पचेलिम इति। अत्र 'कृत्तद्धितसमासाश्च' इत्यनेन प्रातिपदिकसंज्ञायां प्रातिपदिकत्वात् बहुत्वविवक्षायां जस् प्रत्यये, विभक्तिकार्ये च कृते 'चेलिमाः' इति रूपम्।

एवं भिदेलिमाः रूपमपि सिद्ध्यति।

**8. अचो यत् (३.१.९७)**

अजन्तात् धातोः यत् प्रत्ययः भवति

अचः यत् इति द्विपदं सूत्रमिदम्। अनेन सूत्रेण यत्प्रत्ययः विधीयते। अजन्ताद्धातोर्यत् स्यात् इति सूत्रार्थः। धातोः प्रत्ययः, परः च अनुवर्तते। अचः इति पञ्चम्येकवचनान्तम्। यत् इति प्रथमैकवचनान्तम्। यथा - चेयम्।

**चेयम्**

चेतुं योग्यं चेयम्, चिञ् - चयने इति धातोः 'तयोरेव कृत्यक्तखलर्थाः' इत्यनेन कर्मणि 'अचो यत्' इति सूत्रेण यत्प्रत्यये चि यत् इति जाते 'हलन्त्यम्' इति सूत्रेण तकारस्य इत्संज्ञायां, 'तस्य लोपः' इत्यनेन लोपे चि य' इति। 'आर्धधातुकं शेषः' इति सूत्रेण य इत्यस्य आर्धधातुकसंज्ञायां, 'सार्वधातुकार्धधातुकयोः' इति सूत्रेण गुणादेशः। अत्र 'कृत्तद्धितसमासाश्च' इति सूत्रेण प्रातिपदिकसंज्ञायां प्रातिपदिकत्वात् सु प्रत्यये, 'सु' इत्यस्य अमि, पूर्वरूपे एकादेशे च कृते चेयम् इति रूपम्।

**9. ईद्यति (६.४.६५)**

यत् परे आकारस्य ईकारादेशः

ईत् यति इति द्विपदं सूत्रमिदम्। अनेन सूत्रेण ईत्वं विधीयते। यति परे आत ईत् स्यात् इति सूत्रार्थः। ईत् इति प्रथमैकवचनान्तम्। यति इति सप्तम्येकवचनान्तम्। अत्र सूत्रे आतः अङ्गस्य इति च अनुवर्तते। 'अलोऽन्त्यस्य' इति सूत्रेण एष ईदादेशः अन्त्यस्य 'आ' इत्यस्य स्थाने एव भवति । यथा- देयम् ग्लेयम् ।

**देयम्**

दातुं योग्यमित्यर्थः। 'दा' धातोः यतिप्रत्यये दा - यत् इति स्थिते अनुबन्धलोपे दा - य। ततः 'ईद्यति' इति सूत्रेण आकारस्य ईकारादेशे दी -य इति स्थिते यकारस्य आर्धधातुकत्वे ईकारस्य 'सार्वधातुकार्धधातुकयोः' इति सूत्रेण गुणे देयम् इति रूपम्।

एवं - **ग्लेयम्**

'ग्लै' धातोः यति प्रत्यये ग्लै यत् इति स्थिते अनुबन्धलोपे ग्लै-य इति स्थिते 'आदेच उपदेशेऽशिति' इति आत्वे यकारस्य आर्धधातुकसंज्ञयां 'सार्वधातुकार्धधातुकयोः' इति विभक्तिकार्ये ग्लेयम् इति रूपम्।

**10. पोरदुपधात् (३.१.९८)**

पवर्गान्तात् धातोः यत् प्रत्ययः

पोः अदुपधात् इति द्विपदं सूत्रमिदम्। अनेन सूत्रेण यत् विधीयते। पवर्गान्तादुपधात् यत् स्यात्। ण्यतोऽपवादः। पोः इति पञ्चम्येकवचनान्तम्। अदुपधात् इति पञ्चम्येकवचनान्तम्। अत्र धातोः यत् इत्यनुवर्तते। एतत् सूत्रम् ऋहलोर्ण्यत् इति सूत्रस्य अपवादसूत्रम् अस्ति। यथा शप आक्रोशे इति धातुः पकारान्तः अदुपधश्च। अतः अनेन सूत्रेण यत्प्रत्यये शप्यम् इति रूपम्। एवमेव लभ्यम् ।

**शप्यम्**

शप्तुं योग्यं शप्यम्। शप् इति धातोः 'पोरदुपधात्' इति सूत्रेण यत् प्रत्यये अनुबन्धलोपे शप् – य इति स्थिते 'कृत्तद्धितसमासाश्च' इति सूत्रेण सुप् प्रत्यये इत्ययस्य अमि पूर्वरूपमेकादेशे शप्यम् इति रूपम्।

**लभ्यम्**

लब्धुं योग्यं लभ्यम्। लभ् इति धातोः 'पोरदुपधात्' इति सूत्रेण यत्प्रत्यये अनुबन्धलोपे लभ् य इति स्थिते 'कृत्तद्धितसमासाश्च' इति सूत्रेण सुप् प्रत्यये इत्ययस्य अमि पूर्वरूपमेकादेशे लभ्यम् इति रूपम्।

**11. एतिस्तुशास्वृदृजुषः क्यप् (३.१.१०९)**

क्यप् प्रत्ययः

एति, स्तु, शास्, वृ, दृ, जुषः, क्यप् इति पदच्छेदः। अनेन सूत्रेण क्यप्प्रत्ययो विधीयते। अत्र धातोः प्रत्ययः इत्यनुवर्तते। एतिस्तुशास्वृदृजुषः इति पञ्चम्येकवचनान्तम्। क्यप् इति प्रथमैकवचनान्तम्। एतिश्च, स्तुश्च शास् च वृ च दृ च जुष् च इति एतिस्तुशास्वृदृजुषः तस्मात्। अतः इण्, ष्टुञ् (स्तु), शास्, वृञ्, दृङ्, जुष् इत्येतेभ्यः धातुभ्यः क्यप् प्रत्ययः भवति। क्यप् इत्यत्र पकारस्य इत्संज्ञाभवति। तस्य लोपः इति सूत्रेण लोपे य एव अवशिष्यते। यथा - इत्यः स्तुत्यः शिष्यः।

**शिष्यः**

शास्धातोः 'एतिस्तुशास्वृदृजुषः क्यप्' इत्यनेन सूत्रेण क्यपि अनुबन्धलोपे 'शास इदङ्हलोः' इति उपधायाः इत्वे शिस् य शासिवासिघसीनां च इति सूत्रेण सस्य षत्वे विभक्तिकार्ये च शिष्यः इति।

**12. ह्रस्वस्य पिति कृति तुक् (६.१.७१)**

पिति कृति परे तुगागमः

ह्रस्वस्य पिति कृति तुक् इति चतुष्पदं सूत्रमिदम्। अनेन सूत्रेण तुगागमः विधीयते। ह्रस्वस्यस्य इति षष्ठ्येकवचनान्तम्। पिति इति सप्तम्येकवचनान्तम्। कृति इति सप्तम्येकवचनान्तमृ। तुक् इति प्रथमैकवचनान्तम्। पिति कृति परे ह्रस्वस्य तुक् इति आगमः भवति। तुक् इत्यत्र उकौ इत्संज्ञकौ। तयोः लोपे सति त् इति अवशिष्यते। यथा- इण् गतौ इति धातोः क्यपि प्रत्यये कृते इ - या इति स्थिते 'ह्रस्वस्य पिति कृति तुक्' सूत्रेण तुगागमे अन्तावयवे 'इत्यः' इति रूपं सिद्धयति। एवमेव स्तुत्यः इति रूपम्।

**इत्यः**

एतुं योग्यः इत्यः। इण् धातोः 'एतिस्तुशास्वृदृजुषः क्यप्' इति सूत्रेण क्यप् अनुबन्धलोपे इ- क्यप् इति स्थिते 'ह्रस्वस्य पिति कृति' तुक् इत्यनेन तुगागमे अनुबन्धलोपे इ-त्–य इति स्थिते 'कृत्तद्धितसमासाश्च' इति सूत्रेण सुप् प्रत्यये कित्वाद् गुणाभावे सन्धिकार्ये च कृते इत्यः इति रूपम्।

तथैव स्तु धातोः क्यप् प्रत्यये तुगागमे विभक्तिकार्ये स्तुत्यः इति रूपम्

**13. शास इदङ्हलोः (६.४.३४)**

शासः उपधायाः इकारदेशः

शासः इत् अदङ्हलोः इति पदच्छेदः। शास उपधायाः इत्स्यादङि हलादौ क्ङिति इति सूत्रार्थः। शासः इति षष्ठ्येकवचनान्तम्। इत् इति प्रथमैकवचनान्तम्। अत्र 'अङ्गस्य उपधायाः' 'क्ङिति' इति च अनुवर्तते। शास् धातोः उपधा अस्ति शकारोत्तरवर्ती आ। अतः अस्य स्थाने इकारः भवति। यथा- शिष्यः,वृत्यः,आदृत्यः,जुष्यः।

**वृत्यः**

वृ इति धातोः क्यपि तुगागमे विभक्तिकार्ये च कृते वृत्यः।

**आदृत्यः**

आ इत्युपसर्गपूर्वक दृति धातोः क्यपि तुगागमे विभक्तिकार्ये च कृते आदृत्यः इति रूपम्।

**जुष्यः**

एवं जुष् धातोः एतिस्तुशास्वृदृजुषः क्यप् इति सूत्रेण क्यपि अनुबन्धलोपे जुष् य। संयोगे जुष्यः। अत्र तुगागमः न स्यात्।

विकल्पेन क्यप्

**14. मृजेर्विभाषा (३.१.११३)**

मृजेः विभाषा इति द्विपदं सूत्रमिदम्। अनेन सूत्रेण विकल्पेन क्यप् विधीयते। मृजेः इति पञ्चम्येकवचनान्तम्। विभाषा इति प्रथमेकवचनान्तम्। क्यप् धातोः प्रत्ययः परश्च इति च अनुवर्तते। अतः मृज् धातोः विकल्पेन क्यप् प्रत्ययः भवति इति सूत्रार्थः । पक्षे ण्यत्-प्रत्ययः भवति। यथा- मृज्यः'

**मृज्यः**

मृज् धातोः विकल्पेन क्यप् प्रत्यये मृज् य इति स्थिते सुप्रत्यये कित्वात् उपधागुणापवादे विभक्तिकार्ये च कृते मृज्यः इति। क्यपः अभावपक्षे मार्ग्यः इति रूपम्।

ऋवर्णान्तात् हलन्तात् ण्यत्

**15. ऋहलोर्ण्यत् ३ । १ । १२४ ।**

ऋहलोः ण्यत् इति पदच्छेदः। अनेन सूत्रेण ण्यत् विधीयते। ऋवर्णान्ताद्हलन्ताच्च धातोर्ण्यत् स्यात् इति सूत्रार्थः। ऋहलोः इति षष्ठीविभक्तेः द्विवचनान्तम्। ण्यत् इति प्रथमैकवचनान्तम्। ण्यत्' इत्यत्र तकारस्य णकारस्य च इत्संज्ञा भवति। 'तस्य लोपः' इति सूत्रेण इत्संज्ञकवर्णानां लोपे य एव अवशिष्यते। यथा- कार्यम्, हार्यम् ,धार्यम्।

**कार्यम्**

डुकृञ् धातोः 'ऋहलोर्ण्यत्' इति सूत्रेण ण्यत्प्रत्यये अनुबन्धलोपे यकारस्य णित्वात् 'अचो ञ्णिति' इति सूत्रेण आदिवृद्धिः। क् आर् य। संयोगे विभक्तिकार्ये कार्यम् इति रूपम्।

**हार्यम्**

हृञ् धातोः 'ऋहलोर्ण्यत्' इति सूत्रेण ण्यत्प्रत्यये अनुबन्धलोपे वृद्धौ विभक्तिकार्यें हार्यम् इति।

**धार्यम्**

धृ धातोः 'ऋहलोर्ण्यत्' इति सूत्रेण ण्यत्प्रत्यये अनुबन्धलोपे वृद्धौ विभक्तिकार्यें धार्यम् इति।

चकारजकारयोः कवर्गादेशः

**16. चजोः कु घिण्यतोः (७.३.५२)**

चजोः कु घिण्यतोः इति त्रिपदं सूत्रमिदम्। अनेन सूत्रेण कुत्वं विधीयते। चजोः कुत्वं स्यात् घिति ण्यति च परे इचि सूत्रार्थः। 'चजोः' इति षष्ठ्याः द्विवचनान्तम्। कु इति प्रथमैकवचनान्तम्। घिण्यतोः इति सप्तम्याः द्विवचनान्तम्। यथा मार्ग्यः।

वृद्धिः

भक्ष्येऽभिधेये भोज्यम् इति निपात्यते

ण्वुल्तृचौ प्रत्ययौ स्तः

**मार्ग्यः**

मृज्धातोः ऋहलोण्यत् इति ण्यति 'चजोः कु घिण्यतोः' इति कुत्वेन जकारस्य गकारे मृजेर्वृद्धिः इति वृद्धौ रपरत्वे च मार्ग्य। ततः विभक्तिकार्ये मार्ग्यः इति।

**17. मृजेर्वृद्धिः (७.२.११४)**

मृजेः वृद्धिः इति द्विपदं सूत्रमिदम्। अनेन सूत्रेण वृद्धिः विधीयते। मृजेरिको वृद्धिः स्यात् सार्वधातुकार्धातुकयोः इति सूत्रार्थः। 'मृजेः' इति षष्ठ्येकवचनान्तम् वृद्धिः' इति प्रथमैकवचनान्तम्। अत्र सार्वधातुकार्धधातुकयोः इति अनुवर्तते। स्थाने वृद्धिः। यथा- मार्ग्यः।

**मार्ग्यः**

मृज्धातोः क्यपः अभावपक्षे 'ऋहलोर्ण्यत्' इति सूत्रेण ण्यत्प्रत्यये अनुबन्धलोपे 'चजोः कु घिण्यतोः' इति सूत्रेण जकारस्य कुत्वे गकारे जाते 'मृजेर्वृद्धिः' इति सूत्रेण ऋकारस्य वृद्धौ विभक्तिकार्ये मार्ग्यः इति रूपम्।

**18. भोज्यं भक्ष्ये (७.३.६९)**

भोज्यं भक्ष्ये इति द्विपदं सूत्रमिदम्। अनेन सूत्रेण भोज्यमिति निपात्यते। भोज्यम् इति प्रथमैकवचनान्तपदम्। भक्ष्ये इति सप्तम्यकवचनान्तपदम्। भक्ष्येऽभिधेये भोज्यम् इति निपात्यते । यति ण्यति प्रत्यये परतः 'चजोः कु घिण्ण्यतोः' इत्यनेन सूत्रेण प्राप्तं कुत्वं न भवति इति तात्पर्यम्। एतद् निपातनात् भोज्यं भवति। अन्यत्र तु भोग्यम् इति ।

**भोज्यं -भोग्यम्**

भक्ष्यमर्थात् खाद्यार्थश्चेत् भुज् धातोः भोज्यस्य निपातनं भवति। भुज् धातोः अर्थद्वयं अस्ति। भुज् धातोः ण्यत्प्रत्यये जकारस्य कुत्वे प्राप्ते भोज्यं भक्ष्ये इति सूत्रेण भक्ष्यार्थे कुत्वाभावस्य निपातनं कृतम्। पालनार्थे कुत्वे भोग्यम् इति।

## 2.4.2 पूर्वकृदन्तप्रकरणम्।

**19. ण्वुल्तचौ (३.१.१३३)**

एकपदं सूत्रमिदम्। ण्वुल्तृचौ इति प्रथमायाः द्विवचनान्तम्। अत्र धातोः इति अनुवर्तते। कर्तरि कृदिति कर्त्रर्थे इति सूत्रार्थः। अतः धातोः ण्वुल्तृचौ प्रत्ययौ भवतः इति सूत्रार्थः। 'कर्तरि कृत्' इति परिभाषया एतौ प्रत्ययौ

कर्त्रर्थे प्रयुक्तौ भवतः। ण्वुल् इत्यत्र इत्सज्ञकवर्णानां लोपे जाते वु इति अवशिष्यते। तृच् इत्यत्र अनुबन्धलोपे तृ इत्येव अवशिष्यते। यथा कारकः। कृञ्धातोः ण्वुल्तृचौ इति ण्वुलि अनुबन्धलोपे कृ वु इति।

### 20. युवोरनाकौ (७.१.१)

युवु इत्येतयोः स्थाने अन-अकौ आदेशौ

द्विपदं सूत्रमिदम्। युवोः' इति षष्ठीविभक्तेः एकवचनान्तम् । अनाकौ इति प्रथमायाः द्विवचनान्तम्। यु वु इत्येतयोः स्थाने अन-अकौ इत्यादेशौ भवतः। 'यथासंख्यमनुदेशः समानाम्' इति परिभाषया यु इत्यस्य स्थाने 'अन', 'वु इत्यस्य च स्थाने 'अक' इति आदेशः च भवति। 'अनेकालत्वात् अनेकाल्शित्सर्वस्य' इति सूत्रेण एतौ आदेशौ सम्पूर्णस्य स्थानिनः स्थाने भवतः । यथा – कारकः, कर्ता

### कारकः

डुकृञ् करणे धातोः ण्वुल्तृचौ इति सूत्रेण कर्त्रर्थे ण्वुल्प्रत्यये 'युवोरनाकौ' इति सूत्रेण वु इत्यस्य अक इति सर्वादेशे कृ अक। 'अचो ञ्णिति' इति सूत्रेण ऋकारस्य वृद्धौ क् आर् क। संयोगे विभक्ति कार्ये 'कारकः' इति।

### कर्ता

करोति इति कर्ता। डुकृञ् धातोः ण्वुल्तृचौ इति सूत्रेण तृच्प्रत्यये सार्वधातुकार्धधातुकयोः इति सूत्रेण ऋकारस्य गुणे रपरत्वे च कर्तृ इति जाते प्रातिपदिकसंज्ञायां विभक्तिकार्ये च कृते 'कर्ता' इति।

### 21. नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः (३.१.१३४)

लुणिन्यचः

नन्दिग्रहिपचादिभ्यः ल्युणिन्यचः इति पदच्छेदः। अनेन सूत्रेण लुणिन्यचः विधीयन्ते। नन्दिग्रहिपचादिभ्यः इति पञ्चमी बहुवचनम्। ल्युणिन्यचः इति प्रथमा बहुवचनम्। अतः नन्द्यादिन्यः ग्रहादिभ्यः पचादिभ्यश्च धातुभ्यः ल्यु णिनि अच् इत्येते प्रत्ययाः भवन्ति इति अर्थः। नन्दयतीति नन्दनः। जनमर्दयतीति जनार्दनः। लवणः। ग्राही। स्थायी। मन्त्री। पचतीति पचः। पचादिराकृतिगणः।

### नन्दनः

नन्दयतीति नन्दनः। नन्दि इति णिजन्तधातोः 'नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः' इति सूत्रेण 'ल्युप्रत्यये अनुबन्धलोपे। नन्दि यु इति स्थिते 'युवोरनाकौ' हति सूत्रेण 'यु' इत्यस्य स्थाने 'अन' आदेशे 'णेरनिटि' इति सूत्रेण इकारलोपे नन्द् अन। प्रातिपदिकसञ्ज्ञायां विभक्तिकार्ये 'नन्दनः' इति रूपम्।

**जनार्दनः**

जनमर्दयतीति जनार्दनः। जन पूर्व अर्दि धातोः णिचि 'कर्तरि कृत्' इत्यनेन कर्त्रर्थे 'नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः' इति सूत्रेण ल्युप्रत्यये जन अर्दि ल्यु इति स्थिते अनुबन्धलोपे जन अर्दि यु । 'युवोरनाकौ' इति सूत्रेण यु इत्यस्य अनादेशे जन अर्दि अन। 'णेरनिटि' इत्यनेन णेः लोपे जन अर्थ अन- जन अर्दन इति जाते 'अकः सवर्णे दीर्घः' इति सवर्णदीर्घे च कृते जनार्दन इति स्थिते प्रातिपदिकसंज्ञायां, प्रातिपदिकत्वात् सुप्रत्यये, विभक्तिकार्ये च कृते 'जनार्दनः' इति रूपम्।

**लवणः**

लुनातीति लवणः। लूञ् धातोः 'नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः' इति अनेन कर्त्रर्थे ल्यु प्रत्यये अनुबन्धलोपे लू यु। 'युवोरनाकौ' इत्यनेन यु इत्यस्य अनादेश लू अन इति स्थिते "सार्वधातुकार्धधातुकयोः' इति सूत्रेण गुणादेशे लो अन इति जाते 'एचोऽयवायावः' इति सूत्रेण ओकारस्य अवादेशे लव अन लवन इति स्थिते निपातनात् नकारस्य णत्वे च कृते लवण इति। अत्र प्रातिपदिकसंज्ञायां प्रातिपदिकत्वात् सुप्रत्यये विभक्तिकार्ये च कृते 'लवणः' इति रूपम्।

**ग्राही**

गृह्णातीति ग्राही। ग्रह् इति धातोः 'नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः' इति सूत्रेण णिनिप्रत्यये ग्रह णिनि इति जाते अनुबन्धलेपे ग्रह् इन। 'अत उपधायाः' इति सूत्रेण धातोः उपधायाः वृद्धौ ग्राह् इन ग्राहिन' इति। अत्र 'कृत्तद्धितसमासाश्च' इति सूत्रेण प्रातिपदिकसंज्ञायां प्रातिपदिकत्वात् सुप्रत्यये, विभक्तिकार्ये च कृते 'ग्राही' इति रूपम्।

तथैव स्थायी, मन्त्री

**22. इगुपधज्ञाप्रीकिरः कः (३.१.१३५ )**

कः प्रत्ययः

इगुपधज्ञाप्रीकिरः कः इति द्विपदं सूत्रमिदम्। अनेन सूत्रेण कप्रत्ययः विधीयते। इगुपधज्ञाप्रीकिरः इति पञ्चमीविभक्तिः एकवचनम्। इक् उपधा येषां ते इगुपधाः। अत्र धातोः प्रत्ययः परश्च', इति च अनुवर्तते। अतः इगुपधेभ्यः, ज्ञा, प्रीञ्, कृ इत्येतेभ्यः धातुभ्यः क इति प्रत्ययः भवति इति अर्थः। कः इत्यत्र 'अ' अवशिष्यते । यथा - बुधः, कृशः, ज्ञः, प्रियः, किरः।

**बुधः**

बुध्यते इति बुधः पण्डितः इति। बुध् इति धातो. 'कर्तरि कृत्' इति अनुज्ञया कर्त्रर्थे 'इगुपधज्ञाप्रीकिरः कः' इत्यनेन कप्रत्यये बुध् क इति जाते अनुबन्धलोपे बुध् अ। अत्र 'कृत्तद्धितसमासाश्च' इत्यनेन प्रातिपदिकसंज्ञायां प्रातिपदिकत्वात् सुप्रत्यये, विभक्तिकार्ये च कृते 'बुधः' इति रूपम्।

**कृशः**

कृश्यतीति कृशः। कृश् धातो 'कर्तरि कृत्' इत्यनेन कर्त्रर्थे 'इगुपधज्ञाप्रीकिरः कः' इति सूत्रेण कः प्रत्यये अनुबन्धलोपे कृश् अ कृश इति। अत्र 'कृत्तद्धितसमासाश्च' इति प्रातिपदिकसंज्ञायां प्रातिपदिकत्वात् सुप्रत्यये, विभक्तिकार्ये च कृते 'कृशः' इति रूपम्।

**ज्ञः**

जानातीति ज्ञः। ज्ञा इति धातोः 'कर्तरि कृत्' इत्यनेन कर्त्रर्थे 'इगुपधज्ञाप्रीकिरः कः' इति सूत्रेण कप्रत्यये अनुबन्धलोपे ज्ञा अ इति जाते 'आतो लोपः' इटि च इति सूत्रेण आकारस्य लोपे ज्ञ् अ- ज्ञ इति। अत्र 'कृत्तद्धितसमासाश्च' इति सूत्रेण प्रातिपदिकसज्ञायां प्रातिपदिकत्वात् सुप्रत्यये, विभक्तिकार्ये च कृते 'ज्ञः' इति रूपम्।

**प्रियः**

प्रीणातीति प्रियः। प्री इति धातोः कर्तरि कृत् इत्यनेन कर्त्रर्थे 'इगुपधज्ञाप्रीकिरः कः' इति सूत्रेण कप्रत्यये अनुबन्धलोपे प्री अ 'अचिश्नुधातुभ्रुवां य्वोरियङुवङौ' इति सूत्रेण ईकारस्य इयङ्ङादेशे, अनुबन्धलोपे प्रिय् अ इति। अत्र 'कृत्तद्धितसमासाश्च' इति सूत्रेण प्रातिपदिकसंज्ञायां प्रातिपदिकत्वात् सुप्रत्यये विभक्तिकार्य च कृते 'प्रियः' इति रूपम्।

**किरः**

किरतीति किरः। कृ इति धातोः 'कर्तरि कृत्' इत्यनेन कर्त्रर्थे 'इगुपधज्ञाप्रीकिरः कः' इति सूत्रेण कप्रत्यये अनुबन्धलोपे 'कृ अ' इति। 'ऋत इद्' इत्यनेन ऋकारस्य इत्वे रपरत्वे किर् अ किर इति। अत्र 'कृत्तद्धितसमासाश्च' इति सूत्रेण प्रातिपदिकसंज्ञायां प्रातिपदिकत्वात् सुप्रत्यये, विभक्तिकार्ये च कृते 'किरः' इति रूपम्।

**23. आतश्चोपसर्गे (३.१.१३६)**

उपसर्ग उपपदे आकारान्तेभ्यः कः प्रत्ययः

आतः च उपसर्गे इति पदच्छेदः। अनेन सूत्रेण कप्रत्ययः विधीयते। आतः इति पञ्चमीविभक्तिः एकवचनम्। च इति अव्ययम्। उपसर्गे इति सप्तमीविभक्तिः एकवचनम्। अत्र धातोः प्रत्ययः परः कश्च इत्येते अनुवर्तते। अतः उपसर्गे उपपदे आकारान्तेभ्यः धातुभ्यः कः प्रत्ययः भवति इति सूत्रार्थः। 'कः' इत्यत्र 'अ' इति अवशिष्यते। यथा प्रज्ञः सुग्लः।

**प्रज्ञः**

प्रकर्षेण जानातीति प्रज्ञः। प्र उपसर्गपूर्वकात् ज्ञा धातोः 'कर्तरि कृत्' इत्यनेन कर्त्रर्थे 'आतश्चोपसर्गे कः' इति सूत्रेण कप्रत्यये अनुबन्धलोपे प्र ज्ञा अ 'आतो लोप इटि च' इति सूत्रेण आकारस्य लोपे प्र ज्ञ् अ - प्रज्ञ। अत्र 'कृत्तद्धितसमासाश्च' इति सूत्रेण प्रातिपदिकसंज्ञायां प्रातिपदिकत्वात् सुप्रत्यये, विभक्तिकार्ये च कृते 'प्रज्ञः' इति रूपम्।

**सुग्लः**

सुग्लायतीति सुग्लः। सु उपसर्गपूर्वकात् ग्लै इति धातोः कर्त्रर्थे 'आतश्चोपसर्गे कः' इति सूत्रेण कप्रत्यये अनुबन्धलोपे सु ग्लै अ इति। 'आदेच उपदेशेऽशिति' इति सूत्रेण ग्लै इत्यस्य ऐकारस्य आकारादेशे सु ग्ला अ इति। 'आतो लोप इटि च' इति सूत्रेण आकारस्य लोपे सुग्ल अ पररूपे 'कृत्तद्धितसमासाश्च' इति सूत्रेण प्रातिपदिकत्वात् सुप्रत्यये, विभक्तिकार्ये च कृते 'सुग्लः' इति रूपम् ।

**24. गेहे कः (३.१.१४४)**

ग्रहधातोः कः प्रत्ययः

गेहे कः इति द्विपदं सूत्रमिदम्। अनेन सूत्रेण कप्रत्ययः विधीयते। गेहे इति सप्तमी एकवचनम्। कः इति प्रथमा एकवचनम्। अत्र'धातो' प्रत्ययः, परः ग्रहः इत्येते च अनुवर्तन्ते। अतः ग्रह् धातोः गेहे अर्थे कर्तरि कः प्रत्ययः भवति इति सूत्रार्थः । अत्र कः इत्यत्र 'अ' इति अवशिष्यते । यथा - गृहम्।

**गृहम्**

धान्यादिकं गृह्णातीति गृहम्। ग्रहि धातोः 'कर्तरि कृत्' इति कर्त्रर्थे 'गेहे कः' इति सूत्रेण कप्रत्यये अनुबन्धलोपे ग्रह् अ इति जाते 'ग्रहि-ज्या वयि व्यधि-वष्टि विचति-वृश्चति पृच्छति भृज्जतीनां ङिति च' इत्यनेन सम्प्रसारणे गृह् अ इति। अत्र 'कृत्तद्धितसमासाश्च' इति सूत्रेण प्रातिपदिकसंज्ञायां प्रातिपदिकत्वात् सुप्रत्यये, विभक्तिकार्ये च कृते गृहम् इति रूपम् ।

**25. कर्मण्यण् (३.२.१)**

अणप्रत्ययः

कर्मणि अण् इति द्विपदं सूत्रमिदम्। अनेन सूत्रेण अण्प्रत्ययः विधीयते। कर्मणि इति सप्तमी एकवचनम्। 'अण्' इति प्रथमा एकवचनम् । अत्र धातोः, प्रत्ययः परश्च इति अनुवर्तन्ते। अतः कर्मणि उपपदे धातोः अण् प्रत्ययः भवति इति अर्थः। अण् इत्यत्र अ अवशिष्यते। यथा - कुम्भं करोति इति कुम्भकारः।

**कुम्भकारः**

कुम्भं करोतीति कुम्भकारः। 'कर्तरि कृत्' इति कर्त्रर्थे 'कर्मण्यण्' इति सूत्रेण अण्प्रत्यये स्थिते अनुबन्धलोपे कुम्भ कृ अ। 'अचो ञ्णिति' इति सूत्रेण ऋकारस्य वृद्धौ रपरत्वे कुम्भ कार् अ - कुम्भ कार इति । विभक्तिकार्ये कृते कुम्भकारः इति रूपम् ।

**26. आतोऽनुपसर्गे कः (३.२.३)**

कर्मणि उपपदे कः प्रत्ययः

आतः अनुपसर्गे कः इति त्रिपदं सूत्रमिदम्। अनेन सूत्रेण कप्रत्ययः विधीयते। आतः इति पञ्चम्येकवचनम्। 'अनुपसर्गे' इति सप्तम्येकवचनम्। कः' इति प्रथमैकवचनम्। अत्र कर्मणि' इति अनुवर्तते। उपसर्गरहितेभ्यः आकारान्तेभ्यः धातुभ्यः कर्मणि उपपदे कः प्रत्ययः भवति। एषः प्रत्ययः 'कर्मण्यण्' इति सूत्रेण प्राप्तः अण् प्रत्ययस्य बाधकः अस्ति। यथा - गां ददातीति गोदः, धनं ददातीति धनदः, कम्बलं ददातीति कम्बलदः।

**गोदः**

गां ददातीति गोदः। गाम् इति उपपदपूर्वकदाधातोः 'कर्तरि कृत्' अति कर्त्रर्थे 'कर्मण्यण्' इति सूत्रेण अण्प्रत्यये अनुबन्धलोपे गो दा अ। 'आतो लोपः इटि च' इति सूत्रेण आकारस्य लोपे गो दा। 'आतश्चोपसर्गे कः' इति सूत्रेण कप्रत्यये प्रातिपदिकत्वात् सुपः लोपे विभक्तिकार्ये च कृते 'गोदः' इति रूपम्।

तथैव –धनदः,कम्बलदः।

**27. मूलविभुजादिभ्यः कः (वार्तिकम्)**

मूलविभुजादिभ्यः कः प्रत्ययः

वार्तिकमिदम्। अनेन वार्तिकेन कप्रत्ययः विधीयते। मूलानि विभूजतीति मूलविभूजो रथः। आकृतिगणऽयम्। मूलविभुजादिभ्यः शब्देभ्यः कः प्रत्ययः भवति। मूलविभुज इति आकृतिगणः। महीं धरतीति महीध्रः पर्वतः, कुध्रः। आकृतिगणः - मूलविभुज नखमुख काकगुह कुमुद महीध्र कुधामिध्र। इति मूलविभुजादयः।

**मूलविभुजः**

मूलानि विभुजतीति मूलविभुजः। मूल इति कर्मण्युपपदे विपूर्वकात् भुज् धातोः 'मूलविभुजादिभ्यः कः' इति वार्तिकेन कः प्रत्यये अनुबन्धलोपे, 'आर्धधातुकं शेषः' इति सूत्रेण आर्धधातुकसंज्ञायां 'पुगन्तलघूपधस्य च' इति सूत्रेण लघूपधगुणे प्राप्ते 'क्ङिति च' इति सूत्रेण गुणस्य निषेधे 'मूल आम् विभुज' इति जाते 'उपपदमतिङ्' इत्यनेन समासे 'कृत्तद्धितसमासाश्च'इत्यनेन प्रातिपदिकसंज्ञायां प्रातिपदिकत्वात् सुपः लोपे विभक्तिकार्ये च कृते 'मूलविभुजः' इति रूपम् ।

**28. चरेष्टः (३.२.१६)**

चर्धातोः टः प्रत्ययः

चरेः ट इति द्विपदं सूत्रमिदम्। अनेन सूत्रेण टप्रत्ययः विधीयते। अधिकरण उपपदे इति सूत्रार्थः। चरेः इति पञ्चम्येकवचनम्। टः इति प्रथमैकवचनम्। अत्र सुपि अधिकरणे इति च अनुवर्तते। अतः अधिकरणे सुबन्ते उपपदे चर् धातोः टः प्रत्ययः भवति इति अर्थः। ट इत्यत्र 'अ' अवशिष्यते। यथा - कुरुषु चरतीति कुरुचरः। टित्वात् स्त्रीलिङ्गे कुरुचरी इति रूपम्।

**कुरुचरः**

कुरुषु चरतीति कुरुचरः। चर् धातोः 'कर्तरि कृत्' इत्यनेन कर्त्रर्थे 'चरेष्टः' इति सूत्रेण टप्रत्यये अनुबन्धलोपे कुरु चर् अ। 'उपपदमतिङ्' इति सूत्रेण समासे कुरुचर इति। 'कृत्तद्धितसमासाश्च' इति सूत्रेण प्रातिपदिकसंज्ञायां, प्रातिपदिकत्वात् सुपः लोपे विभक्तिकार्ये च कृते कुरुचरः इति रूपम् ।

## Summarised Overview

कृदन्ते कृत्यप्रकरणे अत्र सप्तदश सूत्राणि तस्य व्याख्यानं उदाहरणानि च विस्तरेण प्रतिपादितानि। तस्मिन् प्रकरणे धातोः इति सूत्रेण कृत् विधीयते। कर्तरि कृत् इति सूत्रनिमित्तात् कृत्यप्रत्ययः कर्त्रर्थे भवति। धातुभ्यः तव्य, तव्यत्, अनीयर्, केलिमर्, यत्, क्यप्, ण्यत् इत्यादि प्रत्ययाः स्युः। क्यप् प्रत्ययः विकल्पेन अपि स्यात्। मृजेर्वृद्धिः इति वृद्धिः विधीयते।

पूर्वकृदन्तप्रकरणे इह दश सूत्राणि तस्य व्याख्यानं उदाहरणानि च विस्तरेण प्रतिपादितानि। कत्रार्थे ण्वुल् तृच् एतौ प्रत्ययौ स्तः। यु वु इत्यनयोः अन अक इति आदेशौ स्तः। केषुचित् सूत्रेषु धातुभ्यः कः इति प्रत्ययः विधीयते। अण्, ट इत्यादि प्रत्ययाः अपि धातुभ्यः विधीयते।
कर्ता, कारकः, चेयम्, इत्यः, कुम्भकारः, इत्यनेक कृत्यरूपाणि निष्पादयितुं शक्यते।

## Assignments

1. भोज्यम्,भोग्यम् एतयोः मध्ये कः भेदः?
2. मार्ग्यः इत्यत्र वृद्धिः केन सूत्रेण भवति विशदयत।
3. एधितव्यम्, देयम्, शिष्यः, भोग्यम् इत्येतेषां सप्रमाणं प्रक्रियाः निष्पादयत।
4. प्रज्ञः, सुग्लः, लभ्यम्, ज्ञेयम्, इत्येतान् प्रयोगान् साधयत।
5. आतश्चोपसर्गे कः इति सूत्रं उदाहरणसहितं व्याख्यात।
6. गेहे कः सूत्रं व्याख्यात।
7. कर्तरि कृत् इति सूत्रस्य वृत्तिः का? उदाहरणसहितं विशदयत।
8. जनार्दनः, कुम्भकारः, कम्बलदः, कुरुचरी इत्येतान् प्रयोगान् साधयन्त।

## Suggested Readings


1. लघुसिद्धान्तकौमुदी. वरदराजः, चौखम्बा संस्कृत सीरीस अकादमि, वाराणसी २००५.
2. पदसंस्कारचन्द्रिका. कैकुलका रामवारियर्, केरलसाहित्य अकादमि, तृश्शूर।
3. लघुपाणिनीयम्. ए आर् राजराजवर्मा, केरलसर्वकलाशाला, तिरुवनन्तपुरम्।
4. पाणिनीयप्रद्योतम्. ऐसि चाक्को भाषा इन्स्टिट्यूट, तिरुवनन्वपुरम्
5. प्रक्रियाभाष्यम्. का जोन् कुन्नपप्लि, नाषणल् बुक् स्टाल्, कोट्टयम्।


## References


1. लघुसिद्धान्तकौमुदी,वरदराजा चौखम्बा संस्कृत सीरीस अकादमि, वाराणसी २००५.
2. श्रीवरदराजाचार्यकृतः लघुसिद्धान्तकौमुदी. श्रीसूर्यनारायणशुक्लः 'बालमनोरमा' संस्कृत - हिन्दीटीका सहित प्रकाशकः,वाराणासी, संस्कृत संस्थान सीरीज १०००
3. श्रीमद्वरदराजाचार्यप्रणीता लघुसिद्धान्तकौमुदी. श्रीधरमुखोल्लासिनी- हिन्दी- व्याख्यासमन्विता भाग-2व्याख्याकारः गोविन्द प्रसाद शर्मा, चौखम्बा सुरभारती प्रकाशन, वाराणसी, २००७
4. लघुसिद्धान्तकौमुदी द्वितीयो भागः, प्रोफसर् आर् वासुदेवन् पोट्टि,सर्वकारीयसंस्कृतकलालयः तृप्पूणित्तुरा, १९९३

## Space for Learner Engagement for Objective Questions

Learners are encouraged to develop objective questions based on the content in the paragraph as a sign of their comprehension of the content. The Learners may reflect on the recap bullets and relate their understanding with the narrative in order to frame objective questions from the given text. The University expects that 1 - 2 questions are developed for each paragraph. The space given below can be used for listing the questions.

# समासप्रकरणम्

# BLOCK- 3

UNIT 1

# समासप्रकरणम् (केवलसमासः)

## Learning Outcomes

- संस्कृतभाषायां व्याकरणशास्त्रस्य प्रसक्तिः।
- समासादीनां ज्ञानेन भाषाशुद्धिं जानाति।
- समासभेदान् गृह्णाति।
- केवलसमासं प्रत्यभिजानाति।

## Background

व्याकरणशास्त्रं भाषायाः शुद्धिं निर्णयति। संस्कृतभाषायाः महत्त्वस्य कारणेषु अन्यतमः भवति तस्याः व्याकरणम्। व्याकरणे समासः नितरां प्राधान्यमर्हति। वर्णनिमित्तकः सन्धिः। पदनिमित्तकः समासः एकार्थिभवनं समासः। भट्टोजिदीक्षितमहाशयस्य मते समासाः चतुर्था विभक्ताः। वरदराजाचार्यस्य मते समासः पञ्चधा। ते केवलसमासः अव्ययीभावः तत्पुरुषः बहुव्रीहिः द्वद्वः च।

अस्मिन् खण्डे चत्वारः भागाः सन्ति। प्रथमे भागे एकके समासानां स्वभावं, विभागाः, केवलसमासं च वर्तते। द्वितीये एकके अव्ययीभावसमासं, तत्पुरुषसमासं च विशदयति। तृतीये एकके बहुव्रीहिं द्वन्द्वं च सूचयति। चतुर्थे एकके कारकप्रकरणस्थानि सूत्राणि विशदयति।

इदानीं समासः कः इति, कति विभागाः ,केवलसमासं च पठामः।

## Keywords

समसनं समासः - केवलसमासः - अव्ययीभावः - तत्पुरुषः - तत्पुरुषभेदः - कर्मधारयः - कर्मधारभेदः - द्विगुः - बहुव्रीहिः - द्वन्द्वः - प्राक्काडारात्समासः - सहसुपा - भूतपूर्वः

## Discussion

## समासः

समासः

समसनं समासः। अनेकस्य पदस्य एकपदीभवनं समासः। समसनं मिलनम्। पृथगर्थानां पदानाम् एकार्थोपस्थितिजनकत्वं समासः। समासः युगपत् द्वयोः द्वयोः सुबन्तयोः भवति। द्वन्द्वे तु युगपत् बहूनामपि। परस्परान्वितयोः सुबन्तयोः समासः भवति। यथा वृक्षमूलम्। अत्र द्वयोः परस्परान्वयः अस्ति। यत्र परस्परान्वयो नास्ति तत्र न समासः।

वृत्तयः

परार्थाभिधानं वृत्तिः। प्रत्ययान्तर्भावेण अपरपदार्थान्तर्भावेण वा यः विशेष्टोऽर्थः सः परार्थः। पञ्च वृत्तयः। कृत्तद्धितसमासैकशेषसनाद्यन्तरूपाः। कृत्, तद्धितः, समासः, एकशेषः सनाद्यन्तधातुरूपाः पञ्चवृत्तयः। धातुना साकं प्रत्ययेन नामनिष्पत्तिः कृत्। यथा कर्तुं योग्यं कार्यम्। (कृञ् ण्यत् – कार्यम्)। नामपदात् अन्यनामनिष्पत्तिः तद्धितः। दशरथशब्दात् दाशरथिः इति पदनिष्पत्तिः। राज्ञः पुरुषः राजपुरुषः इति समासः। माता च पिता च पितरौ इति एकशेषः। पठितुमिच्छति पिपठिष्यति। अत्र सन्नन्तः। तस्य धातुसंज्ञा। एवं भवितुमिच्छति बुभूषति। एवं पञ्च वृत्तयः।

विग्रहः

वृत्यर्थावबोधकं वाक्यं विग्रहः। समासादेरर्थं बोधयितुं यद्वाक्यम् उपयुज्यते तद्वाक्यं विग्रहः। विग्रहः द्विविधा। लौकिकालौकिकभेदात्। लोके प्रयोगार्हः लौकिकः। यथा राजपुरुषः इत्यस्य राज्ञः पुरुषः इति लौकिकविग्रहः। लोके प्रयोगानर्हः अलौकिकः। यथा राजन् ङस् पुरुष सु इत्यलौकिकविग्रहः।

समासभेदाः

समासाः पञ्चधा। विशेषसंज्ञाविनिर्मुक्तः केवलसमासः। अव्ययीभावादि-संज्ञाविनिर्मुक्तः केवलसमासः। यथा-भूतपूर्वः। प्रायेण पूर्वपदार्थप्रधानो अव्ययीभावः। प्रायेण यस्मिन् समासे पूर्वपदार्थस्य प्राधान्यं सोऽव्ययीभावसमासः। यथा-यथाशक्ति। प्रायेण उत्तरपदार्थप्रधानो तत्पुरुषः। प्रायेण यस्मिन् समासे उत्तरपदार्थस्य प्रधान्यं सः तत्पुरुषः। यथा हरित्रातः। तत्पुरुषभेदः कर्मधारयः। तत्पुरुषः समानाधिकरणः कर्मधारयः। समानविभक्त्यन्तयोरेव कर्मधारसमासः। यथा नीलोत्पलम्। कर्मधारयभेदः द्विगुः। संख्यापूर्वो द्विगुः। यथा षाण्मातुरः। प्रायेण अन्यपदार्थप्रधानो बहुव्रीहिः। समासाघटकस्य पदस्यार्थः यदि क्रियाया अन्वितो भवति तर्हि बहुव्रीहिः। यथा पीताम्बरः। प्रायेणोभयपदार्थप्रधानो द्वन्द्वः। उभयोः पदार्थयोः यदि क्रियया अन्वयो भवति तर्हि द्वन्द्वः। यथा रामकृष्णौ।

पदविधिः

### 1. समर्थः पदविधिः (२.१.१)

द्विपदं सूत्रम्। पदसम्बन्धी यो विधिः सः समर्थाश्रितो बोध्यः।

**2. प्राक्कडारात्समासः(२.१.३)**

समासः इत्यधिक्रिते

त्रिपदं सूत्रम्। प्राक् कडारात् समासः इति पदच्छेदः। (इत्यधिक्रियते) 'कडाराः कर्मधाये' इति सूत्रं यावत् समासः इत्यधिक्रियते।

**3.सह सुपा (२.१.४)**

केवलसमासः विधीयते

द्विपदं सूत्रम्। अनेन सूत्रेण केवलसमासः विधीयते। यथा भूतपूर्वः। पूर्वं भूतः इति लौकिकविग्रहः। पूर्व अम् भूत सु इति अलौकिकविग्रहः। 'सह सुपा' इति सूत्रेण समासः। समासत्वात् प्रातिपदिकत्वम्। प्रातिपदिकत्वात् 'सुपो धातुप्रातिपदिकयोः' इति सुपः लुक्। पूर्व भूत। 'भूतपूर्वे चरट्' इति निर्देशात् भूतशब्दस्य पूर्वनिपाते प्रातिपदिकत्वात् सु प्रत्यये भूतपूर्व सु। 'उपदेशेऽजनुनासिक इत्' इति उकारस्य इत्संज्ञायां लोपे भूतपूर्व स्। 'ससजुषे रुः इति रुत्वे भूतपूर्व र्। 'खरवसानयोर्विसर्जनीयः' इति विसर्गे भूतपूर्वः इति रूपम्।

**3. इवेन समासो विभक्त्यलोपश्च (वार्तिकम्)**

इवेन समासः

इवेन समासः विभक्त्यलोपः च इति चतुष्पदं वार्तिकम्। विभक्त्येरलोपः च इति चतुष्पदं वार्तिकम्। इव शब्देन सह समासः स्यात्, तथा विभक्त्येरलोपः च। अर्थात् सुपोधातुप्रातिपदिकयोः इत्यनेन विधीयमानं सुपः लुक् न। यथा वागर्थौ इव वागर्थाविव। वागर्थ औ इव इत्यलौकिकविग्रहः। इवेन समासो विभक्त्लोपश्च इति वार्तिकेन समासे विभक्त्यलोपे च वागर्थौ इव। 'एचोऽयवायावः' इति आवादेशे 'वागर्थाविव' इति रूपम्।

## Summarised Overview

एकार्थीभवनं समासः। पदनिमित्तकः समासः। समासस्य प्रथमः भागः भवति केवलसमासः। विविधानां समासानां सामान्यलक्षणं सूचितम्। विशेषसंज्ञाविर्निमुक्तः भवति केवलसमासः। समासे परस्परान्वितत्वमावश्यकम्। वृत्तीनां स्वभावः सूचितः। पञ्चवृत्तयः। वृत्यर्थावबोधकं वाक्यं विग्रहः। विग्रहः द्विधा – लौकिकः अलौकिकः चेति। राजपुरुषः इत्यस्य राजन् ङस् पुरुष सु इत्यलौकिकविग्रहः।

समासभेदेष्वन्यतमः केवलसमासः। लघुसिद्धान्तकौमुद्यां केवलसमासे सूत्रद्वयम् एकं वार्तिकं च सन्ति। 'सह सुपा' इति सूत्रेण केवलसमासः विधीयते।

# Assignments

1. किं नाम केवलसमासः एकमुदाहरणं लिखत।
2. किं नाम समासः? समासः कति विधः?
3. का नाम वृत्तिः? कति वृत्तयः?
4. किम् नाम विग्रहः? विशदयत।
5. सह सुपा इति सूत्रं व्याख्यात।
6. समासभेदविषये भट्टोजिदीक्षितमहाशयस्याभिप्रायः कः? विशदयत।

# Suggested Readings


1. लघुसिद्धान्तकौमुदी. वरदराजः, चौखम्बा संस्कृत सीरीस अकादमि, वाराणसी, २००५
2. पदसंस्कारचन्द्रिका. कैकुलका रामवारियर्, केरलसाहित्य अकादमि, तृश्शूर।
3. लघुपाणिनीयम्. ए आर् राजराजवर्मा ,केरलसर्वकलाशाला, तिरुवनन्तपुरम्।
4. पाणिनीयप्रद्योतम्. ऐसि चाक्को, भाषा इन्स्टिट्यूट, तिरुवनन्वपुरम्।
5. प्रक्रियाभाष्यम्. फा. जोन् कुन्नपप्लि, नाषणल् बुक् स्टाल्, कोट्टयम्।


# References


1. वरदराजाचार्यः, लघुसिद्धान्तकौमुदी, व्याख्या श्रीगिरीशकुमार ठक्कुरः, कृष्णदास अकादमी, वारणासी १९९८, पुटानि २११ – २१२।
2. वरदराजाचार्यः. लघुसिद्धान्तकौमुदी, व्याख्या श्रीगोमतीप्रसादशास्त्रीमिश्रः .चौखम्बा सुरभारती प्रकाशन्, वाराणसी, २०११, पुठानि २१५- २१६।
3. जि.महाबलेश्वरभट्टः, समासः,संस्कृतभारती, बेङ्गलूरू,१९९९, पुटानि १-४।


**Space for Learner Engagement for Objective Questions**

Learners are encouraged to develop objective questions based on the content in the paragraph as a sign of their comprehension of the content. The Learners may reflect on the recap bullets and relate their understanding with the narrative in order to frame objective questions from the given text. The University expects that 1 - 2 questions are developed for each paragraph. The space given below can be used for listing the questions.

UNIT 2

# समासप्रकरणम् (अव्ययीभावः तत्पुरुषः च)

## Learning Outcomes

- भाषायै व्याकरणशास्त्रस्य योगदानमवगच्छति।
- समासस्य पठनेन भाषाप्रयोगे निपुणतामर्जयितुं प्रेरयति।
- अव्ययीभावसमासस्य प्राधान्यं प्रयोगं च जानाति।
- तत्पुरुषसमासं तस्य भेदान् च गृह्णाति।

## Background

भाषायै एव व्याकरणम्। भाषायाः शुद्धिनिर्णये व्याकरणं नितरां साहाय्यकमेव। सन्धिसमासादयः व्याकरणस्याविभाज्यघटकाः। समासविभागे केवलसमासस्य प्रधानान् नियमान् वयम् अपठाम। विशेषसंज्ञाविनिर्मुक्तः केवलसमासः। प्रायेण पूर्वपदार्थप्रधानो अव्ययीभावसमासः। यथा यथाशक्ति। प्रायेण उत्तरपदप्रधानो तत्पुरुषः यथा वृक्षमूलम्। तत्पुरुषभेदः कर्मधारयः। समानाधिकरणः तत्पुरुषः कर्मधारयः। यथा कृष्णसर्पः। कर्मधारयभेदः द्विगुः। यथा षाण्मातुरः।

अस्मिन्नेकके अव्ययीभावसमासं तत्पुरुषसमासं तथा तत्पुरुषभेदं कर्मधारयं, कर्मधारयभेदं द्विगुं चाधिकृत्य पठामः।

## Keywords

अव्ययीभावः.- उपसर्जनम् - नदीभिश्च - तृतीयातत्पुरुषः - सप्तमी शौण्डैः - दिक्संख्ये संज्ञायाम् - टच् - उपमानपूर्वपदः कर्मधारयः - अच्प्रत्ययः।

# Discussion

## 3.2.1. पूर्वपदार्थप्रधानः अव्ययीभावः।

**1. अव्ययीभावः (२.१.५)**

एकपदं सूत्रम्। अधिकारोऽयं प्राक् तत्पुरुषात्।

**2. अव्ययं विभक्तिसमीपसमृद्धिव्यृद्ध्यर्थाभावात्ययासम्प्रति-शब्दप्रादुर्भावपश्चाद्यथानुपूर्व्यसम्पत्तिसाकल्यान्तवचनेषु। (२.१.६)**

अव्ययीभावं समासः

द्विपदं सूत्रम्। अव्ययमिति प्रथमं पदम्। विभक्ति-समीप-समृद्धि-व्यृद्धि-अर्थाभाव-अत्यय-असम्प्रति- शब्दप्रादुर्भाव- पश्चात्- यथा- आनुपूर्व्य-यौगपाद्य-साहश्य-सम्पत्ति- साकल्य- अन्त- वचनेषु इति द्वितीयस्य पदस्य च्छेदः। अनेन सूत्रेण अव्ययीभावसमासः विधीयते।

विभक्त्यर्थादिषु वर्तमानमव्ययं सुबन्तेन सह नित्यं समस्यते सोऽव्ययीभावः। विभक्तौ उदाहरति अधिहरि। हरौ इति अधिहरि इति लौकिकविग्रहः। हरि ङि अधि इति अलौकिकविग्रहः। अव्ययं विभक्ति......' इत्यादिना सूत्रेण समासः। 'प्रथमानिर्दिष्टं समास उपसर्जनम्' इति अधीत्यस्य उपसर्जनसंज्ञायाम् 'उपसर्जनं पूर्वम्' इति अधेः पूर्वनिपाते अधि हरि ङि। 'सुपो धातुप्रातिपदिकयोः' इति सुपः लुकि अधि हरि। पुनः सुप्रत्यये अधिहरि सु। 'अव्ययादाप्सुपः' इति सुलोपे अधिहरि।

**3. उपसर्जनसंज्ञा प्रथमानिर्दिष्टं समास उपसर्जनम् (१.२.४३)**

उपसर्जनसंज्ञा

त्रिपदं सूत्रम्। अनेन सूत्रेण उपसर्जनसंज्ञा विधीयते। समासशास्त्रे प्रथमानिर्दिष्टमुपसर्जनसंज्ञं स्यात्। यथा अधिहरि। हरौ इति अधिहरि। हरि ङि अधि इत्यलौकिकविग्रहः। अव्ययं विभक्ति.....' इत्यादिना समासः, विभक्तौ इत्यर्थे अधि इत्यव्ययं च। अत्र 'प्रथमानिर्दिष्टं समास उपसर्जनम्' इति सूत्रेण अधेः उपसर्जनत्वं लभते। 'उपसर्जनं पूर्वम्' इत्यादावस्य प्रयोजनम्।

**4. उपसर्जनं पूर्वम् (२.२.३०)**

उपसर्जनस्य पूर्वत्वम्

द्विपदं सूत्रम्। अनेन सूत्रेण उपसर्जनस्य प्राक् प्रयोज्यं सूचयति। समासे उपसर्जनं प्राक् प्रयोज्यम्। यथा अधिहरि। हरौ इति अधिहरि। हरि ङि अधि इत्यलौकिकविग्रहः। 'अव्ययं विभक्ति...... 'इत्यादिना समासः। अधि इत्यस्य 'प्रथमानिर्दिष्टं समास उपसर्जनम्' इत्यनेन उपसर्जनसंज्ञायाम् 'उपसर्जनं पूर्वम्' इति पूर्वप्रयोगे अधि हरि औ।

### 5. अव्ययीभावश्च (२.४.१८)

अव्ययीभावसमासः नपुंसकलिङ्गः

अव्ययीभावः च इति द्विपदं सूत्रम्। अनेन सूत्रेण नपुंसकलिङ्गं विधीयते। यथा अधिहरि। हरौ इति अधिहरि। हरि ङि अधि इत्यलौकिकविग्रहे अव्ययं विभक्ति......' इत्यादिना समासः। समासत्वात् सुपः लुकि हरि अधि।
'अधि' इत्यस्योपसर्जनसंज्ञायां पूर्वप्रयोगे अधिहरि। तस्मात्सुप्रत्ययः। 'अव्ययीभावश्च' इति नपुंसके 'अव्ययादाप्सुपः' इति सुप्रत्ययस्य लोपे अधिहरि इति रूपम्।

### 6. नाव्ययीभावदतोऽम्त्वपञ्चम्याः (२.४.८३)

सोः अमादेशः

न अव्ययीभावात् अतः अम् तु अपञ्चम्याः इति षड्पदं सूत्रम्। अनेन सूत्रेण सोः अमादेशः विधीयते। अदन्तादव्ययीभावात् सुपो न लुक्, तस्य पञ्चमीं विना अमादेशश्च स्यात्। यथा गाः पातीति गोपः, तस्मिन् इति अधिगोपम्। गोप ङि अधि इत्यलौकिकविग्रहः। ' अव्ययं विभक्ति...' इत्यादिना समासः। समासत्वात् सुपो धातुप्रादिपदिकयोः इति सुपः लुक्। गोप अधि। अधीत्यस्य उपसर्जनसंज्ञायां पूर्वारूपे अधिगोप। तस्मात्सुप्रत्यये अधिगोप सु। अत्र ' नाव्ययीभावादतोऽम्त्वपञ्चम्याः ' इति सोरमादेशे अधिगोप अम्। 'अमि पूर्वः ' इति पूर्वरूपे अधिगोपम्।

### 7. तृतीयासप्तम्योर्बहुलम् (२.४.८५)

विकल्पेन सोः अमादेशः

तृतीयासप्तम्योः बहुलम् इति द्विपदं सूत्रम्। अनेन सूत्रेण विकल्पेन सोरमादेशः विधीयते। बहुलग्रहणात् पाक्षिकविधिः। अदन्तादव्ययीभावात् तृतीयासम्प्तम्योर्बहुलमम्भावः स्यात्। यथा अधिगोपम् अधिगोपेन। गाः पातीति गोपः तस्मिन् अधिगोपम्। तृतीयाविभक्तौ अधिगोपम् अधिगोपेन वा। सप्तम्याम् अधिगोपम् अधिगोपे वा। गोप ङि अधि इत्यलौकिकविग्रहे 'अव्ययं विभक्ति .....' इत्यादिना समासः। सुपः लुकि गोप अधि। 'प्रथमानिर्दिष्टं समास उपसर्जनम्' इति उपसर्जनसंज्ञायां पूर्वप्रयोगे अधिगोप। तस्मात् टा विभक्तौ तृतीयासप्तम्योर्बहुलम्' इति विकल्पेन अम्भावे पूर्वरूपे अधिगोपम्।

अमादेशाभावे 'टाङसिङसामिनात्स्याः' इति इनादेशे गुणे अधिगोपेन।

सप्तमीविभक्तौ अमादेशे अधिगोपम्। अमादेशाभावे ङि प्रत्यये अनुबन्धलोपे अधिगोप इ। 'आद्गुणः' इति गुणे अधिगोपे इति।

**समस्यत - उपकृष्णम् - उपकृष्णेन - उपकृष्णे।**

कृष्णस्य समीपम् उपकृष्णम्। कृष्ण ङस् उप इत्यलौकिकविग्रहः। 'अव्ययं विभक्ति....' इत्यादिना समासः। समासत्वात् सुपः लुक् कृष्ण उप। उपेत्यस्य पूर्वप्रयोगे उपकृष्ण। तस्मात्सुप्रत्यये उपकृष्णं सु।

‘नाव्ययीभादतोऽम्त्वपञ्चम्याः' इति अमादेशे उपकृष्ण अम्। पूर्वरूपे उपकृष्णम्।

तृतीयविभक्तौ टा प्रत्यये उपकृष्ण टा। ‘तृतीयासप्तम्योर्बहुलम्’ इति विकल्पेन अमादेशे पूर्वरूपे उपकृष्णम्। टाप्रत्ययाभावे इनादेशे गुणे उपकृष्णेन इति। सप्तम्यां ङि प्रत्यये विकल्पेन अमादेशे पूर्वरूपे च उपकृष्णम्। सप्तम्यां अमादेशाभावे अनुबन्धलोपे गुणे उपकृष्णेन इति।

**समद्रम्-** मद्राणां समृद्धिः। मद्‌ आम् स ‘अव्ययं विभक्ति ..'।

**दुर्यवनम्** -यवनानां वृद्धिः दुर्यवनम्। यवन आम् दुर् -'अव्ययं विभक्ति..'।

**निर्मक्षिकम्** - मक्षिकाणामभावः निर्मक्षिकम्। मक्षिक आम निर् -अव्यय विभक्ति....।

**अतिहिमम् -** हिमस्यात्ययः अतिहिमम्। हिम ङस्  अति - ‘अव्ययं विभक्ति ...'।

**अतिनिद्रम्** - निद्रा संप्रति न युज्यते इति अतिनिद्रम्। निद्रा सु अति इत्यलौकिकविग्रहः। अव्ययं विभक्ति....' इत्यादीनां समासः। समासत्वात् सुपः लुक्। निद्रा अति। अतीत्यस्य उपसर्जनसंज्ञायां पूर्वप्रयोगे अतिनिद्रा। 'अव्ययीभावश्च' इत्यव्ययत्वात्' ‘ह्रस्वो नपुंसके प्रातिपदिकस्य' इति ह्रस्वे अतिनिद्रा। तस्मात्सुप्रत्यये 'नाव्ययीभावादतोऽम्त्वापञ्चम्याः ' इत्यमि अतिनिद्र अम्। 'अमि पूर्वः ' इति पूर्वरूपे अतिनिद्रम्।

**इतिहरि** - हरिशब्दस्य प्रकाशः इतिहरि। हरि ङस् इति इत्यलौकिकविग्रहः। 'अव्ययं विभक्ति ..' इत्यादिना समासः। समासत्वात्सुपः लुक्। इतिशब्दस्य पूर्वप्रयोगे इतिहरि। तस्मात्सुपि 'स्वमोर्नपुंसकात्' इति सुलोपे इतिहरि।

**अनुविष्णु** - विष्णोः पश्चादनुविष्णु। विष्णु ङस् उप इत्यलौकिकविग्रहः। 'अव्ययम् विभक्ति ..' इत्यादिना समासः।

यथा इत्यस्य चत्वारः अर्थाः। योग्यता ,वीप्सा, पदार्थानतिवृत्तिः, सादृश्यं च। रूपस्य योग्यं **अनुरूपम्**। रूप ङस् उप इत्यलौकिकविग्रहः। 'अव्ययं विभक्ति..'इत्यादिना समासः। वीप्सायां द्विरुक्तिः।

**प्रत्यर्थम् -** अर्थम् अर्थं प्रति प्रत्यर्थं। अर्थं अम् प्रति इत्यलौकिकविग्रहः। 'अव्ययं विभक्ति..' इत्यादिना समासः। समासत्वात् सुपः लुक्। प्रतीत्यस्योपसर्जनसंज्ञायां 'उपसर्जनं पूर्वम्' इति पूर्वनिपाते प्रति अर्थ। यणि सुप्रत्यये 'नाव्ययीभावादतोऽम्त्वपञ्चम्याः' इत्यमि प्रत्यर्थ अम्। पूर्वरूपे प्रत्यर्थम्।

पदार्थानतिवृत्तेरुदाहरणं भवति **यथाशक्तिः**। शक्तिमनतिक्रम्य यथाशक्तिः। शक्ति अम् यथा इत्यलौकिकविग्रहः। 'अव्ययम् विभक्ति..' इत्यादिना समासः।

सादृश्यस्योदाहरणं भवति हरेः सादृश्यं **सहरिः**। हरि ङस् सह इत्यलौकिकविग्रहः। 'अव्ययम् विभक्ति ..' इत्यादिना समासः।

**8. अव्ययीभावे चाकाले (६.३.८१)**

सहस्य सादेशः

अव्ययीभावे च अकाले इति सूत्रम्। अनेन सूत्रेण सहस्य सादेशः स्यादव्ययीभावे, न तु काले। यथा हरेः सादृश्यं सहरिः। हरि ङस् सह इत्यलौकिकविग्रहे 'अव्ययं विभक्ति....' इत्यादिना समासे, समासत्वात्सुपः लुकि सहस्योपसर्जनसंज्ञायां, 'उपसर्जनं पूर्वम्' इति पूर्वनिपाते सहहरि। अत्र 'अव्ययीभावे चाकाले' इति सहस्य सादेशे सहरि। पुनः सु प्रत्यये 'स्वमोर्नपुंसकात्' इति सुलोपे' सहरि इति।

**समस्यत - अनुज्येष्ठम्।**

ज्येष्ठस्य आनुपूर्व्येत्यनुज्येष्ठम्। ज्येष्ठ ङस् अनु इत्यलौकिकविग्रहे 'अव्ययम् विभक्ति ..' इत्यादिना समासः।

**सचक्रम्** - चक्रेण युगपत् सचक्रम्। चक्र टा सह इत्यलौकिकविग्रहे 'अव्ययम् विभक्ति ..' इत्यादिना समासः।

**ससखि** - सदृशः सख्या ससखि। सखि टा सह इत्यलौकिकविग्रहे 'अव्ययम् विभक्ति..' इत्यादिना समासः। समासत्वात् सुपः लुक्। सहेत्यस्य उपसर्जनसंज्ञायां 'उपसर्जनं पूर्वम्' इति पूर्वनिपाते सह सखि। सहस्य सादेशे सुपि 'स्वमोर्नपुंसकात्' इति सुलोपे ससखि इति रूपम्।

**सक्षत्रम्** - क्षत्राणां सम्पत्तिः सक्षत्रम्। क्षत्र आम् सह इत्यलौकिकविग्रहे 'अव्ययम् विभक्ति ..' इत्यादिना समासः।

**सतृणम्** - तृणामपि अपरित्यज्य सतृणम्। तृण अम् सह इत्यलौकिकविग्रहः। 'अव्ययम् विभक्ति ..' इत्यादिना समासः।

**साग्नि** - अग्निग्रन्थपर्यन्तमधीते साग्नि। अग्नि अम् सह इत्यलौकिकविग्रहे 'अव्ययम् विभक्ति ..' इत्यादिना समासः। समासत्वात् सुपः लुक्। सहस्योपसर्जनसंज्ञायां 'उपसर्जनं पूर्वम्' इति पूर्वप्रयोगे सह अग्नि। सहस्य सादेशे सवर्णदीर्घे साग्नि। पुनः सुप्रत्यये साग्नि सु। सुलोपे साग्नि इति।

**9. नदीभिश्च (२.१.२०)**

संख्या समस्यते

नदीभिः च इति द्विपदं सूत्रम्। अनेन सूत्रेण नदीवाचकेन सह संख्या समस्यते। नदीभिः सह संख्या समस्यते।

**10. समाहारे चायमिष्यते (वार्तिकम्)**

समाहारे संख्या समस्यते

अर्थात् समाहारे नदीभिः सह संख्या समस्यते। यथा पञ्चगङ्गम्। पञ्चानां गङ्गां समाहारः पञ्चगङ्गम्। पञ्चन् आम् गङ्गा आम् इत्यलौकिकविग्रहः। 'नदीभिश्च' इति समासः। 'कृत्तद्धितसमासश्च' इति प्रातिपदिकसंज्ञायां 'सुपो धातुप्रातिपदिकयोः' इति सुपः लोपः। 'नलोपः प्रातिपदिकान्तस्य' इति नलोपे पञ्चगङ्गा'। 'स नपुंसकं' इति नपुंसकसंज्ञायां ह्रस्वे नपुंसके प्रातिपदिकस्य इति ह्रस्वे पञ्चगङ्ग। तस्मात्सुपि 'नाव्ययीभावा- दतोऽम्त्वपञ्चम्याः' इति अमादेशे पञ्चगङ्ग अम्। 'अमि पूर्वः' इति पूर्वरूपे पञ्चागङ्गम्।

**द्वियमुनम्** -द्वयोः यमुनायोः समाहारः द्वियमुनम्। द्वि ओस् यमुना ओस् इत्यलौकिकविग्रहः। 'नदीभिश्च' इति समासः।

**11. तद्धिताः (४.१.७६)**

अधिकारसूत्रम्

एकपदं सूत्रम्। आपञ्चमसमाप्तेः अधिकारोऽयम्।

**12. अव्ययीभावे शरत्प्रभृतिभ्यः (५.४.१०७)**

टच् प्रत्ययः

द्विपदं सूत्रम्। अनेन सूत्रेण टच्प्रत्ययः विधीयते। शरदादिभ्यष्टच् स्यात् समासन्तोऽव्ययीभावे। यथा शरदः समीपमुपशरदम्। शरद् ङस् उप इत्यलौकिकविग्रहः। 'अव्ययं विभक्ति... ' इत्यादिना समासः। समासत्वात् सुपः लुक्। उपेत्यस्य 'उपसर्जनं पूर्वम्' इति पूर्वनिपाते उपशरद्। अत्र 'अव्ययीभावे शरत्प्रभृतिभ्यः' इति टच्प्रत्यये उपशरद् अ। तस्मात्सुप्रत्यये अमादेशे 'अमि पूर्वः' इति पूर्वरूपे उपशरदम्।

**प्रतिविपाशम्** - विपाशं विपाशं प्रति प्रतिविपाशम्। विपाश् अम् प्रति इत्यलौकिकविग्रहः। 'अव्ययं विभक्ति ..' इत्यादिना समासः।

**13. जराया जराश्च (वार्तिकम्)**

जरसादेशः टच् च

जरायाः जरः च इति त्रिपदं वार्तिकम्। अनेन वार्तिकेन जराशब्दस्य जरसादेशः टच्प्रत्ययश्च विधीयते। अव्ययीभावसमासे जराशब्दस्य जरसादेशः' टच्प्रत्ययश्च स्यात्। यथा जरायाः समीपम् उपजरसम्। जरा ङस् उप इत्यलौकिकविग्रहः। 'अव्ययं विभक्ति..' इत्यादिना समासः। समासत्वात् सुपः लुक्। 'उपसर्जनं पूर्वम्' इति उपशब्दस्य पूर्वनिपाते उपजरा। 'जरायाः जरश्च' इति वार्तिकेन

जरसादेशे  टच्प्रत्यये च उपजरस। तस्मात्सुपि अमि 'अमि पूर्वः' इति पूर्वरूपे उपजरसम् इति।

**14. अनश्च | (५.४.१०८)**

टच् प्रत्ययः

अनः च इति द्विपदं सूत्रम्। अनेन सूत्रेण टच्प्रत्ययः विधीयते। अन्नन्तादव्ययीभावाट्टच् स्यात्। यथा उपरजम्। राज्ञः समीपम् उपराजम्। राजन् ङस् उप इत्यलौकिकविग्रहः। 'अव्ययं विभक्ति.' इत्यादिना समासः। समासत्वात्सुपः लुक्। उपेत्यस्य पूर्वनिपाते उपराजन्। 'अनश्च' इति सूत्रेण टच्प्रत्यये उपराजन् अ। 'नस्तद्धिते' इति टिलोपे उपराज। तस्मात्सुपि अमि पूर्वरूपे उपराजम्।

**15. नस्तद्धिते (६.४.१४४)**

टेर्लोपः

न: तद्धिते इति द्विपदं सूत्रम्। अनेन सूत्रेण टेर्लोपः विधीयते। नान्तस्य भस्य टेर्लोपः स्यात् तद्धिते। यथा आत्मनि इति अध्यात्मम्। आत्मन् ङि  अधि इत्यलौकिकविग्रहः। 'अव्ययं विभक्ति...' इत्यादिना  समासः। समासे अधीत्यस्योपसर्जनसंज्ञायां पूर्वप्रयोगे यणि अध्यात्मन्। 'अनश्च' इति टचि अध्यात्मन् अ। भत्वात् 'नस्तद्धिते' इति टिलोपे सुप्रत्यये 'नाव्ययीभादतोऽम्त्वपञ्चम्याः' इत्यमि अध्यात्म अम्। पूर्वरूपे अध्यात्मम्।

विकल्पेन टच्

**16. नपुंसकादन्यतरस्याम् (५.४.१०९)**

द्विपदं सूत्रम्। अनेन सूत्रेण विकल्पेन टच् विधीयते। अन्नन्तं यत् क्लीबं तदन्तादव्ययीभावात् टज्वा स्यात्। यथा उपचर्मम्, उपचर्म वा। चर्मणः समीपम् उपचर्मम् उपचर्म वा। चर्मन् ङस् उप इत्यलौकिकविग्रहः। 'अव्ययं विभक्ति ..' इत्यादिना समासः। समासत्वात् सुपः लुक्। उपेत्यस्य पूर्वप्रयोगः। उपचर्मन्। 'नपुंसकादन्यतरस्याम्' इति विकल्पेन टचि उपचर्मन् अ। 'नस्तद्धिते' इति सूत्रेण टेः लोपे सुप्रत्यये अमादेशे पूर्वरूपे च उपचर्मम्। टचः अभावे सुप्रत्यये अनुबन्धलोपे नलोपे 'हल्ङ्याब्भ्यादिना सलोपे च उपचर्म।

**17.  झयः (५.६.१११)**

झयन्तात् टच् वा

एकपदं सूत्रम्। अनेन सूत्रेण विकल्पेन टच्वा स्यात्। झयन्तादव्ययीभावाट्टज्वा स्यात्। यथा समिधः समीपम् उपसमिधम् उपसमित् वा। समिध् ङस् उप इत्यलौकिकविग्रहः। 'अव्ययं विभक्ति..' इत्यादिना समासः। समासत्वात् सुपः लुक्। उपेत्यस्य पूर्वप्रयोगः। 'झयः' इति सूत्रेण विकल्पेन टच्प्रत्यये उपसमिध् अ। सुपि अमि पूर्वरूपे उपसमिधम्।

टचः अभावे सुप्रत्यये अनुबन्धलोपे उपसमिध् स। 'हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल्' इति सलोपे उपसमिध्। 'वावसाने' इति चत्वे उपसमित्।

## 3.2.2 तत्पुरुषसमासः

प्रायः उत्तरपदप्रधानः तत्पुरुषः। तत्पुरुषा चतुर्था। सामान्यः, कर्मधारयः, द्विगुः, नञ्प्रभृतयः चेति। सामान्यः तत्पुरुषः विभक्त्यानुसारं सप्तधा। प्रथमातत्पुरुषः, द्वितीया तत्पुरुषः, तृतीयातत्पुरुषः इत्याद्याः।

**18. तत्पुरुषः (२.१.२२)**

एकपदं सूत्रम्। अधिकारोऽयं प्राग्बहुव्रीहेः।

तत्पुरुषसंज्ञकः

**19. द्विगुश्च (२.१.२३)**

द्विगुः च इति द्विपदं सूत्रम्। द्विगुः तत्पुरुषे अन्तर्भवतीत्युच्यते। द्विगुरपि तत्पुरुष संज्ञकः स्यात्।

**20. द्वितीया श्रितातीतपतितगतात्यस्तप्राप्तापन्नैः (२.१.२४)**

द्वितीयातत्पुरुषः

द्विपदं सूत्रम्। अनेन सूत्रेण द्वितीयातत्पुरुषसमासः विधीयते। द्वितीयान्तं श्रितादिप्रकृतिकैः सुबन्तैः सह वा समस्यते। यथा कृष्णं श्रितः कृष्णाश्रितः। कृष्ण अम् श्रित सु इत्यलौकिकविग्रहः। 'द्वितीया श्रितातीतपतितगतात्यस्तप्राप्तापन्नैः' इति सूत्रेण समासः। समासत्वात् सुपः लुक्। पुनः सुप्रत्यये अनुबन्धलोपे रुत्वे विसर्गे च कृष्णाश्रितः।

एवं दुखम् अतीतः दुःखातीतः। कूपः पतितः, ग्रामगतः, मार्गात्यस्तः, शालाप्राप्तः, संशयापन्नः इत्यादयः।

**21. तृतीया तत्कृतार्थेन गुणवचनेन (२.१.३०)**

तृतीयातत्पुरुषः

त्रिपदं सूत्रम्। अनेन सूत्रेण तृतीयतत्पुरुषः विधीयते। तृतीयान्तं तृतीयान्तार्थकृतगुणवचनेन अर्थशब्देन च सह वा समस्यते। यथा शङ्कुलया खण्डः शङ्कुलाखण्डः। शङ्कुला टा खण्ड सु इत्यलौकिकविग्रहः। 'तृतीया तत्कृतार्थेन गुणवचनेन' इति सूत्रेण समासः। समासत्वात् सुपः लुक्। पुनः सुप्रत्यये अनुबन्धलोपे रुत्वे विसर्गे च शङ्कुलाखण्डः।

**धान्यार्थः** -धान्येन अर्थः धान्यार्थः। धान्य टा अर्थ सु इत्यलौकिकविग्रहः। तृतीया तत्कृतार्थेन गुणवचनेन इति समासः।

तत्कृतेति किम्? अक्ष्णा काणः इत्यत्र इत्यत्र काणत्वं अक्षिकृतं न। अतः न समासः। शङ्कुलाखण्डः इत्यत्र खण्डत्वं शङ्कुलया कृतम्।

### 22. कर्तृकरणे कृता बहुलम् (२.१.३२)

कृदन्तेन तृतीया समस्यते

त्रिपदं सूत्रम्। अनेन सूत्रेण तृतीयान्तं कृता सह समस्यते। कर्तरि करणे च तृतीया कृदन्तेन बहुलं समस्यते। यथा हरिणा त्रातः हरित्रातः। हरिः टा त्रात सु इत्यलौकिकविग्रहः। 'कर्तृकरणे कृता बहुलं' इति सूत्रेण समासः। समासत्वात् सुपः लुक्। पुनः सुपि विभक्तिकार्ये हरित्रातः।

**नखभिन्नः** - नखैः भिन्नः नखभिन्नः। नख भिस् भिन्न सु इत्यलौकिकविग्रहः। कर्तृकरणे कृता बहुलम् इति समासः।

### 23. कृद्ग्रहणे गतिकारकपूर्वस्यापि ग्रहणम्। ()

गतिपूर्वस्य कृतः, कारकपूर्वस्य च कृतः ग्रहणं

कृतः ग्रहणे गतिपूर्वस्य कृतः, कारकपूर्वस्य च कृतः ग्रहणं कार्यम्। यथा नखैः निर्भिन्नः इत्यत्र निर् इत्यस्य गतिसंज्ञा। कृद्ग्रहणे गतिपूर्वस्यापि ग्रहणात् 'कर्तृकरणे कृता बहुलम्' इति सूत्रेण समासः। नखनिर्भिन्नः इति रूपम्।

परशुना विच्छिन्नः **परशुविच्छिन्नः**।

एवं तेन कृतम् तत्कृतम्। खड्गेन छिन्नः खड्गछिन्नः। भासेन रचितं भासरचितम्।

### चतुर्थी तदर्थार्थबलिहितसुखरक्षितैः (२.१.३६)

चतुर्थीतत्पुरुषः

द्विपदं सूत्रम्। अनेन सूत्रेण चतुर्थीतत्पुरुषसमासः विधीयते। चतुर्थ्यन्तर्थाय यद् तद्वाचिना अर्थादिभिश्च चतुर्थ्यान्तम् वा समस्यते। यथा यूपाय दारु यूपदारु। यूप ङे दारु सु इत्यलौकिकविग्रहः। 'चतुर्थी तदर्थबलिहितसुखरक्षितैः' इति सूत्रेण समासः। समासत्वात् सुपः लुक्। पुनः सुप्रत्यये 'स्वमोर्नपुंसकात् 'इति सुलोपे यूपदारु।

तदर्थेन प्रकृतिविकृतिभाव एवेष्टः। अस्य वाक्यस्यायमर्थः। प्रकृतिः समवायीकरणं, विकृतिः कार्यम्। यत्र समवयीकारणकार्याभावः तत्र समासः। यथा घटाय मृतिका घटमृतिका, वस्त्राय तन्तवः वस्त्रतन्तवः यूपाय दारु यूपदारु इत्यादिषु समासः। रन्धनाय स्थाली इत्यत्र न समासः।

### 24. अर्थेन नित्यसमासो विशेष्यलिङ्गता चेति वक्तव्यम् (वार्तिकम्)

अर्थशब्देन चतुर्थ्यन्तं नित्यं समस्यते

अर्थशब्देन चतुर्थ्यन्तं नित्यं समस्यते, तथा विशेषस्य लिङ्गं प्रयोक्तव्यम्। यथा द्विजार्थः सूपः। सूपः इति विशेष्यस्य लिङ्गः पुल्लिङ्गः। यथा द्विजार्थः सूपः। सूपः इति विशेष्यस्य लिङ्गः पुंलिङ्गः। यथा द्विजाय अयं द्विजार्थः। द्विज ङे अर्थ सु इति अलौकिकविग्रहः। 'चतुर्थी तदर्थार्थबलिहितसुखरक्षितैः' इति समासः।

समासत्वात् सुपः लुक्। सवर्णदीर्घे द्विजार्थः। सुपः इत्यस्य पुंलिङ्गत्वात् सुप्रत्यये अनुबन्धलोपे रुत्वे विसर्गे च द्विजार्थः सूपः।

द्विजाय इयं द्विजार्था यवागूः। अत्र समासे विशेष्यस्य यवागोः, स्त्रीलिङ्गत्वात् सुप्रत्यये 'अजाद्यतष्टाप्' इति टापी विभक्तिकार्ये द्विजार्था यवागूः इति।

द्विजाय इदं द्विजार्थं (पयः)। पयश्शब्दस्य नपुंसकत्वात् द्विजार्थ सु इत्यवस्थायाम् 'अतोऽम्' इत्यमि पूर्वरूपे द्विजार्थम्।
एवं छात्राय इयं छात्रार्था (यवागूः)। शिशवे इदम् शिश्वर्थम्। पयः
**भूतबलिः -** भूतेभ्यो बलिः भूतबलिः। भूत भ्यस् बलि सु इत्यलौकिकविग्रहः। 'चतुर्थी तदर्थार्थबलिहितसुखरक्षितैः' इति समासः।
**कुण्डलहिरण्यम् -** कुण्डलाय हिरण्यं कुण्डलहिरण्यम्।

**गोहितम् -** गवे हितं गोहितम्। गो ङे हित सु इत्यलौकिकविग्रहः। 'चतुर्थी तदर्थार्थ बलिहितसुखरक्षितैः' इति समासः।
**गोसुखम् -** गवे सुखं गोसुखम्।
**गोरक्षितम् -** गवे रक्षितं गोरक्षितम्।

### 25. पञ्चमी भयेन (२.१.३७)

पञ्चमीतत्पुरुषः

द्विपदं सूत्रम्। अनेन पञ्चमीतत्पुरुषसमासः विधीयते। भयवाचकः शब्दः पञ्चम्यन्तेन वा समस्यते। यथा चोराद्भयं चोरभयम्। चोर ङसि भय सु इत्यलौकिकविग्रहः। पञ्चमी भयेन इति समासः। समासत्वात् सुपः लुक्। पुनः सौविभक्तौ अमादेशे पूर्वरूपे च चोरभयम्।
एवं वृकात् भीतिः **वृकभीतिः**। व्याघ्रात् भीतः **व्याघ्रभीतः**। वृश्चिकात् भीः **वृश्चिकभीः**।

### 26. स्तोकान्तिकदूरार्थकृच्छ्राणि क्तेन (२.१.३९)

स्तोकान्तिकादि-शब्दाःक्तान्तप्रकृति केन समस्यते

द्विपदं सूत्रम्। स्तोकान्तिकादिपदानि क्तप्रकृतिकैः सह समस्यते। यथा स्तोकान्मुक्तः। स्तोक ङसि मुक्त सु इत्यलौकिकविग्रहः। 'स्तोकान्तिकदूरार्थकृच्छ्राणि क्तेन' इति सूत्रेण समासः। 'पञ्चम्याः स्तोकादिभ्यः' इत्यनेन पञ्चम्यन्तस्य लोपाभावे स्तोकात् मुक्त। 'अनुस्वारस्य ययि परसवर्णः' इति परसवर्णे स्तोकान्मुक्त। सुपि विभक्तिकार्ये स्तोकान्मुक्तः।

स्तोकादिपरे पञ्चम्याः अलुक्

### 27. पञ्चम्याः स्तोकादिभ्यः (६.३.२)

द्विपदं सूत्रम्। अनेन सूत्रेण पञ्चम्याः अलुक् विधीयते। उत्तरपदे परे स्तोकादिशब्देभ्यः पञ्चम्याः अलुक् स्यात्। यथा अन्तिकादागतः। अन्तिक ङसि आगत सु इत्यलौकिकविग्रहः। 'स्तोकान्तिकदूरार्थकृच्छ्राणि क्तेन' इति

समासः। 'पञ्चम्याः स्तोकादिभ्यः' इति पञ्चम्याः अलुक् अन्तिकात् आगतः। सुपि 'झलां जशोऽन्ते' इति जश्त्वे विभक्तिकार्ये अन्तिकादागतः।
एवम् अभ्यासादागतः। दूरादागतः। कृच्छ्रादागतः।

### 28. षष्ठी (२.२.८)

षष्ठीतत्पुरुषः

एकपदं सूत्रम्। अनेन सूत्रेण षष्ठीतत्पुरुषः विधीयते। षष्ठ्यन्तं सुबन्तेन सह वा समस्यते। यथा राजपुरुषः। राज्ञः पुरुषः राजपुरुषः। राजन् ङस् पुरुष सु इति अलौकिकविग्रहः। 'षष्ठी' इति सूत्रेण समासः। सुब्लुकि राजन् पुरुष। 'नलोपः प्रातिपादिकान्तस्य' इति नलोपे राजपुरुष। विभक्तिकार्ये राजपुरुषः।
एवं देवस्य पूजकः देवपूजकः। भुवः भर्ता भूभर्ता। बुद्धेः मान्द्यं बुद्धिमान्द्यम्।

### 29. पूर्वापराधरोत्तरमेकदेशिनैकाधिकरणे (२.२.१)

प्रथमातत्पुरुषः

पूर्वापराधरोत्तरं एकदेशिना एकाधिकरणे इति त्रिपदं सूत्रम्। अनेन सूत्रेण प्रथमातत्पुरुषसमासः विधीयते। अवयविना सह पूर्वादयः समस्यन्ते एकत्वासंख्यविशिष्टश्चेदवयवी। षष्ठी समासापवादः। पूर्वं कायस्य पूर्वकायः। पूर्व अम् काय ङस् इत्यलौकिकविग्रहः। 'पूर्वापराधरोत्तरमेकदेशिनैकाधिकरणे' इति समासः। समासत्वात् सुपः लुक्। पुनः सुपि विभक्तिकार्ये पूर्वकायः।
**अपरकायः** - अपरं कायस्य अपरकायः। अपर अम् काय ङस् इत्यलौकिकविग्रहः। 'पूर्वपराधरोत्तरमेकदेशिनैकाधिकरणे' इति समासः।
एवं अपरं गृहस्य अपरगृहम्। अधरं भवनस्य अधरभवनम्। उत्तरं रात्रेः उत्तररात्रः।

एकाधिकरणे इति किम्? पूर्वः छात्राणाम् इत्यत्र एकाधिकरणत्वस्य अभावात् न समासः।

### 30. अर्धं नपुंसकम् (२.२.२)

अर्धशब्दं समस्यते

द्विपदं सूत्रम्। अनेन सूत्रेण अर्धशब्दं समस्यते। समांशवाच्यार्थशब्दो नित्यं क्लीबे समस्यते। यथा अर्ध पिप्पल्याः अर्धपिप्पली। अर्ध सु पिप्पली ङस् इत्यलौकिकविग्रहः। अर्ध पिप्पल्याः इति समासः। अर्धस्योपसर्जनत्वे 'उपसर्जनं पूर्वम्' इति पूर्वप्रयोगे अर्ध सु पिप्पली ङस्। 'सुपो धातुप्रातिपदिकयोः' इति सुपः लुकि अर्ध पिप्पली। 'सु' आदि विभक्तिकार्ये अर्धपिप्पली।

### 31. सप्तमीशौण्डैः(२.१.४०)

सप्तमीतत्पुरुषः

द्विपदं सूत्रम्। अनेन सूत्रेण सप्तमीतत्पुरुषसमासः विधीयते। सप्तम्यन्तं शौण्डादिभिः वा समस्यते। यथा अक्षेषु शौण्डः अक्षशौण्डः। अक्ष सुप् शौण्ड सु

इत्यलौकिकविग्रहः। सप्तमी शौण्डैः इति समासः। समासत्वात् सुपः लुक्। पुनः सुपि विभक्तिकार्ये अक्षशौण्ड:।

शौण्डादिगणे शौण्ड-कितव-धूर्त-व्याड-प्रवीण-संवीत-अन्तर-अधि-पटु -पण्डित-कुशल-निपुण-चपलशब्दः-अन्तर्भवन्ति। एवं अक्षेषु धूर्तः अक्षधूर्तः। अक्षेषु कितवः अक्षकितवः। वीणायां प्रवीणः वीणाप्रवीण:। वेदे पण्डितः वेदपण्डितः। काव्ये कुशलः काव्यकुशलः। शास्त्रेषु निपुणः शास्त्रनिपुणः। कार्ये चपलः कार्यचपलः।

द्वितीया–तृतीयेत्यादियोगविभागादन्यत्रापि तृतीयादिविभक्तिनां प्रयोगवशात् समासो ज्ञेयः।

**32. दिक्संख्ये संज्ञायाम् (२.१.५०)**

संज्ञायां समासः

द्विपदं सूत्रम्। अनेन सूत्रेण संज्ञायां सुबन्तेन सह समासः विधीयते। दिशावाची संख्यावाची च शब्दात् समानाधिकरणेऽर्थे सुबन्तेन सह समस्यते। यथा पुर्वेषुकामशमी। पूर्वा च असौ इषुकामशमी च पूर्वेषुकामशमी। पूर्वा सु इषुकामशमी सु इत्यलौकिकविग्रहः। 'दिक्संख्ये संज्ञायाम्' इति सूत्रेण समासः। समासत्वात्सुपः लुक्। गुणे सौ प्रत्यये सोर्लोपे च पूर्वेषुकामशमी इति।

**सप्तर्षिः** - सप्त चासौ ऋषिः च सप्तर्षिः। सप्तन् जस् ऋषि सु इति अलौकिकविग्रहः। 'दिक्संख्ये संज्ञायाम्' इति समासः। समासत्वात्सुपः लुक्। सप्त ऋषि। 'आद्गुणः' इति गुणे रपरत्वे च सप्तर्षि। पुनः जस्प्रत्यये 'जसि च' इति गुणे अयादेशे रुत्वे विसर्गे च सप्तर्षयः इति रूपम्। उत्तराः वृक्षाः, पञ्चब्रहाम्णाः इत्यादौ संज्ञात्वाभावात् न समासः।

**33. तद्धितार्थोत्तरपदसमाहारे च (२.१.५१)**

द्विगुसमासः

द्विपदं सूत्रम्। अनेन द्विगुसमासः विधीयते। तद्धितार्थे विषये उत्तरपदे च परतः समाहारे च वाच्ये दिक्संख्ये समस्येते। यथा पौर्वशालः। 'पूर्वस्यां शालायां भवः' इति लौकिकविग्रहे पूर्वा ङि शाला ङि' इत्यलौकिके 'तद्धितार्थोत्तरपदसमाहारे च' इति समासः। समासत्वात् प्रातिपादिकत्वेन 'सुपो धातुप्रातिपदिकयोः' इति सुपः लुकि पूर्वा शाला। 'सर्वनाम्नो वृत्तिमात्रे पुंवद्भावः' इति पुंवद्भावे पूर्वशाला। 'दिक्पूर्वपदादसंज्ञायां ञः' इति अ (ञ) प्रत्यये पूर्वशाला अ। 'यस्येति च' इति भस्य लुकि पूर्वशाल। 'तद्धितेष्वचामदेः' इति आदिवृद्धौ पौर्वशाल। 'सु' आदि विभक्तिकार्ये पौर्वशालः इति।

**34. सर्वनाम्नो वृत्तिमात्रे पुंवद्भावः (वार्तिकम्)**

पुंवद्भावः

त्रिपदं वार्तिकमिदम्। अनेन वार्तिकेन पुंवद्भावः विधीयते। सर्वनामन्शब्दात् वृत्तिमात्रे पुंवद्भावः स्यात्। यथा पौर्वशालः इति।

**35. दिक्पूर्वपदादसंज्ञायां ञः (४.२.१०७)**

ञप्रत्ययः

त्रिपदं सूत्रम्। अनेन सूत्रेण ञप्रत्ययः विधीयते। ञप्रत्यये अ शिष्यते। दिक्पूर्वपदात् भवाद्यर्थे ञः स्यात् असंज्ञायाम्। यथा पौर्वशालः।

**36. तद्धितेष्वचामादेः (७.२.११७)**

आदिवृद्धिः

तद्धितेषु अचाम् आदेः इति त्रिपदं सूत्रम्। अनेन सूत्रेण आदिवृद्धिः विधीयते। आदौ आगतः वृद्धिः आदिवृद्धिः। यथा पौर्वशालः। पूर्वशाला इत्यत्र 'दिक्पूर्वपदादसंज्ञायां ञः' इत्यनेन ञप्रत्ययः। अत्र ञित्वात् 'तद्धितेष्वचामादेः' इत्यनेन आदिवृद्धौ ऊकारस्य औकारे पौर्वशाला अ। 'यस्येति च' इति भस्य लुकि विभक्तिकार्ये पौर्वशालः इति रूपम्।

**37. द्वन्द्वतत्पुरुषयोरुत्तरपदे नित्यसमासवचनम्।(वार्तिकम्)**

उत्तरपदे परतः नित्यत्वेन समासः स्यात्

त्रिपदं वार्तिकम्। द्वन्द्वे तत्पुरुषसमासे च उत्तरपदे परतः नित्यत्वेन समासः स्यात्। 'तद्धितार्थोत्तरपदसमाहारे च' इति वैकल्पिकेन समासे प्राप्ते नित्यसमासाय वार्तिकमिदम्। यथा पञ्च गावो धनं यस्य इत्यत्र पञ्चन् गोशब्दयोः अनेन वार्तिकेन नित्यसमासः स्यात्।

**38. गोरतद्धितलुकि (५.४.९२)**

टच् प्रत्ययः

गोः अतद्धितलुकि इति द्विपदं सूत्रम्। अनेन सूत्रेण टच्प्रत्ययः विधीयते। गोन्तात्तत्पुरुषाद्टच् स्यात् समासान्ते न तु तद्धितलुकि। यथा पञ्च गावो धनं यस्य इति लौकिकविग्रहे 'पञ्चन् जस् गो जस् धन सु इत्यलौकिके पञ्चन्गोशब्दयोः उत्तरपदे परत्वात् 'द्वन्द्वतत्पुरुषयोः नित्यसमासवचनम्' इति वार्तिकेन समासः। 'सुपो धातुप्रातिपादिकयोः' इति सुपः लुकि पञ्चन् गो। 'नलोपः प्रातिपदिकान्तस्य' इति नलोपे पञ्चगो। 'गोरतद्धितलुकि' इति टच्प्रत्यये अनुबन्धलोपे पञ्चगो अ। 'एचोऽयवायवः' इत्यावादेश पञ्चगव। पञ्चगव धन इत्यवस्थायां प्रातिपदिकत्वात् सुप्रत्यये पञ्चगवधन सु। 'उपदेशेऽजनुनासिक इत्' इतीत्संज्ञायां लोपे पञ्चगवा धन स्। 'ससजुषो रुः' इति रुत्वे पञ्चगवधन र्। खरवसानयोर्विसर्जनीयः इति विसर्गे पञ्चगवधनः।

**39. तत्पुरुषः समानाधिकरणः कर्मधारयः (१.२.४२)**

कर्मधारयः

त्रिपदं सूत्रम्। अनेन कर्मधारयसंज्ञः विधीयते। समानाधिकरणः (एकाधिकरणः) तत्पुरुषः कर्मधारयसंज्ञः स्यात्। समानविभक्त्यन्तयोरेव कर्मधारयसंज्ञः स्यात्। यथा नीलोत्पलम्। 'विशेषणं विशेष्येण बहुलम्' इत्यादावस्य प्रयोजनम्।

**40. संख्यापूर्वो द्विगुः (२.१.५२)**

द्विपदं सूत्रम्। अनेन सूत्रेण द्विगुसंज्ञः विधीयते। तद्धितार्थे विषये उत्तरपदे च परतः समाहारे च वाच्ये संख्यापूर्वो द्विगुसंज्ञः स्यात्। द्विगुरेकवचनम् इत्यादावस्य प्रयोजनम्। यथा द्विरात्रम्।

**41. द्विगुरेकवचनम्। (२.४.१)**

एकवद्भावः

द्विगुः एकवचनमिति द्विपदं सूत्रम्। अनेन सूत्रेण एकवद्भावः विधीयते।

द्विग्वर्थः समाहारः एकवत्स्यात्। यथा द्विरात्रम्।

**42. स नपुंसकम् (२.४.१७)**

द्विगुः नपुंसकं भवति

द्विपदं सूत्रम्। अनेन सूत्रेण द्विगुद्वन्दयोः नपुंसकत्वं विधीयते। समाहारे द्विगुः द्वन्दश्च नपुंसकं स्यात्। यथा पञ्चानां गवां समाहारः पञ्चगवम्। पञ्चन् आम् गो आम् इत्यलौकिकविग्रहः। 'तद्धितार्थोत्तरपदसमाहारे च' इति समासः। समासत्वात् 'सुपो धातुप्रातिपदिकयोः' इति सुपः लुकि पञ्चन् गो। 'नलोपः प्रातिपदिकान्तस्य' इति नलोपे पञ्चगो। 'गोरतद्धितलुकि' इति टच्प्रत्यये पञ्चगो अ। 'एचोऽयवायावः' इत्यवादेशे पञ्चगव 'संख्यापूर्वो द्विगुः' इति द्विगुत्वे 'द्विगुरेकवचनम्' इत्येकवद्भावे सौ 'स नपुंसकम्' इति नपुंसकत्वात् 'अतोऽम्' इत्यमि 'अमिपूर्वः' इति पूर्वरूपे पञ्चगवम्।

**43. विशेषणं विशेष्येण बहुलम् (२.१.५७)**

विशेषणपूर्वपद-समासः

त्रिपदम् सूत्रम्। अनेन सूत्रेण विशेषणपूर्वपदसमासः विधीयते। बहुलमित्यतः पाक्षिकविधिः। भेदकं (विशेषणं) भेद्येन (विशेष्येण) समानाधिकरणेन बहुलं समस्यते। यथा नीलमुत्पलं नीलोत्पलम्। नील सु उत्पल सु इत्यलौकिकविग्रहः। विशेषणं विशेष्येण बहुलम् इति समासः। समासत्वात् सुपः लुक्। गुणे नीलोत्पल तस्मात्सुप्। 'अतोऽम्' इत्यमादेशे नीलोत्पल अम्। पूर्वरूपे नीलोत्पलम् इति रूपम्।

एवं दीर्घा रज्जुः दीर्घरज्जुः। उन्नतः वृक्षः उन्नतवृक्षः। बहुलग्रहणात् क्वचिन्नित्यम्। यथा कृष्णसर्पः। क्वचिन्न। यथा रामो जामदग्न्यः।

**44. उपमानानि सामान्यवचनैः (२.१.५५)**

उपमानपूर्वपदः

द्विपदं सूत्रम्। अनेन सूत्रेण उपमानपूर्वपदः कर्मधारयसमासः विधीयते। उपमानवाची सुबन्तः समानाधिकरणेन सुबन्तेन सह समस्यते। यथा घन इव श्यामः घनश्यामः। घन सु श्याम सु इत्यलौकिकविग्रहः। उपमानानि सामान्यवचनैः इति सूत्रेण समासः। समासात्सुपः लुक्। पुनः सुपि विभक्तिकार्ये घनश्यामः इति रूपम्।

एवं कुसुममिव कोमलं कुसुमकोमलम्। वज्रम् इव कठिनं वज्रकठिनम्। शैलः इव उन्नतः शैलोन्नतः।

**45. शाकपार्थिवादीनांसिद्धये उत्तरपदलोपस्योपसंख्यानम्।(वार्तिकम्)**

मध्यमपदलोपः

चतुष्पदं वार्तिकम्। अनेन वार्तिकेन मध्यमपदलोप: समासः विधीयते। शाकपार्थिवादीनां पदानां सिद्ध्यर्थं उत्तरपदलोपः कार्यः। यथा शाकप्रियः पार्थिवः शाकपार्थिवः। शाकप्रिय सु पार्थिव सु इत्यलौकिकविग्रहः। 'विशेषणं विशेष्येण बहुलम् इति समासः'। शाकपार्थिवादीनां सिद्धये 'उत्तरपदलोपस्योपसंख्यानम्' इति वार्तिकेन मध्यमपदलोपे शाक सु पार्थिव। समासत्वात् सुपः लुक्। पुनः सुपि विभक्तिकार्ये शाकपार्थिवः। देवपूजको ब्राह्मणः देवब्राह्मणः। देवपूजक सु ब्राह्मण सु इत्यलौकिकविग्रहः। विशेषणं विशेष्येण बहुलं इति समासः। एवं द्वयाधिका विंशति द्वाविंशतिः। षोडशसंख्याकाः पदार्थाः षोडशपदार्थाः। द्वयाधिका दश द्वादश| द्वाधिकं शतं द्विशतम्।

**46. नञ् (२.२.६)**

नञ् समासः

एकपदं सूत्रम्। अनेन सूत्रेण नञ् समासः विधीयते। नञ् सुपा सह समस्यते। यथा न ब्राह्मणः अब्राह्मणः। न ब्राह्मण सु इत्यलौकिकविग्रहः। 'नञ्' इति सूत्रेण समासः। समासत्वात्सुपः लुक्। 'नलोपे नञः' इति 'न्' इत्यस्य लोपे अब्राह्मण। सुपि विभक्तिकार्ये अब्राह्मणः।

**47. नलोपे नञः। (६.३.७३)**

नञ् नस्य लोपः

नलोपे नञः इति द्विपदं सूत्रम्। अनेन सूत्रेण नञः नस्य लोपः विधीयते। नञो नस्य स्यात् उत्तरपदे। यथा न ब्राह्मणः अब्राह्मणः।

**48. तस्मान्नुडचि (६.३.७४)**

नुडागमः

तस्मात् नुट् अचि इति त्रिपदं सूत्रम्। अनेन सूत्रेण नुडागमः विधीयते। लुप्तनकारान्नञः उत्तरपदस्याजादेः नुडागमः स्यात्। यथा अनश्वः। न अश्वः अनश्वः। न अश्व सु इत्यलौकिकविग्रहः। 'नञ्' इति समासः। 'नलोपो नञः' इति नलोपो अ अश्व। 'तस्मान्नुडचि' इति अनुबन्धलोपे अन् अश्व। पुनः प्रातिपदिकसंज्ञायां सुप्रत्यये अनश्व सु। अनुबन्धलोपे रुत्वे विसर्गे च अनश्वः।

**49. कुगतिप्रादयः (२.२.१८)**

कुगतिप्रादयः समस्यन्ते

एकपदं सूत्रम्। अनेन सूत्रेण कुगतिप्रादयः समस्यन्ते। कुगतिप्रादयः समर्थेन नित्यं समस्यन्ते। यथा कुत्सितः पुरुषः कुपुरुषः। कु पुरुष सु इत्यलौकिकविग्रहः। 'कुगतिप्रादयः' इति सूत्रेण समासः। समास्वत्वात्सुपः लुक्। सुपि विभक्तिकार्ये कुपुरुषः।

### 50. ऊर्यादिच्विडाचश्च (१.४.६१)

गतिसंज्ञा

ऊर्यादिच्विडाचः चेति द्विपदं सूत्रम्। अनेन सूत्रेण गतिसंज्ञा विधीयते। ऊर्यादयः च्व्यन्ताः डाजन्ताश्च क्रियायोगे गतिसंज्ञाः स्युः। अङ्गीकारं कृत्वा ऊरीकृत्य। ऊरिपूर्वात् कृञ् धातोः ल्यप् प्रत्यये 'ऊर्यादिच्विडाचश्च' 'इति सूत्रेण गतिसंज्ञायां 'कुगादिप्रादयः' इति सूत्रेण समासे ऊरीकृत्य इति रूपम्।
एवं शुक्लीकृत्य। अशुक्लं शुक्लं कृत्वा शुक्लीकृत्य।
पटपटा इति शब्दं कृत्वा पटपटाकृत्य।
शोभनः पुरुषः सुपुरुषः। शोभनः जनः सुजनः। दुराचारः पुरुषः दुष्पुरुषः।

### 51. प्रादयो गतात्यर्थे प्रथमया।(वार्तिकम्)

गतात्यर्थे प्रथमान्तेन सह समस्यते

त्रिपदं वार्तिकमिदम्। अनेन वार्तिकेन गतात्यर्थे प्रथमान्तेन सह समस्यते। गतार्थकः प्रादिः प्रथमान्तेन साकं समस्यते। यथा प्रगतः आचार्यः प्राचार्यः। प्र आचार्य सु इत्यलौकिकविग्रहः। प्रादयो गतद्यर्थे प्रथमया इति वार्तिकेन समासः। समासत्वात् सुपः लुकि सवर्णदीर्घे विभक्तिकार्ये प्राचार्यः इति रूपम्।

### 52. अत्यादयः क्रान्ताद्यर्थे द्वितीयया (वार्तिकम्)

क्रान्ताद्यर्थे द्वितीयाय सह समस्यते

त्रिपदं वार्तिकमिदम्। अत्यादयः क्रान्ताद्यर्थे द्वितीयया सह समस्यते। यथा अतिमालः। अतिक्रान्तः मालाम् अतिमालः। अति माला अम् इत्यलौकिकविग्रहः। अत्यादयः क्रान्ताद्यर्थे द्वितीयया इति वार्तिकेन समासः। प्रातिपदिकत्वात् 'सुपो धातुप्रातिपदिकयोः' इति सुपः लुक्। 'एकविभक्ति चापूर्वनिपाते' इति सूत्रेण एव मालेत्यस्योपसर्जनत्वे, तस्य प्राक् प्रयोगस्य च निषेधे, 'गोस्त्रियोरुपसर्जनस्य' इति ह्रस्वे अतिमालः। पुनः प्रातिपदिकत्वेन सुप्रत्यये अतिमल सु। 'उपदेशेऽजनुनासिका इत्' इति इकारस्य इत्संज्ञायां लोपे अतिमाल स्। 'ससजुषो रुः' इति रुत्वे अतिमाला र्। 'खरवसानयोर्विसर्जनीयः इति विसर्गे अतिमालः।

### 53. एकविभक्ति चापूर्वनिपाते (१.२.४४)

उपसर्जनसंज्ञा, प्राग्प्रयोगनिषेधः च

एकविभक्ति च अपूर्वनिपाते इति त्रिपदं सूत्रम्। न पूर्वनिपातः अपूर्वनिपातः, तस्मिन् अपूर्वनिपाते। अनेन सूत्रेण उपसर्जनसंज्ञा विधीयते। विग्रहे यन्नियतविभक्तिकं तदुपसर्जनसंज्ञं स्यात्, न तु तस्य पूर्वनिपातः। यथा अतिमालः। 'गोस्त्रियोरुपसर्जनस्य' इत्यादावस्य प्रयोजनम्।

### 54. गोस्त्रियोरुपसर्जनस्य (१.२.४८)

ह्रस्वः

गोस्त्रियोः उपसर्जनम् इति द्विपदं सूत्रम्। अनेन सूत्रेण ह्रस्वः विधीयते। उपसर्जनं यो गोशब्दः। स्त्रीप्रत्ययान्तस्य तदन्तस्य प्रातिपदिकस्य ह्रस्वः स्यात्। यथा अतिमालः।

### 55. अवादयः क्रुष्टाद्यर्थे तृतीयया (वार्तिकम्)

उपसर्गाः क्रुष्टाद्यर्थे तृतीयान्तेन सुबन्तेन समस्यते

त्रिपदं वार्तिकमिदम्। अवादिकाः उपसर्गाः क्रुष्टाद्यर्थे तृतीयान्तेन सुबन्तेन समस्यते। यथा अवक्रुष्टः कोकिलया अवकोकिलः। अव कोकिला टा इत्यलौकिकविग्रहः। 'अवादयः क्रुष्टाद्यर्थे तृतीयया' इति वार्तिकेन समासः। समासत्वात् सुपः लुक्। 'एकविभक्ति चापूर्वनिपाते' इति उपसर्जनसंज्ञायां 'गोस्त्रियोरुपसर्जनस्य' इति ह्रस्वे अवकोकिल। सुपि विभक्तिकार्ये अवकोकिलः।

### 56. पर्यादयो ग्लानाद्यर्थे चतुर्थ्या (वार्तिकम्)

ग्लानाद्यर्थे पर्यादयः उपसर्गाः चतुर्थी

पर्यादयो ग्लानाद्यर्थे चतुर्थ्या इति त्रिपदं वार्तिकम्। अनेन वार्तिकेन ग्लानाद्यर्थे पर्यादयः उपसर्गाः चतुर्थ्या सह समस्यते। यथा परिम्लानो अध्ययनाय पर्यध्ययनः। परि अध्ययन ङे इत्यलौकिकविग्रहः। 'पर्यादयो ग्लानाद्यर्थे चतुर्थ्या' इति वार्तिकेन समासः। समासत्वात् सुपः लुक्। यणि विभक्तिकार्ये पर्यध्ययनः।

### 57. निरादयः क्रान्ताद्यर्थे पञ्चम्या (वार्तिकम्)

निरादयः क्रान्ताद्यर्थे पञ्चमी

त्रिपदं वार्तिकमिदम्। अनेन वार्तिकेन निरादयः क्रान्ताद्यर्थे पञ्चम्यन्तेन सुबन्तेन सह समस्यते। यथा निष्क्रान्तः कौशाम्ब्याः निष्कौशाम्बिः। निर् कौशाम्बि ङस् इत्यलौकिकविग्रहः। 'निरादयः क्रान्ताद्यर्थे पञ्चम्या' इति वार्तिकेन समासः। समासत्वात् सुपः लुक्। निर् कौशाम्बि। 'खरवसानोर्विसर्जनीयः' इति विसर्गे निः कौशाम्बी। 'विसर्जनीयस्य सः' इति सत्वे निस् कौशम्बी। 'आदेशप्रत्ययोः' इति षत्वे निष्कौशाम्बी। 'गोस्त्रियोरुपसर्जनस्य इति ह्रस्वे निष्कौशाम्बि। सुपि रुत्वे विसर्गे च निष्कौशाम्बिः।

### 58. तत्रोपपदं सप्तमीस्थम् (३.१.९२)

उपपदसंज्ञा

तत्र उपपदं सप्तमीस्थम् इति त्रिपदं सूत्रम्। अनेन सूत्रेण उपपदसंज्ञा विधीयते। सप्तम्यन्ते पदे कर्मणीत्यादौ वाच्यत्वेन स्थितं कुम्भादि तद्वाचकं पदमुपपदसंज्ञं स्यात्। यथा कुम्भं करोतीत्यर्थे 'कर्मण्यण्' इत्यणि कारः इति रूपसिद्धिः। अत्र उपपदत्वं वर्तते। उपपदमतिङ् इत्यादावस्य प्रयोजनम्।

### 59. उपपदमतिङ् (२.२.१९)

उपपदसमासः

द्विपदं सूत्रम्। अनेन सूत्रेण उपपदसमासः विधीयते। उपपदं सुबन्तं समर्थेन नित्यं समस्यते। अतिङ्न्तः चायं समासः। यथा कुम्भं करोतीति कुम्भकारः। अत्र 'कर्मण्यण्' इत्यणि 'तत्रोपपदं सप्तमीस्थम्' इत्युपपदसंज्ञायाम् 'उपपदमतिङ्' इति समासः। समासत्वात् 'सुपो धातुप्रातिपदिकयोः' इति सुपः लुकि कुम्भ कृ अ। 'अचो ञ्णिति' इति वृद्धौ 'उरण् रपरः' इति रपरत्वे च कुम्भकार। पुनः सुपि विभक्तिकार्ये कुम्भकारः इति रूपम्।

अतिङ् इति किं? मा भवान् भूत् इत्यत्र माङि ति सप्तमीनिर्देशात् उपपदम्। अत्र तिङ्त्वात् समासो न।

निशां करोतीति निशाकरः। तुन्दं परिमाष्टि इति तुन्दपरिमृजः। उषणं भुङ्क्ते इति उष्णभोजि। सोमेन इष्टवान् सोमयाजि। शास्त्रं करोति इति शास्त्रकृत्। शास्त्रकारः। भाष्यं करोतीति भाष्यकृत्। भाष्यकारः।

### 60. गतिकारकोपपदानां कृद्भिः सह समासवचनं प्राक् सुबुत्पत्तेः (परिभाषा)

कृद्भिः सह समासः

सुबुत्पत्तेः पूर्वमेव गतेः कारकस्य, उपपदस्य च कृद्भिः सह समासः जायते। तेन व्याघ्री, अश्वक्रीति, कच्छपी इत्यादि रूपाणि सिद्ध्यन्ति। सुप्प्रत्यनन्तरं समासे तु व्याघ्री इत्यादीनि रूपाणि न सिद्ध्यन्ति। ङीपः ङीषः च अभावः सिद्ध्येत्।

**व्याघ्री** - व्याजिघ्रति इति विग्रहे 'आतश्चोपसर्गे' कः इति कप्रत्यये 'आङ्' उपसर्गस्य घ्रशब्देन योगे आघ्र इति जाते 'गतिकारकोपपदानां कृद्भिः सह समासवचनं प्राक् सुबुत्पत्तेः' इति परिभाषाबलात् प्राक् 'कुगादिप्रादयः' इति समासः। सुपि 'जातेरस्त्रिविषयादयोपधात्' इति ङीषि विभक्तिकार्ये आघ्री। पुनः 'वि' इत्यनेन योगे यणि व्याघ्री इति।

**अश्वक्रीती** - अश्वेन क्रीता अश्वक्रीती। अत्र क्रीतशब्दात् 'गतिकारकोपपदानां कृद्भिः सह समासवचनं प्राक् सुबुत्पत्तेः' इति परिभाषाबलात् सुबुत्पत्तेः पूर्वं 'कर्तुकरणे कृता बहुलम्' इति समासे 'क्रीताकरणपूर्वात्' इति ङीषि, प्रातिपदिकत्वात् 'सुपोधातु'रिति सुपो लुकि सौ तस्य लोपे च अश्वक्रीती इति रूपम्।
अत्र सुबुत्प्रत्ययनन्तरं समासः जायेत तर्हि ङीष् न सिद्ध्येत।
**कच्छपी** - कच्छेन कच्छाभ्यां वा पिबति इति कच्छपी (स्त्रीत्वविपक्षायाम्) 'सुपिस्थः' इत्यत्र सुपीत्यस्य योगविभागेन क्तप्रत्यये 'उपपदमतिङ्' इति समासे, सुपो लुकि, जातिवाचकत्वात् 'जातेरस्त्रीविषयादयोपधात्' इति ङीषि

अनुबन्धलोपे विभक्तिकार्ये च कच्छपी। अत्र 'गतिकारकोपपदानां कृद्भिः सहसमासवचनं प्राक् सुबुत्पत्तेः' इति परिभाषाये ङीष् न सिद्धयेत्।

### 61. तत्पुरुषाङ्गुलेः संख्याव्ययादेः (५.४.८६)

अच्प्रत्ययः

द्विपदं सूत्रम्। अनेन सूत्रेण अच्प्रत्ययः विधीयते। संख्याव्ययादेः अङ्गुल्यन्तस्य समासान्तोऽच् स्यात्। यथा द्वे अङ्गुली प्रमाणमस्य द्वयङ्गुलम्। द्वि औ अङ्गुलि औ इत्यलौकिकविग्रहः। 'तत्पुरुषाङ्गुलेः संख्याव्ययादेः' इति समासे अच्प्रत्ययान्ते च द्वि औ अङ्गुल औ। प्रातिपदिकत्वात्सुपः लुकि द्वि अङ्गुल। 'इको यणचि' इति यणि द्वयङ्गुल। सुपि अमि 'अमि पूर्वः' इति पूर्वरूपे द्वयङ्गुलम्।

**निरङ्गुलम्-** निर्गतमङ्गुलिभ्यो निरङ्गुलम्। निर् अङ्गुलि भ्यस् इत्यलौकिकविग्रहः। 'तत्पुरुषाङ्गुले संख्याव्ययादेः' इति समासे अच्प्रत्ययान्ते च निर् अङ्गुल। विभक्तिकार्ये निरङ्गुलम्।

### 62. अहः सर्वैकदेशसंख्यातपुण्याच्च रात्रेः (५.४.८७)

रात्रेरच्

अहः सर्वैकदेशसंख्यातपुण्यात् च रात्रेः इति त्रिपदं सूत्रम्। अनेन सूत्रेण रात्रेरच् विधीयते। अहरादि-संख्यादि-अव्ययादि पूर्वपदेभ्यः रात्रेरच् स्यात् संख्याव्ययादेः। यथा अहोरात्रः। अहश्च रात्रिश्च अहोरात्रः। अहन् सु रात्रि सु इत्यलौकिकविग्रहः। 'चार्थे द्वन्दः' इति सूत्रेण समासः। समासत्वात् 'सुपो धातुप्रातिपदिकयोः' इति सुपः लुक्। अहन् रात्रि। 'अहः सर्वैकदेशसंख्यातपुण्याच्च रात्रेः' इति सूत्रेण अच्प्रत्यये 'अहन् रात्रि अ'। 'यस्येति च' इतीकारलोपे 'अहन् रात् अ'। 'अहन्' इति तस्य रुत्वे अहर् रात्र। 'हशि च' इति उत्वे अह उ रात्र। 'आद्गुणः' इति गुणे अहोरात्र। 'रात्राह्नाहा पुंसि' इति पुलिङ्गे विभक्तिकार्ये च अहोरात्रः।

### 63. रात्राह्नाहः पुंसि (२.४.२९)

पुंस्त्वम्

द्विपदं सूत्रम्। अनेन सूत्रेण पुंस्त्वं विधीयते। कृतसमासान्तैः रात्रि -अह्निः-अहाः द्वन्द्वतत्पुरुषौ पुम्स्येव। यथा अहोरात्रः। समासे रात्रिशब्दः यदा अकारान्तः भवति। तदा पुलिङ्गः भवति। सर्वा रात्रिः सर्वरात्रिः। सर्वा सु रात्रिः सु इत्यलौकिकविग्रहः। 'चार्थे द्वन्दः' इति समासः। समासत्वात् सुपः लुक्। 'सर्वनाम्नो वृत्तिमात्रे पुंवद्भाव' इति पुंवद्भावे सर्व रात्रि। 'अहःसर्वैकदेशसंख्यातपुण्याच्च रात्रेः' इत्यच्प्रत्यये भस्य लुकि च सर्वरात्र। 'रात्राह्नाहाः पुंसि' इति पुंसत्वे विभक्तिकार्ये सर्वरात्रः।
एवं संख्याता रात्रिः संख्यातारात्रः। संख्याता सु रात्रि सु इति अलौकिकविग्रहः। 'चार्थे द्वन्दः' इति समासः।
एवं पुण्या रात्रिः पुण्यरात्रः।

नपुंसकत्वम्

**64. संख्यापूर्वं रात्रं क्लीबम् (वार्तिकम्)**

द्विपदं वार्तिकमिदम्। अनेन वार्तिकेन नपुंसकत्वं विधीयते। संख्यापूर्वकः रात्रिशब्दः नपुंसकलिङ्गं स्यात्। यथा द्वयोः रात्र्योः समाहारः द्विरात्रम्। द्वि ओस् रात्रि ओस् इत्यलौकिकः विग्रहः। 'तद्धितार्थोत्तरपदसमाहारे च' इति समासः। समासत्वात् सुपः लुक्। द्वि रात्रि। 'अहःसर्वैकदेशसंख्यातपुण्याच्च रात्रेः' इत्यच्प्रत्यये 'यस्येति च' इति भस्य लुकि द्वि रात्र। 'संख्यापूर्वं रात्रं क्लीबम्' नपुंसकत्वे सुप्रत्यये अमि 'अमिपूर्वः' इति पूर्वरूपे द्विरात्रम्।

**त्रिरात्रम्** - त्रयाणां रात्रीणां समाहारः त्रिरात्रम्। त्रि आम् रात्रि आम् इति अलौकिकविग्रहः। 'तद्धितार्थोत्तरपदसमाहारे च' इति समासः।

टच्प्रत्ययः

**65. राजाहःसखिभ्यष्टच् (५.४.९१)**

राजाहःसखिभ्यः टच् द्विपदं सूत्रम्। अनेन सूत्रेण टच्प्रत्ययः विधीयते। टचि अकार एव शिष्यते। राजन्-अहन्-अहिशब्दान्तेभ्यः तत्पुरुषस्य टच्स्यात्। यथा परमश्चासौ राजा च परमराजः। परम सु राजन् सु इत्यलौकिकविग्रहः। 'सन्महत्परामोत्तमोत्कृष्टाः पूज्यमानैः' इति सूत्रेण समासः। समासत्वात् 'सुपो धातुप्रातिपदिकयोः' इति सुपः लुकि परम राजन्। 'राजाहःसखिभ्यष्टच्' इति टचि परमराजन् अ। 'नस्तद्धिते' इति टिलोपे परमराज। विभक्तिकार्ये परमराजः।

आत्वम्

**66. आन्महतः समानाधिकरणजातीययोः (६.३.४६)**

आत् महतः समानाधिकरणजातीययो: इति त्रिपदं सूत्रम्। अनेन सूत्रेण आत्वं विधयते। महत आकारोऽन्तादेशः स्यात् समानाधिकरणे जातीये च परे। यथा महांश्चासौ राजा च महाराजः। महत् सु राजन् सु इत्यलौकिकविग्रह:। 'सन्महत्परमोत्तमोत्कृष्टाः पूज्यमानैः' इति समासः। समासत्वात् 'सुपो धातुप्रातिपदिकयो:' इति सुपः लुकि महत् राजन्। अत्र 'आन्महतः समानाधिकरणजातीययोः' इत्यात्वे महाराजन्। 'राजाहःसखिभ्यष्टच्' इति टचि महाराजन् अ। 'नस्तद्धिते' इति टिलोपे महराज। विभक्तिकार्ये महाराजः।

महाप्रकारो महाजातीयः। महत् सु प्रकारः सु इत्यलौकिकः विग्रहः। 'सन्महत्परमोत्तमोत्कृष्टाः पूज्यमानैः' इति। समासः प्रकारवचने जातीयर् इत्यतः जातीये महाजातीयः।

द्वि अष्टन् शब्देभ्यः आत्

**67. द्वयष्टनः सङ्ख्यायामबहुव्रीह्यशीत्योः (६.३.४७)**

द्वयष्टनः सङ्ख्यायाम् अबहुव्रीह्यशीत्योः इति त्रिपदं सूत्रम्। अनेन सूत्रेण द्वयष्टनः आत्वं विधीयते। संख्याशब्दे परे 'द्वि अष्टन्' शब्दयोः आत्वं स्यात् किन्तु बहुव्रीह्याम् अशीतिशब्दे च परे न। यथा द्वौ च दश च द्वादश। द्वि औ

दाशन् जस् इत्यलौकिकविग्रहः। 'चार्थे द्वन्द्वः' इति समासः। समासत्वात् सुपः लुक्। 'द्वयष्टनः सख्यामबहुव्रीह्यशीत्योः' इति आत्वे द्वादशन्। 'नलोपः प्रातिपदिकान्तस्य' इति नलोपे द्वादश। जस् प्रत्यये 'षड्भ्यो लुक्' इति जसः लोपे द्वादश इति रूपम्।

अष्टौ च विशतिः च अष्टाविंशतिः। अष्टन् जस् विंशतिः जस् इत्यलौकिकविग्रहः। 'चार्थे द्वन्द्वः' इति समासः। 'द्वयष्टनः सङ्ख्यायामबहुव्रीह्यशीत्योः' इत्यात्वे अष्टविंशतिः। जसि विभक्तिकार्ये अष्टविंशतिः।

**68. त्रेस्त्रयः (६.३.४८)**

त्रयसादेशः

त्रेः त्रयः इति द्विपदं सूत्रम्। अनेन सूत्रेण त्रिशब्दस्य त्रयसादेशः विधीयते। संख्या परतः चेत् त्रिशब्दस्य त्रयसादेशः स्यात् अबहुव्रीह्यशीत्योः परे। यथा त्रयः च दश च त्रयोदश। त्रि जस् दशन् जस् इति अलौकिकविग्रहः। 'चार्थे द्वन्दः' इति समासः। सुपः लुकि 'त्रेस्त्रेयः' इति सूत्रेण त्रयसादेशे त्रयस् दशन्। न लोपे 'ससजुषो रुः' इति रुत्वे त्रयर् दश। 'हशि च' इति उत्वे गुणे जसि 'षट्भ्यो लुक्' इति जसः लुकि च त्रयोदश इति रूपम्।

**त्रयोविंशतिः** - त्रयः च विंशति च त्रयोविंशतिः। त्रि जस् विंशति जस् इत्यलौकिकविग्रहे 'चार्थे द्वन्दः' इति समासः।

**त्रयस्त्रिंशत्** - त्रयः च त्रिंशत् च त्रयस्त्रिंशत्। त्रि जस् त्रिंशत् जस् इत्यलौकिकविग्रहः। 'चार्थे द्वन्दः' इति समासः।

**69. परवल्लिङ्गं द्वन्द्वतत्पुरुषयोः (२.३.२६)**

परलिङ्गं स्यात्

परवत् लिङ्गं द्वन्द्वतत्पुरुषत्योः इति त्रिपदं सूत्रम्। अनेन सूत्रेण परपदस्य लिङ्गं स्यात्। द्वन्द्वतत्पुरुषत्योः परपदस्येव लिङ्गं स्यात्। यथा कुक्कुटमयूर्यौ इमे। कुक्कुटः च मयूरि च। कुक्कुट सु मयूरी सु इत्यलौकिकविग्रहः। 'चार्थे द्वन्द्वः' इति समासः। समासत्वात् सुपः लुकि कुक्कुटमयूरि। तस्मात् औ विभक्तौ 'परवल्लिङ्गद्वन्द्वतत्पुरुषयोः' इत्यनेन परपदस्य मयूरिपदस्य लिङ्गं स्त्रीलिङ्गमेव। 'इको यणचि' इति यणि कुक्कुट मयूर् य् औ कुक्कुटमयूर्यौ इति।

मयूरी च कुक्कुटः च इत्यत्र समासे परपदस्य कुक्कुटपदस्य लिङ्गे पुंलिङ्गे वृद्धिरेचि इति वृद्धौ मयूरकुक्कुटौ इति।

अर्धं पिप्पल्याः अर्धपिप्पली। अत्र 'अर्धं नपुंसकम्' इति समासः। पिप्पलीशब्दस्य नपुंसकत्वात् अर्धपिप्पली सु इत्यत्र 'स्वमोर्नपुंसकात्' इति सुलोपे अर्धपिप्पली।

### 70. द्विगुप्राप्तापन्नालम्पूर्वगतिसमासेषु प्रतिषेधो वाच्यः (वार्तिकम्)

परलिङ्गं न स्यात्

'परवलिङ्गं द्वन्द्वतत्पुरुषयोः' इति सूत्रेण विधीयमानं परवलिङ्गं द्विगुसमासे प्राप्त-आपन्न- अलम्पूर्वके तथा गतिसमासे च न स्यात्। यथा पञ्चसु कपालेषु संस्कृतः पञ्चकपालः। अत्र संख्यापूर्वत्वात् द्विगुः। कपाल शब्दस्य पुंलिङ्गत्वं नपुंसकलिङ्गत्वं च वर्तते। अत्र नपुंसकलिङ्गप्रतिषेधः।

### 71. प्राप्तापन्ने च द्वितीयया (२.४.४)

समस्यते, अकारान्तादेशः

त्रिपदं सूत्रम्। अत्र समासः अकारः अन्तादेशश्च विधीयेते। प्राप्तापन्ने समस्येते। अकारश्चानयोः अन्तादेशस्य। यथा प्राप्तो जीविकां प्राप्तजीविकः। प्राप्त सु जीविका अम् इत्यलौकिकविग्रहः। 'प्राप्तापन्ने च द्वितीयया' इति सूत्रेण समासे अकारान्तादेशे च प्राप्त सु जीविक अम्। समासत्वात् सुपः लुकि विभक्तिकार्ये प्राप्तजिविकः।

अलङ्कुमारिः -अलं कुमार्यै अलङ्कुमारिः।अत्र 'द्विगुप्राप्तापन्नालम्पूर्वगतिसमासेषु प्रतिषेधो वाच्यः' इति वार्तिकस्य ज्ञापकात् समासे परपदलिङ्गत्वनिषेधे 'एकविभक्ति चापूर्वनिपाते' इत्युपसर्गसंज्ञायां 'गोस्त्रियोरूपसर्जनस्य' इति ह्रस्वे अलम्कुमारि। सुपि अनुबन्धलोपे अलंकुमारि स्। रुत्वे विसर्गे च अलङ्कुमारिः।

### 72. अर्धर्चाः पुंसि च (२.४.३१)

पुंसि क्लीबे च

त्रिपदं सूत्रम्। अनेन सूत्रेण पुंस्त्वं क्लीबन्तं च विधीयते। अर्धर्चादयः शब्दाः पुंसि क्लीबे च स्युः। यथा ऋचोऽर्धम् अर्धर्चः, अर्धर्चम् वा। ऋच् ङस् अर्ध सु इत्यलौकिकविग्रहः।'अर्धं नपुंसकम्' इति समासः। समासत्वात् 'सुपोधातुप्रातिपदिकयोः' इति सुपः लुक्। ऋच् अर्ध। अर्धशब्दस्य 'उपसर्जनं पूर्वम्' इति पूर्वनिपाते अर्ध ऋच्। 'ऋक्पूरब्धूःपथामानक्षे' इति अकार अन्तावयवे अर्ध ऋच। गुणे रपरत्वे च अर्धर्च। 'अर्धर्चाः पुंसि च' इति पुंसि सुप्रत्यये अनुबन्धलोपे रुत्वे विसर्गे च अर्धर्चः।

'अर्धर्चः पुंसि च' इत्यनेन क्लीबे अर्धर्चम् इति रूपम्। एवं ध्वज-तीर्थ-शरीर-मण्डप-यूप-देह-अङ्कुर-पात्रसूत्रादयः।

मृदु पचति, प्रातः कमनीयम् इत्यादिषु सामान्यतया नपुंसकम्।

## Summarised Overview

अस्मिन्नेकके सप्तपञ्चाशत् सूत्राणि व्याख्यातानि। अव्ययीभावे तत्पुरुषे च वर्तमानानि अन्तर्भूतानि तत्सम्बन्धीनि सर्वाणि कार्याणि सूचितानि। तेषु प्रधानानि तु अव्ययीभावः, उपसर्जनं पूर्वम्, तृतीयासप्तम्योर्बहुलम्, नदीभिश्च, तृतीया तत्कृतार्थेन गुणवचनेन, सप्तमी शौण्डैः, दिक् संख्ये संज्ञायाम्, उपमानानि सामान्यवचनैः, अर्धर्चाः पुंसि च इत्यादीनि।

एवं समासरूपाणि विशदीकृतानि। समद्रम्, अनुरूपम्, उपचर्मम्, कुण्डलहिरण्यम्, पौर्वशालः, द्वादश, अहोरात्रः, परमराजः, त्रयोदश इत्यादीनि सप्रमाणं विशदीकृतानि।

वार्तिकानि स्पष्टीकृतानि। जरायाः जरसन्यतरस्याम्' प्रादयो गताद्यर्थे प्रथमया' इत्यादीनि। 'कृद्ग्रहणे गतिकारकपूर्वस्यापि ग्रहणम्, गतिकारकोपपदानां कृद्भिः सह समासवचनं प्राक् सुबुत्पत्तेः इत्याद्याः। उपसर्जनम् उपपदम् इत्याद्याः संज्ञाः विशदीकृताः।

अव्ययीभावसमासं, तत्पुरुषसमासं च स्पष्टतया ललितया छात्रेभ्यः पठनानुकूलतया रीत्या सूचितानि।

## Assignments

**प्रशनाः**

1. अव्ययं विभक्ति इत्यादिना सूत्रेषु केषु केष्वर्थेषु अव्ययीभावः विधीयते?
2. उपसर्जनस्य पूर्वनिपातत्वं केन सूत्रेण विधीयते? तत् सूत्रं व्याख्यात।
3. अधिगोपम्- अधिगोपेन इति तृतीयैकवनं रूपद्वयं कथम्?
4. यथार्थाः के? विशदयत।
5. **व्याख्यात-**
    1. नपुंसकादन्यतरस्याम्।
    2. द्वितीया श्रितातीतपतितगतात्यस्तप्रापन्नैः।
    3. चतुर्थी तदर्थार्थबलिहितसुखरक्षितैः।
    4. स्तोकान्तिकदूरार्थकृच्छ्राणि क्तेन।
    5. अर्धं नपुंसकम्।
6. **रूपाणि सप्रमाणं समस्यत।**
    1. कुम्भकारः।
    2. द्व्यङ्गुलम्।
    3. सर्वरात्रः।
    4. महाराजः।
    5. कुक्कुटमयूर्यौ।
7. **सिद्धान्तकौमुद्याः अव्ययीभावसमासप्रकरणम् सविशदं पठन्तु।**

## Suggested Readings


1. लघुसिद्धान्तकौमुदी. वरदराजः,चौखम्बा संस्कृत सीरीस अकादमि, वाराणसी २००५।
2. पदसंस्कारचन्द्रिका. कैकुलका रामवारियर्, केरलसाहित्य अकादमि, तृश्शूर।
3. लघुपाणिनीयम्. ए आर् राजराजवर्मा, केरलसर्वकलाशाला तिरुवनन्तपुरम्।
4. पाणिनीयप्रद्योतम्. ऐसि चाक्को, भाषा इन्स्टिट्यूट, तिरुवनन्वपुरम्।
5. प्रक्रियाभाष्यम्. फा जोन् कुन्नपप्लि, नाषणल् बुक् स्टाल् कोट्टयम्।


## References


1. वरदराजाचार्यः, लघुसिद्धान्तकौमुदी, व्याख्या श्रीगिरीशकुमार ठक्कुरः, कृष्णदास अकादमी, वारणासी १९९८, पुटानि ११३ – १२३।
2. वरदराजाचार्यः. लघुसिद्धान्तकौमुदी, व्याख्या श्रीगोमतीप्रसादशास्त्रीमिश्रः .चौखम्बा सुरभारती प्रकाशन्, वाराणसी, २०११, पुठानि २१९- २२६।
3. जि.महाबलेश्वरभट्टः, समासः,संस्कृतभारती, बेङ्गलूरू,१९९९, पुटानि ६-४४।


### Space for Learner Engagement for Objective Questions

Learners are encouraged to develop objective questions based on the content in the paragraph as a sign of their comprehension of the content. The Learners may reflect on the recap bullets and relate their understanding with the narrative in order to frame objective questions from the given text. The University expects that 1 - 2 questions are developed for each paragraph. The space given below can be used for listing the questions.

# UNIT 3

# समासप्रकरणम् (बहुव्रीहिः द्वन्द्वः च)

## Learning Outcomes

- व्याकरणपठनं सर्वशास्त्रोपकारकमिति जानाति।
- साहित्यस्य अविभाज्य घटकमेव वाक्यार्थमिति अवगच्छति।
- समासप्रयोगे चातुर्यमार्जयति।
- बहुव्रीहिं द्वन्द्वसमासं च सविशेषं गृह्णाति।

## Background

व्याकरणं भाषां शुद्धीकरोति। व्याकरणज्ञानं विना संस्कृतसाहित्ये प्रवेष्टुं न शक्यते। व्याकरणस्य सोपानानि भवन्ति सन्धिसमासकारकादीनां ज्ञानम्। सन्धिमधिकृत्य वयमपठाम। समासे अव्ययीभाव- तत्पुरुष-कर्मधारयद्विगुसमासान् तेषां सूत्राणि च सूचितानि। इदानीं बहुव्रीहिं द्वन्द्वं चाधिकृत्य पठामः।

## Keywords

शेषो बहुव्रीहिः - अनेकमन्यपदार्थे - अप्पूरणीप्रमाण्ययोः - संख्यासुपूर्वस्य - व्यूढोरस्कः - चार्थे द्वन्द्वः - पिता माता - पाणिपादम् - अर्धर्चः - गवाक्षः - उपसर्गादध्वनः - अतिराजा।

## Discussion

### 3.3.1 बहुव्रीहिः

अन्यस्य पदस्यार्थे वर्तमानमनेकं समस्यते। लिङ्गत्रयेऽपि बहुव्रीहिः संभवति।

### 1. शेषो बहुव्रीहिः (२.२.२३)

अधिकारसूत्रम्

शेषः बहुव्रीहिः इति द्विपदं सूत्रम्। अधिकारोऽयं प्राग्द्वन्द्वात्। शेषः प्रथमान्तः इत्यर्थः।

### 2. अनेकमन्यपदार्थे (२.२.२४)

बहुव्रीहिसमासं विधीयमानं सूत्रम्

द्विपदं सूत्रम्। अनेन सूत्रेण बहुव्रीहिसमासः विधीयते। अनेकं प्रथमान्तमन्यस्य पदस्यार्थे वर्तमानं वा समस्यते स बहुव्रीहिः। यथा पीताम्बरः। पीतमम्बरं यस्य सः पीताम्बरः। पीत सु अम्बर सु इत्यलौकिकविग्रहः। 'अनेकमन्यपदार्थे' इति समासः। समासत्वात् सुपः लुकि पीत अम्बर। 'अकः सवर्णे दीर्घः' इति सवर्णदीर्घे पीताम्बर। तस्मात्सुपि विभक्तिकार्ये पीताम्बरः।

### 3. सप्तमीविशेषेण बहुव्रीहौ (२.२.३५)

पूर्वप्रयोगः

द्विपदं सूत्रम्। अनेन सूत्रेण सप्तम्यन्तपदस्य विशेषणपदस्य च पूर्वत्त्वं विधीयते। सप्तम्यन्तं विशेषणं च बहुव्रीहौ पूर्वं स्यात्। अत एव ज्ञापकात् व्यधिकरणपदो बहुव्रीहिः। विभिन्नविभक्त्यन्तयोः समासे व्यधिकरणबहुव्रीहिः इति कथ्यते। यथा कण्ठे कालः यस्य सः कण्ठेकालः। कण्ठ ङि काल सु इत्यलौकिकविग्रहः। 'अनेकमन्यपदार्थे' इति सूत्रेण समासः। 'सप्तमीविशेषणे बहुव्रीहौ' इति सूत्रेण सप्तम्यन्तपदस्य पूर्वत्वम्। 'हलन्तात्सप्तम्याः संज्ञायाम्' इति सूत्रेण सप्तम्यन्तस्य न लुक्। विभक्तिकार्ये कण्ठेकालः।

### 4. हलन्तात्सप्तम्याः संज्ञायाम् (६.३.९)

सप्तम्याः अलुक्

त्रिपदं सूत्रम्। अनेन सूत्रेण सप्तम्याः अलुक्। हलदन्ताददन्ताच्च सप्तम्याः अलुक्। यथा कण्ठेकालः।

**प्राप्तोदकः** - प्राप्तमुदकं यं स प्राप्तोदकः ग्रामः। प्राप्त सु उदकं सु इत्यलौकिकविग्रहः। 'अनेकमन्यपदार्थे' इति समासः। समासत्वात्सुपः लुक्। गुणे प्राप्तोदक। विभक्तिकार्ये प्राप्तोदकः।
ऊढो रथो येन सः ऊढरथः(अनड्वान्)।
उपहृतः पशुः यस्मै सः उपहृतपशुः(रुद्रः)।

उद्धृतमोदनं यस्याः सा उद्धृतौदना (स्थाली)।
वीराः पुरुषाः यस्मिन् सः वीरपुरुषः(ग्रामः)।

### 5. प्रादिभ्यो धातुजस्य वाच्यो वा चोत्तरलोपः।(वार्तिकम्)

प्रादितः धातुजेन सह समासः उत्तरपदलोपः च

प्रादिभ्यः धातुजस्य वाच्यः वा च उत्तरपदलोपः इति षड्पदं वार्तिकमिदम्। प्रादितः परत्वेन वर्तमानेन धातुजेन अन्यपदेन सह समासः स्यात् उत्तरपदस्य वैकल्पिकेन लोपः च। यथा प्रकर्षेण पतितानि प्रपतितानि, प्रपतितानि पर्णानि यस्य सः प्रपतितपर्णः प्रपर्णः वा। प्रपतित जस् पर्ण जस् इत्यलौकिकविग्रहः। 'प्रादिभ्यो धातुजस्य वाच्यो वा चोत्तरपदलोपः' इति वार्तिकेन समासे

पतितशब्दस्य वैकल्पिकेन लोपे च प्रपर्ण। तस्मात्सुपि विभक्तिकार्ये प्रपर्णः। पतितशब्दस्य लोपाभावे प्रपतितपर्णः।

**6. नञोऽस्त्यर्थानां वाच्यो वा चोत्तरपदलोपः। (वार्तिकम्)**

समासः विकल्पेन उत्तरपदलोपः च

नञः अस्त्यर्थानां वाच्यः वा च उत्तरपदलोपः इति षड्पदं वार्तिकम्। अनेन वार्तिकेन समासः, विकल्पेन उत्तरपदलोपश्च विधीयते। नञः परस्य अस्त्यर्थवाचकेन (विद्यमान) सह समासः तथा वैकल्पिकेन उत्तरपदस्य विधीयेते। न विद्यमानः अविद्यमानः। अविद्यमानः पुत्रः यस्य सः अपुत्रः अविद्यमनपुत्रः वा। 'नञोऽस्त्यर्थानां वाच्यो वा चोत्तरपदलोपः' इति वार्तिकेन समासे विकल्पेन उत्तरपदलोपे अपुत्र। तस्मात्सुपि विभक्तिकार्ये अपुत्रः।

उत्तरपदलोपाभावे अविद्यमानपुत्रः इति रूपमपि।

**7. स्त्रियाः पुम्वद्भाषितपुंस्कादनूङ् समानाधिकरणे स्त्रियामपूरणीप्रियादिषु (६.३.३४)**

पुंवद्भावः

स्त्रियाः पुंवद्भाषितपुंस्काद् अनूङ् समानाधिकरणे स्त्रियाम् अपूरणीप्रियादिषु इति षड्पदं सूत्रम्। अनेन सूत्रेण पुंवद्भावः विधीयते। ऊङः अभावः अनूङ्। भाषितः पुमान् यस्मिन्नर्थे सः भाषितपुंस्कः। तुल्ये प्रवृत्तिनिमित्ते यदुक्तं पुंस्कं तस्मात्परः ऊङोऽभावः यत्र तथाभूतस्य स्त्रीवाचकस्येव रूपं स्यात् समानाधिकरणे स्त्रीलिङ्गे उत्तरपदे न तु पूरण्यां प्रियादौ च परतः। यथा चित्राः गावः यस्य सः चित्रगुः। चित्रा जस् गो जस् इत्यलौकिकविग्रहः। 'अनेकमन्यपदार्थे' इति सूत्रेण समासः। समासत्वात् सुपः लुक्। 'स्त्रियाः पुंद्भाषितपुंस्कादनूङ् समानाधिकरणे स्त्रियामपूरणीप्रियादिषु' इति सूत्रेण पुंद्भावे चित्र गो। 'गोस्त्रियोरुपसर्जनस्य' इति ह्रस्वे चित्रगु। तस्मात्सुप् प्रत्यये विभक्तिकार्ये चित्रगुः इति।
एवं रूपवती भार्या यस्य सः रूपवद्भार्यः।

गलितानि पुष्पाणि यस्याः सा गलितपुष्पा (लता)। गलित जस् पुष्प जस् इत्यलौकिकविग्रहः। 'अनेकमन्यपदार्थे' इति समासः। समासत्वात् सुपः लुक्। तस्मात्सुप् प्रत्यये 'अजाद्यतष्टाप्' इति टापि अनुबन्धलोपे गलितपुष्प आ (टा) सु। भस्य 'हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्क्तं हल्' इति सलोपे गलितपुष्पा।

अनूङ् इति किम्? वामोरूभार्यः इत्यत्र ऊङ् वर्तमानत्वात् पुंवद्भावो न।

**8. अप्पूरणीप्रमाण्योः (५.४.११६)**

अप्प्रत्ययः

द्विपदं सूत्रम्। अनेन सूत्रेण अप्प्रत्ययः विधीयते। पूरणार्थप्रत्ययान्तं यत् स्त्रीलिङ्गं तदन्तात्प्रमाण्यन्ताच्च बहुव्रीहेरप्स्यात्। यथा कल्याणीपञ्चमाः रात्रयः। पञ्चानां पूरणी पञ्चमी। अत्र पूरणार्थे डट्प्रत्ययः। कल्याणी पञ्चमी यासां रात्रीणां ताः कल्याणीपञ्चमाः। कल्याणी सु पञ्चमी सु इत्यलौकिकविग्रहे 'अनेकमन्यपदार्थे' इति समासे सुब्लुकि कल्याणी पञ्चमी। 'यस्येति च' इति

भस्य लुकि कल्याणीपञ्चम्। 'अप्पूरणीप्रमाण्योः' इत्यप्प्रत्यये कल्याणीपञ्चम। जसि विभक्तिकार्ये कल्याणीपञ्चमाः इति रूपम्।

स्त्री प्रमाणी यस्य सः स्त्रीप्रमाणः।

अप्रियादिषु किम्? कल्याणीप्रियः इत्यत्र प्रियशब्दः परत्वेन वर्तमानत्वात् न अप्प्रत्ययः।

**9. बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात्षच् (५.४.११३)**

षच्प्रत्ययः

चतुष्पदं सूत्रम्। अनेन सूत्रेण षच्प्रत्ययः विधीयते। स्वाङ्गवाचि सक्थ्यक्ष्यन्ताद्बहुव्रीहेः षच् स्यात्। यथा दीर्घसक्थः। दीर्घे सक्थिनी यस्य सः दीर्घसक्थः। दीर्घ औ सक्थि औ इत्यलौकिकविग्रहः। 'अनेकमन्यपदार्थे' इति समासः। समासत्वात् सुपः लुक्। बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात्षच् इति षच्प्रत्यये दीर्घसक्थि अ। भस्य लुकि विभक्तिकार्ये दीर्घसक्थः।

**जलजाक्षी-** जलजे इव अक्षिणी यस्याः सा जलजाक्षी। 'अनेकमन्यपदार्थे' इति समासे 'सुब्लुकि बहुव्रीहौ सक्थ्याक्ष्णोः स्वाङ्गात्षच्' इति षचि जलज अक्षि षच्। अनुबन्धलोपे जलज अक्षि अ। 'नस्तद्धिते' इति टिलोपे जलज अक्ष। दीर्घे सुपि 'षिद्गौरादिभ्यश्च' इति ङीपि जलजाक्ष ई। 'यस्येति च' इति भस्य लुकि जलजाक्षी इति।

स्वाङ्गात् किम्? दीर्घसक्थि (शकटम्)। अत्र स्वाङ्गत्वाभावात् न षच्प्रत्ययः। स्थूलाक्षा वेणुयष्टिः। अत्रापि स्वाङ्गत्वाभावात् न षच्। अत्र अक्ष्णोऽदर्शनात् इति सूत्रेण समासान्तः अच्प्रत्ययः।

**10. द्वित्रिभ्यां ष: मूर्ध्नः (५.४.११)**

षप्रत्ययः

त्रिपदं सूत्रम्। अनेन सूत्रेण षप्रत्ययः विधीयते। द्वित्रिभ्यां मूर्ध्नः षः स्याद् बहुव्रीहौ। यथा द्विमूर्धः। द्वौ मूर्धानौ यस्य सः द्विमूर्धः। 'अनेकमन्यपदार्थे' इति समासे सुब्लुकि 'द्वित्रिभ्यां षः मूर्ध्नः' इति षप्रत्यये द्विमूर्धन् अ। 'नस्तद्धिते ' इति टिलोपे द्विमूर्ध। विभक्तिकार्ये द्विमूर्धः।
एवं त्रिमूर्धः। त्रयः मूर्धानः यस्य सः त्रिमूर्धः।

**11. अन्तर्बहिभ्यां च लोम्नः (५.४.११७)**

लोम्नः अप्

त्रिपदं सूत्रम्। अनेन सूत्रेण लोमन्शब्दस्य अप्स्यात्। अन्तर्बहिभ्यां लोम्नोऽप् स्यात् बहुव्रीहौ। यथा अन्तः लोमानि यस्य सः अन्तलोमः। अन्तर् लोमन् जस् इत्यलौकिकविग्रहे 'अनेकमन्यपदार्थे' इति समासः। सुपः लुकि 'अन्तर्बहिभ्यां च लोम्नः' इति अप्प्रत्यये अन्तर् लोमन् अ। टिलोपे विभक्तिकार्ये अन्तर्लोमः।

**12. पादस्य लोपोऽहस्त्यादिभ्यः (५.४.१३८)**

पादशब्दान्तस्य लोपः

पादस्य लोपः अहस्त्यादिभ्यः इति त्रिपदं सूत्रम्। अनेन सूत्रेण पादान्तस्य लोपः विधीयते। हस्त्यादिवर्जितादुपमानात्परस्य पादशब्दस्य लोपः स्याद्बहुव्रीहौ। यथा व्याघ्रस्येव पादावस्य व्याघ्रपात्। व्याघ्र ङस् पाद औ इत्यलौकिकविग्रहः। 'अनेकमन्यपदार्थे' इति समासः। सुब्लुकि 'पादस्य लोपोऽहस्त्यादिभ्यः इति पादान्तस्य लोपे व्याघ्रपाद्। सुप्रत्यये इतः लोपे 'हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल्' इति सलोपे चर्त्वे च व्याघ्रपात्।

अहस्त्यादिभ्यः इति किम्? हस्तिपादः, कुसुलपादः इत्यादौ पादशब्दान्तस्य लोपो न।

**13. संख्या सुपूर्वस्य (५.४.१४०)**

संख्यासुपूर्वस्य पादान्तस्य लेपः

एकपदं सूत्रम्। अनेन सूत्रेण संख्यासुपूर्वयोः पादशब्दान्तस्य लोपः स्यात्। बहुव्रीहौ संख्यापूर्वस्य सुपूर्वस्य च पादशब्दान्तस्य लोपः स्यात्। यथा द्वौ पादौ यस्य सः द्विपात्। द्वि औ पाद औ इत्यलौकिकविग्रहे 'अनेकमन्यपदार्थे' इति समासः। सुब्लुकि 'संख्यासुपूर्वस्य' इति सूत्रेण पादशब्दान्तस्य लोपे द्विपाद्। सुपि विभक्तिकार्ये चर्त्वे च द्विपात्।
एवं शोभनौ पादौ यस्य सः सुपात्।

**14. उद्विभ्यां काकुदः (५.४.१४८)**

काकुदशब्दान्तस्य लेपः

द्विपदं सूत्रम्। अनेन सूत्रेण काकुदशब्दान्तस्य लोपः विधीयते। उद्विभ्यां परस्य काकुदशब्दान्तस्य लोपः स्यात् बहुव्रीहौ। यथा उद्गतं काकुदं यस्य सः उत्काकुत्। उत् काकुद सु इत्यलौकिकविग्रहे 'अनेकमन्यपदार्थः' इति समासः। सुब्लुकि 'उद्विभ्यां काकुदस्य' इति काकुदशब्दान्तस्य लोपे उत्काकुद्। विभक्तिकार्ये उत्काकुत्।
एवं विगतं काकुदं यस्य सः विकाकुत्।

**15. पूर्णाद्विभाषा (५.४.१४९)**

विकल्पेन काकुदपदान्तस्य लोपः

द्विपदं सूत्रम्। अनेन सूत्रेण विकल्पेन काकुदशब्दान्तलोपः विधीयते। पूर्णशब्दात्परस्य काकुदशब्दान्तलोपः स्यात् बहुव्रीहौ। यथा पूर्णं काकुदं यस्य सः पूर्णकाकुत्, पूर्णकाकुदः वा। पूर्ण सु काकुद सु इत्यलौकिकविग्रहे 'अनेकमन्यपदार्थे' इति समासः। सुब्लुकि 'पूर्णाद्विभाषा' इति विकल्पेन काकुदपदान्तलोपे पूर्णकाकुद्। विभक्तिकार्ये चर्त्वे पूर्णकाकुत्।

पदान्तलोपाभावे पूर्णकाकुद। सुपि विभक्तिकार्ये पूर्णकाकुदः।

**16. सुहृद्दुहृदौ मित्रामित्रयोः (५.४.१५७)**

हृदयस्य हृद्भावः

द्विपदं सूत्रम्। अनेन सूत्रेण हृदयस्य हृद्भावः निपात्यते। मित्रममित्रमित्यर्थे सुदुर्भ्यां हृदयस्य हृद्भावो निपात्यते। यथा सुष्ठु शोभनं हृदयं यस्य सः सुहृत्-

मित्रम्। सु हृदय सु इत्यलौकिकविग्रहः। 'अनेकमन्यपदार्थे' इति समासः। सुब्लुकि 'सुहृद्दुहृदौ मित्रामित्रयोः' इति हृद्भावनिपातने सुहृद्। विभक्तिकार्ये चर्त्वे च सुहृत् (मित्रम्)।

एवं दुष्टं हृदयं यस्य सः दुहृत् (अमित्रम्)।

**17. उरः प्रभृतिभ्यः कप् (५.४.१५१)**

कप् प्रत्ययः

त्रिपदं सूत्रम्। अनेन सूत्रेण कप्प्रत्ययः विधीयते। उरः प्रभृतिभ्यः शब्देभ्यः कप्प्रत्ययः स्यात्। यथा व्यूढोरस्कः। व्यूढं उरः यस्य सः व्यूढोरस्कः। व्यूढ सु उरस् सु इति अलौकिकविग्रहः। 'अनेकमन्यपदार्थे' इति समासः। प्रतिपदिकत्वात् सुपः लुकि व्यूढः उरस्। 'उरः प्रभृतिभ्यः कप्' इति कप्, पकारलोपे व्यूढ उरस् क। 'ससजुषोरुः' इति रुत्वे व्यूढ उरर् क। 'खरवसानयोर्विसर्जनीयः' इति विसर्गे व्यूढ उरः क। 'कस्कादिषु च' इति विसर्गस्य सत्वे व्यूढ उरस्क। 'आद्गुणः' इति गुणे व्यूढोरस्कः। प्रातिपदिकत्वेन सौ रुत्वे विसर्गे च व्यूढोरस्कः।

**18. सोऽपदादौ (८.३.३८)**

विसर्ग सत्वम्

सः अपदादौ इति द्विपदं सूत्रम्। अनेन सूत्रेण विसर्गस्य सः विधीयते। पाशकल्पककाम्येषु परेषु विसर्गस्य सः स्यात्। यथा महायशस्कः। महान् यशो यस्येति विग्रहः। महत् सु यशस् सु इत्यलौकिकविग्रहे 'अनेकमन्यपदार्थे' इति समासः। सुब्लुकि महत् यशस्। 'आन्महतः समानाधिकरणजातीययोः' इति आत्वे महायशस्। शेषाद्विभाषा इति विकल्पेन कप्प्रत्यये महायशस्क। सस्य रुत्वे विसर्गे महायशः क। 'सोऽपदादौ' इति विसर्गस्य सत्वे महायशस्क। विभक्तिकार्ये महायशस्कः।

कप्प्रत्ययाभावे 'अत्वसन्तस्य चाधातोः' इति उपधादीर्घे महायशाः इति रूपम्।

**19. कस्कादिषु च (८.३.४८)**

विसर्गस्य षः

द्विपदं सूत्रम्। अनेन सूत्रेण विसर्गस्य षत्वं अन्यस्य सत्वं विधीयते। कस्कादिषु शब्देषु परेषु इणः उत्तरस्य विसर्गस्य षोऽन्यस्य तु सः। यथा व्यूढोरस्कः।

**20. इणः षः (८.३.३९)**

विसर्गस्य सः पाशकल्पककाम्येषु परेषु

द्विपदं सूत्रम्। अनेन सूत्रेण विसर्गस्य षत्वं विधीयते। इण उत्तरस्य विसर्गस्य षः स्यात् पाशकल्पककाम्येषु परेषु। यथा प्रियसर्पिष्कः। प्रिय सु सर्पिस् सु इत्यलौकिकविग्रहः। 'अनेकमन्यपदार्थे' इति समासः। सुब्लुकि रुत्वे विसर्गे 'इणः षः' इति षत्वे प्रियसर्पिष्क। अनुबन्धलोपे प्रियसर्पिष्कः।

**21. निष्ठा (२.३.३९)**

पूर्वप्रयोगः

एकपदं सूत्रम्। अनेन सूत्रेण निष्ठायाः पूर्वप्रयोगः विधीयते। निष्ठान्तं बहुव्रीहौ पूर्वं स्यात्। यथा युक्तयोगः। युक्त सु योग सु इत्यलौकिकविग्रहः।

'अनेकमन्यपदार्थे' इति समासः। सुब्लुकि 'निष्ठा' इति सूत्रेण निष्ठायाः पूर्वप्रयोगे युक्तयोग। विभक्तिकार्ये युक्तयोगः।

**22. शेषाद्विभाषा (५.४.१५४)**

विकल्पेन कप्

द्विपदं सूत्रम्। अनेन सूत्रेण विकल्पेन कप्प्रत्ययः विधीयते। अनुक्तसमासान्तात् बहुव्रीहेः कप् वा स्यात्। यथा महान् यशः यस्य सः महायशस्कः महायशाः वा। महत् सु यशस् सु इत्यलौकिकविग्रहे बहुव्रीहिसमासे सुब्लुकि महतः आत्वे 'शेषाद्विभाषा' इति विकल्पेन कप्प्रत्यये कपि अनुबन्धलोपे रुत्वे विसर्गे 'सोऽपदादौ' इति विसर्गस्य सत्वे महायशस्क। विभक्तिकार्ये महायशस्कः।

कप्प्रत्ययाभावे उपधादीर्घे महायशाः इति।

## 3.3.2 द्वन्द्वसमासः

**23. चार्थे द्वन्द्वः (२.२.२९)**

द्वन्द्वसमासं विधीयमानं सूत्रम्

द्विपदं सूत्रम्। अनेन सूत्रेण द्वन्द्वसमासः विधीयते। अनेकं सुबन्तं चार्थे वर्तमानं वा समस्यते सः द्वन्द्वः।

चार्थाः के? चत्वारः चार्थाः। ते -

1. समुच्चयः- परस्परनिरपेक्षस्यानेकस्यैकस्मिन्नवयः समुच्चयः - यथा ईश्वरं गुरुं च भजस्व।
2. अन्वाचयः- अन्यतरस्यानुषङ्गिकेन अन्वयः अन्वाचयः- यथा भिक्षामट गां च आनय।
3. इतरेतरयोगः- मिलितानामन्वयः इतरेतरयोगः - यथा धवखदिरौ छिन्धि।
4. समाहारः- समूहः समाहारः - संज्ञापरिभाषम्।

समुच्चये अन्वाचये च न समासः।

**24. राजदन्तादिषु परम् (२.२.३१)**

पूर्वप्रयोगार्हं परं स्यात्

द्विपदं सूत्रम्। अनेन सूत्रेण पूर्वप्रयोगार्हं परं स्यात्। राजदन्तादिषु परेषु पूर्वप्रयोगार्हं परं स्यात्। यथा दन्तानां राजानो राजदन्ताः। दन्त आम् राजन् जस् इत्यलौकिकविग्रहः। 'षष्ठी' इति समासे समासत्वात् सुप् लुकि 'राजदन्तादिषु परम्' इति सूत्रेण पूर्वप्रयोगे राजदन्त। जसि अनुबन्धलोपे पूर्वसवर्णदीर्घे रुत्वे विसर्गे च राजदन्ताः।

**25. धर्मादिष्वनियमः (वार्तिकम्)**

धर्मादिषु कः पूर्वः कः परः इति नियमो नास्ति। यथा अर्थधर्मौ। अर्थ सु धर्म सु इत्यलौकिकविग्रहे 'चार्थे द्वन्द्वः' इति समासः। सुब्लुकि अर्थधर्म।

'धर्मादिष्वनियमः' इति पूर्वपरप्रयोगे नियमाभावत् औविभक्तौ अर्थधर्मौ, धर्मार्थौ वा स्यात्।

**26. द्वन्द्वे घि (२.२.३२)**

घि पूर्वम्

द्विपदं सूत्रम्। अनेन सूत्रेण घिशब्दं पूर्वं प्रयुज्यते। द्वन्द्वे घिसंज्ञं पूर्वं स्यात्। यथा हरिहरौ। हरश्च हरिश्चेति विग्रहे 'चार्थे द्वन्द्व' इति समासे सुब्लुकि हरहरि। 'द्वन्द्वे घि' इति घिसंज्ञकस्य हरिशब्दस्य पूर्वप्रयोगे हरिहर। विभक्तिकार्ये हरिहरौ इति।

**27. अजाद्यदन्तम् (२.२.३३)**

अजाद्यदन्तं पूर्वम्

एकपदं सूत्रम्। अनेन सूत्रेण अजाद्यदन्तं पूर्वं स्यात्। द्वन्द्वसमासे अजादिः अजन्तं च पूर्वं स्यात्। यथा ईश कृष्णौ। ईशः च कृष्णः च ईशकृष्णौ। ईश सु कृष्ण सु इत्यलौकिकविग्रहः। 'चार्थे द्वन्द्वः' इति समासः। सुब्लुकि 'अजाद्यदन्तं' इति सूत्रेण ईशशब्दस्य अचादित्वात् पूर्वप्रयोगे ईशकृष्ण। औ विभक्तौ ईशकृष्णौ इति।

**28. अल्पाच्तरम् (२.२.३४)**

अल्पाच् पूर्वम्

एकपदं सूत्रम्। अनेन सूत्रेण अल्पाचः पूर्वत्वं विधीयते। द्वन्द्वसमासे अल्पाचः पूर्वप्रयोगः। यथा शिवकेशवौ। शिवश्च केशवश्चेति विग्रहे द्वन्द्वसमासे सुब्लुकि 'अल्पाच्तरम्' इति शिवशब्दस्य पूर्वनिपाते विभक्त्यादिकार्ये शिवकेशवौ इति रूपम्।

**29. पिता मात्रा (१.२.७०)**

पितृशब्दः शिष्यते

द्विपदं सूत्रम्। अनेन सूत्रेण पितृशब्दः एव शिष्यते। मात्रा सहोक्तौ पिता वा शिष्यते। यथा पितरौ। माता च पिता च पितरौ। मातृ सु पितृ सौ इति अलौकिकविग्रहे 'चार्थे द्वन्द्वः' इति समासे सुब्लुकि 'पितामात्रा' इति सूत्रेण विकल्पेन पितृशब्दस्यैकशेषे मातृशब्दस्य लोपे च कृते पितृ औ इति स्थिते 'ऋतौ ङि सर्वनामस्य' इति गुणे रपरत्वे च पितरौ।

पितृशब्दस्य शेषाभावे मातृ पितृ औ इत्यवस्थायां 'आनङ् ऋतौ द्वन्द्वे' इति मातृशब्दस्य पितृशब्दस्य आनङि अनुबन्धलोपे मातान् पितृ। 'नलोपः प्रातिपदिकान्तस्य' इति नलोपे माता पितृ। तस्मात् औ 'ऋतौ ङि..' इत्यनेन गुणे रपरत्वे मातापितरौ।

**30. द्वन्द्वश्च प्राणितूर्यसेनाङ्गानाम् (२.४.२)**

एकवद्भावः

द्वन्द्वः च प्राणितूर्यसेनाङ्गानाम् इति त्रिपदं सूत्रम्। अनेन सूत्रेण एकवद्भावः विधीयते। प्राणितूर्यसेनाङ्गानां द्वन्द्वः एकवत्स्यात्। यथा पाणिपादम्। पाणी च पादौ च एतेषां समाहारः पाणिपादम्। पाणि औ पाद औ इत्यलौकिकविग्रहः। 'चार्थे द्वन्द्वः' इति समासः। सुब्लुकि 'द्वन्द्वश्च प्राणितूर्यसेनाङ्गानाम्' इति

एकवद्भावे सुप्रत्यये पाणिपाद सु। अमि पूर्वरूपे पाणिपादम्।एवं च मार्दङ्गिकाश्च वैणिविकाश्च एतेषां समाहारः मार्दङ्गिकवैणविकम्।

रथिकाश्च अश्वारोहाश्च एतेषां समाहारः रथिकाश्वारोहम्।

**31. द्वन्द्वाच्चुदषहान्तात् समाहारे (५.४.१०६)**

टच्प्रत्ययः

द्वन्द्वात् चुदषहन्तात् समाहारे इति त्रिपदं सूत्रम्। अनेन सूत्रेण टच्प्रत्ययः विधीयते। चु इत्यनेन चवर्गः। चवर्गान्तात् दषहान्तात् च द्वन्द्वात् टच् स्यात् समाहारे। यथा वाक् च त्वक् च अनयोः समाहारः वाक्त्वचम्। वाच् सु त्वक् सु इत्यलौकिकविग्रहः। 'चार्थे द्वन्द्वः' इति समासः। सुब्लुकि 'चोः कि' इति कुत्वे वाक् त्वच्। 'द्वन्द्वाच्चुदहषहन्तात्समाहारे' इति टच्प्रत्यये वाक्त्वच् अ। सुपि विभक्तिकार्ये वाक्त्वचम्।

एवं त्वक् च स्रक् च त्वक्स्रजम्। शमी च दृषद् चानयोः समाहारः शमीदृषदम्। वाक् च त्विट् च अनयोः समाहारः वाक्त्विषम्। छत्रः च उपानहौ च एषां समाहारः छत्रोपानहम्।

छत्र सु उपानह् औ इति अलौकिकविग्रहः। 'चार्थे द्वन्द्वः' इति द्वन्द्वसमासः। सुब्लुकि 'द्वन्द्वाच्चुदषहान्तात्समाहारे' इति टचि छत्र उपानह् अ। गुणे सुपि विभक्तिकार्ये छत्रोपानहम्।

समाहारे किम्? समाहारे एवायं टच्प्रत्ययः। इतरेतरयोगे तु न। यथा प्रावृट् च शरद् च प्रावृट्शरदौ।

## 3.3.3 समासान्ताः

**32. ऋक्पूरब्धूःपथामानक्षे (५.३.७४)**

अप्रत्ययः अन्तादेशः

ऋक्पूरब्धूःपथाम् अ अनक्षे इति त्रिपदं सूत्रम्। ऋक्- पूर्- अप्- धुर्- पथिन् अन्तस्य इत्यर्थः लभते ऋगाद्यन्तस्य। अनेन सूत्रेण अप्रत्ययः अन्तत्वेन विधीयते। ऋगद्यन्तस्य समासस्य अप्रत्ययो अन्तावयवः स्यात् अन्ते या धूः तदन्तस्य तु न। यथा अर्धर्चः। ऋचः अर्धम् इति विग्रहः। ऋच् सु अर्ध सु इत्यलौकिकविग्रहः। 'अर्धं नपुंसकम्' इति समासे सुब्लुकि ऋच् अर्ध। अर्धशब्दस्य पूर्वनिपातत्वे 'ऋक्पूरब्धूःपथामानक्षे' इति समासान्तत्वेन अप्रत्यये गुणे रपरत्वे च 'अर्धर्चाः पुंसि' च इति पुंस्त्वे अर्धर्चः इति रूपम्।

एवं विष्णोः पुरं विष्णुपुरम्। विमला आपो यत्र तत् विमलापं सरः। राज्ञोः धूः राजधुरा। अक्षे धूः अक्षधूः। अत्र अकारः अन्तादेशत्वेन न। दृढा धूः यस्यासौ दृढधूः। अत्र अकारः अन्तत्वेन न।

सख्युः पन्थाः सखिपथः। सखि ङस् पथिन् सु इत्यलौकिकविग्रहः। 'षष्ठी' इति समासः। सुब्लुकि 'ऋक्पूरब्धूःपथामानक्षे' इति अकारान्तादेशे सखि पथिन् अ। 'नस्तद्धिते' इति टिलोपे विभक्तिकार्ये सखिपथः।

रम्यः पन्थाः यत्रासौ रम्यपथः। अत्र 'अनेकमन्यपदार्थे' इति समासः। सुपो लुकि रम्य पथिन्। 'ऋक्पूरब्धूःपथामानक्षे' इति अकारान्तादेशे रम्यपथिन् अ। 'नस्तद्धिते' इति टिलोपे रम्यपथ। विभक्तिकार्ये रम्यपथः। रम्यपथः देशः।

**33. अक्षणोऽदर्शनात् (५.४.७६)**

अध्वन् शब्दस्य अच्प्रत्ययः

अक्षणः अदर्शनात् इति द्विपदं सूत्रम्। अनेन समासान्तः अच्प्रत्ययः विधीयते। अचक्षुपर्यायादक्ष्णोरच् स्यात् समासान्तः। यथा गवाम् अक्षीव गवाक्षः। गो आम् अक्षि सु इत्यलौकिकविग्रहः। 'उपमानानि सामान्यवचनैः' इति समासः। सुब्लुकि 'अक्षणोऽदर्शनात्' इति अच्समासान्ते गो अक्ष। अवादेशे गवाक्ष। विभक्तिकार्ये गवाक्षः।

**34. उपसर्गादध्वनः (५.४.८५)**

अच् प्रत्ययः

द्विपदं सूत्रम्। अनेन सूत्रेण अध्वन्शब्दस्य अच्प्रत्ययः समासान्तत्वेन विधीयते। उपसर्गात्परस्य अध्वन्शब्दस्य अच्प्रत्ययः स्यात्। यथा प्रगतोऽध्वानं प्राध्वो रथः। प्र अध्वन् सु इत्यलौकिकविग्रहे 'प्रादयो गताद्यर्थे प्रथमया' इति वार्तिकेन समासः। सुब्लुकि 'उपसर्गादध्वनः' इति समासान्तः अच्प्रत्यये प्र अध्वन् अ। सवर्णदीर्घे टेः लोपे विभक्तिकार्ये च प्राध्वः।

**35. नू पूजनात् (३.४.६९)**

टच् निषेधः

द्विपदं सूत्रम्। अनेन सूत्रेण टच्निषेधः विधीयते। पूजनार्थात्परेभ्यः समासान्ताः न स्युः। यथा सुराजा। सु शोभनो राजा सुराजा। सु राजन् सु इत्यत्र 'कुगतिप्रादयः' इति समासः सुब्लुकि 'राजाहःसखिभ्यष्टच्' इति सूत्रेण विधीयमानस्य टच्प्रत्ययस्य 'न पूजनात्' इति निषेधे सु राजन्। पुनः सुपि अनुबन्धलोपे न लोपे सलोपे च सुराजा।

एवं अतिराजा। अति राजन् सु। 'कुगतिप्रादयः' इति समासः सुब्लुकि न लोपे विभक्तिकार्ये अतिराजा।

## Summarised Overview

अस्मिन् एकके द्वात्रिंशत् सूत्राणि व्याख्यातानि। बहुव्रीहिसमासे द्वन्द्वसमासे च आगतान् वार्तिकान्यापि व्याख्यातानि। तेषु प्रधानानि अनेकमन्यपदार्थे, सप्तमीविशेषण बहुव्रीहौ, संख्यासुपूर्वस्य, सोऽपदादौ, चार्थे द्वन्द्वः, पिता मात्रा, ऋक्पूरब्धूःपथामानक्षे, उपसर्गादध्वनः इत्यादीनि सूत्राणि अन्तर्भवन्ति।

चार्थाः के इति सोदाहरणं विशदय्य समासान्तरूपाणि विशदीकृतानि। तेषु चित्रगुः, दीर्घसक्थः, सुहृत्, व्यूढोरस्कः, ईशकृष्णौ, गवाक्षः, अतिराजा इत्यादीनि सन्ति।

पाठभागस्थानि सर्वाणि वार्तिकानि सविशदं विशदीकृतानि। केवलेन एकवारपठनेन छात्रैः ज्ञातुं शक्यते। प्रादिभ्यो धातुजस्य वाच्यो वा चोत्तरपदलोपः धर्मादिष्वनियमः इत्यादीनि तस्मिन् विभागे अन्तर्भवन्ति।

## Assignments

**प्रश्नाः**

1. कियत्पर्यन्तं शेषो बहुव्रीहिः इति सूत्रमनुवर्तते।
2. सप्तम्याः अलुक् विधीयमानं सूत्रं किम्? व्याख्यात।
3. 'नञोऽस्त्यर्थानां वाच्यो वा चोत्तरपदलोपः' इति वार्तिकं विशदयत।
4. अप्पूरणीप्रमाण्योः इति सूत्रेण किं विधीयते? उदाहरणसहितं लिखत।
5. पूर्णकाकुत्, पूर्णकाकुदः इति रूपद्वयं कथम्?

**2. सूत्राणि व्याख्यात ।**

1. कस्कादिषु च।
2. निष्ठा।
3. अजाद्यदन्तम्।
4. द्वन्द्वाच्चुदषहान्तात् समाहारे।
5. अक्ष्णोऽदर्शनात्।

**3. सप्रमाणं समासकार्याणि लिखत।**

1. पीताम्बरः।
2. गलितपुष्पा।
3. व्याघ्रपात्।
4. उत्काकुत्।
5. प्रियसर्पिष्कः।

**4. सिद्धान्तकौमुद्याः तत्पुरुषसमासप्रकरणं सविशदं पठन्तु।**

## Suggested Readings


1. लघुसिद्धान्तकौमुदी.वरदराजः, चौखम्बा संस्कृत सीरीस अकादमि, वाराणसी, २००५.
2. पदसंस्कारचन्द्रिका. कैकुलका रामवारियर्, केरलसाहित्य अकादमि, तृश्शूर।
3. लघुपाणिनीयम्. ए आर् राजराजवर्मा, केरलसर्वकलाशाला, तिरुवनन्तपुरम्।
4. पाणिनीयप्रद्योतम्, ऐसि चाक्को, भाषा इन्स्टिट्यूट, तिरुवनन्वपुरम्।
5. प्रक्रियाभाष्यम्. फा जोन् कुन्नपप्लि, नाषणल् बुक् स्टाल्, कोट्टयम्।


## References


1. वरदराजाचार्यः, लघुसिद्धान्तकौमुदी, व्याख्या. श्रीगिरीशकुमारठक्कुरः, कृष्णदास अकादमी,

वाराणसी, १९९८, पुटानि २२४-२३०
2. वरदराजाचार्यः, लघुसिद्धान्तकौमुदी, व्याख्या श्रीगोमतीप्रसादशास्त्रीमिश्रः, चौखम्बा सुरभारती प्रकाशन्, वाराणसी, १०९९, पुटानि २२६-१३१
3. पि. बलेश्वरभट्टः, समासः, संस्कृतभारती, बेङ्गलुरू, १९९९ पुटानि ५०- ५६

**Space for Learner Engagement for Objective Questions**

Learners are encouraged to develop objective questions based on the content in the paragraph as a sign of their comprehension of the content. The Learners may reflect on the recap bullets and relate their understanding with the narrative in order to frame objective questions from the given text. The University expects that 1 - 2 questions are developed for each paragraph. The space given below can be used for listing the questions.

UNIT 4

# कारकप्रकरणम्

## Learning Outcomes

- संस्कृतभाषायां व्याकरणशास्त्रस्य प्रसक्तिः।
- कारकज्ञानेन पदशुद्धिं जानाति।
- क्रियाज्ञानेन वाक्यज्ञानं तद्वारा आशयावगतिं गृह्णाति।

## Background

क्रमवतां वर्णानां समूहः पदम्। पदसमूहः वाक्यम्। वाक्याश्रितानि कारकाणि। कारकाणि षट्। कर्तृकर्मकरणसम्प्रादनापादानाधिकरणानि षट् कारकाणि। सप्त विभक्तयः। षष्ठी विभक्तौ क्रिययाश्रितत्वं न। अतः षष्ठीं विहाय सर्वाः विभक्तयः कारकाश्रिताः भवन्ति।

किं नाम कारकम्? यः क्रियया सम्बन्धं प्राप्नोति सः कारकम्। करोति क्रियां निर्वर्तयति इति कारकम्। वाक्ये क्रियायाः प्राधान्यम्। क्रियाजनकः कारकम्। कारकैरन्वितं क्रियापदं वाक्यमिति अमरसिंहः।

अस्मिन् प्रकरणे षण्णां कारकाणां, सप्तानां विभक्तीनां च कार्यं विशदयति। तस्मादत्र प्रविश्यामः।।

## Keywords

कर्तृसंज्ञा - प्रथमा - कर्म - द्वितीया- करणं- तृतीया- सम्प्रदानं- चतुर्थी- अपादानं- पञ्चमी- शेषे षष्ठी- अधिकरणम् आधारः।

## Discussion

कारकं किमिति ज्ञातुं प्रथमं कतिपयानि वाक्यानि परिशोधयन्तु भवन्तः।

बालः पठति। बालः पाठं पठति। बालः कन्तुकेन क्रीडति। अध्यापकः बालाय विद्यां ददाति। सायं बालः विद्यालयात् गृहं प्रत्यागच्छति। सः मातुः उपदेशमनुसरति। बालः उद्याने क्रीडति।

रेखाङ्कितानि पदानि परिशोधयतु।

प्रथमे वाक्ये पठनं बालः करोति। अत्र क्रियया सह बालस्य बन्धो वर्तते। क्रियां कर्तुं तस्मिन् बाले स्वातन्त्र्यमस्ति। अतः सः कर्ता भवति।

द्वितीये वाक्येऽपि पठनक्रिया वर्तते। पठनक्रियां बालः करोति। पाठमेव पठितुं स ईहते। अतः पाठस्य कर्मत्वं लभते।

तृतीये वाक्ये क्रीडति इति क्रिया। केन क्रीडति इति प्रश्नस्योत्तरं भवति कन्तुकेन इति। क्रियां कर्तुं कन्तुकं साहाय्यकं भवति। अतः कन्तुकस्य करणत्वं लभते।

चतुर्थे वाक्ये ददाति इति क्रिया। अध्यापकः कर्ता। कर्ता कर्मभूतां विद्यां बालाय दातुमिच्छति। अतः बालः सम्प्रसारणम्।

पञ्चमे वाक्ये प्रत्यागच्छति इति क्रिया। कस्मात्? विद्यालयात्। विभागाश्रयः अत्र सूचितः। अतः विद्यालयस्य अपादानत्वम्।

षष्ठे वाक्ये क्रिया अनुसरति। कर्ता सः। मातुः क्रियया सह न कोऽपि बन्धः। अतः कारकत्वं न।

सप्तमे वाक्ये क्रीडति इति क्रिया। बालः कर्ता। कर्तुः आधारः उद्यानम्। अतः उद्यानस्य अधिकरणत्वम्।

कर्तृकर्मकरणादीनि कारकाणि भवन्ति। तानि वाक्यानि क्रियामवलम्ब्य प्रवृत्तानि भवन्ति।

### 1. प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा (२.३.४६)

द्विपदं सूत्रम्। अनेन सूत्रेण प्रथमाविभक्तिः विधीयते। प्रातिपदिकार्थः च लिङ्गं च परिमाणं च वचनञ्च प्रातिपदिकार्थलिङ्गपरिमाणवचनानि। तान्येव प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रं, तस्मिन् प्रातिपदिकार्थलिङ्गपरिमाण-वचन मात्रे।

प्रथमाविभक्तिः

नियता व्यापिका उपस्थितिः यस्य सः नियतोपस्थितिकः। प्रातिपदिकश्रवणेन यस्यार्थं स्मरणे आयाति सः प्रातिपदिकार्थः। मात्रशब्दस्य प्रत्येकं योगः।

प्रातिपदिकार्थमात्रे लिङ्गमात्राद्याधिक्ये परिमाणमात्रे वचनमात्रे च प्रथमा स्यात्। प्रातिपदिकार्थमात्रे इत्यस्य उदाहरणानि भवन्ति - उच्चैः, नीचैः, कृष्णः, श्रीः, ज्ञानम् इत्यादयः। उच्चैः इत्युक्तौ उच्चाधिकरणस्य, नीचैः इत्युक्तौ अधोऽधिकरणस्य, कृष्णः इत्युक्तौ वसुदेवपुत्रस्य पुंस्त्वस्य, श्रीः इत्युक्तौ

लक्ष्मीदेव्याः स्त्रीत्वस्य, ज्ञानमित्यत्र नपुंसकत्वविशिष्टस्य अन्तःप्रकाशकस्य च भानत्वम्।

लिङ्गमात्राधिक्ये तटः, तटी, तटम्। अनियतलिङ्गस्य तटस्य 'तटः' इति प्रथमाविभक्तियोजनेन पुंस्त्वं, तटी इत्यत्र स्त्रीत्वं, तटम् इत्यत्र नपुम्सकत्वं च सूचयन्ति।

परिमाणमात्रे द्रोणो व्रीहिः।

वचनं संख्या - एकः, द्वौ, बहवः।

**2. सम्बोधने च (२.३.४७)**

सम्बोधन-प्रथमा

द्विपदं सूत्रम्। अनेन सूत्रेण सम्बोधनप्रथमा विधीयते। सम्बोधने च प्रथमा स्यात्। यथा - हे राम।

**3. कर्तुरीप्सिततमं कर्म (२.३.४९)**

कर्मसंज्ञा

कर्तुः ईप्सिततमं कर्म इति त्रिपदं सूत्रम्। अनेन सूत्रेण कर्मसंज्ञा विधीयते। आप्तुम् इष्यमाणं ईप्सितम्।अतिशयेन ईप्सितं ईप्सिततमम्।

कर्तुः क्रियया आप्तुं इष्टतमं कारकं कर्मसंज्ञं स्यात्। यथा बालः पाठं पठति। अत्र बालः कर्ता। पाठमेव इष्टतमं कार्यम्। पठति इति क्रिया। अत्र पाठस्य कर्मत्वम्। अतः 'कर्मणि द्वितीया' इति सूत्रेण द्वितीया। पाठम् इति द्वितीया।

**4. कर्मणि द्वितीया (२.३.२)**

द्वितीया

द्विपदं सूत्रम्। अनेन सूत्रेण द्वितीया विधीयते। अनुक्ते कर्मणि द्वितीया स्यात्। यत्र प्रत्ययः न वर्तते तादृशे कर्मणि द्वितीया। यथा हरिं भजति। अत्र अभिलषितं कर्म हरिः। भजनक्रिया हरिमुद्दिश्यैव करोति। अतः कर्मसंज्ञायां 'कर्मणि द्वितीया' इति द्वितीया। हरिम् इति द्वितीया रूपम्।

अभिहिते तु कर्मादौ प्रथमा, कर्म तु उक्ते कर्मवाच्यः, अर्थात् कर्मणिप्रयोगे प्रथमा विभक्तिः। यथा हरिः सेव्यते। लक्ष्म्या सेवितः। अत्र सेव्यते, सेवितः च कर्मवाच्यः। अतः प्रथमा।

**5. अकथितञ्च (१.४.५१)**

अविवक्षितकारकम्

अकथितं चेति द्विपदं सूत्रम्। अनेन सूत्रेण कर्मसंज्ञा विधीयते। अपादानादिविशेषैरविवक्षितं कारकं कर्मसंज्ञं स्यात्। अपादान- सम्प्रदान- अधिकरणत्वरूपेण अविवक्षितं कारकं कर्मसंज्ञमित्यर्थः।

**द्विकर्मधातवः षोडश सन्ति। तेषां सविशेषताः पट्टिकारूपेण अधो दीयते।**

| धातुः- अर्थः | क्रियापदम् | उदाहरणम् | कर्मद्वयम् | वाक्यस्यार्थः |
|---|---|---|---|---|
| दुह् प्रपूरणे | दोग्धि | गां दोग्धिपयः | गां, पयः | गोसकाशात् पयः दोग्धि। |
| टुयाचृ याञ्चायाम् | याचते | बलिं याचते वसुधां | बलिं, वसुधां | बलेः सकाशात् वसुधां याचते। |
| टुपचप् पाके | पचति | तण्डुलान् ओदनं पचति | तण्डुलान्,ओदनं | तण्डुलानामोदनं पचति। |
| दण्ड दण्डनिपातने | दण्डयति | गर्गान् शतं दण्डयति | गर्गान्, शतं | गर्गोभ्यः शतं दण्डयति |
| रुधिर् आवरणे | अवरुणद्धि | व्रजम् अवरुणद्धि गां | व्रजं, गां | व्रजे गामवरुणद्धि |
| प्रच्छ् वीप्सायां | पृच्छति | माणवकं पन्थानं पृच्छति | माणवकम् पन्थानं | माणवकात् (माणवकाय वा) पन्थानं पृच्छति |
| चिञ् चयने | अवचिनोति | वृक्षं अवचिनोति फलानि | वृक्षं फलानि | वृक्षात् अवचिनोति फलानि |
| ब्रूञ् व्यक्तायां वाचि | ब्रूते | माणवकं धर्मं ब्रूते | माणवकं, धर्मं | माणवकाय धर्मं ब्रूते |
| शासु अनुशिष्टौ | शस्ति | माणवकं धर्मं शस्ति | माणवकं धर्मं | माणवकाय धर्मं शास्ति |
| जि जये | जयति | शतं जयति देवदत्तम् | शतं, देवदत्तं | देवदत्तात् शतं जयति |
| मन्थ विलोडने | मथ्नाति | सुधां क्षीरनिधिं मथ्नाति | सुधां क्षीरनिधिं | सुधायै क्षीरनिधिं मथ्नाति |
| मुष् स्तेये | मुष्णाति | देवदत्तं शतं मुष्णाति | देवदत्तं, शतं | देवदत्तात् शतं मुष्णाति |
| णीञ् प्रापणे | नयति | ग्राममजां नयति | ग्रामं अजां | ग्रामात् अजां नयति |
| हृञ् हरणे | हरति | ग्राममजां हरति | ग्रामं अजां | ग्रामात् अजां हरति |
| कृष् विलेखने | कर्षति | ग्राममजां कर्षति | ग्रामं अजां | ग्रामात् अजां कर्षति |
| वह प्रापणे | वहति | ग्राममजां वहति | ग्रामं अजां | ग्रामात् अजां वहति |

द्विकर्मकधातूनां अर्थे वर्तमानाः धातवः अपि द्विकर्मकधातवः

**अर्थनिबन्धेयं संज्ञा**

दुहादीनां धातूनामर्थे वर्तमानाः अन्ये धातवः अपि द्विकर्मकधातवः। यथा बलिं भिक्षते वसुधाम्। अत्र 'अर्थनिबन्धेयं संज्ञा' इत्यनेन द्विकर्मकत्वात् 'अकथितं च' इत्यनेन कर्मसंज्ञायां 'कर्मणि द्वितीया' इति द्वितीया। बलिं वसुधाम् इति रूपे।

**कतिपयानां तादृशानां धातूनां विवरणम्**

| धातुः | धात्वन्तरे वर्तमानं पदमर्थञ्च | उदाहरणम् | उदाहरणस्यार्थः |
|---|---|---|---|
| ब्रूञ् व्यक्तायां वाचि | भाष- भाषते | माणवकं धर्मं भाषते | माणवकाय धर्मं भाषते |
| टुयाचृ याञ्चायां | भिक्ष- भिक्षते | बलिं भिक्षते वसुधाम् | बलेः सकाशात् भिक्षां वसुधां भिक्षते |
| प्रच्छ् ज्ञीप्सायां | अभिधत्ते- पृच्छति | माणवकं धर्ममभिधत्ते | माणवकाय धर्मं ब्रूते |
| ब्रूञ् व्यक्तायां वाचि | वक्ति - वदति<br>वच - परिभाषणे | माणवकं धर्मं वक्ति | माणवकाय धर्मं वदति |

कर्ता

**6. स्वतन्त्रः कर्ता (२.४.५४)**

द्विपदं सूत्रम्। अनेन सूत्रेण कर्तृसंज्ञः विधीयते। क्रियायां स्वातन्त्र्येण विवक्षितोऽर्थः कर्ता स्यात्। कर्तृकरणयोस्तृतीया इत्यादावस्य प्रयोजनम्। बालः पठति इत्यत्र 'स्वतन्त्रः कर्ता' इति सूत्रेण बालस्य कर्तृत्वम्। हि पठनक्रियां कर्तुं बाले स्वातन्त्र्यमस्ति।

करणसंज्ञः

**7. साधकतमं करणम् (१.४.४२)**

द्विपदं सूत्रम्। अनेन सूत्रेण करणसंज्ञा विधीयते। क्रियासिद्धौ प्रकृष्टोपकारकं करणसंज्ञं स्यात्। यद् व्यापारानन्तरं क्रियायाः फलनिष्पत्तिः तत् प्रकृष्टम्। 'कर्तृकरणयोस्तृतीया' इत्यादावस्य प्रयोजनम्। यथा बालः कन्तुकेन क्रीडति इत्यत्र क्रीडनार्थं नितान्तम् उपकारकं भवति कन्तुकमित्यतः तस्य करणसंज्ञा। अतः तृतीया।

तृतीया

**8. कर्तृकरणयोस्तृतीया (२.३.१८)**

कर्तृकरणयोः तृतीया इति द्विपदं सूत्रम्। अनेन सूत्रेण तृतीया विधीयते। अनभिहिते कर्तरि करणे च तृतीया। यथा रामेण बाणेन हतो बाली। अत्र रामकर्तृक- बाणकरणक- हननाश्रयो बाली इति शाब्दबोधः। अत्र रामो बाणेन बालिनं जघान इत्यर्थे हन् धातोः कर्मणि क्तप्रत्यये कृते कर्मणः उक्तत्वात् तत्र प्रथमा। हननक्रियायां रामस्य स्वातन्त्र्यविवक्षया 'स्वतन्त्रः कर्ता' इति कर्तृसंज्ञा।

बाणस्य हननक्रियायाम् अत्यन्तोपकारकत्वात्' साधकतमं करणम्' इति करणसंज्ञा। उभयत्र 'कर्तृकरणयोस्तृतीया' इति तृतीया। रामेण बाणेन इति तृतीया।

**9. कर्मणा यमभिप्रैति स संप्रदानम् (१.४.३२)**

सम्प्रदानसंज्ञा

कर्मणा यम् अभिप्रैति सः सम्प्रदानम् इति पञ्चपदं सूत्रम्। अनेन सूत्रेण सम्प्रदानसंज्ञा विधीयते। सम्यक् प्रदीयते अस्मै, तत् सम्प्रदानम्। दानक्रियाकर्मणा कर्ता यम् अभिप्रैति, सम्बध्नाति, सम्बन्धुमिच्छति वा, तत् कारकं सम्प्रदानकसंज्ञकम् इत्यर्थः।

दानस्य कर्मणा यमभिप्रैति स सम्प्रदानसंज्ञः स्यात्। यथा विप्राय गां ददाति इत्यत्र विप्रः सम्प्रदानः। अतः चतुर्थी। चतुर्थी सम्प्रदाने इत्यादावस्य प्रयोजनम्।

**10. चतुर्थी संप्रदाने (२.३.३३)**

चतुर्थी

द्विपदं सूत्रम्। अनेन सूत्रेण चतुर्थी विधीयते। सम्प्रदाने चतुर्थी स्यात्। यथा विप्राय गां ददाति इत्यत्र 'कर्मणा यमभिप्रैति स सम्प्रदानम्' इति सूत्रेण संप्रदानसंज्ञायां चतुर्थी सम्प्रदाने इति चतुर्थी। विप्राय इति चतुर्थी।

**11. नमःस्वस्तिस्वाहास्वधालंवषड्योगाच्च (२.३.१६)**

नमः इत्यादीनां योगे चतुर्थी

नमः- स्वस्ति- स्वाहा- स्वधा- अलं- वषड्योगात् च इति द्विपदं सूत्रम्। अनेन सूत्रेण चतुर्थी विधीयते। नमः- स्वस्ति-स्वाहा-स्वधा- अलं- वषड् इत्येतैः योगे चतुर्थी स्यात्। यथा हरये नमः। अत्र नमः इत्यस्य योगात् 'नमःस्वस्तिस्वाहास्वधालंवषड्योगाच्च' इति सूत्रेण चतुर्थी। हरये इति चतुर्थी। एवं प्रजाभ्यः स्वस्ति। अग्नये स्वाहा। पितृभ्यः स्वधा इत्यत्र स्वधा इत्यस्य योगात् नमः- स्वस्ति-स्वाहा- स्वधा- अलं- वषड्योगाश्च इति सूत्रण चतुर्थी। पितृभ्यः इति चतुर्थी।

अलमिति पर्याप्त्यर्थग्रहणम्। 'अलम्' इत्यस्य अर्थद्वयं वर्तते। पर्याप्तिः, निषेधः च। पर्याप्त्यर्थे चतुर्थी। निषेधार्थे तृतीया।

दैत्येभ्यः हरिरलम्। 'अलम्' इत्यस्य योगे चतुर्थी। एवं दैत्येभ्यः हरिः, प्रभुः, शक्तः इत्यादिः।

**12. ध्रुवमपायेऽपादानम् (१.४.२४)**

अपादानसंज्ञा

त्रिपदं सूत्रम्। अनेन सूत्रेण अपादानसंज्ञः विधीयते। अपायः विश्लेषः। विभागानुकूलव्यापारः विश्लेषः। विश्लेषे साध्ये यद् ध्रुवम् अवधिभूतं कारकं तदपादानं स्यात्। अपादानसंज्ञायां अपादाने पञ्चमी इति पञ्चमी विभक्तिः। यथा ग्रामादायाति। अत्र ग्रामस्य 'ध्रुवमपायेऽपादानम्' इत्यपादानसंज्ञायां 'अपादाने पञ्चमी' इति पञ्चमी। ग्रामात् इति रूपम्।

### 13. अपादाने पञ्चमी (२.३.२८)

पञ्चमी

द्विपदं सूत्रम्। अनेन सूत्रेण पञ्चमी विधीयते। अपादाने पञ्चमी स्यात्। यथा धावतोऽश्वात् पतति इत्यत्र 'ध्रुवमपायेऽपादानम्' इति सूत्रेण अश्वस्य अपादानसंज्ञायां 'अपादाने पञ्चमी' इति पञ्चमी। अश्वात् इति रूपम्।

### 14. षष्ठी शेषे (२.३.५०)

षष्ठी

द्विपदं सूत्रम्। अनेन सूत्रेण षष्ठी विधीयते। कारकप्रातिपदिकार्थव्यतिरिक्तः स्वस्वामिभावादिः संबन्धः शेषः, तत्र षष्ठी स्यात्। यथा राज्ञः पुरुषः। अत्र स्वस्वामिभावादिसंबन्धः वर्तमानत्वात् 'षष्ठी शेषे' इति षष्ठी। राज्ञः इति रूपम्।

कर्मादीनामपि सम्बन्धमात्रविवक्षायां षष्ठ्येव। यथा सतां गतम्। सज्जनसम्बन्धि गमनमित्यर्थः। अत्र 'षष्ठी शेषे' इति सूत्रेण षष्ठी। सताम् इति रूपम्।

सर्पिषो जानीते। सर्पिषोपायाने जानीते इत्यर्थः।

मातुः स्मरति- मातरं स्मरति इत्यर्थे कर्मणि षष्ठी। मातुः इति षष्ठी।

एवम् एधोदकस्योपस्कुरुते। भजे शम्भोश्चरणयोः।

### 15. आधारोऽधिकरणम् (१.४.४५)

अधिकरणम्

आधारः अधिकरणम् इति द्विपदं सूत्रम्। अनेन सूत्रेण अधिकरणसंज्ञा विधीयते। कर्तृकर्मद्वारा तन्निष्ठक्रियायाः आधारः कारकम् अधिकरणं स्यात्। 'सप्तम्यधिकरणे च' इत्यादावस्य प्रयोजनम्। यथा कटे आस्ते। अत्र कर्तुः आधारः भवति कटः। अतः 'आधारोऽधिकरणं' इति सूत्रेण कटस्याधिकरणसंज्ञायां 'सप्तम्यधिकरणे च' इति सप्तमी। कटे इति सप्तमी।

### 16. सप्तम्यधिकरणे च (२.३.३६)

सप्तमी

सप्तमी अधिकरणे चेति त्रिपदं सूत्रम्। अनेन सूत्रेण सप्तमी विधीयते। अधिकरणे सप्तमी स्यात्, चकारात् दूरान्तिकार्थेभ्यश्च। यथा स्थाल्यां पचति। अत्र कर्मणः आधारः भवति स्थाली। अतः आधारोऽधिकरणं इत्यनेन अधिकरणसंज्ञायां 'सप्तम्यधिकरणे च' इति सप्तमी। स्थाल्यां इति रूपम्।

आधारः त्रिधा। औपश्लेषिकः, वैषयिकः, अभिव्यापकः चेत्यधारः त्रिधा।

कटे आस्ते, स्थाल्यां पचति, इति औपश्लेषिकस्य आधारस्य उदाहरणद्वयम्। उप समीपे श्लेषः औपश्लेषिकः। एकदेशवृत्ति औपश्लेषिकः।

मोक्षे इच्छास्ति। मोक्षविषये इच्छास्ति इत्यर्थः। अत्र वैषयिकः आधारः। मोक्षस्य आधारोऽधिकरणम् इत्यधिकरणसंज्ञायां 'सप्तम्यधिकरणे च' इति सप्तम्यां मोक्षे इति।

अभिव्यापकस्योदाहरणं भवति सर्वस्मिन् आत्मा अस्ति। तिले तैलम् इत्यपरमुदाहरणम्।

वनस्य दूरे। वनस्य अन्तिके वा।

## Summarised Overview

अस्मिन् एकके षोडशसूत्राणि विशदीकृतानि। षड् कारकाणि सुष्ठु विशदीकृतानि। द्विकर्मकधातूनां, द्विकर्मकधातूनामर्थे वर्तमानानां धातूनां च सविशेषताः सूचिताः।

कतृकरणादिसंज्ञाः, प्रथमाविभक्तिं विधीयमानं प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा, कर्तुरीप्सिततमं कर्म, नमः-स्वस्ति- स्वाहा-स्वधालंवषड्योगच्च, सप्तम्यधिकरणे च इत्यादीनि सूत्राणि, हरिः सेव्यते, हरिं भजति, रामेण बाणेन हतो बाली, विप्राय गां ददाति, ग्रामादायाति, राज्ञः पुरुषः, कटे आस्ते इत्यादीनां पाठभागस्थानां सर्वेषां विभक्तिनिर्णयं च व्यक्ततया प्रकटितम्।

द्विकर्मकधातूनां, द्विकर्मकधातोरर्थे वर्तमानानाम् इतरधातूनां विशकलनमपि दत्तम्। तण्डुलान् ओदनं पचति, माणवकं पन्थानं पृच्छति, शतं धारयति देवदत्तं, ग्राममजां नयति, माणवकं धर्ममभिधत्ते इत्यादीनि स्पष्टीकृतानि च।

## Assignments

**I. उत्तरयत-**

1. बालः कन्तुकेन क्रीडति इत्यत्र कारणं किम्?
2. परिमाणमात्रे का विभक्तिः प्रयुज्यते? विशदयत।
3. गर्गान् शतं दण्डयति इत्यस्य कोऽर्थः?
4. कर्तृसंज्ञाविधायकं सूत्रं किम्? तत् सूत्रं व्याख्यात।
5. करणार्थे का विभक्तिः? उदाहरणसहितं व्याख्यात।

**II. सूत्राणि व्याख्यात-**

1. ध्रुवमपायेऽपादानम्।
2. कर्तुरीप्सिततमं कर्म।
3. षष्ठी शेषे।
4. सप्तम्यधिकरणे च।
5. कर्तृकरणयोस्तृतीया।

**III. रेखाङ्कितानां सुप्विभक्तीः सप्रमाणं साधयत-**

1. धावतोऽश्वात् पतति।
2. सतां गतम्।
3. कटे आस्ते।
4. बालाय विद्यां ददाति।
5. ग्रामम् अजां नयति।

IV. सिद्धान्तकौमुद्याः कारकप्रकरणं पठन्तु।

## Suggested Readings


1. लघुसिद्धान्तकौमुदी.वरदराजः,चौखम्बा संस्कृत सीरीस अकादमि, वाराणसी, २००५.
2. पदसंस्कारचन्द्रिका. कैकुलका रामवारियर्, केरलसाहित्य अकादमि, तृश्शूर।
3. लघुपाणिनीयम्. ए आर् राजराजवर्मा, केरलसर्वकलाशाला, तिरुवनन्तपुरम्।
4. पाणिनीयप्रद्योतम्. ऐसि चाक्को, भाषा इन्स्टिट्यूट, तिरुवनन्वपुरम्।
5. प्रक्रियाभाष्यम्. फा. जोन् कुन्नपप्ल्लि, नाषणल बुक् स्टाल्, कोट्टयम्।


## References


1. वरदराजाचार्यः, लघुसिद्धान्तकौमुदी, व्याख्या श्रीगिरीशकुमारठक्कुरः, कृष्णदास अकादमी, वाराणसी, १९९२, पुटानि २०७-२१०
2. वरदराजाचार्यः, लघुसिद्धान्तकौमुदी, व्याख्या श्रीगोमतीप्रसादशास्त्रीमिश्रः, चौखम्बा सुरभारती प्रकाशन्, वाराणसी, १९९९, पुटानि ११०-११८


### Space for Learner Engagement for Objective Questions

Learners are encouraged to develop objective questions based on the content in the paragraph as a sign of their comprehension of the content. The Learners may reflect on the recap bullets and relate their understanding with the narrative in order to frame objective questions from the given text. The University expects that 1 - 2 questions are developed for each paragraph. The space given below can be used for listing the questions.

# तद्धितप्रकरणम्

# BLOCK - 4

UNIT 1

# अपत्याधिकारप्रकरणम्

## Learning Outcomes

- संस्कृतव्याकरणे अवबोधः।
- पदनिष्पत्तिज्ञानम्।
- अष्टाध्यायीसूत्राणामनुशीलनम्।
- तद्धितप्रत्ययान् प्रोक्तुं जानाति।

## Background

भाषाशुद्ध्यर्थमेव व्याकरणम्। भाषायै एव व्याकरणम्। संस्कृतियुक्तां भाषां ज्ञातुं व्याकरणशास्त्रप्रवेशनमावश्यकमेव। उक्तञ्च 'व्याकरणं सर्वशास्त्रोपकारकम्' इति। भाषा आशयविनिमयायोपयुज्यते। आशयस्य दृढीकरणाय साध्वी भाषा प्रयोक्तव्यम्। पदनिष्पत्तिः आशयग्रहणस्य मुख्यः घटकः भवति। पदानि मित्राणीव उपकारकाणि भवन्ति। आपदि मित्रमिव सभायां साध्वी भाषा साहाय्यति।

पदानां रूपनिष्पत्तौ सन्धिसमासकारकादीनां ज्ञानमावश्यकमेव। पदनिष्पत्तौ धातवः परमप्राधान्यम् अर्हन्ति। धातोः सकाशादेव क्रियापदानि जायन्ते। क्रियायाः साहाय्येन वाक्यानि कारकाप्रयोगाः च संजाताः। पदनिष्पत्तौ तद्धितप्रत्ययाः उन्नतं स्थानं वहन्ति। पदानां विभागेषु अन्यतमः भवति तद्धितपदानि। एकस्मात् नामपदात् अपरं नामपदं निष्पादयति चेत् तत् तद्धितपदं भवति। यथा दशरथपदात् दाशरथिः इति पदमुत्पादयति। एवं पदनिष्पत्तिद्वारा ़विज्ञानसम्वर्धनं साध्यमित्यतः अस्माभिः तद्धितान्तरूपाणि पठितुमवसरः सम्प्राप्तः।

## Keywords

नञ्स्नञौ - अण् - इण् - यञ् - यञञोश्च - गोत्राद् यून्यस्त्रियाम् - फक् - इञ् - इण् - अनृष्यानन्तर्ये बिदादिभ्योऽञ् - ऋष्यन्धक - वृष्णिकुरुभ्यश्च - ढक् - ये चाभावकर्मणोः - अत्राद्घः - जनपद - शबदात्क्षत्रियादञ्।

## Discussion

नञ्स्नञौ

### 1. स्त्रीपुंसाभ्यां नञ्स्नञौ भवनात् (४.१.८७)

त्रिपदं सूत्रम्। अनेन सूत्रेण नञ्स्नञौ प्रत्ययौ विधीयते। 'धान्यानां भवने क्षेत्रे' प्रागर्थेषु स्त्रीपुंसाभ्यां क्रमात् नञ्स्नञौ स्तः। यथा स्त्रैणः स्त्रीषु भावः, स्त्रियाः अपत्यम्, स्त्रीणां समूहः वा स्त्रैणः। स्त्रीशब्दात् 'स्त्रीपुंसाभ्यां नञ्स्नञौ भवनात्' इत्यनेन नञ् प्रत्यये स्त्री न। ञित्वात् 'तद्धितेष्वचामादेः' इत्यादिवृद्धौ स्त्रै न। 'रषाभ्यां नो णः' समानपदे इति णत्वे स्त्रैण। तस्मात् सुपि स्त्रैण सु। अनुबन्धलोपे स्त्रैण स्। 'ससजुषो रुः' अति रुत्वे स्त्रैण र्। 'खरवसानयोर्विसर्जनीयः' इति विसर्गे स्त्रैणः।

पुंसः अपत्यम् पुंसि भवः, पुंसां समूहः पौंस्नः। 'पुंस्' शब्दात् स्त्रीपुंसाभ्यां 'नञ्स्नञौ भवनात्' इति सूत्रेण स्नञ् प्रत्यये पुंस् स्नञ्। आदिवृद्धौ 'स्कोः संयागाद्योरन्ते च' इति सकारलोपे पौंस्नः। विभक्तिकार्ये पौंस्नः।

अणादिप्रत्ययः

### 2. तस्यापत्यम् (४.१.९२)

द्विपदं सूत्रम्।अनेन सूत्रेण अणादिप्रत्ययाः विकल्पेन विधीयन्ते। षष्ठ्यन्तात्कृतसन्धेः समर्थादपत्येऽर्थे उक्ताः वक्ष्यमाणाश्च प्रत्ययाः वा स्युः। यथा उत्सस्यापत्यं पुमान् औत्सः। उत्सशब्दात् 'तस्यापत्यम्' इति सूत्रेण अण् प्रत्यये उत्स अ। णित्वात् 'तद्धितेष्वचामादेः' इत्यादि वृद्धौ औत्स अ। 'यस्येति च' इति भस्य लुकि औत्स। विभक्तिकार्ये औत्सः।

उवर्णान्तस्य गुणः

### 3. ओर्गुणः (६.४.१४६)

ओः गुणः इति द्विपदं सूत्रम्। अनेन सूत्रेण उकारस्य गुणः विधीयते। उवर्णान्तस्य भस्य गुणस्तद्धिते। यथा उपगोरपत्यं इति विग्रहे तस्यापत्यं इत्यणि उपगु अ। अनुबन्धलोपे 'तद्धितेष्वचामादेः' इत्यादिवृद्धौ औपगु अ। 'ओर्गुणः' इति उकारस्य गुणे औपगो अ। अवादेशे औपगव। विभक्त्यादिकार्ये औपगवः। एवं अश्वपतेः अपत्यम् आश्वपतः।

दितेः अपत्यं पुमान् दैत्यः। दितिशब्दात् 'दित्यादित्यादित्यपत्युत्तर- पदाण्णयः' इति ण्यप्रत्यये दिति च। आदिवृद्धौ भस्य लुकि विभक्तिकार्ये च दैत्यः।

गोत्रसंज्ञः

### 4. अपत्यं पौत्रप्रभृति गोत्रम् (४.१.१६२)

त्रिपदं सूत्रम्। अनेन सूत्रेण गोत्रसंज्ञः विधीयते। अपत्यत्वेन विवक्षितं पौत्रादि गोत्रसंज्ञं स्यात्। एको गोत्रे इत्यादावस्य प्रयोजनम्। गर्गादिशब्दात् गोत्रापत्ये यञ् प्रत्ययः स्यात्।

**5. एको गोत्रे (४.१.९३)**

गोत्रे एक एव प्रत्ययः

एकः गोत्रे इति द्विपदं सूत्रम्। अनेन सूत्रेण अपत्यार्थे एक एव प्रत्ययः विधीयते।

गोत्रे एक एव अपत्यप्रत्ययः स्यात्। यथा उपगोः गोत्रापत्यम् औपगवः।

**6. गर्गादिभ्यो यञ् (४.१.१०५)**

यञ्प्रत्ययः

गर्गादिभ्यः यञ् इति द्विपदं सूत्रम्। अनेन सूत्रेण यञ् प्रत्ययः विधीयते। गर्गादिशब्देभ्यः गोत्रापत्ये षष्ठ्यन्तात् यञ्प्रत्ययः स्यात्। यथा गर्गस्य गोत्रापत्यं पुमान् गार्ग्यः। गर्गशब्दात् 'गर्गादिभ्यो यञ्' इति यञि गर्ग यञ्। अनुबन्धलोपे गर्ग य। आदिवृद्धौ गार्ग य। 'यस्येति च' इति भस्य लुकि गार्ग्य। विभक्तिकार्ये गार्ग्यः।

**को भेदः -** <u>गार्गिः</u>- <u>गार्ग्यः</u>- <u>गार्ग्यायणः</u>

अपत्यं त्रिविधम्। अनन्तरापत्यं, गोत्रापत्यं, युवापत्यं च।

गर्गस्य अनन्तरापत्यं गर्गिः (पुत्रः)- 'अत इञ्' इति इञ्प्रत्ययः।

गर्गस्य गोत्रापत्यं गार्ग्यः - गर्गादिभ्यो यञ्।

गर्गस्य युवापत्यं गार्ग्यायणः - यञिञोश्च इति फक्।

वत्सस्य गोत्रापत्यं पुमान् वात्स्यः। गर्गादिभ्यो यञ्।

**7. यञञोश्च (२.४.६४)**

बहुत्वे यञञोः लुक्

यञञोः च इति द्विपदं सूत्रम्। यञ् च अञ् च यञञौ, तयोः यञञोः। अनेन सूत्रेण बहुत्वविवक्षायां यञञोः लुक्। गोत्रे यद्यञन्तमञन्तं च तदवययोः एतयोः लुक् स्यात् तत्कृते बहुत्वे न तु स्त्रियाम्। यथा गर्गस्य गोत्रापत्यं पुमांसः गर्गाः। गर्गशब्दात् गोत्रापत्यमित्यर्थे 'गर्गादिभ्यो यञ्' इति यञ्। किन्तु बहुत्वविवक्षायां 'यञिञोश्च' इति सूत्रेण यञः लुक्। विभक्तिकार्ये बहुत्वविवक्षायां गर्गाः इति। (अनुबन्धलोपे प्रथमयोः पूर्वसवर्णः इति पूर्वसवर्णदीर्घे रुत्वे विसर्गे च।)

गर्गस्य गोत्रापत्यं पुमान् गार्ग्यः।

गर्गस्य गोत्रापत्ये पुमांसौ - गार्ग्यौ।

गर्गस्य गोत्रापत्यानि पुमांसः गर्गाः।

(गार्ग्यः- गार्ग्यौ- गर्गाः।)

**8. जीवति तु वंश्ये युवा (४.१.१६३)**

युवसंज्ञा

चतुष्पदं सूत्रम्। अनेन सूत्रेण युवसंज्ञा विधीयते। वंश्ये पित्रादौ जीवति पौत्रादेर्यदपत्यं चतुर्थादि तद्युवसंज्ञमेव स्यात्। गोत्राद्यून्यास्त्रियाम् इत्यादावस्य प्रयोजनम्।

यस्य सन्तानस्य पितृपितामहाद्यन्यतमोऽस्ति तस्य युवसंज्ञा न तु गोत्रसंज्ञा।

### 9. गोत्राद्यून्यस्त्रियाम् (४.१.९४)

गोत्रप्रत्ययान्तात् प्रत्ययः

गोत्राद् यूनि अस्त्रियाम् इति त्रिपदं सूत्रम्। अनेन सूत्रेण गोत्रप्रत्ययान्तादेव यून्यपत्ये प्रत्ययाः विधीयन्ते। यून्यपत्ये गोत्रप्रत्ययान्तादेव प्रत्ययः स्यात् स्त्रियां तु न युवसंज्ञा। यथा गर्गस्य युवापत्यं पुमान् इत्यत्र प्रथमं गोत्रार्थे प्रत्ययः; अनन्तरं यून्यर्थे गोत्रप्रत्ययान्तादेव। गर्गशब्दात् गोत्रापत्ये 'गर्गादिभ्यो यञ्' इति यञ्। गार्ग्यः इति रूपम्। युवापत्ये गार्ग्यशब्दादेव 'यञिञोश्च' इति सूत्रेण फक्। तस्य 'आयनेयीनीयियः....' इति आयनादेशे णत्वे च गार्ग्यायणः इति रूपम्।

### 10. यञिञोश्च (४.१.१०१)

फक् प्रत्ययः

यञिञोः च इति द्विपदं सूत्रम्। यञ् च इञ् च यञिञौ, तयोः यञिञोः। अनेन सूत्रेण फक् प्रत्ययः विधीयते। गोत्रे यौ यञिञौ, तदन्तात्फक् स्यात्। यथा गार्ग्यशब्दात् 'यञिञोश्च' इति सूत्रेण फक् प्रत्यये गार्ग्य फ। तस्य आयनादेशे णत्वे विभक्तिकार्ये च गार्ग्यायणः।

### 11. आयनेयीनीयियः फढखछघां प्रत्ययादीनाम् (७.१.२)

अयनाद्यादेशाः

त्रिपदं सूत्रम्। आयन् च एय् च ईन् च ईय् च इय् च आयनेयीयियः। अनेन सूत्रेण फढखछघाम् आयनाद्याः आदेशाः विधीयन्ते। प्रत्ययादेः फस्य आयन्, ढस्य एय्, खस्य ईन्, छस्य ईय्, घस्य ईय्-एते स्युः। यथा गार्ग्यशब्दात् 'यञिञोश्च' इति सूत्रेण युवापत्ये फक्प्रत्यये गार्ग्य फ। अस्य फस्य 'आयनेयीनीयियः फढखछघां प्रत्ययादीनाम्' इति सूत्रेण आयनादेशे नस्य णत्वे विभक्तिकार्ये गार्ग्यायणः।

दक्षस्य युवापत्यं पुमान् दाक्षायणः ।

### 12. अत इञ् (४.१.९५)

इञ् प्रत्ययः

द्विपदं सूत्रम्। अनेन सूत्रेण इञ्प्रत्ययः विधीयते। अदन्तं यत् प्रातिपदिकं तस्मादिञ् स्यात् अपत्ये अर्थे। यथा दक्षस्य अपत्यं पुमान् दाक्षिः। दक्षशब्दात् 'अत इञ्' इतीञि दक्ष इञ्। अनुबन्धलोपे आदिवृद्धौ 'यस्येति च' इति भस्य लुकि च दाक्षि। विभक्तिकार्ये दाक्षिः।

### 13. बाह्वादिभ्यश्च (४.१.९६)

बाह्वादिगणात् इञ्

बाह्वादिभ्यः चेति द्विपदं सूत्रम्। अनेन सूत्रेण इञ् विधीयते। बाह्वादिभ्यः शब्देभ्यः अपत्यार्थे इञ् स्यात्। यथा बाहोः अपत्यं बाहविः। बाहुशब्दभ्यात् 'बाह्वादिभ्यश्च' इति इञि बाहु इञ्। 'ओर्गुणः' इति गुणे अवादेशे विभक्तिकार्ये च बाहविः इति रूपम्।

**14. लोम्नोऽपत्येषु बहुष्वकारो वक्तव्यः (वार्तिकम्)**

बहुत्वे अप्रत्ययः

लोम्नः अपत्येषु बहुषु अकारः वक्तव्यः इति पञ्चपदं वार्तिकम्। अनेन वार्तिकेन बहुत्वे अप्रत्ययः विधीयते। 'लोमन्' शब्दात् अपत्यार्थे बहुत्वविवक्षायाम् अकारप्रत्ययः स्यात्। यथा उडुलोम्नोऽपत्यम् औडुलोमिः। उडुलोमन् शब्दात् बाह्वादिभ्यश्च इति इञ्। आदिवृद्धौ नस्तद्धिते इति रिलोपे औडुलोमि। विभक्तिकार्ये औडुलोमिः।

उडुलोम्नः अपत्यानि पुमांसः उडुलोमाः, 'उडुलोमन्' शब्दात् बहुत्वविवक्षायां 'लोम्नोऽपत्येषु बहुष्वकारो वक्तव्यः' इति वार्तिकेन अप्रत्यये उडुलोमन् अ। टिलोपे उडुलोम। तस्मात् जस्प्रत्यये अनुबन्धलोपे 'प्रथमयोः पूर्वसवर्णः' इति पूर्वसवर्णदीर्घे उडुलोमास्। रुत्वे विसर्गे च उडुलोमाः इति रूपम्।

**15. अनृष्यानन्तर्ये बिदादिभ्योऽञ् (४.१.१०४)**

अञ्

त्रिपदं सूत्रम्। अनेन सूत्रेण अञ् प्रत्ययः विधीयते। ये त्वत्रानृषयस्तेभ्योऽपत्येऽन्यत्र तु गोत्रे। यथा बिदस्य गोत्रापत्यं बैदः। बिदशब्दात् 'अनृष्यानन्तर्ये बिदादिभ्योऽञ्' इत्यञ्प्रत्यये बिद अञ्। अनुबन्धलोपे आदिवृद्धौ 'यस्येति च' इति भस्य लुकि बैद। विभक्तिकार्ये बैदः।

बैदः - बैदौ - बिदाः।

पुत्रस्यापत्यं पौत्रः। पौत्रः - पौत्रौ- पौत्राः।

दुहितुरपत्यं दौहित्रः। दुहितृशब्दात् 'तस्यापत्यं' इत्यण्। दुहितृ अ। आदिवृद्धौ यणि विभक्तिकार्ये च दौहित्रः।

**16. शिवादिभ्योऽण् (४.१.११२)**

अण्

शिवादिभ्यः अण् इति द्विपदं सूत्रम्। अनेन सूत्रेण अण्प्रत्ययः विधीयते। शिवादिभ्यः शब्देभ्यः अण् स्यात् अपत्येऽर्थे। यथा शिवस्यापत्यं शैवः। शिवशब्दात् 'शिवादिभ्योऽण्' इति अण्प्रत्यये शिव अण्। णित्वात् आदिवृद्धौ भस्य लुकि च शैव। विभक्तिकार्ये शैवः।

एवं गङ्गायाः अपत्यं गाङ्गः।

**17. ऋष्यन्तकवृष्णिकुरुभ्यश्च (४.१.११५)**

ऋष्यन्द्यकादिभ्यः अण्

द्विपदं सूत्रम्। अनेन सूत्रेण अण्प्रत्ययः विधीयते। ऋषि- अन्धक- वृष्णि- कुरुभ्यः शब्देभ्यः अण्प्रत्ययः स्यात् अपत्यार्थे। यथा वसिष्ठस्य अपत्यं वासिष्ठः। 'ऋष्यन्तकवृष्णिकुरुभ्यश्च' इत्यण् प्रत्यये वासिष्ठः इति।

एवं विश्वामित्रापत्यं वैश्वामित्रः।

वसुदेवस्य अपत्यं वासुदेवः।

श्वफल्कस्यापत्यं श्वाफल्कः।

नकुलस्यापत्यं नाकुलः।

सहदेवस्य अपत्यं साहदेवः।

**18. मातुरुत्संख्यासम्भद्रपूर्वायाः (४.१.११५)**

उदादेशः अण् प्रत्ययश्च

मातुः उत् संख्यासंभद्रपूर्वायाः इति त्रिपदं सूत्रम्। अनेन सूत्रेण उदादेशः अण् प्रत्ययश्च विधीयेते। संख्यादिपूर्वस्य मातृशब्दस्योदादेशः स्यात् अण् प्रत्ययः च। यथा द्वैमातुरः। द्वयोर्मात्रोरपत्यमिति विग्रहे 'तद्धितार्थोत्तरपदसमाहारे' इति समासे सुब्लुकि द्विमातृशब्दात् 'मातुरुत्संख्यासम्भद्रपूर्वायाः' इति अणि मातुरुदादेशे रपरत्वे च मातुर् अ। आदिवृद्धौ द्वैमातुर। विभक्तिकार्ये द्वैमातुरः।

षण्णां मातृणामपत्यं षाण्मातुरः।

सम्मातुरपत्यं सांमातुरः।

भद्रमातुरपत्यं भाद्रमातुरः। भद्रमातृशब्दात् 'मातुरुत्संख्यासंभद्रपूर्वायाः' इति अणि मातृशब्दस्य उदादेशे रपरत्वे आदिवृद्धौ विभक्तिकार्ये च भाद्रमातुरः इति।

**19. स्त्रीभ्यो ढक् (४.१.१२०)**

ढक् प्रत्ययः

स्त्रीभ्यः ढक् इति द्विपदं सूत्रम्। अनेन सूत्रेण ढक् प्रत्ययः विधीयते। स्त्रीप्रत्ययान्तेभ्यः ढक् स्यात्। यथा वैनतेयः। विनतायाः अपत्यं इति विग्रहे विनताशब्दात् 'स्त्रीभ्यो ढक्' इति ढकि विनता ढक्। ढस्य 'आयनीयी.....' इत्यादिना एयादेशे विनता एय। 'यस्येति च' इति आकारलोपे विनत् एय। 'किति च' इत्यादिवृद्धौ वैनतेय। विभक्तिकार्ये वैनतेयः।

**20. कन्यायाः कनीन च (४.१.११६)**

कनीनादेशः अण् प्रत्ययश्च

त्रिपदं सूत्रम्। अनेन सूत्रेण कनीनादेशः अण्प्रत्ययश्च विधीयेते। कन्याशब्दात् कनीनादेशः चकारात् अपत्यार्थे अण्प्रत्ययश्च स्यात्। यथा कानीनः व्यासः कर्णश्च। कन्यायाः अपत्यं कानीनः। कन्याशब्दात् 'कन्यायाः कनीन च' इति सूत्रेण कनीनादेशे अण् प्रत्यये च कनीन अ। आदिवृद्धौ भस्य लुकि विभक्तिकार्ये च कानीनः।

**21. राजश्वशुराद्यत् (४.१.१३७)**

राजश्वशुरात् यत् इति द्विपदं सूत्रम्। अनेन सूत्रेण यत्प्रत्ययः विधीयते। राजन् श्वशुरशब्दाभ्यां यत्प्रत्ययः स्यात्। यथा राजन्यः। क्षत्रियात् क्षत्रियायां स्वभार्यायामुत्पन्नो राजन्यः। राजन्शब्दात् 'राजश्वशुराद्यत्' इति यत्प्रत्यये राजन् य। येऽभावकर्मणोः इति प्रकृतिभावे विभक्तिकार्ये राजन्यः इति।

यत् प्रत्ययः

**22. राज्ञो जातावेवेति वाच्यम् (वार्तिकम्)**

राज्ञः जातौ एव इति वाच्यम् इति पञ्चपदं वार्तिकम्। अनेन वार्तिकेन राज्ञः स्वजातौ (क्षत्रियायां) जातस्य पुत्रस्यैव यत्प्रत्ययः स्यात् इति वदति। यथा राजन्यः।

**23. ये चाभावकर्मणोः (६.४.१६८)**

प्रकृत्या स्यात्

ये च अभावकर्मणोः इति त्रिपदं सूत्रम्। भावश्च कर्म च भावकर्मणौ, तयोः भावकर्मणोः, न भावकर्मणोः अभावकर्मणोः। अनेन सूत्रेण प्रकृतिभावः विधीयते। यादौ तद्धिते परेऽन् प्रकृत्या स्यान्न तु भावकर्मणोः। यथा राजन्यः।

राज्ञो जातावेवेति किम्? क्षत्रियस्य क्षत्रियायां समुत्पन्नः राजन्यः। राज्ञः अपत्यं इति विग्रहे राजनः इति रूपम्।

**24. अन् (६.४.१६७)**

अणि अन् प्रकृत्या स्यात्

एकपदं सूत्रम्। अनेन सूत्रेण अणि परे अनः प्रकृतिभावः विधीयते। अन् प्रकृत्या स्यादणि परे। यथा राजनः। राज्ञः अपत्यम् इति विग्रहे 'तस्यापत्यं' इत्यणि राजन् अण्। णलोपे 'अन्' इत्यनः प्रकृतिभावे राजन। विभक्तिकार्ये राजनः इति रूपम्।

श्वशुरस्यापत्यं श्वशुर्यः। राजश्वशुराद्यत् इति यत् प्रत्यये विभक्तिकार्ये श्वशुर्यः।

**25. क्षत्राद् घः (४.१.१३८)**

घप्रत्ययः

द्विपदं सूत्रम्। अनेन सूत्रेण घप्रत्ययः विधीयते। क्षत्रशब्दात् अपत्यार्थे घप्रत्ययः स्यात् जातवित्येव। यथा क्षत्रियः। क्षत्रशब्दात् क्षत्राद्धः इति घप्रत्यये क्षत्र घ। 'आयनेयी' इत्यादिना इयादेशे भस्य लुकि क्षत्रिय, विभक्तिकार्ये क्षत्रियः इति। क्षत्रिरन्यत्र। जातिः न।

**26. रेवत्यादिभ्यष्ठक् (४.१.१४६)**

ठक् प्रत्ययः

रेवत्यादिभ्यः ठक् इति द्विपदं सूत्रम्। अनेन सूत्रेण ठक् विधीयते। रेवत्यादिभ्यः शब्देभ्यः ठक् स्यात्। यथा रैवतिकः। रेवत्याः अपत्यमित्यर्थे रेवतीशब्दात् 'रेवत्यादिभ्यष्ठक्' इति सूत्रेण ठक्प्रत्यये रेवती ठक्। इकादेशे आदिवृद्धौ भस्य लुकि विभक्तिकार्ये च रैवतिकः।

**27. जनपदशब्दात् क्षत्त्रियादञ् (४.१.१६८)**

क्षत्त्रियादञ्

त्रिपदं सूत्रम्। अनेन सूत्रेण अञ् प्रत्ययः विधीयते। जनपदक्षत्त्रियवाचकात् शब्दादञ् स्यादपत्ये। यथा पाञ्चालः। पाञ्चालशब्दात् 'जनपदशब्दात् क्षत्त्रियादञ्' इत्यञ्। पञ्चाल अञ्। ञित्वात् आदिवृद्धिः। भस्य लुक्। विभक्तिकार्ये पाञ्चालः।

**28. क्षत्त्रियसमानशब्दाज्जनपदात्तस्य राजन्यपत्यवत्' (वार्तिकम्)**

अपत्यवत् प्रत्ययाः स्युः

पञ्चपदं वार्तिकम्। क्षत्त्रियसमानशब्दात् जनपदात् तस्य राजनि अन्यतरस्यां इति पदच्छेदः। अनेन वार्तिकेन अपत्यवत् प्रत्ययाः स्युः इति सूचयति। क्षत्त्रियवाचकजनपदशब्दात् राजार्थे अपत्यवत् प्रत्ययाः स्युः। यथा पञ्चालानां राजा पाञ्चालः।

**29. पूरोरण् वक्तव्यः (वार्तिकम्)**

अण्प्रत्ययः

पूरोः अण् वक्तव्यः इति त्रिपदं वार्तिकम्। अनेन वार्तिकेन अण् प्रत्ययः विधीयते। पुरुशब्दादण् स्यात्। यथा पुरुशब्दात् पुरोरण् वक्तव्यः इति वार्तिकेन अण् प्रत्यये आदिवृद्धौ पौरू अ। गुणे अवादेशे विभक्तिकार्ये पौरवः इति रूपम्। पौरवः - पौरवौ- पुरवः।

**30. पाण्डोर्ड्यण् (वार्तिकम्)**

ड्यण्

पाण्डोः ड्यण् इति द्विपदं वार्तिकम्। अनेन वार्तिकेन ड्यण् विधीयते। पाण्डुशब्दात् ड्यण् स्यात्। पाण्डुशब्दात् 'पाण्डोर्ड्यण्' इति ड्यण् आदिवृद्धौ विभक्तिकार्ये पाण्ड्य विभक्तिकार्ये पाण्ड्यः इति। पाण्ड्यः - पाण्ड्यौ - पाण्डवः इति।

**31. कुरुनादिभ्यो ण्यः (४.१.१७२)**

ण्यः

कुरुनादिभ्यः ण्यः इति द्विपदं सूत्रम्। अनेन सूत्रेण ण्यप्रत्ययः विधीयते। कुरुशब्दात् नकारादिभ्यः शब्देभ्यश्च ण्यप्रत्ययः स्यात्। यथा कौरव्यः। कुरोरपत्यं कौरव्यः। 'कुरुनादिभ्यो ण्यः' इति ण्यप्रत्यये आदिवृद्धौ कौरु य। गुणे अवादेशे विभक्तिकार्ये च कौरव्यः।

एवं निषेधस्यापत्यं नैषध्यः। 'कुरुनादिभ्यो ण्यः' इति ण्यप्रत्ययः।

**32. ते तद्राजाः (४.१.१७४)**

तद्राजसंज्ञा

द्विपदं सूत्रम्। अनेन सूत्रेण तद्राजसंज्ञा विधीयते। अञादयस्तद्राजसंज्ञाः स्युः। तद्राजस्य बहुषु तेनैवास्त्रियां इत्यादावस्य प्रयोजनम्।

**33. तद्राजस्य बहुषु तेनैवास्त्रियाम् (२.४.६२)**

तद्राजस्य लुक्

तद्राजस्य बहुषु तेन एव अस्त्रियाम् इति पञ्चपदं सूत्रम्। अनेन सूत्रेण बहुष्वर्थेषु तद्राजस्य लुक् विधीयते। बहुष्वर्थेषु तद्राजस्य लुक् तदर्थकृते बहुत्वे न तु स्त्रियाम्। यथा इक्ष्वाकवः। इक्ष्वाकोः अपत्यानि पुमांसः इत्यर्थे इक्ष्वाकुशब्दात् 'तस्यापत्यम्' इति सूत्रेण विधीयमानस्य अण् प्रत्ययस्य बहुत्वविवक्षायां 'तद्राजस्य बहुषु तेनैवास्त्रियाम्' इति लुकि विभक्तिकार्ये जसि अनुबन्धलोपे पूर्वसवर्णदीर्घे रुत्वे विसर्गे च इक्ष्वाकवः इति रूपम्।

ऐक्षाकवः - ऐक्षाकवौ- इक्ष्वाकवः।

एवं पाञ्चालः- पाञ्चालौ- पञ्चालाः।

**34. कम्बोजाल्लुक् (४.१.१७५)**

लुक्

कम्बोजात् लुक् इति द्विपदं सूत्रम्। अनेन सूत्रेण तद्राजप्रत्ययस्य लुक् स्यात्। कम्बोजशब्दात् विहितस्य तद्राजप्रत्ययस्य लुक् स्यात्। कम्बोजस्य अपत्यं राजा वा कम्बोजः। कम्बोजशब्दात् तस्यापत्यं इति सूत्रेण विधीयमानस्य प्रत्ययस्य 'कम्बोजाल्लुक्' इति सूत्रेण लुकि कम्बोज। सुपि अनुबन्धलोपे रुत्वे विसर्गे च कम्बोजः इति रूपम्।

स्त्रीत्वविवक्षायां 'अजाद्यतष्टाप्' इति टापि विभक्तिकार्ये कम्बोजा इति रूपम्।

**कम्बोजादिभ्य इति वक्तव्यम् (वार्तिकम्)**

तद्राजप्रत्ययस्य लुक्

त्रिपदं वार्तिकम्। अनेन वार्तिकेन तद्राजप्रत्ययस्य लुक् स्यात्। कम्बोजादिगणपठितशब्देभ्यः तद्राजसंज्ञकस्य प्रत्ययस्य लुक् स्यात्। चोलः। चोलस्यापत्यं राजा वा चोलः। चोलशब्दात् तस्यापत्यं इति सूत्रेण विधीयमानस्य तद्राजप्रत्ययस्य 'कम्बोजादिभ्यः इति वक्तव्यम्' इति वार्तिकेन लुक्। विभक्तिकार्ये चोलः।

एवं शकस्यापत्यं राजा वा शकः।

केरलस्य अपत्यं राजा वा केरलः।

यवनस्यापत्यं राजा वा यवनः।

## Summarised Overview

अस्मिन्नेकके ऊनविंशतिः सूत्राणि षट् वार्तिकानि च विशदीकृतानि। अपि नवापत्यप्रत्ययानि च व्याख्यातानि। सूत्रेषु गर्गादिभ्यो यञ्, अत इञ्, अनृष्यानन्तर्ये बिदादिभ्योऽञ् मातुरुत्संख्यासंभद्रपूर्वायाः, स्त्रीभ्यो ढक्, कम्बोजाल्लुक् इत्यादीनि अन्तर्भवन्ति।

वार्तिकेषु लोम्नोऽपत्येषु बहुष्वकारो वक्तव्यः, क्षात्रियसमानशब्दाज्जनपदात्तस्य राजन्यपत्यवत्, पूरोरण् वक्तव्यः इत्यादीनि अन्तर्भवन्ति।

अपत्यप्रत्ययेषु नञ्स्नञौ अण्, यत्, फक्, इञ्, ढक्, घ, ण्यादिप्रत्ययाः अन्तर्भवन्ति। सर्वान् प्रत्ययान् सोदाहरणं विशदीकृताः। अस्मिन् पाठभागे गोत्र- युवा- तद्राजसंज्ञा अन्तर्भवन्ति। ताः सुष्ठु विशदीकृताः।

तद्धितप्रत्ययानां पठनेन पदसंपत्तिं संवर्धयितुं शक्यते। अनेकानि तद्धितसुबन्तरूपाणि अस्मिन् पठनाय निर्दिष्टाः। तानि पदानि, तेषां निष्पादनप्रक्रियाः कथमिति ज्ञातुमवसरः संप्राप्ताः। औपगवः, गार्ग्यः, गार्ग्यायणः, गार्गिः, गर्गाः, बाहविः, कानीनः, रैवतिकः, इत्यादीनि रूपाणि निष्पादयितुं अर्थभेदान् ज्ञात्वा प्रयोक्तुं च शक्यते।

## Assignments

**उत्तरयत-**

1. स्त्रैणः इत्यत्र वर्तमानः अपत्यप्रत्ययः कः? सूत्रं किं व्याख्यात।
2. यञिञोश्च इति सूत्रेण किं विधीयते? तस्य कः आदेशः स्यात्?
3. राजन्यः- राजनः इत्यनयोः कः भेदः?
4. श्वशुर्यः इत्यस्य कोऽर्थः? कः प्रत्ययः? सूत्रं किम्?
5. गोत्र-युवसंज्ञयोः कः भेदः?

**सूत्राणि व्याख्यात-**

1. गोत्राद्यून्यस्त्रियाम्।
2. शिवादिभ्योऽण्।
3. ऋष्यन्धकवृष्णिकुरुभ्यश्च।
4. राजश्वशुराद्यत्।
5. अन्।

**सप्रमाणं तद्धितरूपाणि निष्पादयत-**

1. औत्सः।
2. औपगवः।
3. दाक्षायणः।
4. कौरव्यः।
5. इक्ष्वाकवः।

**सिद्धान्तकौमुद्याः अपत्याधिकारप्रकरणं पठन्तु।**

## Suggested Readings


1. पदसंस्कारचन्द्रिका. कैकुलका रामवारियर्, केरलसाहित्य अकादमि, तृश्शूर्।
2. लघुपाणिनीयम्. ए आर् राजराजवर्मा, केरलसर्वकलाशाला तिरुवनन्तपुरम्।
3. पाणिनीयप्रद्योतम्. ऐसि चाक्को, भाषा इन्स्टिट्यूट, तिरुवनन्वपुरम्।

4. प्रक्रियाभाष्यम्.फा जोन् कुन्नपाप्लि, नाषणल् बुक् स्टाल्, कोट्टयम्।

## References


1. वरदराजाचार्यः, लघुसिद्धान्तकौमुदी, व्याख्या श्रीगिरीशकुमारठक्कुरः, कृष्णदास अकादमी, वाराणसी, १९९२, पुटानि १३३-१३६।
2. वरदराजाचार्यः, लघुसिद्धान्तकौमुदी, व्याख्या श्रीगोमतीप्रसादशास्त्रीमिश्रः, चौखम्बा सुरभारती प्रकाशन्, वाराणसी, २०११, पुटानि २३३-२३७।


### Space for Learner Engagement for Objective Questions

Learners are encouraged to develop objective questions based on the content in the paragraph as a sign of their comprehension of the content. The Learners may reflect on the recap bullets and relate their understanding with the narrative in order to frame objective questions from the given text. The University expects that 1 - 2 questions are developed for each paragraph. The space given below can be used for listing the questions.

UNIT 2

# मत्वर्थीयप्रकरणम्

## Learning Outcomes

- संस्कृतव्याकरणशास्त्रपठने तात्पर्यं जनयति।
- पदनिष्पत्तिज्ञानम्।
- तद्धितप्रत्ययानां विशिष्य मत्वर्थीयप्रत्ययादीनां पठनेन नूतनपदावलीरचनायां सामर्थ्योत्पादनम्।
- सूत्राणि जानाति, आशयं गृह्णाति।

## Background

आशयज्ञानाय ग्रह्णाय च भाषा उपयुज्यते। भाषायाः शुद्ध्यर्थं व्याकरणपठनमावश्यकम्। पदनिष्पत्तिज्ञानाय व्याकरणं साहाय्यति। व्याकरणस्य विभाज्यघटकानि भवन्ति पदानि। पदानि सुबन्तानि तिङन्तानि अव्ययानि इति प्रधानतया त्रिधा विभक्तुं शक्यते। सुबन्तेषु कृत्प्रत्ययात् निष्पन्नानि, तद्धितप्रत्ययात् निष्पन्नानि इत्यनेकविधानि सन्ति। तद्धितविभागे अपत्यार्थे वर्तमानानि अण्-अञ्-इञ्-ढक्-ठादि प्रत्ययाः बहवः। एकस्मात् नामपदात् अन्यत् नामपदनिष्पादनमेव तद्धितप्रत्ययस्य सामान्यस्वभावः।

तद्धितेषु मत्वर्थीयाः प्रत्ययाः अन्तर्भवन्ति। भूमनिन्दाप्रशंसायां नित्ययोगे अतिशायने सम्बन्धे अस्तिविवक्षायां च मतुबादयः प्रत्ययाः प्रयुक्ताः भवन्ति। सामान्यतया 'अस्यास्ति' 'अस्मिन्नस्ति' इत्यादिषु मतुप्प्रत्ययाः उपयुज्यन्ते।

संस्कृतभाषापठने नितान्तमुपकारकं भवन्ति पदवलीग्रहणसामर्थ्यम्। अतः तदर्थमुपकारकं मत्वर्थीयप्रकरणं सोत्साहं पठामः।

## Keywords

मतुप् - भसंज्ञः - लच् - लोमादिभ्यः शः - पामादि नः - पिच्छादि श्लच् - उरच् - व- इनिठनौ - विन् - ग्मिन् - युस्।

## Discussion

मतुप्

### 1. तदस्यास्त्यस्मिन्निति मतुप् (५.२.९४)

तत् अस्य अस्ति अस्मिन् इति मतुप् इति षड्पदं सूत्रम्। अनेन सूत्रेण मतुत्प्रत्ययः विधीयते। प्रथमान्तात् सुबन्तात् 'अस्यास्ति' 'अस्मिन्नस्ति' इत्याद्यर्थे मतुप्प्रत्ययः वा स्यात्। यथा गावः अस्यास्ति, गावः अस्मिन्नस्ति इत्यर्थे मतुप्प्रत्यये गोमत्। तस्मात् सौ 'उगिदचां सर्वनामस्थानेऽधातोः' इति नुमागमे गोमन् त् सु। अनुबन्धलोपे 'हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल्' इति सलोपे गोमन्त्। 'सर्वनामस्थाने चासम्बुद्धौ' इत्युपधादीर्घे गोमान् त्। 'संयोगान्तस्य लोपः' इति संयेगान्तलोपे गोमान्।

भसंज्ञः

### 2. तसौ मत्वर्थे (१.४.१९)

द्विपदं सूत्रम्। अनेन सूत्रेण भसंज्ञः विधीयते। तान्तसान्तौ भसंज्ञौ स्तो मत्वर्थे प्रत्यये परे। यथा गरुत्मान्। गरुतः पक्षाः सन्त्यस्य गरुत्मान्। 'गरुत्' शब्दात् तदस्यास्त्यस्मिन्निति मतुप्' इति मतुप् प्रत्यये गरुत् मत्। सुप्रत्यये उपधादीर्घे 'उगिदचां सर्वनामस्थाने चाधातोः' इति नुमागमे गरुत्मान् त्। संयोगान्तलोपे गरुत्मान्।

**विदुष्मान्-** 'विद्वस्' अस्यास्तीति विदुष्मान्। 'विद्वस्' शब्दात् 'तदस्यास्त्यस्मिन्निति मतुप्' इति मतुप्प्रत्यये विद्वस् मत्। सुप्रत्यये अनुबन्धलोपे 'उगिदचां सर्वनामस्थाने चाधातोः' इति नुमागमे विद्वस् मन् त् स्। 'तसौ मत्वर्थे' इति सान्तस्य भसंज्ञायां 'वसोः सम्प्रसारणम्' इति सम्प्रसारणे विदुस् मन्त् स्। 'सर्वनामस्थाने चासम्बुद्धौ' इत्युपधादीर्घे विदुस् मान्त् स् । सलोपे संयोगान्तलोपे आदेशप्रत्यययोः इति षत्वे विदुष्मान्।

मतुपः लोपः

### 3. गुणवचनेभ्यो मतुपो लुगिष्टः (वार्तिकम्)

गुणवचनेभ्यः मतुपः लुक् इष्टः इति चतुष्पदं वार्तिकम्। गुणवचनशब्दात्परस्य मतुपः लोपः स्यात्। यथा शुक्लो गुणोऽस्यास्तीति शुक्लः पटः। अत्र 'तदस्यास्त्यस्मिन्निति मतुप्' इति सूत्रेण विधीयमानस्य मतुपः 'गुणवचनेभ्यः मतुपः लुगिष्टः' इति वार्तिकेन लोपः। शुक्लः इति। एवं कृष्णः गुण अस्यास्तीति कृष्णः पटः।

लच् वा

### 4. प्राणिस्थादातो लजन्यतरस्याम् (५.२.९६)

प्राणिस्थात् आतः लच् अन्यतरस्यां इति चतुष्पदं सूत्रम्। अनेन सूत्रेण विकल्पेन लच् विधीयते। सत्ताक्रियाकर्मभूतादाकारान्तात् प्राण्यङ्ग- वाचकाल्लज्वा स्यात्। यथा चूडा अस्यास्तीति चूडालः, चूडावान् वा। चूडाशब्दात्

'प्राणिस्थादातो लजन्यतरस्याम्' इति विकल्पेन लचि चूडाल। विभक्तिकार्ये चूडालः। लचः अभावे 'तदस्यास्त्यस्मिन्निति मतुपि' नुमि उपधादीर्घो सलोपे संयोगान्तरलोपे च चूडावान्।

प्राणिस्थात् इति किम्? शिखावान् दीपः। अत्र प्राण्यङ्गत्वाभावात् न लच्। मतुपेव।

मेधावान् इत्यत्रापि न लच्। प्राण्यङ्गत्वाभावात्।

शलेनचः

### 5. लोमादिपामादिपिच्छादिभ्यः शनेलचः (५.२.१००)

द्विपदं सूत्रम्। श च न च इलच् च शनेलचः। अनेन सूत्रेण शनेलचः विधीयन्ते। लोमादिभ्यः शः पामादिभ्यः न, पिच्छादिभ्यः इलच् च स्युः। यथा लोमशः लोमवान्। लोमन्शब्दात् 'लोमादिपामादिपिच्छादिभ्यः शनेलचः' इति सूत्रेण शप्रत्यये लोमन् श। सुपि 'नलोपः प्रातिपदिकान्तस्य' इति नलोपे विभक्तिकार्ये लोमशः। शप्रत्ययाभावे मतुपि लोमन् मत्। नलोपे सुपि उपधादीर्घे सलोपे संयोगान्तलोपे च लोमवान्।

एवं रोमशः, रोमवान्। (रोमन्शब्दात् शप्रत्यये रोमशः।) पामादिभ्यः न। पामन्शब्दात् 'लोमादिपामादिपिच्छादिभ्यः शनेलचः' इति सूत्रेण नप्रत्यये पामन् न। नलोपे विभक्तिकार्ये पामनः।

नप्रत्ययः

### 6. अङ्गात्कल्याणे (वार्तिकम्)

द्विपदं वार्तिकम्। अनेन वार्तिकेन नप्रत्ययः विधीयते। अङ्गशब्दात् कल्याणार्थे नप्रत्ययः स्यात्। प्रशस्तानि अङ्गानि अस्याः अङ्गना। अङ्गशब्दात् 'अङ्गात्कल्याणे' इति वार्तिकेन नप्रत्यये अङ्ग न। सुपि 'अजाद्यतष्टाप्' इति टापि अङ्गना।

नप्रत्ययः अत् च

### 7. लक्ष्म्या अच्च (वार्तिकम्)

लक्ष्म्या अत् च इति त्रिपदं वार्तिकम्। अनेन नियमेन (वार्तिकेन) नप्रत्ययः अत् च विधीयेते। लक्ष्मीशब्दस्याकारादेशो नप्रत्ययश्च। यथा लक्ष्मणः। लक्ष्मीरस्त्यस्येति लक्ष्मणः। लक्ष्मीशब्दात् 'लक्ष्म्या अच्च' इति अकारे 'पामादिभ्यः न' इति नत्वे लक्ष्म न। 'अट्कुप्वाङ्नुम्व्यवायेऽपि' इति णत्वे विभक्तिकार्ये च लक्ष्मणः। मत्वर्थे लक्ष्मीवान्।

इलच्

### 8. पिच्छादिभ्यः इलच् (वार्तिकम्)

द्विपदं वार्तिकम्। अनेन वार्तिकेन इलच्प्रत्ययः विधीयते। पिच्छादिभ्यः शब्देभ्यः इलच् स्यात्। यथा पिच्छिलः। पिच्छाशब्दात् 'पिच्छादिभ्यः इलच्' इति वार्तिकेन इलचि पिच्छिल। विभक्तिकार्ये पिच्छिलः इति रूपम्। पिच्छं चूडा अस्त्यस्येति पिच्छिलः। मतुपि पिच्छावान्।

एवं उरसिलः, उरस्वान्। प्रशस्तम् अतिशयितं वा उरो वक्षो यस्य सः उरसिलः। मतुपि उरस्वान् इति।

**9. दन्त उन्नत उरच् (५.२.१०६)**

उरच्

त्रिपदं सूत्रम्। अनेन सूत्रेण उरच्प्रत्ययः विधीयते। उन्नतोपाधिकात्प्रथमान्ताद् दन्तशब्दात् मतुबर्थे उरच् स्यात्। उन्नताः दन्ताः सन्त्यस्य दन्तुरः। दन्तशब्दात् 'दन्त उन्नत उरच्' इति उरच्प्रत्यये विभक्तिकार्ये च दन्तुरः।

**10. केशाद्वोऽन्यतरस्याम् (५.२.१०९)**

व-विकल्पेन

केशात् वः अन्यतरस्याम् इति त्रिपदं सूत्रम्। अनेन सूत्रेण विकल्पेन वः विधीयते। केशशब्दात् मत्वर्थे विकल्पेन व स्यात्। यथा केशाः सन्ति अस्येति केशवः केशवान् वा। केशशब्दात् 'केशाद्वोऽन्यतरस्याम्' इति वप्रत्यये विभक्तिकार्ये केशवः।

वप्रत्ययाभावे मतुपि केशवान् इति रूपम्।
'अत इनिठनौ' इति सूत्रेण इनिप्रत्यये केशी इति।
ठन्प्रत्यये 'ठस्येकः' इति इकादेशे केशिकः इति।

**11. अन्येभ्योऽपि दृश्यते (वार्तिकम्)**

अन्येभ्यः व प्रत्ययः

अन्येभ्यः अपि दृश्यते इति त्रिपदं वार्तिकम्। अन्यशब्देभ्योऽपि मत्वर्थे वप्रत्ययः स्यात्। यथा मणिवः।

**12. अर्णसो लोपश्च (वार्तिकम्)**

व प्रत्ययः, अन्त्यस्य अलः लोपः च

अर्णसः लोपः चेति त्रिपदं वार्तिकम्। अनेन वार्तिकेन वप्रत्ययः अन्त्यस्यालः लोपश्च विधीयते। आकृतिगणोऽयम्। 'अर्णस्' शब्दात् मत्वर्थे वप्रत्ययः अन्त्यस्यालः लोपश्च स्यात्। यथा अर्णांसि जलानि सन्त्यस्मिन्निति अर्णवः। 'अर्णस्' शब्दात् 'अर्णसो लोपश्च' इति वार्तिकेन वप्रत्यये अन्त्यस्यालः लोपे च अर्णवः।

**13. अत इनिठनौ (५.२.११५)**

इनिठनौ

द्विपदं सूत्रम्। अनेन सूत्रेण इनिठनौ विधीयेते। अकारान्तात्प्रातिपदिकात् मत्वर्थे इनिठनौ प्रत्ययौ स्तः। यथा दण्डोऽस्यास्तीति दण्डी, दण्डिकः। अत्र दण्डशब्दात् 'अत इनिठनौ' इति इनिप्रत्यये दण्ड इन्। 'यस्येति च' इति भस्य लुकि दण्डिन्। सुप्रत्यये अनुबन्धलोपे 'सर्वनामस्थाने चासम्बुद्धौ' इत्युपधादीर्घे सलोपे च दण्डी इति।

ठनि तु 'ठस्येकः' इति इकादेशे भस्य लुकि विभक्तिकार्ये दण्डिकः इनि रूपम्।

### 14. व्रीह्यादिभ्यश्च (५.२.११६)

व्रीह्यादिभ्यः इनिठनौ

व्रीह्यादिभ्यः च इति द्विपदं सूत्रम्। अनेन सूत्रेण इनिठनौ विधीयेते। व्रीह्यादिशब्देभ्यः मत्वर्थे इनिठनौ स्तः। यथा व्रीहिः अस्ति अस्मिन्निति व्रीही, व्रीहिकः। व्रीहिशब्दाभ्यां 'व्रीह्यादिभ्यश्च' उपधादीर्घे सलोपे नलोपे च व्रीही इति।

ठनि इकादेशे भस्य लुकि विभक्तिकार्ये व्रीहिकः इति।

### 15. अस्मायामेधास्रजो विनिः (५.२.१२१)

विनिप्रत्ययः

अस्मायामेधास्रजः विनिः इति द्विपदं सूत्रम्। अनेन सूत्रेण विनिप्रत्ययः विधीयते। असन्तशब्दः, माया मेधा- स्रजशब्देभ्यः मत्वर्थे विनिः स्यात्। यथा यशोऽस्यास्तीति यशस्वी, यशस्वान्। यशस् शब्दात् 'अस्मायामेधास्रजो विनिः' इति विनिप्रत्यये यशस् विन्। 'सौ च' इति दीर्घे यशस्वीन् । 'नलोपः प्रातिपदिकान्तस्य' इति नलोपे यशस्वी इति।

पक्षे 'तदस्यास्त्यस्मिन्निति मतुप्' इति मतुपि यशस् मत्। 'मादुपधायाश्च मतोर्वोऽयवादिभ्यः' इति मस्य वकारे यशस् वत्। तस्मात्सुप्रत्यये यशस्वत् सु। 'अत्वसन्तस्य चाधातोः' इति दीर्घे यशस् वा त्। 'उगिदचां सर्वनामस्थाने चाधातोः' इति नुमि यशस्वान् त्। 'संयोगान्तस्य लोपः' इति तलोपे यशस्वान् इति।

मायी- मायिकः- मायावान्।

मायाशब्दात् 'व्रीह्यादिभ्यश्च' इति सूत्रेण इनि, भस्य लुकि मायिन्। सुपि 'सौ च' दीर्घे नलोपे मायी इति।

ठनि 'ठस्यैकः' इति इकादेशे भस्य लुकि इकादेशे विभक्तिकार्ये च मायिकः।

माया अस्त्यस्यामिति मतुपि मायावान्।

मेधावी- मेधाशब्दात् 'अस्मायामेधास्रजो विनिः' इति विनि मेधावी।

स्रग्वी- स्रजशब्दात् 'अस्मायामेधास्रजो विनिः' इति विनि 'सौ च' दीर्घे 'चो कुः' इति कुत्वे गकारे स्रग्वीन्। सलोपे नलोपे च स्रग्वी।

### 16. वाचो ग्मिनिः (५.२.१२४)

ग्मिनिः

वाचः ग्मिनिः इति द्विपदं सूत्रम्। अनेन सूत्रेण ग्मिनिप्रत्ययः विधीयते। वाचो ग्मिनिः स्यान्मत्वर्थे। यथा वाग्मी। वाच्शब्दात् 'वाचो ग्मिनिः' इति ग्मिन्प्रत्यये वाच् ग्मिन्। 'चो कुः' इति कुत्वे वाक् ग्मिन्। 'झलां जशोऽन्ते' इति जश्त्वे वाग्ग्मिन्। सुपि 'सौ च' इति दीर्घे सलोपे नलोपे च वाग्मी इति।

**अर्शआदिभ्योऽच् (५.२.१२७)**

अच् प्रत्ययः

त्रिपदं सूत्रम्। आकृतिगणोऽयम्। अनेन सूत्रेण अच्प्रत्ययः विधीयते। अर्शस् आदिभ्यः अच्प्रत्ययः स्यात् मत्वर्थे। यथा अर्शांसि अस्य विद्यन्ते इति अर्शसः। 'अर्शस्' शब्दात् 'अर्शआदिभ्योऽच्' इत्यच्प्रत्यये अर्शस। विभक्तिकार्ये अर्शसः इति।

**17. अहंशुभयोर्युस् (५.२.१४०)**

युस्

अहंशुभयोः युस् इति द्विपदं सूत्रम्। अनेन सूत्रेण युस्प्रत्ययः विधीयते। 'अहं शुभं' इत्येतयोः युस् स्यात् मत्वर्थे। यथा अहंयुः। अहङ्कारवान् इत्यर्थः। अहंशब्दात् 'अहंशुभयोर्युस्' इति युस्प्रत्यये अहंयुस्। विभक्तिकार्ये अहंयुः।

एवं शुभंयुः। शुभंशुः शुभान्वितः।

## Summarised Overview

अस्मिन् पाठभागे द्वादशसूत्राणि दश मत्वर्थीयप्रत्ययाः षट्वार्तिकानि च सन्ति। सर्वाण्यपि कार्याणि विशदीकृतानि।
लोमादिपामादिपिच्छादिभ्यः शनेलचः, अत इनिठनौ, तसौ मत्वर्थे इत्यादीनि सूत्राणि व्याख्यातानि।
मत्वर्थीयप्रत्ययेषु श- न- इलच्- उरच्- व- इनि-ठनादयः प्रत्ययाः सुष्ठु सूचिताः।
अन्येभ्योऽपि दृश्यते, अर्णसो लोपश्च इत्यादीनां वार्तिकानां सोदाहरणं व्याख्यानं दत्तम्।
गरुत्मान्, चूडालः, अङ्गना, केशवः, व्रीही इत्यादीनि रूपाणि सप्रमाणं निष्पादितानि।
नूतनपदावलीज्ञानाय रूपनिष्पत्यर्थं मत्वर्थीयप्रकरणं नितान्तमुपकारकं भवति।

## Assignments

**उत्तरयत-**

1. मतुप्प्रत्ययं विधीयमानं सूत्रं किम्? तत् व्याख्यात।
2. मत्वर्थीयप्रकरणे भसंज्ञा केन सूत्रेण विधीयते? सूत्रं व्याख्यात।
3. 'वाग्मी' इति रूपसिद्ध्यर्थं कः प्रत्ययः उपयुज्यते? तत् सूत्रं किम्? उदाहरणसहितं व्याख्यात।

**सूत्राणि व्याख्यात-**

1. लोमादिपामादिपिच्छादिभ्यः शनेलचः।
2. अत इनिठनौ।
3. अहंशुभमोर्युस्।

**रूपाणि सप्रमाणं निष्पादयत-**

1. दन्तुरः।
2. केशिकः।
3. मणिवः।

4. दण्डी।
5. व्रीहिकः।

**सिद्धान्तकौमुदीस्थं मत्वर्थीयप्रकरणं पठन्तु।**

## Suggested Readings


1. पदसंस्कारचन्द्रिका. कैकुलका रामवारियर्, केरलसाहित्य अकादमि, तृश्शूर।
2. लघुपाणिनीयम्. ए आर् राजराजवर्मा, केरलसर्वकलाशाला, तिरुवनन्तपुरम्।
3. पाणिनीयप्रद्योतम्. ऐसि चाक्को, भाषा इन्स्टिट्यूट, तिरुवनन्वपुरम्।
4. प्रक्रियाभाष्यम्.फा जोन् कुन्नपप्लि, नाषणल् बुक् स्टाल्, कोट्टयम्।


## References


1. वरदराजाचार्यः, लघुसिद्धान्तकौमुदी, व्याख्या श्रीगिरीशकुमारठक्कुरः, कृष्णदास अकादमी, वाराणसी, २०११, पुटानि २५७-२५९
2. वरदराजाचार्यः, लघुसिद्धान्तकौमुदी, व्याख्या श्रीगोमतीप्रसादशास्त्रीमिश्रः, चौखम्बा सुरभारती प्रकाशन्, वाराणसी, १९९८, पुटानि २५९- २६०।


### Space for Learner Engagement for Objective Questions

Learners are encouraged to develop objective questions based on the content in the paragraph as a sign of their comprehension of the content. The Learners may reflect on the recap bullets and relate their understanding with the narrative in order to frame objective questions from the given text. The University expects that 1 - 2 questions are developed for each paragraph. The space given below can be used for listing the questions.

UNIT 3

# स्त्रीप्रत्ययप्रकरणम्

## Learning Outcomes

- संस्कृतव्याकरणशास्त्रे अवबोधं जनयति।
- अष्टाध्यायीसूत्राणामनुशीलनम्।
- नूतनपदावलीरचनां कर्तुं परिशीलयति।
- स्त्रीप्रत्ययानां ज्ञानं प्रयोगीकर्तुं सामर्थ्योत्पादनम्।

## Background

भाषायाः मुख्यमुद्देश्यमाशयावगतिरेव। आशयानां स्पष्टीकरणाय शुद्धा भाषा प्रयोक्तव्या। व्याकरणम् भाषां शुद्धीकरोति। आशयज्ञानाय वाक्यनिर्माणं, वाक्याय पदनिर्माणं च कार्यम्। नूतनपदावलीज्ञानेन भाषायाः प्रयोगे तात्पर्यम् संवर्धते। सुबन्तानि तिङन्तानि अव्ययानि इति पदानि त्रिधा विभज्यते। सुबन्तेषु पुंलिङ्गस्त्रीलिङ्गनपुंसकलिङ्गअलिङ्गपदानि अन्तर्भवन्ति। पुंलिङ्गपदात् स्त्रीलिङ्गपदनिष्पादनाय स्त्रीलिङ्गप्रकरणस्थानि सूत्राणि साहाय्यकानि भवन्ति। तदर्थं केचन प्रत्ययाः सन्ति।

स्त्रीलिङ्गप्रत्ययानां ज्ञानेन पठनेन च अनेकानि स्त्रीलिङ्गरूपाणि निष्पाद्य पदस्वाधीनतां संवर्धयितुं पाठभागमिमं साहाय्यति। तत्र प्रविशामः।

## Keywords

टाप् - ङीप्, ष्फः, ङीष्, अङ्गस्येकारः, चाप्, यलोपः, ऊङ्, ङीन्, तिः।

## Discussion

अधिक्रियते

**1. स्त्रियाम् (४.१.३)**

एकपदं सूत्रम्। अधिकारोऽयम्। 'समर्थानां प्रथमाद्वा ' इति सूत्रं यावत् स्त्रियामिति पदमनुवर्त्तते।

**2. अजाद्यतष्टाप् (४.१.४)**

टाप्

अजाद्यतः टाप् इति द्विपदं सूत्रम्। अनेन सूत्रेण टाप् विधीयते। अजादीनामकारान्तस्य च वाच्यं यत् स्त्रीत्वं तत्र द्योत्ये टाप् स्यात्। यथा अजा। अजशब्दात् स्त्रीत्वविवक्षायाम् 'अजाद्यतष्टाप्' इति टापि अनुबन्धलोपे अज आ। 'यस्येति च' इति भस्य लुकि अजा। विभक्तिकार्ये अजा। एवम् एडका, अश्वा, चटका, मूषिका, बाला, वत्सा, होडा, मन्दा, विलाता, मेघा, गङ्गा, सर्वा इत्यादि।

मेघा - मेघशब्दात् स्त्रीत्वविवक्षायाम् 'अजाद्यष्टाप् ' इति टापि अनुबन्धलोपे, भस्य लुकि विभक्तिकार्ये मेघा इति रूपम्।

**3. उगितश्च (४.१.६)**

ङीप्

उगितः च इति द्विपदं सूत्रम्। उक् इत् यस्य तत् उगित्। अनेन सूत्रेण ङीप् विधीयते। ङीपि ई शिष्यते। उगिदन्तात्प्रातिपदिकात् स्त्रियां ङीप् स्यात्। यथा भवती, भवन्ती, पचन्ती इत्यादि।

भवती - भवत्शब्दात् शतृप्रत्यये भू अत्। गुणे अवादेशे च भवत्। ततः 'उगितश्च' इति ङीपि भवत् ई। विभक्तिकार्ये भवती इति रूपम्।

भवन्ती - भवत्शब्दात् 'उगितश्च' इति ङीपि 'शप्श्नोर्नित्यम्' इति नुमागमे अनुबन्धलोपे भवन्ती। पुनः सुप्रत्यये अनुबन्धलोपे 'हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल्' इति सलोपे भवन्ती इति।

पचन्ती - पचत्शब्दात् 'उगितश्च' इति ङीपि पचत् ङीप्। अनुबन्धलोपे 'शाप्श्नोर्नित्यम्' इति नुमागमे पचन् त् ई। स्वादेरुत्पत्तौ विभक्तिकार्ये च 'पचन्ती ' इति रूपम्।

### 4. टिड्ढाणञ्द्वयसज्दघ्नञ्मात्रच्तयप्ठक्ठञ्कञ्क्वरपः (४.१.१५)

टिड्ढाणञ् इति ङीप्

एकपदं सूत्रम्। अनेन सूत्रेण ङीप् विधीयते। टित् -ढ-अण्-अञ्-द्वयसच् -दध्नञ्-मात्रच् -तयप् -ठक् -ठञ्-कञ्-क्वरपः। अनुपसर्जनं यट्टिदादि तदन्तं यददन्तं प्रातिपदिकं ततः स्त्रियां ङीप् स्यात्। यथा कुरूचरी। कुरुषु चरतीरीति कुरूचरी। चर् धातोः 'चरेष्टः' इति टप्रत्यये चरः। 'टित्वात् 'टिड्ढाणञ् ..' इत्यादिना सूत्रेण ङीपि कुरूचरी। विभक्तिकार्ये कुरूचरी।

एवं नदट् - नदी , देवट् - देवी।

ढकः उदाहरणं भवति सौपर्णेयी। स्त्रीभ्यो ढक्, 'आयनेयी..' इति एयादेशः। टिड्ढाणञ्..' इति ङीपि सौपर्णेयी।

अणः उदाहरणं भवति ऐन्द्री। 'सास्यदेवता' इत्यण्।

अञः उदाहरणं भवति औत्सी। 'उत्सादिभ्योऽञ्' इत्यञ्।

द्वयसचः उदाहरणं भवति ऊरुद्वयसी। प्रमाणे द्वयसज्दघ्नञ्मात्रचः' इति सूत्रम्।

तयपाः उदाहरणं भवति पञ्चतयी। 'संख्यायाः अवयवे तयप्' इति सूत्रम्।

आक्षिकी_- अक्षशब्दात् 'तेन दीव्यति खनति जयति जितम्' इति सूत्रेण ठक्। अक्ष ठ। 'ठस्येकः' इतीकादेशे आदिवृद्धौ आक्षिक। तस्मात् टिड्ढाणञ्' इत्यादिना ङीपि अनुबन्धलोपे विभक्तिकार्ये च आक्षिकी। एवं प्रास्थिकी इति।

ठञः उदाहरणं लावणकी। 'लवणाट्ठञ्' इति। 'ठस्येकः'।

क्वरपः उदाहरणं भवति इत्वरी। 'इण्नशजितसर्तिभ्यः क्वरप्' इति सूत्रम्।

### 5. नञ्स्नञीकक्ख्युंस्तरुणतलुनानामुपसंख्यानम् (वार्तिकम्)

स्नञ्नञ् - -ईकक् ख्युन् -तरुण- तलुन- इत्येतेभ्यः ङीप्

द्विपदं वार्तिकम्। अनेन वार्तिकेन ङीप् विधीयते। नञ् -स्नञ् -ईकक् ख्युन् इत्येतेभ्यः प्रत्ययेभ्यः तरुण - तलुनशब्देभ्यश्च ङीप् स्यात्। यथा स्त्रैणी। स्त्रीषु भवः,स्त्रीणां समूहः इत्यादिष्वर्थे स्त्रीशाब्दात् 'स्त्रीपुंसाभ्यां 'नञ्स्नञौभवनात्' इति सूत्रेण नञ्प्रत्यये आदिवृद्धौ नस्य णत्वे च स्त्रैण। तस्मात् स्त्रीत्वविवक्षायां 'नञ्स्नञीकक्ख्युंस्तरुणतलुनानामुपसंख्यानम्' इति वार्तिकेन ङीपि अनुबन्धलोपे स्त्रैण ई। भस्य लुकि सुपि अनुबन्धलोपे सुलोपे च स्त्रैणी इति।

स्नञः उदाहरणं भवति पौंस्नी। स्त्रीपुंसाभ्यां नञ्स्नञौ भवनात्।
ईककः उदाहरणं भवति शाक्तिकी। शक्तियष्ट्योरीकक् इति सूत्रम्।एवं याष्टिकी। आढ्यंकरणी -तरुणी - तलुनी इत्यादिष्वपि ङीप्।

### 6. यञश्च (४.१.१६)

यञन्तात् ङीप्

द्विपदं सूत्रम्। यञः च इति पदच्छेदः। अनेन सूत्रेण ङीप् विधीयते। यञन्तात् स्त्रियां ङीप्स्यात्। यथा गार्गी। गार्ग्य शब्दात् 'यञश्च' इति ङीपि अनुबन्धलोपे गार्ग्य ई। भसंज्ञायां 'यस्येति च' इत्यनेनाकारलोपे 'गार्ग्य् ई'। 'हलस्तद्धितस्य' इति यलोपे गार्ग् ई। विभक्तिकार्ये गार्गी इति।

**7. हलस्तद्धितस्य (६.४.१५०)**

यकारलोपः

'हलः तद्धितस्य इति द्विपदं सूत्रम्। अनेन सूत्रेण यलोपः विधीयते। हलः परस्य तद्धितयकारस्योपधाभूतस्य लोपः ईति परे। यथा गार्गी।

**8. प्राचां ष्फ तद्धितः (४.१.१७)**

ष्फप्रत्ययः

त्रिपदं सूत्रम्। अनेन सूत्रेण विकल्पेन ष्फप्रत्ययः विधीयते। 'यञन्तात् ष्फो वा स्यात्स च तद्धितः। यथा गार्ग्यायणी। गर्गस्यापत्यं स्त्री गार्गी। युवापत्यं स्त्री गार्ग्यायणी। गर्गशब्दात् 'गर्गादिभ्यो यञ्' इति यञि गर्ग य। आदिवृद्धौ भस्य लुकि गार्ग्य। 'प्राचां ष्फ तद्धितः' इति सूत्रेण फप्रत्यये गार्ग्य फ। आयनादेशे सवर्णदीर्घे नस्य णत्वे ङीषि सुपि विभक्तिकार्ये च गार्ग्यायणी।

**9. षिद्गौरादिभ्यश्च (४.१.४१)**

ङीष्

षित् गौरादिभ्यः च इति त्रिपदं सूत्रम्। अनेन सूत्रेण ङीष् विधीयते। षिद्भ्यो गौरादिभ्यश्च स्त्रियां ङीष् स्यात्। यथा गौरी। गौरशब्दात् स्त्रीत्वे 'षिद्गौरादिभ्यश्च' इति ङीषि गौर ई। भस्य लुकि विभक्तिकार्ये गौरी।

अनडुही - अनडुह्शब्दात् ङीपि अनडुही।

अनड्वाही - अनडुह्शब्दात् सौ विभक्तौ 'चतुरनडुहोरामुदात्तः' इत्यामि अनडु आह् सु 'सावनडुहः' इति नुमि अनडु आन् ह् सु। उकारलोपे सलोपे नलोपे यणि च अनड्वाह्। ङीपि अनड्वाही।

**10. वयसि प्रथमे (३.१.२१)**

अदन्तात् ङीप्

द्विपदं सूत्रम्। अनेन सूत्रेण ङीप् विधीयते। प्रथमवयोवाचिनोऽदन्तात् स्त्रियां ङीप् स्यात्। यथा कुमारी। प्रथमवयोवाचकात् कुमारशब्दात् स्त्रीत्वविवक्षायां 'वयसि प्रथमे' इति ङीपि अनुबन्धलोपे कुमार ई। भत्वात् 'यस्येति च' इत्यलोपे कुमारी। प्रातिपदिकत्वात् सौ कुमारी सु। हल्ङ्याब्भ्यादिना सुलोपे कुमारी। अप्रादुर्भूतयौवनेत्यर्थः।

**11. द्विगोः ( ४.१.२१)**

द्विगोः ङीप्

एकपदं सूत्रम्। अनेन सूत्रेण ङीप् विधीयते। अदन्तात् द्विगोः ङीप् स्यात्।

यथा त्रिलोकी। त्रिलोकशब्दात् स्त्रीत्वविवक्षायां 'द्विगोः' इति ङीपि सौ सुलोपे च त्रिलोकी इति।

त्रिफला- अत्र अजादित्वात् 'अजाद्यतष्टाप्' इति टाप्। त्र्यनीका इत्यत्रापि टाप्। सेना इत्यर्थः।

**12. वर्णादनुदात्तात्तोपधात्तो नः (४.१.३९)**

ङीप् तकारस्य विकल्पेन नकारश्च

वर्णात् अनुदात्तात् तोपधात् तः नः इति पञ्चपदं सूत्रम्। अनेन सूत्रेण ङीप् तकारस्य विकल्पेन नकारादेशश्च विधीयते। वर्णवाची योऽनुदात्तान्तस्तोपधस्तदन्तात् अनुपसर्जनात् प्रातिपदिकाद्वा ङीप् तकारस्य नकारादेश्च। यथा एनी, एता। श्वेतपर्यायवाचकात् एतशब्दात् स्त्रीत्वविवक्षायां 'वर्णादनुदात्तात्तोपधात्तो नः' इति ङीपि तस्य नत्वे एन ङीप् | अनुबन्धलोपे विभक्तिकार्ये च एनी इति।

अदन्तत्वाट्टापि एता इति।

रोहिणी - रोहिता। रोहितशब्दात् 'वर्णादनुदात्तात्तोपधात्तोः नः' इति ङीपि तस्य नत्वे णत्वे विभक्तिकार्ये रोहिणी। रोहितशब्दात् 'अजाद्यतष्टाप्' इति रोहिता।

**13. वोतो गुणवचनात् (४.१.४४)**

वा ङीष्

वा उतः गुणवचनात् इति त्रिपदं सूत्रम्। अनेन विकल्पेन ङीष् विधीयते। उदन्तात् गुणवाचिनो वा ङीष् स्यात्। यथा मृद्वी, मृदुः। मृदुशब्दात् 'वोतो गुणवचनात्' इति ङीपि मृदु ई। यणि विभक्तिकार्ये मृद्वी। ङीषः अभावे मृदुः इति।

**14. बह्वादिभ्यश्च (४.१.४५)**

बह्वादिभ्यः वा ङीष्

बह्वादिभ्यः च इति द्विपदं सूत्रम्। अनेन सूत्रेण विकल्पेन ङीष् विधीयते। बह्वादिभ्यः शब्देभ्यः स्त्रीत्वविवक्षायां वा ङीष्। यथा बह्वी, बहुः। बहुशब्दात् 'बह्वादिभ्यश्च' इति विकल्पेन ङीष्। बहु ई। विभक्तिकार्ये बह्वी। ङीषः अभावे बहुः।

**15. कृदिकारादक्तिनः (वार्तिकम्)**

वा ङीष्

कृत् इकारात् अक्तिनः इति त्रिपदं वार्तिकम्। अनेन वार्तिकेन ङीष् विकल्पेन विधीयते। क्तिनः अवयवाद्भिन्नः यः कृतः इत्, तदन्तात् प्रातिपदिकात् ङीष् विकल्पेन स्यात्। यथा रात्री, रात्रिः। रात्रिशब्दात् स्त्रीत्वविवक्षायां 'कृदिकारादक्तिनः' इति वार्तिकेन विकल्पेन ङीषि विभक्तिकार्ये रात्री। ङीषः अभावे रात्रिः।

**16. सर्वतोऽक्तिन्नर्थादित्येके (वार्तिकम्)**

विकल्पेन ङीष्

सर्वतः अक्तिन्नर्थात् इति एके इति चतुष्पदं वार्तिकम्। अनेन ङीष् विकल्पेन विधीयते। 'कतिपयानामाचार्याणां मते क्तिन्नर्थप्रत्ययावयवात् भिन्नः इकारान्त प्रातिपदिके एव ङीष् स्यात्। यथा शकटी, शकटिः। शकटः इति पुल्लिङ्गः। अटन्प्रत्ययम्। शकटशब्दात् 'सर्वतोऽक्तिन्नर्थादित्येके' इति वार्तिकेन विकल्पेन ङीषि भस्य लुकि विभक्तिकार्ये च शकटी। ङीषः अभावे क्तिन्प्रत्यये शकटिः इति।

**17. पुंयोगादाख्यायाम् (४.१.४८)**

पुंयोगात् ङीष्

पुंयोगात् आख्यायाम् इति द्विपदं सूत्रम्। अनेन सूत्रेण ङीष् विधीयते। या पुमाख्या पुंयोगात् स्त्रियां वर्तते ततो ङीष्। यथा गोपस्य स्त्री गोपी। अत्र 'पुंयोगादाख्यायाम्' इति ङीषि अनुबन्धलोपे गोप ई। 'यस्येति च' इति पकारोत्तरवर्त्यकारलोपे गोप् ई। विभक्तिकार्ये 'गोपी' इति।

**18. पालकान्तान्न (वार्तिकम्)**

न ङीष् इति वार्तिकम्

पालकान्तात् नेति द्विपदं वार्तिकम्। अनेन वार्तिकेन ङीष् निषिध्यते। पालकान्तप्रातिपदिकात् ङीष् न। यथा 'अजाद्यतष्टाप्' इति टापि गोपालिका। अत्र 'पालकान्तान्न' इति ङीषः निषेधे प्रत्ययस्थात्कात्पूर्वस्यात इदाप्यसुपः इति अकारस्येकारे विभक्तिकार्ये च गोपालिका।

**19. प्रत्ययस्थात्कात्पूर्वस्यात इदाप्यसुपः (७.३.४४)**

कात्पूर्वस्याकारस्य इकारः

प्रत्ययस्थात् कात्पूर्वस्य आतः इत् अपि असुपः इति षड्पदं सूत्रम्। अनेन सूत्रेण आकारस्य इदादेशः विधीयते। 'प्रत्ययस्थात्कात्पूर्वस्य अकारस्येकारः स्यादापि, स आप्सुपः परो न चेत्। यथा गोपालिका। गोपालक शब्दात् टापि 'प्रत्ययस्थात्कात्पूर्वस्यात इदाप्यसुपः' इति अकारस्य इकारे गोपालिक टा। विभक्तिकार्ये गोपालिका।

एवम् अश्वपालकशब्दात् टापि कात्पूर्वस्य अकारस्य इकारे विभक्तिकार्ये च अश्वपालिका।

सर्विका - सर्वकशब्दात् 'अजाद्यतष्टाप्' इति टापि अनुबन्धलोपे सर्व आ। 'प्रत्ययस्थात्कात्पूर्वस्यात इदाप्यसुपः' इति वकारोत्तरवर्त्यकारस्य इकारे सर्विक आ। 'अकः सवर्णे दीर्घः' इति सवर्णदीर्घे सर्विका। विभक्तिकार्ये च कृते सर्विका इति रूपसिद्धिः।

एवं कारिका। कारकशब्दात् टापि, कात्पूर्वस्याकारस्येकारे कारिका।

अतः किम्? नौका इत्यत्र अकारपूर्वत्वं न। अतः नेकारः। न प्रत्ययस्थात् इति किम्। शक्नोतीति शका। अत्र ककारः न प्रत्ययस्थः। अतः नेत्वम्।

असुपः इति किम्? बहुपरिव्राजका नगरी। अत्र सुपः परत्वेन न वर्तमानत्वात् नेत्वम्।

**20. सूर्याद्देवतायां चाब्वाच्यः (वार्तिकम् )**

चाप्प्रत्ययः

सूर्यात् देवतायां चाप् वाच्यः इति चतुष्पदं वार्तिकम्। अनेन वार्तिकेन चाप्प्रत्ययः विधीयते। देवतार्थे वर्तमानात् सूर्यशब्दात् चाप् स्यात्। यथा सूर्यस्य स्त्री देवता सूर्या। अत्र स्त्रीत्वविवक्षायां 'सूयद्देवतायां चाप्वाच्यः' इति चापि अनुबन्धलोपे सूर्य आ। सवर्णदीर्घे सूर्या। विभक्तिकार्ये सूर्या।

देवतायां किम्? देवतायामेव (सूर्यस्य स्त्री देवता चेत् )चाप्। मानुषी चेत् 'पुंयोगादाख्यायाम्' इति ङीष्।

**21. सूर्यागस्त्ययोश्छे च ङ्यां च  (वार्तिकम् )**

यलोपः

सूर्यागस्त्ययोः छे च ङ्यां च इति पञ्चपदं वार्तिकम्। अनेन वार्तिकेन यलोपः विधीयते। छ तथा ङी च परे सूर्यागस्त्यशब्दाभ्यां यकारस्य लोपः स्यात्। यथा सूर्यस्य स्त्री मानुषी सूरी। सूर्यशब्दात् 'पुंयोगादाख्यायाम्' इति ङीषि सूर्य ई। 'यस्येति च' इति भस्य लुकि सूर्य ई। 'सूर्यागस्त्ययोश्छे च ङ्यां' च इति वार्तिके यलोपे सूर् ई। विभक्तिकार्ये सूरी। कुन्ती।

**22. इन्द्रावरुणभवशर्वरुद्रमृडहिमारण्ययववनमातुलाचार्याणामानुक् (४.१.४९)**

द्विपदं सूत्रम्। अनेन सूत्रेण आनुगागमः ङीष्  च विधीयते। इन्द्र- वरुण - भव-शर्व-रुद्र-मृड-हिम-अरण्य-यव-यवन-मातुल-आचार्य-शब्देभ्यःआनुगागमः स्यात् ङीष् च। यथा इन्द्रस्य स्त्री इन्द्राणि। अत्र 'इन्द्रावरुणभवशर्वरुद्र मृडहिमारण्ययवचवनमातुलाचार्याणामानुक्' इति ङीषि आनुगागमे च इन्द्र आन् ई। सवर्णदीर्घे इन्द्रान् ई। नास्य णत्वे इन्द्राणि। विभक्तिकार्ये इन्द्राणीति एवं वरुणानि, भवानि, शर्वाणि, रुद्राणी, मृडानि।

आनुक् ङीष् च

शर्वाणि - शर्वस्य स्त्री शर्वाणि। शर्वशब्दात् 'इन्द्रावरुणभवशर्वरुद्रमृड-हिमारण्ययवयवनमातुलाचार्याणामानुक्' इति ङीपि आनु गी च शर्व आन् ई। सवर्णदीर्घे नास्य णत्वे विभक्तिकार्ये च शर्वाणि।

**23. हिमारण्ययोर्महत्वे (वार्तिकम्)**

द्विपदं वार्तिकम्। हिमारण्ययोः महत्वे इति पदच्छेदः। अनेन वार्तिकेन ङीष् आनुगागमाः च विधीयेते। हिमारण्यशब्दाभ्यां महात्वर्थे ङीष् आनुगगमे हिम आन् ई। सवर्णदीर्घे विभक्तिकार्ये च हीमानि। महद्धिमं हिमानि। महदारण्यमारण्यानि।

**24. यवाद्दोषे (वार्तिकम्)**

आनुक् ङीष् च

यवात् दोषे इति द्विपदं वार्तिकम्। अनेन वार्तिकेन ङीष् आनुक् च विधीयेते। यवात् दोषार्थे ङीष् आनुगागमः च स्यात्। दृष्टो यवः यवानि। यवशब्दात् 'यवाद्दोषे' इति वार्तिकेन ङीषि आनुगागमे च यव आन् ई। सवर्णदीर्घे विभक्तिकार्ये च यवानि इति रूपम्।

**25. यवनाल्लिप्याम् (वार्तिकम्)**

लिप्यर्थे आनुक् ङीष् च

यवनात् लिप्याम् इति द्विपदम्। अनेन वार्तिकेन ङीष् आनुगागमाः च विधीयेते। यवनशब्दात् लिप्यर्थे ङीष् आनुगागमाः च स्यात्। यवनानां लिपिर्यवनानि। यवनशब्दात् 'यवनल्लिप्याम्' इति वार्तिकेन ङीषि आनुगागमी च यवन आन् ई। सवर्णदीर्घे विभक्तिकार्ये च यवनानि।

**26. मातुलोपाध्याययोरानुग्वा (वार्तिकम् )**

आनुक् वा

मातुलोपाध्यायो अनुक् वा इति त्रिपदं वार्तिकम्। अनेन वार्तिकेन विकल्पेन आनुगागमः विधीयते। मातुलोपाध्ययो स्त्रीलिङ्गे आनुक् विकल्पेन स्यात्। यथा मातुलानि मातुलस्य स्त्री इति विग्रहः। 'इन्द्रवरुणभवशर्वरुद्रमृडहिमारण्य-यवयवनमातुलाचार्याणामानुक्' इति ङीषि अनुबन्धलोपे मातुल ई। 'मातुलोपाध्याययोरानुग्वा' इति वार्तिकेन आनुगागमे अनुबन्धलोपे च मातुल अन् ई। सवर्णदीर्घे विभक्तिकार्ये च मातुलानि। आनुगाभावे मातुली।

उपाध्यायानि - उपाध्यायी। उपेत्य अधीयतेऽस्मादित्युध्यायः, तस्य स्त्री उपाध्यायानि उपाध्यायी वा। उपाध्यायशब्दात् 'मातुलोपाध्याययोरानुग्वा' इत्यानुगी 'पुंयोगादाख्यायाम्' इति ङीषि च उपाध्याय आनु ई। सवर्णदीर्घे विभक्तिकार्ये च उपाध्यायनी आनुगाभावे उपाध्यायी।

**27. आचार्यादणत्वं च (वार्तिकम् )**

णत्वनिषेधः

आचार्यात् अणत्वं च इति त्रिपदं वार्तिकम्। न णत्वं अणत्वम्। अनेन वार्तिकेन णत्वनिषेधः विधीयते। आचार्यशब्दात्परस्य आनुगः नस्य णत्वं न। यथा आचार्यस्य स्त्री आचार्यानी। आचार्यशब्दात् 'इन्द्रवरुणभवशर्वरुद्रमृड-हिमारण्ययवयवनमातुलाचार्याणामानुक्' इति सूत्रेण ङीषि आनुगि च आचार्य आन् ई सवर्णदीर्घे आचार्यान् ई। अत्र 'आचार्यादणत्वं च' इति णत्वनिषेधः।

आचार्याणि विभक्तिकार्ये आचार्याणि। आचार्यस्य स्त्री अध्यापिका चेत् सा आचार्या 'अजाद्यतष्टाप्'।

**28. अर्यक्षत्रियाभ्यां वा स्वार्थे (वार्तिकम्)**

ङीष् आनुक् वा

त्रिपदं वार्तिकम्। अनेन वार्तिकेन ङीष् आनुगागमः वा विधीयते। अर्यक्षत्रियाशब्दात् ङीष् आनुगागमः च स्वार्थे विकल्पेन स्यात्। यथा अर्याणि अर्यशब्दात् 'अर्यक्षत्रियाभ्यां वा स्वार्थे' इति वार्तिकेन ङीषि आनुगागमे च अर्य आन् ई। सवर्णदीर्घे णत्वे विभक्तिकार्ये च अर्याणि। ङीषः आनुगः चाभावे अजाद्यष्टाप् इति टापि अर्या।

क्षत्रियाणि - क्षत्रियात् क्षत्रियायाम् स्वभार्यायामुत्पन्न स्त्री क्षत्रियाणि। अत्र स्त्रीत्वविवक्षायाम् अर्यक्षत्रियाभ्यां वा स्वार्थे इति ङीषि आनुकि च कृते अनुबन्धलोपे क्षत्रिय आन् ई। भत्वादलोपे क्षत्रियानी। णत्वे क्षत्रियाणी। विभक्तिकार्ये क्षत्रियाणी इति। पक्षे अदन्तत्वात् टापि क्षत्रिया। पुंयोगे तु क्षत्रियस्य स्त्री क्षत्रियी।

**29. क्रीतात्करणपूर्वात् (४.१.५०)**

क्रीतात् ङीष्

द्विपदं सूत्रम्। अनेन सूत्रेण ङीष् विधीयते। क्रीतान्ताददन्तात् करणादेः स्त्रियां ङीष् स्यात्। यथा वस्त्रेण क्रीता वस्त्रक्रीति। वस्त्रक्रीतशब्दात् 'क्रीतात्करणपूर्वात्' इति ङीषि वस्त्रक्रीत ई। भस्य लुकि विभक्तिकार्ये वस्त्रक्रीती।

क्वचिन्न। धनक्रीता इत्यत्र ङीष् न। धनक्रीतशब्दात् टाप्।

**30. स्वङ्गाच्चोपसर्जनादसंयोगोपधात् (४.१.५०)**

ङीष् वा

स्वङ्गात् च उपसर्जनात् असंयोगोपधात् इति चतुष्पदम् सूत्रम्। अनेन सूत्रेण विकल्पेन ङीष् विधीयते। असंयोगोपधमुपसर्जनं यत्स्वाङ्गं तदन्ताददन्तान् ङीष् वा स्यात्। यथा केशान् अतिक्रान्ता अतिकेशि। अतिकेश शब्दात् 'स्वङ्गाच्चोपसर्जनादसंयोगोपधात्' इति विकल्पेन ङीषि अतिकेशी इति रूपम्। ङीषः अभावे टापि अतिकेशा।

चन्द्रमुखी- चन्द्र इव मुखं यस्याः सा चन्द्रमुखी इति। अत्र स्त्रीत्वविवक्षायां 'स्वङ्गाच्चोपसर्जनादसंयोगोपधात्' इति ङीषि चन्द्रमुख ई। भत्वादलोपे विभक्तिकार्ये चन्द्रमुखी इति।

पक्षे अदन्तत्वाट्टापि चन्द्रमुखा इति।

असंयोगोपधात् इति किम्? संयोगोपधे न ङीष्। टापेव यथा सुगुल्फा। उपसर्जनात् इति किम्? अत्र सोः सुशिखा। अत्र सोः उपसर्जनत्वाभावात् न ङीष्। टापे न सुशिखा।

**31. न क्रोडादिबह्वचः (४.१.५६)**

न ङीष्

द्विपदं सूत्रम्। अनेन सूत्रेण ङीषः निषेधे विधीयते। क्रोडादेः बह्वचः स्वाङ्गान्न ङीष्। यथा कल्याणक्रोडा| कल्याणक्रोडशाब्दात् 'स्वाङ्गच्चोपसर्जनाद-संयोगोपधात्' इति विकल्पेन विधीयमानस्य ङीषः निषेधे न 'क्रोडादिबह्वचः' इति सूत्रेण निषिध्यते। टापि कल्याणक्रोडा इति। सुजघना इत्यत्रापि न ङीष्। टापेव।

**32. नखःमुखात्संज्ञायाम् (४.१.५८)**

नखःमुखात् न ङीष्

द्विपदं सूत्रम्। अनेन ङीषः निषेधः विधीयते। संज्ञायां नखमुखप्रातिपदिकान्तात् ङीष् न। यथा शूर्पणखा। शूर्पनखशब्दात् 'स्वाङ्गच्चोपसर्जन..' इत्यादिना विधीयमानः ङीष् 'नखःमुखात्संज्ञायाम्' इति सूत्रेण निषिध्यते। 'पूर्वपदात्संज्ञायामगः' इति नस्य णत्वे शूर्पणखा।

**33. पूर्वपदाद् संज्ञायामगः (८.४.३)**

नस्य णः

पूर्वपदात् संज्ञायाम् अगः इति त्रिपदं सूत्रम्। अनेन सूत्रेण नस्य णत्वे विधीयते। पूर्वपदस्थान्निमित्तात्परस्य नस्य णः स्यात् संज्ञायाम् न तु गकारव्यवधाने। यथा शूर्पणखशब्दात् 'अजाद्यतष्टाप्' इति टापि 'पूर्वपदाद् संज्ञायामगः' इति नस्य णत्वे शूर्पणखा इति रूपम्।

गौरमुखा इत्यत्र 'नखमुखात्सम्ज्ञायाम्' इति न ङीष्। टापेन संज्ञायां किम्? शूर्पणखावत् काचन संज्ञा न भवति। ताम्रमुखी इत्यत्र कन्या इत्यर्थः।

**34. जातेरस्त्रीविषयादयोपधात् (४.१.६३)**

ङीष्

जातेः अस्त्रीविषयात् अयोपधात् इति त्रिपदं सूत्रम्। अनेन सूत्रेण ङीष् विधीयते। जातिवाचि यत्र च स्त्रियां नियतं अयोपधं ततः स्त्रियां ङीष् स्यात्। यथा तटी, वृषली, कठी, वह्वृची। तटशब्दात् 'जातेरस्त्रीविषयादयोपधात्' इति ङीषि विभक्तादि लोपे तटी।

जातेः किम्? मुण्डपदस्य जातित्याभावात् न ङीष्। टापेव मुण्डा।

अस्त्रीविषयात्किम्? बलाकाशब्दः स्त्रीविषयः। अतः न ङीष्। अयोपधात् इति किम्? क्षत्रियशब्दः योपधः। अयोपधादेव ङीष् क्षत्रिया इत्यत्र टाप्।

**35. योपधाप्रतिषेधे हयगवयमुकयमनुष्यमत्स्यानामप्रतिषेधः (वार्तिकम्)**

त्रिपदं वार्तिकम्। अनेन वार्तिकेन ङीष् विधीयते योपधप्रतिषेधे हय-गवय-मुकय-मनुष्य-मत्स्य-शब्दानां प्रतिषेधः न। यथा हयी, गवयी, मुकयी। हयशब्दात् 'जातेरस्त्रीविषयादयोपधात्' इति ङीष्। सर्वेऽस्मिन् योपधप्रतिषेधं सूचयति। तादृशस्य प्रतिषेधः भवति 'हयगवयमुकयमनुष्यमत्स्यानामप्रतिषेधः' इति वार्तिकम्। अतः ङीषि भत्वादलोपे विभक्तिकार्ये च हयी इति।

मनुषी - मनुष्यशाब्दात् स्त्रीत्वविवक्षायां योपधप्रतिषेधे 'हयगवयमुकय मनुष्यमत्स्यानामप्रतिषेधः' इति ङीषि मनुष्य ई। भत्वादलोपे आदिवृद्धौ मनुष्य ई। 'हलस्तद्धितस्य' इति यलोपे विभक्तिकार्ये मानुषी इति रूपम्।

**36. मत्स्यस्य ङ्याम् (वार्तिकम् )**

यलोपः

द्विपदं वार्तिकम्। अनेन वार्तिकेन यलोपः विधीयते। मत्स्यशब्दावयवस्य यकारस्य लोपः स्यात्। ङीष्परे। यथा मत्स्यशब्दात् 'जातेरस्त्रीविषयादयोपधात्' इति ङीषि अनुबन्धलोपे मत्स्य ई। भत्वादलोपे मत्स्य ई। 'मत्स्यस्य ङ्याम्' इति वार्तिकेन यलोपे विभक्तिकार्ये च मत्सी इति।

**37. इतो मनुष्यजातेः (४.१.६५)**

इदन्तात् ङीष्

इतः मनुष्यजातेः इति द्विपदं सूत्रम्। अनेन सूत्रेण ङीष् विधीयते। मनुष्यजातिवाचकात् इदन्तात् ङीष् स्यात्। यथा दाक्षी। दक्षि शब्दात् 'इतो मनुष्यजातेः' इति ङीष्वनुबन्धलोपे दाक्षि ई। भत्वात् 'यस्येति च' इति दाक्षेः इकारलोपे विभक्तिकार्ये च दाक्षी इति।

**38. ऊङुतः (४.१.६६)**

ऊङ्

ऊङ् उतः इति द्विपदं सूत्रम्। अनेन सूत्रेण ऊङ् विधीयते। उदन्तादयोपधान्मनुष्यजातिवाचिनः स्त्रियामूङ् स्यात्। यथा कुरुः। कुरुशब्दात् ऊङुतः इति ऊङि कुरु ऊ। सवर्णदीर्घे विभक्तिकार्ये च कुरूः।

अयोपधात् इति किम्? अध्वर्युः इत्यत्र यकारोपाधित्वात् न ऊङ्। अध्वर्यु इत्यत्र यकारोपाधित्वात् न ऊङ्। अध्वर्युः ब्राह्मणी।

**39. पङ्गोश्च (४.१.६८)**

पङ्गुशब्दात् ऊङ्

पङ्गोः च इति द्विपदं सूत्रम्। अनेन सूत्रेण ऊङ् विधीयते। पङ्गुशब्दात् स्त्रीत्वविवक्षायाम् ऊङ् स्यात्। यथा पङ्गूः। पङ्गुशब्दात् 'पङ्गोश्च' इति ऊङि पङ्गु ऊ। सवर्णदीर्घे विभक्तिकार्ये च पङ्गूः।

**40. श्वशुरस्योकाराकारलोपश्च (वार्तिकम्)**

उकाराकारयोः लोपश्च

श्वशुरस्य उकाराकारलोपः चेति त्रिपदं वार्तिकम्। श्वशुरशब्दात् उकाराकारयोः लोपश्च विधीयते। यथा श्वशुरस्य स्त्री श्वश्रूः। श्वशुरशब्दात् ऊङ्तः इति ऊङि अनुबन्धलोपे श्वशुर ऊ। 'श्वशुरस्योकाराकारयोर्लोपश्च' इति शकारोत्तरवत्युकारलोपे रकारोत्तरवर्त्यकारस्य लोपे श्वश् र् ऊ। विभक्तिकार्ये श्वश्रूः इति रूपम्।

**41. ऊरूत्तरपदादौपम्ये (४.१.६९)**

ऊङ्

ऊरूत्तरपदात् औपम्ये इति द्विपदं सूत्रम्। अनेन सूत्रेण ऊङ् विधीयते। उपमानवाचि पूर्वपदमुरूत्तरपदं यत्प्रातिपादिकं तस्मादूङ् स्यात्। यथा करभोरूः। करभस्य ऊरु इव यस्याः सा करभोरुः। करभोरुशब्दात् स्त्रीत्वविवक्षायाम् 'ऊरूत्तरपदादौपम्ये' इति ऊङि अनुबन्धलोपे विभक्तिकार्ये च करभोरूः।

**42. संहितशफलक्षणवामादेश्च (४.१.७०)**

अनौपम्यार्थे ऊङ्

द्विपदं सूत्रम्। अनेन सूत्रेण ऊङ् विधीयते। संहित- शफ -लक्षण -वामादिभ्यः परस्य ऊरूत्तरपदस्य प्रातिपदिकस्य स्त्रीत्वे ऊङ् स्यात्। यथा संहितोरूः। संहितोरुशब्दात् 'संहितशफलक्षणवामादेश्च' इति ऊङि अनुबन्धलोपे विभक्तिकार्ये च संहितोरूः। एवं शफोरूः, लक्षणोरूः, वामोरूः।

**43. शार्ङ्गरवाद्यञो ङीन् (४.१.७१)**

ङीन्

शार्ङ्गरवादि अञः ङीन् इति त्रिपदं सूत्रम्। अनेन सूत्रेण ङीन् विधीयते। शार्ङ्गरवादेरञो योऽकारस्तदन्ताच्च जातिवाचिनो ङीन् स्यात्। यथा शार्ङ्गरवी। शार्ङ्गरशब्दात् स्त्रीत्वविवक्षायां 'शार्ङ्गरवाद्यञो ङीन्' इति ङीन्। शर्ङ्गरव ई। भस्य लुकि विभक्तिकार्ये शार्ङ्गरवी। एवं बैदी ब्राह्मणी।

**44. नृनरयोर्वृद्धिश्च (वार्तिकम्)**

वृद्धिः

नृनरयोः वृद्धिः चेति त्रिपदं वार्तिकम्। अनेन वार्तिकेन वृद्धिः विधीयते। नृनरेभ्यः प्रातिपदिकेभ्यः वृद्धिः स्यात्। यथा नारी। नृ शब्दात् 'शार्ङ्गरवाद्यञो ङीन्' इति ङीनि अनुबन्धलोपे नृ ई। 'नृनरयोर्वृद्धिश्च' इति वृद्धौ रपरत्वे आरि विभक्तिकार्ये च नारी।

**45. यूनस्तिः (४.१.७७)**

तिप्रत्ययः

यूनः तिः इति द्विपदं सूत्रम्। अनेन सूत्रेण तिप्रत्ययः विधीयते। युवन् शब्दात् स्त्रियां तिः प्रत्ययः स्यात्। यथा युवतिः। युवन् शब्दात् स्त्रीत्वविवक्षायां 'ऋन्नेभ्यो ङीप्' इति सूत्रं प्रबाध्य 'यूनस्तिः' इति तिप्रत्यये युवन् ति। 'स्वादिष्वसर्वनामस्थाने' इति पदत्वात् नलोपे युवति। विभक्तिकार्ये युवतिः इति।

## Summarised Overview

अस्मिन् पाठभागे ऊनत्रिंशत् सूत्राणि षोडशशवार्तिकानि अष्टौ प्रत्ययाः च विशदयन्ति। स्त्रियाम् इति सूत्रादारभ्य यूनस्तिः इति सूत्रपर्यन्तं वर्तमानाः सर्वाः प्रक्रियाः विशदीकृताः। सूत्रेषु अधिकारं सूत्रं स्त्रियां ङीप् विधीयमानं उगितश्च, यञश्च, ङीपेन साकं विकल्पेन तकारस्य नकारमपि विधीयमानं वर्णादनुदात्तलोपधातो नः इति सूत्रम्, आनुक् ङीष् च विधीयमानं 'इन्द्रवरुणभवशर्वरुद्रमृडहिमारण्ययवयवनमातुलाचार्याणामानुक्' इति सूत्रम् ङीष् निषेधसूत्रं न क्रोडादिबह्वचः' इति सूत्रम्, नस्य णत्वं विधीयमानं सूत्रं 'पूर्वापदादसंज्ञायामगः' इति सूत्रम् जातिवाचकात् ङीष् विधीयमानं 'जातेरस्त्रीविषयादयोपधात् इति सूत्रं , ऊङ् विधीयमानम् ऊङुतः इति सूत्रम् , औपम्ये ऊङ् विधीयमानं सूत्रम्, उरूत्तरपदादौपम्ये इत्यादीनि सूत्राणि अन्तर्भवन्ति।

वार्तिकेषु ङीष् विकल्पेन विधीयमानं कृदिकारादक्तिनः, सर्वतोऽक्तिन्नर्थादित्येके इति वार्तिकद्वयं, ङीष् निषेधं पालकान्तान्न इति वार्तिकम्, श्वशुरशब्दस्योकारकारयोः लोपं विधीयमानं श्वशुरस्योकारराकारलोपश्च नृनस्योः वृद्धिः विधीयमानं नृनस्योर्वृद्धिश्च इत्यादिकानि वार्तिकानि अन्तर्भवन्ति।

टाप् इति स्त्रीलिङ्गप्रसक्तिः अत्यधिका। 'अजाद्यष्टाप्' इति टाप्। विकल्पेन ङीष् विधीयमानमेकं सूत्रं भवति वोतो गुणवचानात् इति पुंयोगे ङीष् विधीयते पुंयोगादाख्यायामिति सूत्रम्। कात्पूर्वस्याकारस्य इकारः 'प्रत्ययस्कात्कात्पूर्वस्यात इदाप्यसुपः इति सूत्रम्। नखमुखात् ङीष् निषिध्यते 'नखमुखात्संज्ञायाम्' इति सूत्रम्। पङ्गुशब्दादूङ्' विधीयमानं सूत्रं भवति पङ्गोश्च। एतान्यपि अस्मिन् पाठभागे अन्तर्भवन्ति।

स्त्रीप्रत्ययसाहाय्येन निष्पन्नानि कुरूचरी, पञ्चतयी,आक्षिकी इत्यादीनि रूपाणि यलोपेन संजाता गार्गी इति रूपं, वैकल्पिकेन ङीष् प्राप्तं बह्वी बहुः इति रूपद्वयं, ङीष् प्राप्तौ निष्पन्नं वस्त्रक्रीतीति रूपं, स्वाङ्गवाचिशब्दात् विकल्पेन प्राप्तम् अतिकेशी, अतिकेशा इति रूपद्वयं, मनुष्यजातौ दाक्षी इति रूपम्। अनौपम्यार्थे ऊङ् प्राप्त्या जातं संहितोरूः शफोरूः, इत्यादीनि रूपाण्यपि अस्मिन् एकके अन्तर्भवन्ति।

## Assignments

**I. उत्तरत -**

1. गार्ग्यायणी इत्यत्र ष्फप्रत्ययाः केन सूत्रेण विधीयते? विशदयत।
2. गौरी इत्यत्र कः स्त्रीलिङ्गप्रत्ययः? केन सूत्रेण विधीयते? प्रक्रियां च लिखत।
3. 'कुमारी' इति रूपं कथं सिद्ध्यति ?
4. त्रिलोकशब्दात् ङीषि त्रिलोकी | त्रिफलशब्दात् स्त्रीत्वविवक्षायां किं रूपम् ? प्रकियां लिखत।
5. ङीन् प्रत्ययः केन सूत्रेण विधीयते ? विशदयत।

**II. व्याख्यात -**

1. यञश्च।
2. प्रत्ययस्थात्कात्पूर्वस्य इदाप्यसुपः।
3. हिमारण्योर्महत्वे।
4. पङ्गोश्च।
5. श्वशुरस्योकाराकारलोपश्च।

**III. रूपाणि सप्रमाणं निष्पादयत।**

1. पचन्ती।
2. गार्गी।
3. कुमारी।
4. मृदुः।
5. सूर्या।

**IV. सिद्धान्तकौमुदीस्थानि स्त्रीलिङ्गप्रकरणम् पठन्तु।**

## Suggested Readings


1. पदसंस्कारचन्द्रिका. कैकुलका रामवारियर्, केरलसाहित्य अकादमि, तृश्शूर।
2. लघुपाणिनीयम्. ए आर् राजराजवर्मा, केरलसर्वकलाशाला, तिरुवनन्तपुरम्।
3. पाणिनीयप्रद्योतम्. ऐसि चाक्को, भाषा इन्स्टिट्यूट, तिरुवनन्वपुरम्।
4. प्रक्रियाभाष्यम्. फा जोन् कुन्नपप्लि, नाषणल् बुक् स्टाल्, कोट्टयम्।


## References

1. वरदराजाचार्याः , लघुसिद्धान्तकौमुदी, व्याख्या, श्री गोमतीप्रसादशास्त्री मिश्रः , चौखम्बा सुरभारती प्रकाशन्, वाराणसी, २०११, पुटानि  २६६-२७२।
2. वरदराजाचार्यः, लघुसिद्धान्तकौमुदी, व्याख्या. श्री गिरीशकुमारठक्कुरः कृष्णदास अकादमी, १९९८ वाराणसी, पुटानि २६९-२७५।

## Space for Learner Engagement for Objective Questions

Learners are encouraged to develop objective questions based on the content in the paragraph as a sign of their comprehension of the content. The Learners may reflect on the recap bullets and relate their understanding with the narrative in order to frame objective questions from the given text. The University expects that 1 - 2 questions are developed for each paragraph. The space given below can be used for listing the questions.

UNIT 4

# अव्ययप्रकरणम्

## Learning Outcomes

- संस्कृतव्याकरणशास्त्रे अवबोधं जनयति।
- अष्टाध्यायीसूत्राणि व्याख्यानाय प्रभवति।
- पदावलीरचनायां तत्पर्योत्पादनम्।
- अव्ययानां ग्रहणं प्रयोगसाधुतां च अवगच्छति।

## Background

आशयावगमनाय भाषा उपयुज्यते। आशयः वाक्याधीनः भवति। वाक्येषु पदानि सन्ति। आशयस्य विभाज्यघटकमेव पदम्। पदानि प्रथमतया त्रिधा विभक्तानि। सुबन्तानि तिङ्न्तानि अव्ययानि चेति। नामपदानि सुबन्तानि। क्रियापदानि तिङन्तानि। नाम- क्रियापदेषु प्रतिविभक्ति प्रतिपुरुषं प्रतिवचनं च भेदः वर्तते। रामः- रामौ- रामाः इति प्रथमाविभक्तौ रूपाणि। भवति- भवतः- भवन्ति इति क्रियापदेषु वचनानुसारं भेदः वर्तते। किन्तु अव्ययपदानि सदा एकरूपेणैव वर्तिष्यन्ते उक्तं च

**'सदृशं त्रिषु लिङ्गेषु सर्वासु च विभक्तिषु**
**वचनेषु च सर्वेषु यन्नव्येति तदव्यम्' इति।**

तादृशानां अव्ययानां तेषां प्रयोगसाधुतां च पठितुमयमवसरः सम्प्राप्तः।

## Keywords

अव्ययम् - स्वर् - अन्तर् - उपधा - अन्तरा - च - वा - उपसर्गाः - असर्वविभक्तिः - कृन्मेजन्तः - क्त्वा - तोसुन् - भागुरिः - अल्लोपः।

# Discussion

अव्ययसंज्ञा

**1. स्वरादिनिपातमव्ययम् (१.१.३७)**

स्वरादिनिपातम् अव्ययम् इति द्विपदं सूत्रम्। अनेन सूत्रेण अव्ययसंज्ञा विधियते। स्वर् आदिः येषां ते स्वरादयः। स्वरादयः च निपातश्च स्वरादिनिपातम्। स्वरादयो निपाताश्च अव्यसंज्ञा स्युः। अव्ययीभावश्च इत्यादावस्य प्रयोजनम्।

यथा स्वर्(स्वर्गः), अन्तर् (मध्ये), प्रातर् (प्रातः), पुनर् (पुनः), सनुसर्, उच्चैस् (उच्चैः), नीचैस् (नीचैः), ऋधक् (सत्यं), ऋते(विना), युगपत् (एकस्मिन्नेव समये), आरात् (समीपे), पृथक् (विना), ह्यस् (ह्यः), श्वस् (श्वः), दिवा (दिनं), रात्रौ, सायं, चिरं (बहुकालं), मनाक् (अल्पः), ईषत् (अल्पः), जोषम् (मौनं), तूष्णीं (मौनं), बहिस् (बहिः), अवस् (बहिः), समया (समीपं), निकषा (समीपं), स्वयम्, वृथा (व्यर्थः), नक्तम् (रात्रिः) नञ् (निषेधवाचकः), हेतौ (कारणं), शब्दा (स्पष्टः), अब्दा (स्पष्टार्थः), सामि (निन्दा), वद् (समानः), ब्राह्मणवत् (ब्राह्मणतुल्यः), क्षत्रियवत् (क्षत्रियसमानः), सना (नित्यै), सनात् (नित्यं), उपधा (धर्माद्यैः परीक्षणं), तिरस् (अन्तर्धानं), अन्तर्धा (अन्तर्धानं), अन्तरेण (विना), ज्योक् (अतिशीघ्रता), कम् (जलं), शम् (मङ्गलं), सहसा (झटिति), विना (अन्तरेण), नाना (अनेकप्रकारः), स्वस्ति (शुभं), स्वधा (पितृणां तृप्त्यर्थं क्रियमाणां श्राद्धादिकं कर्म), अलम् (पर्याप्तिः), वषट् (हविः), श्रौषट् (स्वाहा), अन्यत् (अन्यः), अस्ति (भवति), उपांशुः (अन्तः उच्चारणं), क्षमा (सहनशीलत्वं), विहायसा (आकाशः), दोषा (रात्रिः), मृषा (मिथ्या), मिथ्या (असत्यं), मुधा (व्यर्थः), पुरा (पुरातनकाले), मिथो (परस्परं), मिथः (परस्परः), प्रायस् (अत्यन्तं), मुहुस् (मुहुः), प्रवाहिकम् (अविच्छेदेन वर्तमानं कर्म), प्रवाहिका (अविच्छेदेन क्रियमाण प्रवृत्तिः), आर्यहलम् (बलात्कारकरणं), अभीक्ष्णम् (निरन्तरं), साकम् (सह), सार्थम् (सह), सार्धम् (सह), नमस् (नमस्कारः), हिरुक् (विना), धिक् (कष्टं), अथ (अनन्तरं), अम् (अतिशीघ्रता), आम् (स्वीचकार), प्रताम् (पश्चात्तापः), प्रशाम् (तुल्यः), प्रतान् (विस्तारः), मा (निषेधः) माङ् (निषेधः)। पूर्वोक्ताः स्वरादयः आकृतिगणः। आकृत्या स्वरूपेणैव ज्ञातुं शक्यते।

च (अपि), वा (अथवा), ह (प्रसिद्धः), अह (स्पष्टः), एव (निश्चयः), एवं (एवं प्रकारः), नूनं (निश्चयं), शश्वत् (पुनःपुनः), युगपत् (एकस्मिन्नेव समये), भूयस् (अत्यधिकं), कूपत् (प्रश्नः), कुवित् (अत्यधिकं), नेत् (निषेधः), चेत् (यति), चण् (शब्दः), यत्र (यस्मिन् स्थले), क्वचित् (कदाचित्), किंचित् (एकम्), नेह (नात्र), हन्त (प्रसन्नतायां दुःखप्रकटनम्), माकिः (प्रतिषेध)), माकिम्

(प्रतिषेधः), नाकिः, नाकिम्, माङ् (निषेधः), नञ् (निषेधः), यावत् (यावत्पर्यन्तं), तावत् (तावत्पर्यन्तं), त्वै (तर्कः), द्वै (विशिष्टविकारः), न्वै (तर्कः), रै (आदरः), श्रौषट् (देवतानां प्रीत्यर्थं हविरर्पणम्), वौषट् (श्रौषट्), स्वाहा (श्रौषट्), स्वधा (स्वाहा), ओम् (प्रणवः), तुम् (तु-पादपूरणम् भेदः) तथाहि (तथारूपेण), खलु (किल), किल (निश्चयद्योतकः), अथो (अथ), अथ (अनन्तरं), शुष्टुं (सुन्दरं), स्म (भूतकालवाचकः), आदह (प्रारम्भः)।

**2. उपसर्ग-विभक्ति-स्वरप्रतिरूपकाश्च (वार्तिकम्)**

उपसर्गप्रतिरूपकाः, विभक्त्यन्तप्रतिरूपकाः, अच् प्रतिरूपकाश्च चादिगणे पाठ्याः। उपसर्गप्रतिरूपकम् उदाहरति-अवदत्तः। दत्तमित्यर्थः। अत्र अवेति उपसर्गप्रतिरूपकम्, न तूपसर्गः। अंहयुः (अभिमानी), अस्तिक्षीरा(क्षीरवती), अ, आ, इ, ई, उ, ऊ, ऋ,ए, ऐ, ओ, औ (प्रत्यक्षरं पशुरित्यर्थः), शुकम्(शीघ्रं), यथकथाच (अनादरः), पाट्, प्याट्, अङ्ग, है, हे भोः अये (सम्बोधनार्थे), द्य (सम्बोधनहिंसा), विषु(अनेकः), एकपदे(एकत्र), युत्(निन्दा), आतः(अतः)। चादिराकृतिरणः।

**3. तद्धितश्चासर्वविभक्तिः (१.१.३८)**

अव्ययसंज्ञः

तद्धितः च असर्वविभक्तिः इति त्रिपदं सूत्रम्। अनेन सूत्रेण अव्ययत्वं विधीयते। यस्मात् सर्वा विभक्तिः नोत्पद्यते स तद्धितान्तोऽव्ययं स्यात्। तसिल् प्रत्ययान्तस्य (तद्धितान्तस्य) अव्ययसंज्ञा, तथा शसः समासान्तप्रत्ययस्य पूर्वं अव्ययसंज्ञकः। अम्, आम्। कृत्वोऽर्थाः। तसिवति। नानाञौ। एतदन्तमव्ययम्।

**4. कृन्मेजन्तः (१.१.३९)**

कृन्मेजन्तः अव्ययम्

एकपदं सूत्रम्। अनेन सूत्रेण अव्ययत्वं विधीयते। मान्तः एजन्तः च यो कृत् तद् अव्ययसंज्ञा स्यात्। यथा स्मारं स्मारम्। अत्र 'अभीक्ष्ण्ये णमुल् च' इति स्मृधातोःणमुलि स्मृ णमुल्। 'अचोञ्णिति' इति वृद्धौ 'उरण् रपरः' इति रपरत्वे च स्मारम्। नित्यवीत्सयोः इति द्वित्वम्। मान्तकृद- न्तादव्ययत्वम् 'कृन्मेजन्तः' इति सूत्रेण। जीवसे (जीवनार्थम्)। पिबध्यै इत्यस्यादि अव्ययत्वम्।

**5. क्त्वा-तोसुन्-कसुनः (१.१.४०)**

क्त्वा-तोसुन्-कसुनः अव्ययत्वम्

एकपदं सूत्रम्। अनेन सूत्रेण अव्ययत्वं विधीयते। क्त्वा- तोसुन्- कसुनान्ताः अव्ययाः स्युः। यथा कृत्वा। डुकृञ् धातोः क्त्वाप्रत्यये कृत्वा इति।

**उदेतोः** - उत्पूर्वात् इण् धातोः 'भावलक्षणे.....' इत्यादि सूत्रेण तोसुन् प्रत्यये अनुबन्धलोपे उद् इ तोस्। 'आद्गुणः' इति गुणे उदितोस्। 'क्त्वा तोसुन् कसुनः' इत्यव्ययत्वात् 'अव्ययदाप्सुपः' इति सोर्लुकि सस्य रुत्वे विसर्गे च 'उदेतोः' इति।

**विसृपः**। विपुर्वसृप्धातोः कसुन्प्रत्यये विसृप् सस्। अव्ययत्वे सुलोपे विसृपः।

### 6. अव्ययीभावश्च (१.१.४१)

अव्ययसंज्ञः

अव्ययीभावः च इति द्विपदं सूत्रम्। अनेन सूत्रेण अव्ययत्वं विधीयते। अव्ययीभावश्चऽव्ययसंज्ञः स्यात्। यथा हरौ इति अधिहरि। हरि ङि अधि इत्यलौकिकविग्रहे 'अव्ययं विभक्ति...' इत्यादिना सूत्रेणाव्ययीभावैः। समासत्वात् सुपः लुक्। अधि इत्यस्य पूर्वनिपातः। अधिहरि। तस्मात्सुप्रत्यये 'अव्ययीभावश्च' इति सूत्रेण अव्ययत्वे 'अव्ययादाप्सुपः' इति सुपः लोपे अधिहरि।

### 7. अव्ययादप्सुपः (२.४.८२)

सुपः लुक्

अव्ययात् आप्सुपः इति द्विपदं सूत्रम्। अनेन सूत्रेण सुपः लुक् विधीयते। अव्ययाद्विहितस्यापः सुपस्य लुक् स्यात्। यथा अधिहरि। हरौ इति अधिहरि। हरि ङि अधि इत्यलौकिकविग्रहः। 'अव्ययं विभक्ति...''इत्यादिना समासः। समासत्वात् सुपः लुक्। अधीत्यस्य पूर्व निपाते अधिहरि। तस्मात्सुप्रत्यये अव्ययीभावस्य इत्यव्ययत्वे 'अव्ययादाप्सुपः' इति सुपः लोपे अधिहरि।

**अव्ययलक्षणम्**

> **सदृशं त्रिषु लिङ्गेषु सर्वासु च विभक्तिषु**
> **वचनेषु च सर्वेषु सत्र वेति तदव्ययम्।**

त्रिषु लिङ्गेषु, सर्वासु च विभक्तिषु, वचनेषु सर्वेषु च यत् न व्येति (विकारं न प्राप्नेति) किन्तु सदृशं (एक प्रकारकम्) एव भवति, तत् अव्ययम्।

अव्ययम्

आचार्यस्य भागुरेः मते

> **"वष्टि भागुरिरल्लोपमवाप्योपसर्गयोः**
> **आपं चैव हलन्तानां यथा वाचा निशा दिशा" इति।**

पाणिनिमतात् विरुद्धं भवति भागुरिमतम्। उपसर्गस्य आदौ अकारस्य लोपः स्यात् इति। यथा अवगाहः। 'अपि' इत्युपसर्गस्य अकारस्य लोपे 'अव्ययादाप्सुपः' इति सुलोपे च कृते पिधानम् इति। अकारलोपाभावे अपिधानम्।

एवं वगाहः अवगाहः वा। अवपूर्व गाह्धातोः 'वष्टि भागुरि...' इत्यादिना अकारलोपे वगाहः। लोपाभावे अवगाहः इति।

अपि भागुरेः मते हलन्तशब्दानां स्त्रीलिङ्गे टाप् (आप्) प्रत्ययः। यथा वाच् आ - वाचा। दिश् आ दिशा। निश् आ निशा इत्यादीनि।

## Summarised Overview

अस्मिन् पाठभागे षट् सुत्राणि एकं वार्तिकं च सन्ति। षट्सूत्रेषु पञ्चभिः सूत्रैः अव्ययत्वम्। एकेन सूत्रेण सुपः लोपः च विधीयन्ते। पुनः अव्ययस्य सामान्य लक्षणं, भागुरेः मते वर्तमानं व्यतियानं च प्रकटितमस्ति।
वार्तिकं तु उपसर्ग-विभक्ति-स्वरप्रतिरूपकाश्च इति भवति।
पाठभागे पञ्चदशाधिकशतम् अव्ययानि तेषामर्थाः च सूचिताः।
कानिचन अव्ययानि सदृशानि भवन्ति। अव्ययानमर्थसूचनात् कुत्र कुत्र तानि प्रयोक्तव्यानि इति ज्ञातुं ज्ञातुं शक्यते।

## Assignments

**I. उत्तरयत**

1. कृन्मेजन्तः इति सूत्रस्य वृत्तिः का? विशदयत।
2. स्वरादीनामव्ययत्वं केन सूत्रेण विधीयते? सूत्रं व्याख्यात।
3. 'अव्ययीभावश्च' इति सूत्रस्य एकं प्रयोजनसूत्रं लिखतु।
4. 'अधिहरि सु' इत्यत्र सोः लोपः केन सूत्रेण? विशदयत।
5. क्त्वाप्रत्ययस्य अव्ययत्वं केन सूत्रेण विधीयते? व्याख्यात।

**II. अधोनिर्दिष्टानाम् अव्ययानामर्थं लिखत-**

1. स्वर् ।
2. जीवसे।
3. अस्तिक्षीरा।
4. सहसा।
5. हिरुक्।

**III. रूपाणि सप्रमाणं निष्पादयत-**

1. उदेतोः।
2. अधिहरि।
3. दिशा।
4. सायम्।
5. स्मारं स्मारम्।

## Suggested Readings

1. पदसंस्कारचन्द्रिका. कैकुलका रामवारियर्, केरलसाहित्य अकादमि, तृश्शूर।
2. लघुपाणिनीयम्. ए आर् राजराजवर्मा, केरलसर्वकलाशाला, तिरुवनन्तपुरम्।
3. पाणिनीयप्रद्योतम्. ऐसि चाक्को, भाषा इन्स्टिट्यूट, तिरुवनन्वपुरम्।
4. प्रक्रियाभाष्यम्. फा जोन् कुन्नपप्लि, नाषणल् बुका् स्टाल्, कोट्टयम्।

## References


1. वरदराजाचार्यः. लघुसिद्धान्तकौमुदी. व्याख्या श्री गोमतीप्रसादशास्त्री मिश्रः, चौखम्बा सुरभारतीप्रकाशन, वारणासि, २०१९, पुटानि ९६-९९।
2. वरदराजाचार्यः. लघुसिद्धान्तकौमुदी, व्याख्या श्रीगिरीशकुमारठक्कुरः, कृष्णदास अकादमी, वारणासी, १९९८, पुटानि ८२-८४


### Space for Learner Engagement for Objective Questions

Learners are encouraged to develop objective questions based on the content in the paragraph as a sign of their comprehension of the content. The Learners may reflect on the recap bullets and relate their understanding with the narrative in order to frame objective questions from the given text. The University expects that 1 - 2 questions are developed for each paragraph. The space given below can be used for listing the questions.

**Model Question Paper (SET – A)**

# SREENARAYANAGURU OPEN UNIVERSITY

**Reg. No....................** **QP CODE..................**

**Name........................**

**FIRST SEMESTER M.A. SANSKRIT LANGUAGE AND LITERATURE EXAMINATIONS**
**DISCIPLINE CORE - 4 - M23SN04DC- व्याकरणम्**
**(CBCS- PG)**
**2023 Admission Onwards**

**Time: 3 Hours** **Max Marks: 70**

**सर्वे प्रश्नाः संस्कृतभाषायां समाधेयाः। संसकृतलेखने देवनागरीलिपि उपयोक्तव्या।**

**(Answer may be written in Sanskrit. In writing Sanskrit, Devanagari script should be used.)**

## SECTION- A
## (प्रथमो भागः)

**I. एकखण्डिकया केषाञ्चित् पञ्चप्रश्नानाम् उत्तराणि लिखत।** **(5 x 2=10)**
**(Answer any five Questions in a Paragraph)**

**सूत्राणि व्याख्यात-**

1. हलन्त्यम्।
2. अनुस्वारस्य ययि परसवर्णः।
3. कर्तरि शप्।
4. अव्ययीभावश्च।
5. अव्ययादाप्सुपः।
6. लट् स्मे।
7. मृजेर्वृद्धिः।
8. सार्वधातुकार्धधातुकयोः।

## SECTION –B
## (द्वितीयो भागः)

**II. एकपुटेन केषाञ्चित् षड्प्रश्नानाम् उत्तराणि लिखत।** **(6 x 5=30)**
**(Answer any six Questions in a page)**

**सप्रमाणं प्रक्रियां साधयत।**

9. रामः - द्वितीया विभक्तिः एकवचनम्।

10. लता - तृतीयाविभक्तिः एकवचनम्।

11. अभवत्।

12. बुभूषयति।

13. पीताम्बरः।

14. पितरौ।

15. सप्तर्षिः।

16. दक्षस्य अपत्यम्।

17. विद्वस् अस्यास्तीति।

18. भवती।

## SECTION – C
## (तृतीयो भागः)

**III. केषाञ्चित् द्वयोः प्रश्नयोः निबन्धात्मकं उत्तरं लिखत।** **(2x15=30)**

**(Write an essay on any two of the following)**

19. अयम्, चतुर्णाम्, ज्ञानानि - एतेषां पदानां सप्रमाणं प्रक्रियां निरूपयत।

20. बुधः, प्रज्ञः, कारकः - एतेषां पदानां सप्रमाणं प्रक्रियां व्याख्यात।

21. गां देग्धि पयः, रामेण बाणेन हतो बालि, दैत्येभ्यः हरिः अलम् - रेखाङ्कितपदानां विभक्त्यर्थविशेषं सप्रमाणं विशदयत।

22. नारी, पङ्गूः, युवतिः - एतेषां स्त्रीप्रत्ययानां प्रक्रियारूपाणि व्याख्यात।

**Model Question Paper (SET – B)**

# SREENARAYANAGURU OPEN UNIVERSITY

**Reg. No..................** **QP CODE.......................**

**Name......................**

**FIRST SEMESTER M.A. SANSKRIT LANGUAGE AND LITERATURE EXAMINATIONS**

**DISCIPLINE CORE – 4 – M23SN04DC- व्याकरणम्**

**(CBCS- PG)**

**2023 Admission Onwards**

**Time: 3 Hours** **Max Marks: 70**

**सर्वे प्रश्नाः संस्कृतभाषायां समाधेयाः। संसकृतलेखने देवनागरीलिपिः उपयोक्तव्या।**

**(Answer may be written in Sanskrit. In writing Sanskrit, Devanagari script should be used.)**

## Section- A
## (प्रथमो भागः)

**I. एकखण्डिकया केषाञ्चित् पञ्चप्रश्नानाम् उत्तराणि लिखत।** **(5 x 2=10)**

**(Answer any five Questions in a word or Sentence)**

**सूत्राणि व्याख्यात-**

1. मोऽनुस्वारः।
2. अत इञ्।
3. ध्रुवमपायेऽपादानम्।
4. तङानावात्मनेपदम्।
5. कर्तरि कृत्।
6. कर्तरि कर्मव्यतिहारे।
7. यस्येति च।
8. अनुपराभ्यां कृञः।

## SECTION –B
## (द्वितीयो भागः)

**II. एकपुटेन केषाञ्चित् षड्प्रश्नानाम् उत्तराणि लिखत।** **(6 x 5=30)**

**(Answer any six Questions)**

**सप्रमाणं प्रक्रियां साधयत-**

9. तद् - प्रथमैकवचनम्।
10. हरि - सप्तम्यैकवचनम्

11. अभूत्।

12. एधते।

13. यथाशक्ति।

14. मणिवः।

15. अपुत्रः।

16. पौत्रः।

17. सतां गतम् - रेखाङ्कितपदस्य विभक्त्यर्थविशेषं लिखत।

18. अव्ययलक्षणं लिखत।

## SECTION – C
## (तृतीयो भागः)

**III. केषाञ्चित् द्वयोः प्रश्नयोः निबन्धात्मकं उत्तरं लिखत।** **(2x15=30)**
**(Write an essay on any two of the following)**

19. ईशकृष्णौ, महाराजः, त्रिलोकी-एतेषां पदानां समासं विग्रहं च सप्रमाणं लिखत।
20. कुमारी, सूर्या, गार्गी-एतेषां स्त्रीप्रत्ययानां प्रक्रियारूपाणि विशदयत।
21. शिष्यः, पराकरोति, पराजयते - एतेषां पदानां सप्रमाणं प्रक्रियां निष्पादयत।
22. हरि + एतौ, महा +औषधिः, इति + उवाच - एतेषां सन्धिं कृत्वा सप्रमाणं व्याख्यात।

**സർവ്വകലാശാലാഗീതം**

---------------------

വിദ്യയാൽ സ്വതന്ത്രരാകണം
വിശ്വപൗരരായി മാറണം
ഗ്രഹപ്രസാദമായ് വിളങ്ങണം
ഗുരുപ്രകാശമേ നയിക്കണേ

കൂരിരുട്ടിൽ നിന്നു ഞങ്ങളെ
സൂര്യവീഥിയിൽ തെളിക്കണം
സ്നേഹദീപ്തിയായ് വിളങ്ങണം
നീതിവൈജയന്തി പാറണം

ശാസ്ത്രവ്യാപ്തിയെന്നുമേകണം
ജാതിഭേദമാകെ മാറണം
ബോധരശ്മിയിൽ തിളങ്ങുവാൻ
ജ്ഞാനകേന്ദ്രമേ ജ്വലിക്കണേ

**കുരീപ്പുഴ ശ്രീകുമാർ**

# SREENARAYANAGURU OPEN UNIVERSITY

## Regional Centres


### Kozhikode
Govt. Arts and Science College
Meenchantha, Kozhikode,
Kerala, Pin: 673002
Ph: 04952920228
email: rckdirector@sgou.ac.in

### Thalassery
Govt. Brennen College
Dharmadam, Thalassery,
Kannur, Pin: 670106
Ph: 04902990494
email: rctdirector@sgou.ac.in

### Tripunithura
Govt. College
Tripunithura, Ernakulam,
Kerala, Pin: 682301
Ph: 04842927436
email: rcedirector@sgou.ac.in

### Pattambi
Sree Neelakanta Govt. Sanskrit College
Pattambi, Palakkad,
Kerala, Pin: 679303
Ph: 04662912009
email: rcpdirector@sgou.ac.in

# व्याकरणम्

M23SN04DC

Sreenarayanaguru Open University
Kollam, Kerala Pin- 691601, email: info@sgou.ac.in, www.sgou.ac.in Ph: +91 474 2966841

ISBN 978-81-966907-5-5